# VarAhamihira’s BRhatsaMhitA

# વરાહમિહિર બૃહત્સંહિતા

## Document Information

Text title : varAhamihirarachitA bRihatsaMhitA

File name : varbrhs.itx

Category : sociology_astrology, varAhamihira, jyotisha

Location : doc_z_misc_sociology_astrology

Author : varAhamihirara

Transliterated by : Michio YAno

Proofread by : Mizue Sugita

Description-comments : edition of A.V.TripAThI (SarasvatI Bhavan GranthamAlA Edition)

Latest update : June 5, 1992, July 7, 1995, November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# વરાહમિહિર બૃહત્સંહિતા

sએપરતે અધ્યાય ૧ ઉપનયનાધ્યાયઃ

૧।૧અબ્/ જયતિ જગતઃ પ્રસૂતિઃ વિશ્વાત્મા સહજભૂષણં નભસઃ ।
૧।૧ય્દ્/ દ્રુતકનકસદૃશદશશતમયૂખમાલાર્ચિતઃ સવિતા ॥ ॥

૧।૨અબ્/ પ્રથમમુનિકથિતમવિતથમવલોક્ય ગ્રન્થવિસ્તરસ્યાર્થમ્ ।
૧।૨ય્દ્/ નાતિલઘુવિપુલરચનાભિરુદ્યતઃ સ્પષ્ટમભિધાતુમ્ ॥ ॥

૧।૩અબ્/ મુનિવિરચિતમિદમિતિ યગિરન્તનં સાધુ ન મનુજગ્રથિતમ્ ।
૧।૩ય્દ્/ તુલ્યેઽર્થેઽક્ષરભેદાદમન્ત્રકે કા વિશેષોક્તિઃ ॥ ॥

૧।૪અબ્/ ક્ષિતિતનયદિવસવારો ન શુભકૃદિતિ યદિ પિતામહપ્રોક્તે ।
૧।૪ય્દ્/ કુજદિનમનિષ્ટમિતિ વા કોઽત્ર વિશેષો નૃદિવ્યકૃતેઃ (કૃતે) ॥ ॥

૧।૫અબ્/ આબ્રહ્માદિવિનિઃસૃતમાલોક્ય ગ્રન્થવિસ્તરં ક્રમશઃ ।
૧।૫ય્દ્/ ક્રિયમાણકમેવ એતત્ સમાસતોઽતો મમૌત્સાહઃ ॥ ॥

૧।૬અબ્/ આસીત્તમઃ કિલેદં તત્રાપાં તૈજસેઽભવદ્ ધૈમે ।
૧।૬ય્દ્/ સ્વર્ભૂશકલે બ્રહ્મા વિશ્વકૃદણ્ડેઽર્કશશિનયનઃ ॥ ॥

૧।૭અબ્/ કપિલઃ પ્રધાનમાહ દ્રવ્યાદીન્ કણકભુગ્ અસ્ય વિશ્વસ્ય ।
૧।૭ય્દ્/ કાલં કારણમેકે સ્વભાવમપરે જગુઃ કર્મ ॥ ॥

૧।૮અબ્/ તદલમતિવિસ્તરેણ પ્રસંગવાદાર્થનિર્ણયોઽતિમહાન્ ।
૧।૮ય્દ્/ જ્યોતિઃશાસ્ત્રાંગાનાં વક્તવ્યો નિર્ણયોઽત્ર મયા ॥ ॥

૧।૯અ જ્યોતિઃશાસ્ત્રમનેકભેદવિષયં સ્કન્ધત્રયાધિષ્ઠિતં
૧।૯બ્ તત્કાત્સ્ન્યોંપનયસ્ય નામ મુનિભિઃ સંકીર્ત્યતે સંહિતા ।
૧।૯ય્ સ્કન્ધેઽસ્મિન્ ગણિતેન યા ગ્રહગતિઃ તન્ત્રાભિધાનઃ ત્વસૌ
૧।૯દ્ હોરા અન્યો અંગવિનિશ્ચયશ્ચ કથિતઃ સ્કન્ધઃ તૃતીયોઽપરઃ ॥ ॥

૧।૧૦અબ્/ વક્રાનુવક્રાસ્તમયૌદયાદ્યાઃ તારાગ્રહાણાં કરણે મયોક્તાઃ ।

૧।૧૦ય્દ્/ હોરાગતં વિસ્તરશશ્ચ જન્મયાત્રાવિવાહૈઃ સહ પૂર્વમુક્તમ્ ॥ ॥

૧।૧૧અબ્/ પ્રશ્નપ્રતિપ્રશ્નકથાપ્રસંગાન્ સ્વલ્પૌપયોગાન્ ગ્રહસંભવાંશ્ચ ।
૧।૧૧ય્દ્/ સન્ત્યજ્ય ફલ્ગૂનિ ચ સારભૂતં ભૂતાર્થમર્થૈઃ સકલૈઃ પ્રવક્ષ્યે ॥ ॥

sએપરતે અધ્યાય ૨ અથાતઃ સાંવત્સરસૂત્રં વ્યાખ્યાસ્યામઃ ।
૨।(૧) તત્ર સાંવત્સરોऽભિજાતઃ પ્રિયદર્શનો વિનીતવેષઃ સત્યવાગ્ -
અનસૂયકઃ સમઃ સુસંહિતા ઉપચિતગાત્રસન્ધિઃ -
અવિકલશ્ચારુકરચરણનખનયનચિબુકદશનશ્રવણલલાટભ્રૂ -
ઉત્તમાંગો વપુષ્માન્ ગંભીરૌદાત્તઘોષઃ ।
પ્રાયઃ શરીર આકારાનુવર્ત્તિનો (વર્તિનો) હિ ગુણા દોષાશ્ચ ભવન્તિ ।
૨।(૨) તત્ર ગુણાઃ-શુચિઃ દક્ષઃ પ્રગલ્ભો વાગ્મી (વાગ્મી) પ્રતિભાનવાન્ -
દેશકાલવિત્ સાત્ત્વિકો ન પર્ષદ્ભીરુઃ સહાધ્યાયિભિઃ અનભિભવનીયઃ -
કુશલોऽવ્યસની શાન્તિકપૌષ્ટિકાભિચારસ્નાનવિદ્યાભિજ્ઞો -
વિબુધાર્ચનવ્રતૌઅપવાસનિરતઃ સ્વતન્ત્રાશ્ચર્યા ઉત્પાદિતપ્રભાવઃ -
પૃષ્ટાભિધાય્યન્યત્ર દૈવાત્યયાદ્ ગ્રહગણિતસંહિતાહોરા-
ગ્રન્થાર્થવેત્તા ઇતિ ।
૨।(3) તત્ર ગ્રહગણિતે પૌલિશરોમકવાસિષ્ઠસૌરપૈતામહેષુ -
પંચસ્વેતેષુ સિદ્ધાન્તેષુ -
યુગવર્ષાયનઋતુમાસપક્ષાહોરાત્રયામમુહૂર્તનાડીવિણાડીપ્રાણ-
ત્રુટિત્રુટ્યાદ્યવયવ આદિકસ્ય (આદ્યસ્ય) કાલસ્ય ક્ષેત્રસ્ય ચ વેત્તા ।
૨।(૪) ચતુર્ણાં ચ માનાનાં સૌરસાવનનાક્ષત્રચાન્દ્રાણામધિમા-
સકાવમસંભવસ્ય ચ કારણાભિજ્ઞઃ ।
૨।(૫) ષષ્ટ્યબ્દયુગવર્ષમાસ-
દિનહોરા અધિપતીનાં પ્રતિપત્તિ (વિ)ચ્છેદવિત્ ।
૨।(૬) સૌરાદીનાં ચ માનાનામસદૃશસદૃશ (સદૃશાસદૃશ) -
યોગ્યાયોગ્યત્વપ્રતિપાદનપટુઃ ।
૨।(૭) સિદ્ધાન્તભેદેऽપિ અયનનિવૃત્તૌ પ્રત્યક્ષં -
સમમણ્ડલલેખાસમ્પ્રયોગાભ્યુદિતાંશકાનાં (ચ) -
છાયાજલયન્ત્રદૃગ્ગણિતસામ્યેન પ્રતિપાદનકુશલઃ ।
૨।(૮) સૂર્યાદીનાં ચ ગ્રહાણામ્ -
શીઘ્રમન્દયામ્યૌત્તરનીચૌચ્ચગતિકારણાભિજ્ઞઃ ।
૨।(૯) સૂર્યચન્દ્રમસોશ્ચ ગ્રહણે ગ્રહણ -

આદિમોક્ષકાલદિક્પ્રમાણસ્થિતિવિમર્દવર્ણાદિશાનાં (વર્ણદેશાનાં) -
અનાગતગ્રહસમાગમયુદ્ધાનામાદેષ્ટા ।
૨।(૧૦) પ્રત્યેકગ્રહભ્રમણયોજનકક્ષ્યાપ્રમાણપ્રતિવિષયયોજન-
પરિચ્છેદકુશલઃ (કુશલો) ।
૨।(૧૧) ભૂભગણભ્રમણસંસ્થાનાદ્યક્ષાવલંબકાહવ્ર્યાસચરદલકાલરા-
શ્યુદયચ્છાયાનાડીકરણપ્રભૃતિષુ ક્ષેત્રકાલકરણેષ્વભિજ્ઞઃ ।
૨।(૧૨) નાનાચોદ્યપ્રશ્નભેદોપલબ્ધિજનિતવાક્સારો-
નિકષસન્તાપાભિનિવેશૈઃ (વિશુદ્ધસ્ય) કનકસ્યૈવાધિકતરમમલીકૃતસ્ય -
(શાસ્ત્રસ્ય) વક્તા તન્ત્રજ્ઞો ભવતિ (ઉક્તજ્ ચ) ।
૨।૧અબ્/ ન પ્રતિબદ્ધં ગમયતિ વક્તિ ન ચ પ્રશ્નમેકમપિ પૃષ્ટઃ ।
૨।૧ચ્દ્/ નિગદતિ ન ચ શિષ્યેભ્યઃ સ કથં શાસ્ત્રાર્થવિજ્ઞેયઃ ॥ ॥

૨।૨અબ્/ ગ્રન્થોઽન્યથા અન્યથાર્થં (અન્યથાર્થઃ) કરણં યશ્ચાન્યથા કરોત્યબુધઃ ।
૨।૨ચ્દ્/ સ પિતામહમુપગમ્ય સ્તૌતિ નરો વૈશિકેનાર્યામ્ ॥ ॥

૨।૩અબ્/ તન્ત્રે સુપરિજ્ઞાતે લગ્ને છાયા અંબુયન્ત્રસંવિદિતે ।
૨।૩ચ્દ્/ હોરાર્થે ચ સુરૂઢે નાદેષ્ટુઃ ભારતી વન્ધ્યા ॥ ॥

ઉક્તન્ ચાર્યવિષ્ણુગુપ્તેન
૨।૪અ અપિ અર્ણવસ્ય પુરુષઃ પ્રતરન્ કદાચિદ્
૨।૪બ્ આસાદયેદનિલવેગવશેન પારમ્ ।
૨।૪ચ્ ન ત્વસ્ય કાલપુરુષ આખ્યમહાર્ણવસ્ય
૨।૪દ્ ગચ્છેત્ કદાચિદનૃષિઃ મનસાપિ પારમ્ ॥ ॥

૨।(૧૩) હોરાશાસ્ત્રેઽપિ (ચ) રાશિહોરાદ્રેષ્કાણનવાંશકદ્વાદશભા-
ગત્રિંશદ્ભાગબલાબલપરિગ્રહો ગ્રહાણાં દિક્સ્થાનકાલચેષ્ટાભિઃ -
અનેકપ્રકારબલનિર્ધારણં પ્રકૃતિધાતુદ્રવ્યજાતિચેષ્ટાદિપરિગ્રહો -
નિષેકજન્મકાલવિસ્માપનપ્રત્યય આદેશસદ્યોમરણ આયુર્દાયદશા અન્તર્દશા -
અષ્ટકવર્ગરાજયોગચન્દ્રયોગદ્વિગ્રહાદિયોગાનાં નાભસાદીનામ્ ચ -
યોગાનામ્ ફલાનિ આશ્રયભાવાવલોકનનિર્યાણગત્યનૂકાનિ -
તત્કાલ (કાલિક)પ્રશ્નશુભાશુભનિમિત્તાનિ વિવાહાદીનામ્ ચ કર્મનાં કરણમ્ ।
૨।(૧૪) યાત્રાયાં તુ (ચ) તિથિદિવસકરણનક્ષત્રમુહૂર્તવિલગ્નયોગ-
દેહસ્પન્દનસ્વપ્નવિજયસ્નાનગ્રહયજ્ઞગણયાગાગ્નિ-
લિંગહસ્ત્યશ્વેંગિતસેના-

પ્રવાદચેષ્ટાદિગ્રહષાડ્ગુણ્યૌપાયમંગલામંગ-
લશકુનસૈન્યનિવેશભૂ-
મયોઽગ્નિવર્ણા મન્ત્રિચરદૂતાટવિકાનાં યથાકાલં પ્રયોગાઃ પરદુર્ગ (ઉપ) -
લંભોપાયશ્ચેત્યુક્તં ચ આચાર્યૈઃ ।
૨।૫અબ્/ જગતિ પ્રસારિતમિવ આલિખિતમિવ મતૌ નિષિક્તમિવ હૃદયે ।
૨।૫ચ્દ્/ શાસ્ત્રં યસ્ય સભગણં નાદેશા નિષ્ફલાઃ (નિઃફલાઃ) તસ્ય ॥ ॥

૨।(૧૫) સંહિતાપારગશ્ચ દૈવચિન્તકો ભવતિ ।
૨।(૧૬) યત્ર એતે સંહિતાપદાર્થાઃ ।
૨।(૧૭।૧) દિનકરાદીનામ્ ગ્રહાણાં ચારાઃ તેષુ ચ તેષાં -
પ્રકૃતિવિકૃતિપ્રમાણવર્ણકિરણદ્યુતિસંસ્થાનાસ્તમન-
ઉદયમાર્ગમાર્ગાન્તરવક્રા-
નુવક્રર્ક્ષગ્રહસમાગમચારાદિભિઃ ફલાનિ નક્ષત્રકૂર્મવિભાગેન -
દેશેષ્વગસ્ત્યચારઃ (અગસ્તિચારઃ)। સપ્તર્ષિચારઃ ।ગ્રહભક્તયો -
નક્ષત્રવ્યૂહગ્રહશ્ૃંગાટકગ્રહયુદ્ધગ્રહસમાગમ-
ગ્રહવર્ષફલગર્ભલક્ષણરોહિણીસ્વાત્યાષાઢીયોગાઃ -
સદ્યોવર્ષકુસુમલતાપરિધિપરિવેષપરિઘપવનૌલ્કાદિગ્દાહ-
ક્ષિતિચલનસન્ધ્યારાગગન્ધર્વનગરરજોનિર્ઘાતાર્ઘકાણ્ડસસ્ય-
જન્મેન્દ્રધ્વજેન્દ્ર-
ચાપવાસ્તુવિદ્યા અંગવિદ્યાવાયસવિદ્યા અન્તરચક્રમૃગચક્રાશ્વ-
ચક્રવાતચક્રપ્રાસા-
દલક્ષણપ્રતિમાલક્ષણપ્રતિષ્ઠાપનવૃક્ષાયુર્વેદૌદગાર્ગલનીરા-
જનખઞ્જન્ (અક્) ઔત્પાતશાન્તિમયૂરચિત્રકઘૃત-
કંબલખડ્ગપટ્ટકૃકવાકુકૂર્મગોઽજાશ્વૈભપુરૂષ -
(પુરુષ) સ્ત્રીલક્ષણાનિ -
૨।(૧૭।૨) અન્તઃપુરચિન્તાપિટકલક્ષણૌપાનચ્છેદવસ્ત્રચ્છેદચામરદણ્ડ-
શયના (શય્યા) આસનલક્ષણરત્નપરીક્ષા દીપલક્ષણં -
દન્તકાષ્ઠાદ્યાશ્રિતાનિ (શુદ્ધાશુદ્ધાનિ) (શુભાશુભાનિ) -
નિમિત્તાનિ સામાન્યાનિ ચ જગતઃ પ્રતિપુરુષં -
પાર્થિવે ચ પ્રતિક્ષણમનન્યકર્માભિયુક્તેન દૈવજ્ઞેન ચિન્તયિતવ્યાનિ ।
ન ચૈકાકિના શક્યન્તેઽહર્નિશમવધારયિતું નિમિત્તાનિ ।
તસ્માત્ સુભૃતેનૈવ દૈવજ્ઞેનાન્યેઽપિ તદ્વિદશ્ચત્વારઃ કર્તવ્યાઃ (ભર્તવ્યાઃ) ।

તત્રએકેનેન્દ્રી ચ આગ્નેયી ચ દિગ્ અવલોકયિતવ્યા ।
યામ્યા નૈરૃતી ચાન્યેનૈવં વારુણી વાયવ્યા ચૌત્તરા ચ એશાનિ ચેતિ ।
યસ્માદુલ્કાપાતાદીનિ (નિમિત્તાનિ) શીઘ્રમપ (ઉપ) (અભિ) ગચ્છન્તીતિ ।
તસ્યાઃ (તેષાં) ચ આકારવર્ણસ્નેહપ્રમાન આદિગ્રહઋક્ષૌપઘાતાદિભિઃ ફલાનિ ભવન્તિ ।

ઉક્તં ચ ગર્ગેણ મહર્ષિણા

૨।૬અબ્/ કૃત્સ્નાંગોપાંગકુશલં હોરાગણિતનૈષ્ઠિકમ્ ।
૨।૬ચ્દ્/ યો ન પૂજયતે રાજા સ નાશમુપાગચ્છતિ ॥ ॥

૨।૭અબ્/ વનં સમાશ્રિતા યેઽપિ નિર્મમા નિષ્પરિગ્રહાઃ ।
૨।૭ચ્દ્/ અપિ તે પરિપૃચ્છન્તિ જ્યોતિષાં ગતિકોવિદમ્ ॥ ॥

૨।૮અબ્/ અપ્રદીપા યથા રાત્રિઃ અનાદિત્યં યથા નભઃ ।
૨।૮ચ્દ્/ તથા અસાંવત્સરો રાજા ભ્રમ્યત્યન્ધ ઇવાધ્વનિ ॥ ॥

૨।૯અબ્/ મુહૂર્ત (મુહૂર્તં) તિથિનક્ષત્રમ્ ઋતવશ્ચાયને તથા ।
૨।૯ચ્દ્/ સર્વાણિ એવાકુલાનિ સ્યુઃ ન સ્યાત્ સાંવત્સરો યદિ ॥ ॥

૨।૧૦અબ્/ તસ્માદ્ રાજ્ઞાધિગન્તવ્યો વિદ્વાન્ સાંવત્સરોઽગ્રણીઃ ।
૨।૧૦ચ્દ્/ જયં યશઃ શ્રિયં ભોગાન્ શ્રેયશ્ચ સમભીપ્સતા ॥ ॥

૨।૧૧અબ્/ નાસાંવત્સરિકે દેશે વસ્તવ્યં ભૂતિમિચ્છતા ।
૨।૧૧ચ્દ્/ ચક્ષુર્ભૂતો હિ યત્રૈષ પાપં તત્ર ન વિદ્યતે ॥ ॥

૨।૧૨અબ્/ ન સાંવત્સરપાઠી ચ નરકેષુ ઉપપદ્યતે ।
૨।૧૨ચ્દ્/ બ્રહ્મલોકપ્રતિષ્ઠાં ચ લભતે દૈવચિન્તકઃ ॥ ॥

૨।૧૩અબ્/ ગ્રન્થતશ્ચાર્થતશ્ચૈતત્ કૃત્સ્નં જાનતિ યો દ્વિજઃ ।
૨।૧૩ચ્દ્/ અગ્રભુક્ સ ભવેત્શ્રાદ્ધે પૂજિતઃ પંક્તિપાવનઃ ।
૨।૧૪અબ્/ મ્લેચ્છા હિ યવનાઃ તેષુ સમ્યક્ શાસ્ત્રમિદં સ્થિતમ્ ।
૨।૧૪ચ્દ્/ ઋષિવત્ તેઽપિ પૂજ્યન્તે કિં પુનઃ દૈવવિદ્ દ્વિજઃ ॥ ॥

૨।૧૫અબ્/ કુહકાવેશપિહિત (ઇઃ) કર્ણોપશ્રુતિહેતુભિઃ ।
૨।૧૫ચ્દ્/ કૃતાદેશો ન સર્વત્ર પ્રષ્ટવ્યો ન સ દૈવવિત્ ॥ ॥

૨।૧૬અબ્/ અવિદિત્વૈવ યત્ (યઃ) શાસ્ત્રં દૈવજ્ઞત્વં પ્રપદ્યતે ।
૨।૧૬ચ્દ્/ સ પંક્તિદૂષકઃ પાપો જ્ઞેયો નક્ષત્રસૂચકઃ ॥ ॥

નક્ષત્રસૂચકોદ્દિષ્ટમુપહાસં કરોતિ યઃ ।
સ વ્રજત્યન્ધતામિસ્રં સાર્ધમ્ ઋક્ષવિડંબિના ॥

૨।૧૭અબ્/ નગરદ્વારલોષ્ટસ્ય યદ્વત્ સ્યાદુપયાચિતમ્ ।
૨।૧૭ચ્દ્/ આદેશઃ તદ્વદજ્ઞાનાં યઃ સત્યઃ સ વિભાવ્યતે ॥ ॥

૨।૧૮અબ્/ સમ્પત્ત્યા યોજિતાદેશઃ તદ્વિચ્છિન્નકથાપ્રિયઃ ।
૨।૧૮ચ્દ્/ મત્તઃ શાસ્ત્રએકદેશેન ત્યાજ્યઃ તાદૃગ્મહીક્ષિતા ॥ ॥

૨।૧૯અબ્/ યઃ તુ સમ્યગ્વિજાનાતિ હોરાગણિતસંહિતાઃ ।
૨।૧૯ચ્દ્/ અભ્યર્ચ્યઃ સ નરેન્દ્રેણ સ્વીકર્તવ્યો જયૈષણા ॥ ॥

૨।૨૦અબ્/ ન તત્ સહસ્રં કરિણાં વાજિનાં ચ ચતુર્ગુણમ્ ।
૨।૨૦ચ્દ્/ કરોતિ દેશકાલજ્ઞો યથા એકો (યદેકો) દૈવચિન્તકઃ ॥ ॥

૨।૨૧અબ્/ દુઃસ્વપ્નદુર્વિચિન્તિતદુષ્પ્રેક્ષિતદુષ્કૃતાનિ કર્માણિ ।
૨।૨૧ચ્દ્/ ક્ષિપ્રં પ્રયાન્તિ નાશમ્ શશિનઃ શ્રુત્વા ભસંવાદમ્ ॥ ॥

૨।૨૨અબ્/ ન તથા ઇચ્છતિ ભૂપતેઃ પિતા જનની વા સ્વજનોઽથવા સુહૃત્ ।
૨।૨૨ચ્દ્/ સ્વયશોઽભિવિવૃદ્ધયે યથા હિતમાપ્તઃ સબલસ્ય દૈવવિત્ ॥ ॥

ઽએપરતે અધ્યાય ૩ આદિત્યચારાધ્યાયઃ
૩।૧અબ્/ આશ્લેષાર્ધાદ્ દક્ષિણમુત્તરમયનં રવેર્ધનિષ્ઠા અદ્યમ્ ।
૩।૧ચ્દ્/ નૂનં કદાચિદાસીદ્ યેનોક્તમ્ પૂર્વશાસ્ત્રેષુ ॥ ॥

૩।૨અબ્/ સાંપ્રતમયનં સવિતુઃ કર્કટકાદ્યમ્ મૃગાદિતશ્ચાન્યત્ ।
૩।૨ચ્દ્/ ઉક્તાભાવો વિકૃતિઃ પ્રત્યક્ષપરીક્સણૈઃ વ્યક્તિઃ ॥ ॥

૩।૩અબ્/ દૂરસ્થચિહ્નવેધાદુદયેઽસ્તમયેઽપિ વા સહસ્રાંશોઃ ।
૩।૩ચ્દ્/ છાયાપ્રવેશનિર્ગમચિહ્નૈઃ વા મણ્ડલે મહતિ ॥ ॥

૩।૪અબ્/ અપ્રાપ્ય મકરમર્કો વિનિવૃત્તો હન્તિ સાપરામ્ યામ્યામ્ ।
૩।૪ચ્દ્/ કર્કટકમસમ્પ્રાપ્તો વિનિવૃત્તશ્ચોત્તરાં સ।એન્દ્રીમ્ ॥ ॥

૩।૫અબ્/ ઉત્તરમયનમતીત્ય વ્યાવૃત્તઃ ક્ષેમસસ્યવૃદ્ધિકરઃ ।
૩।૫ચ્દ્/ પ્રકૃતિસ્થશ્ચાપ્યેવં વિકૃતગતિઃ ભયકૃદુષ્ણાંશુઃ ॥ ॥

૩।૬અબ્/ સતમસ્કં પર્વ વિના ત્વષ્ટા નામાર્કમણ્ડલં કુરુતે ।
૩।૬ચ્દ્/ સ નિહન્તિ સપ્ત ભૂપાન્ જનાંશ્ચ શસ્ત્રાગ્નિદુર્ભિક્ષૈઃ ॥ ॥

૩।૭અબ્/ તામસકીલકસંજ્ઞા રાહુસુતાઃ કેતવઃ ત્રયઃ ત્રિંશત્ ।
૩।૭ચ્દ્/ વર્ણસ્થાન આકારૈઃ તાન્ દૃષ્ટ્વાઽર્કે ફલં બ્રૂયાત્ ॥ ॥

૩।૮અબ્/ તે ચાર્કમણ્ડલગતાઃ પાપફલાશ્ચન્દ્રમણ્ડલે સૌમ્યાઃ ।
૩।૮ય્દ્/ ધ્વાંક્ષકબન્ધપ્રહરણરૂપાઃ પાપાઃ શશાંકેઽપિ ॥ ॥

૩।૯અબ્/ તેષામુદયે રૂપાણિ અંભઃ કલુષં રજોવૃતં વ્યોમ ।
૩।૯ય્દ્/ નગતરુશિખરામર્દી (શિખરવિમર્દી) સશર્કરો મારુતશ્ચણ્ડઃ ॥ ॥

૩।૧૦અબ્/ ઋતુવિપરીતાઃ તરવો દીપ્તા મૃગપક્ષિણો દિશાં દાહાઃ ।
૩।૧૦ય્દ્/ નિર્ઘાતમહીકંપાદયો ભવન્ત્યત્ર ચોત્પાતાઃ ॥ ॥

૩।૧૧અબ્/ ન પૃથક્ ફલાનિ તેષાં શિખિકીલકરાહુદર્શનાનિ યદિ ।
૩।૧૧ય્દ્/ તદુદયકારણમેષાં કેતુઆદીનામ્ ફલં બ્રૂયાત્ ॥ ॥

૩।૧૨અબ્/ યસ્મિન્ યસ્મિન્ દેશે દર્શનમાયાન્તિ સૂર્યબિંબસ્થા ।
૩।૧૨ય્દ્/ તસ્મિં તસ્મિન્ વ્યસનમ્ મહીપતીનામ્ પરિજ્ઞેયમ્ ॥ ॥

૩।૧૩અબ્/ ક્ષુત્પ્રમ્લાનશરીરા મુનયોઽપિ ઉત્સૃષ્ટધર્મસચ્ચરિતાઃ ।
૩।૧૩ય્દ્/ નિર્માંસબાલહસ્તાઃ કૃચ્છ્રેણાઽઽયાન્તિ પરદેશં (પરદેશાન્) ॥ ॥

૩।૧૪અબ્/ તસ્કરવિલુપ્તવિત્તાઃ પ્રદીર્ઘનિઃશ્વાસમુકુલિતાક્ષિપુટાઃ ।
૩।૧૪ય્દ્/ સન્તઃ સન્નશરીરાઃ શોકોદ્ભવવાષ્પ (બાષ્પ) રુદ્ધદૃશઃ ॥ ॥

૩।૧૫અબ્/ ક્ષામા જુગુપ્સમાનાઃ સ્વનૃપતિપરચક્રપીડિતા મનુજાઃ ।
૩।૧૫ય્દ્/ સ્વનૃપતિચરિતં કર્મ ન (ચ) પુરા કૃતં (પરાકૃતં, પુરાકૃતં) પ્રબ્રુવન્ત્યન્યે ॥ ॥

૩।૧૬અબ્/ ગર્ભેષ્વપિ નિષ્પન્ના વારિમુચો ન પ્રભૂતવારિમુચઃ ।
૩।૧૬ય્દ્/ સરિતો યાન્તિ તનુત્વં ક્વચિત્ ક્વચિજ્જાયતે સસ્યમ્ ॥ ॥

૩।૧૭અબ્/ દણ્ડે નરેન્દ્રમૃત્યુઃ વ્યાધિભયં સ્યાત્ કબન્ધસંસ્થાને (કવન્ધસંસ્થાને) ।
૩।૧૭ય્દ્/ ધ્વાંક્ષે ચ તસ્કરભયં દુર્ભિક્ષં કીલકેઽર્કસ્થે ॥ ॥

૩।૧૮અબ્/ રાજોપકરણરૂપૈશ્છત્રધ્વજચામરાદિભિઃ વિદ્ધઃ ।
૩।૧૮ય્દ્/ રાજાન્યત્વકૃદર્કઃ સ્ફુલિંગધૂમાદિભિઃ જનહા ॥ ॥

૩।૧૯અબ્/ એકો દુર્ભિક્ષકરો દ્વ્યાદ્યાઃ સ્યુઃ નરપતેઃ વિનાશાય ।
૩।૧૯ય્દ્/ સિતરક્તપીતકૃષ્ણૈઃ તૈઃ વિદ્ધોઽર્કોઽનુવર્ણઘ્નઃ ॥ ॥

૩।૨૦અબ્/ દ્રશ્યન્તે (દૃશ્યન્તે) ચ યતઃ તે રવિબિંબસ્યોત્સ્થિતા મોહોત્પાતાઃ ।
૩।૨૦ય્દ્/ આગચ્છતિ લોકાનાં તેનૈવ ભયં પ્રદેશેન ॥ ॥

૩।૨૧અબ્/ ઊર્ધ્વકરો દિવસકરઃ તામ્રઃ સેનાપતિં વિનાશયતિ ।
૩।૨૧ય્દ્/ પીતો નરેન્દ્રપુત્રં શ્વેતઃ તુ પુરોહિતં હન્તિ ॥ ॥

૩।૨૨અબ્/ ચિત્રોઽથવાપિ ધૂમ્રો રવિરશ્મિર્વ્યાકુલાં (વ્યાકુલાં) કરોત્યૂર્ધ્વં (મહીં) ।
૩।૨૨ય્દ્/ તસ્કરશસ્ત્રનિપાતૈઃ યદિ સલિલં નાશુ પાતયતિ ॥ ॥

૩।૨૩અબ્/ તામ્રઃ કપિલો વાર્કઃ શિશિરે હરિકુંકુમચ્છવિશ્ચ મધૌ ।
૩।૨૩ય્દ્/ આપાણ્ડુકનકવર્ણો ગ્રીષ્મે વર્ષાસુ શુક્લશ્ચ ॥ ॥

૩।૨૪અબ્/ શરદિ કમલોદરાભો હેમન્તે રુધિરસન્નિભઃ શસ્તઃ ।
૩।૨૪ય્દ્/ પ્રાવૃટ્કાલે સ્નિગ્ધઃ સર્વઋતુનિભોઽપિ શુભદાયી ॥ ॥

૩।૨૫અબ્/ રૂક્ષઃ શ્વેતો વિપ્રાન્ રક્તાભઃ ક્ષત્રિયાન્ વિનાશયતિ ।
૩।૨૫ય્દ્/ પીતો વૈશ્યાન્ કૃષ્ણઃ તતો અપરાન્ શુભકરઃ સ્નિગ્ધઃ ॥ ॥

૩।૨૬અબ્/ ગ્રીષ્મે રક્તો ભયકૃદ્ વર્ષાસ્વસિતઃ કરોત્યનાવૃષ્ટિમ્ ।
૩।૨૬ય્દ્/ હેમન્તે પીતોઽર્કઃ કરોતિ ન ચિરેણ (અચિરેણ) રોગભયમ્ ॥ ॥

૩।૨૭અબ્/ સુરચાપપાટિતતનુઃ નૃપતિવિરોધપ્રદઃ સહસ્રાંશુઃ ।
૩।૨૭ય્દ્/ પ્રાવૃટ્કાલે સદ્યઃ કરોતિ વિમલદ્યુતિઃ વૃષ્ટિમ્ ॥ ॥

૩।૨૮અબ્/ વર્ષાકાલે વૃષ્ટિં કરોતિ સદ્યઃ શિરીષપુષ્પાભઃ ।
૩।૨૮ય્દ્/ શિખિપત્રનિભઃ સલિલં ન કરોતિ દ્વાદશાબ્દાનિ ॥ ॥

૩।૨૯અબ્/ શ્યામેઽર્કે કીટભયં ભસ્મનિભે ભયમુશન્તિ પરચક્રાત્ ।
૩।૨૯ય્દ્/ યસ્ય ઋક્ષે સચ્છિદ્રઃ તસ્ય વિનાશઃ ક્ષિતીશસ્ય ॥ ॥

૩।૩૦અબ્/ શશરુધિરનિભે ભાનૌ નભસ્તલસ્થે ભવન્તિ સંગ્રામાઃ ।
૩।૩૦ય્દ્/ શશિસદૃશે નૃપતિબધઃ (નૃપતિવદ્ધઃ) ક્ષિપ્રં ચાન્યો નૃપો ભવતિ ॥ ॥

૩।૩૧અબ્/ ક્ષુત્મારકૃત્ ઘટનિભઃ ખણ્ડો જનહા (નૃપહા) વિદીધિતિઃ ભયદઃ ।
૩।૩૧ય્દ્/ તોરણરૂપઃ પુરહા છત્રનિભો દેશનાશાય ॥ ॥

૩।૩૨અબ્/ ધ્વજચાપનિભે યુદ્ધાનિ ભાસ્કરે વેપને ચ રૂક્ષે ચ ।
૩।૩૨ય્દ્/ કૃષ્ણા રેખા સવિતરિ યદિ હન્તિ તતો નૃપં (નૃપં તતઃ) સચિવઃ ॥ ॥

૩।૩૩અબ્/ દિનકરં (દિવસકરં) ઉદયાસ્તસંસ્થિતમુદયસંસ્થિતં) ઉલ્કાશનિવિદ્યુતો યદા હન્યુઃ ।
૩।૩૩ય્દ્/ નરપતિમરણં વિન્દ્યાત્ તદા અન્યરાજપ્રતિષ્ઠા (પ્રતિષ્ઠાં) ચ ॥ ॥

૩।૩૪અબ્/ પ્રતિદિવસમહિમકિરણઃ પરિવેષી સન્ધ્યયોઃ દ્વયોઃ અથવા ।
૩।૩૪ય્દ્/ રક્તોઽસ્તમેતિ રક્તોદિતશ્ચ ભૂપં કરોત્યન્યમ્ ॥ ॥

૩।૩૫અબ્/ પ્રહરણસદૃશૈઃ જલદૈઃ સ્થગિતઃ સન્ધ્યાદ્વયેઽપિ રણકારી ।

૩।૩૫ચ્દ્/ મૃગમહિષવિહગખરકરભસદૃશરૂપૈશ્ચ ભયદાયી ॥ ॥

૩।૩૬અબ્/ દિનકરકરાભિતાપાદ્ ઋક્ષમવાપ્નોતિ સુમહતીમ્ પીડામ્ ।
૩।૩૬ચ્દ્/ ભવતિ તુ પશ્ચાત્શુદ્ધં કનકમિવ હુતાશપરિતાપાત્ ॥ ॥

૩।૩૭અબ્/ દિવસકૃતઃ પ્રતિસૂર્યો જલકૃદુદગ્ દક્ષિણે સ્થિતોઽનિલકૃત્ ।
૩।૩૭ચ્દ્/ ઉભયસ્થઃ સલિલભયં નૃપમુપરિ નિહન્ત્યધો જનહા ॥ ॥

૩।૩૮અ રુધિરનિભો વિયત્યવનિપાન્તરકરો ન ચિરાત્ ।
૩।૩૮બ્ પરુષરજોઽરુણીકૃતતનુઃ યદિ વા દિનકૃત્ ॥ ॥

૩।૩૮ચ્ અસિતવિચિત્રનીલપરુષો જનઘાતકરઃ ।
૩।૩૮દ્ ખગમૃગભૈરવસ્વરરુતૈશ્ચ નિશાદ્યુમુખે ॥ ॥

૩।૩૯અબ્/ અમલવપુઃ અવક્રમણ્ડલઃ સ્ફુતવિપુલામલદીર્ઘદીધિતિઃ ।
૩।૩૯ચ્દ્/ અવિકૃતતનુવર્ણચિહ્નભૃજ્જગતિ કરોતિ શિવં દિવાકરઃ ॥ ॥

ઽએપરતે અધ્યાય ૪ ચન્દ્રચારાધ્યાયઃ ।
૪।૧અબ્/ નિત્યમધઃસ્થસ્યેન્દોઃ ભાભિઃ ભાનોઃ સિતં ભવત્યર્ધમ્ ।
૪।૧ચ્દ્/ સ્વચ્છાયયા અન્યદસિતં કુંભસ્યૈવ આતપસ્થસ્ય ॥ ॥

૪।૨અબ્/ સલિલમયે શશિનિ રવેઃ દીધિતયો મૂર્છિતાઃ તમો નૈશમ્ ।
૪।૨ચ્દ્/ ક્ષપયન્તિ દર્પણૌદરનિહિતા (નિહતા) ઇવ મન્દિરસ્યાન્તઃ ॥ ॥

૪।૩અબ્/ ત્યજતોઽર્કતલં શશિનઃ પશ્ચાદવલંબતે યથા શૌક્લ્યમ્ ।
૪।૩ચ્દ્/ દિનકરવશાત્ તથા ઇન્દોઃ પ્રકાશતેઽધઃ પ્રભૃત્યુદયઃ ॥ ॥

૪।૪અબ્/ પ્રતિદિવસમેવમર્કાત્ સ્થાનવિશેષેણ શૌક્લ્યપરિવૃદ્ધિઃ ।
૪।૪ચ્દ્/ ભવતિ શશિનોઽપરાહ્ને પશ્ચાદ્ ભાગે ઘટસ્યૈવ
૪।૫અબ્/ એન્દ્રસ્ય શીતકિરણો મૂલાષાઢાદ્વયસ્ય ચાયાતઃ (વા યાતઃ) ।
૪।૫ચ્દ્/ યામ્યેન વીજજલચરકાનનહા વહ્નિભયદશ્ચ ॥ ॥

૪।૬અબ્/ દક્ષિણપાર્શ્વેન ગતઃ શશી વિશાખા અનુરાધયોઃ પાપઃ ।
૪।૬ચ્દ્/ મધ્યેન તુ પ્રશસ્તઃ પિતૃદેવ (પિત્ર્યસ્ય) વિશાખયોશ્ચાપિ
૪।૭અબ્/ ષડ્ અનાગતાનિ પૌષ્ણાદ્ દ્વાદશ રૌદ્રાગ મધ્યયોગીનિ ।
૪।૭ચ્દ્/ જ્યેષ્ઠાદ્યાનિ નવર્ક્ષાણિ ઉડુપતિના અતીત્ય યુજ્યન્તે ॥ ॥

૪।૮અબ્/ ઉન્નતમીષચ્છૃંગં નૌસંસ્થાને વિશાલતા ચૌક્તા ।
૪।૮ચ્દ્/ નાવિકપીડા તસ્મિન્ ભવતિ શિવં સર્વલોકસ્ય ॥ ॥

૪।૯અબ્/ અર્દ્ધોન્નતે ચ લાંગલમિતિ પીડા તદુપજીવિનાં તસ્મિન્ ।
૪।૯ય્દ્/ પ્રીતિશ્ચ નિર્નિમિત્તં મનુજપતીનાં સુભિક્ષં ચ ॥ ॥

૪।૧૦અબ્/ દક્ષિણવિષાણમર્ધોન્નતં યદા દુષ્ટલાંગલાખ્યં તત્ ।
૪।૧૦ય્દ્/ પાણ્ડ્યનરેશ્વરનિધનકૃદુદ્યોગકરં બલાનામ્ ચ ॥ ॥

૪।૧૧અબ્/ સમશશિનિ સુભિક્ષક્ષેમવૃષ્ટયઃ પ્રથમદિવસસદૃશાઃ સ્યુઃ ।
૪।૧૧ય્દ્/ દણ્ડવદુદિતે પીડા ગવાં નૃપશ્ચૌગ્રદણ્ડોઽત્ર ॥ ॥

૪।૧૨અબ્/ કાર્મુકરૂપે યુદ્ધાનિ યત્ર તુ જ્યા તતો જયઃ તેષામ્ ।
૪।૧૨ય્દ્/ સ્થાનં યુગમિતિ યામ્યોત્તરાયતં ભૂમિકંપાય ॥ ॥

૪।૧૩અબ્/ યુગમેવ યામ્યકોટ્યાં કિંચિત્ તુંગં સ પાર્શ્વશાયીઇતિ
૪।૧૩ય્દ્/ વિનિહન્તિ સાર્થવાહાન્ વૃષ્ટેશ્ચ વિનિગ્રહં કુર્યાત્ ॥ ॥

૪।૧૪અબ્/ અભ્યુચ્છ્રાયાદેકં યદિ શશિનોઽવાન્મુખં ભવેત્છૃંગમ્ ।
૪।૧૪ય્દ્/ આવર્જિતમિત્યસુભિક્ષકારિ તદ્ ગોધનસ્યાપિ ॥ ॥

૪।૧૫અબ્/ અવ્યુચ્છિન્ના રેખા સમન્તતો મણ્ડલા ચ કુણ્ડાખ્યમ્ ।
૪।૧૫ય્દ્/ અસ્મિન્ માણ્ડલિકાનાં સ્થાનત્યાગો નરપતીનામ્ ॥ ॥

૪।૧૬અબ્/ પ્રોક્તસ્થાનાભાવાદુદગુચ્ચઃ ક્ષેમવૃદ્ધિવૃષ્ટિકરઃ ।
૪।૧૬ય્દ્/ દક્ષિણતુંગશ્ચન્દ્રો દુર્ભિક્ષભયાય નિર્દિષ્ટઃ ॥ ॥

૪।૧૭અબ્/ શૃંગેણએકેનેન્દુઃ (ઇન્દું) વિલીનમથવાપ્યવાન્મુખં શૃંગં (અશૃગ્ગં) ।
૪।૧૭ય્દ્/ સમ્પૂર્ણં ચાભિનવં દૃષ્ટ્વા એકો જીવિતાદ્ ભ્રશ્યેત્ ॥ ॥

૪।૧૮અબ્/ સંસ્થાનવિધિઃ કથિતો રૂપાણિ અસ્માદ્ ભવન્તિ ચન્દ્રમસઃ ।
૪।૧૮ય્દ્/ સ્વલ્પો દુર્ભિક્ષકરો મહાન્ સુભિક્ષાવહઃ પ્રોક્તઃ ॥ ॥

૪।૧૯અબ્/ મધ્યતનુઃ વજાખ્યઃ ક્ષુદ્ભયદઃ સંભ્રમાય રાજ્ઞાં ચ ।
૪।૧૯ય્દ્/ ચન્દ્રો મૃદંગરૂપઃ ક્ષેમસુભિક્ષાવહો ભવતિ ॥ ॥

૪।૨૦અબ્/ જ્ઞેયો વિશાલમૂર્તિઃ નરપતિલક્ષ્મીવિવૃદ્ધયે ચન્દ્રઃ ।
૪।૨૦ય્દ્/ સ્થૂલઃ સુભિક્ષકારી પ્રિયધાન્યકરઃ તુ તનુમૂર્તિઃ ॥ ॥

૪।૨૧અ પ્રત્યન્તાન્ કુનૃપાંશ્ચ હન્ત્યુડુપતિઃ શૃંગે કુજેન આહતે ।
૪।૨૧બ્ શસ્ત્રક્ષુદ્ભયકૃદ્ યમેન શશિજેનાવૃષ્ટિદુર્ભિક્ષકૃત્ ।
૪।૨૧ય્ શ્રેષ્ઠાન્ હન્તિ નૃપાન્ મહેન્દ્રગુરુણા શુક્રેણ ચાલ્પાન્ નૃપાન્ ।
૪।૨૧દ્ શુક્લે યાપ્યમિદં ફલમ્ ગ્રહકૃતં કૃષ્ણે યથોક્તાગમમ્ ।

૪।૨૨અ ભિન્નઃ સિતેન મગધાન્ યવનાન્ પુલિન્દાન્
૪।૨૨બ્ નેપાલભૃંગિમરુકચ્છ (મરુકુચ્ચ) સુરાષ્ટ્રમદ્રાન્ ।
૪।૨૨ય્ પાંચાલકૈકયકુલૂતકપુરુષાદાન્
૪।૨૨દ્ હન્યાદુશીનરજનાન્ અપિ સપ્ત માસાન્ ॥ ॥

૪।૨૩અબ્/ ગાન્ધારસૌવીરકસિન્ધુકીરાન્ ધાન્યાનિ શૈલાન્ દ્રવિદાધિપાંશ્ચ ।
૪।૨૩ય્દ્/ દ્વિજાંશ્ચ માસાન્ દશ શીતરશ્મિઃ સન્તાપયેદ્ વાક્પતિના વિભિન્નઃ ॥ ॥

૪।૨૪અ ઉદ્યુક્તાન્ સહ વાહનૈઃ નરપતીં ત્રૈગર્તકાન્ માલવાન્
૪।૨૪બ્ કૌલિન્દાન્ ગણપુંગવાન્ અથ શિબીનાયોધ્યકાન્ પાર્થિવાન્ ।
૪।૨૪ય્ હન્યાત્ કૌરવમત્સ્યશુક્ત્યધિપતીન્ રાજન્યમુખ્યાન્ અપિ
૪।૨૪દ્ પ્રાલેયાંશુરસૃગ્ગ્રહે તનુગતે ષણ્માસમર્યાદયા ॥ ॥

૪।૨૫અબ્/ યૌધેયાન્ સચિવાન્ સકૌરવાન્ પ્રાગીશાન્ અથ ચાર્જુનાયનાન્ ।
૪।૨૫ય્દ્/ હન્યાદર્કજભિન્નમણ્ડલઃ શીતાંશુઃ દશમાસપીડયા ॥ ॥

૪।૨૬અબ્/ મગધાન્ મથુરાં ચ પીડયેદ્ વેણાયાશ્ચ તટં શશાંકજઃ ।
૪।૨૬ય્દ્/ અપરત્ર કૃતં યુગં વદેદ્ યદિ ભિત્ત્વા શશિનં વિનિર્ગતઃ ॥ ॥

૪।૨૭અબ્/ ક્ષેમારોગ્યસુભિક્ષનિનાશી શીતાંશુઃ શિખિના યદિ ભિન્નઃ ।
૪।૨૭ય્દ્/ કુર્યાદાયુધજીવિવિનાશં ચૌરાણામધિકેન ચ પીડામ્ ॥ ॥

૪।૨૮અબ્/ ઉલ્કયા યદા શશી ગ્રસ્ત એવ હન્યતે ।
૪।૨૮ય્દ્/ હન્યતે તદા નૃપો યસ્ય જન્મનિ સ્થિતઃ ॥ ॥

૪।૨૯અબ્/ ભસ્મનિભઃ પરુષોઽરુણમૂર્તિઃ શીતકરઃ કિરણૈઃ પરિહીણઃ ।
૪।૨૯ય્દ્/ શ્યાવતનુઃ સ્ફુટિતઃ સ્ફુરણો વા ક્ષુદ્ડમરા (ક્ષુડ્સમરા) મયચૌરભયાય ॥ ॥

૪।૩૦અબ્/ પ્રાલેયકુન્દકુમુદસ્ફટિકાવદાતો યત્નાદિવાદ્રિસુતયા પરિમૃજ્ય ચન્દ્રઃ ।
૪।૩૦ય્દ્/ ઉચ્ચૈઃ કૃતો નિશિ ભવિષ્યતિ મે શિવાય યો દૃશ્યતે સ ભવિતા જગતઃ શિવાય ॥ ॥

૪।૩૧અબ્(૪।૩૨અબ્)/ શુક્લે પક્ષે સમ્પ્રવૃદ્ધે પ્રવૃદ્ધિં બ્રહ્મક્ષત્રં યાતિ વૃદ્ધિં પ્રજાશ્ચ ।
૪।૩૧ય્દ્(૪।૩૨ય્દ્)/ હીને હાનિઃ તુલ્યતા તુલ્યતાયાં કૃષ્ણે સર્વે તત્ફલં વ્યત્યયેન ॥ ॥

૪।૩૨અબ્(૪।૩૧અબ્)/ યદિ કુમુદમૃણાલહારગૌરઃ તિથિનિયમાત્ ક્ષયમેતિ વર્દ્ધતે વા ।
૪।૩૨ય્દ્(૪।૩૧ય્દ્)/ અવિકૃતગતિમણ્ડલાંશુયોગી ભવતિ નૃણાં વિજયાય શીતરશ્મિઃ ॥ ॥

sએપરતે અધ્યાય ૫ રાહુચારાધ્યાયઃ
૫।૧અબ્/ અમૃતાસ્વાદવિશેષાચ્છિન્નમપિ શિરઃ કિલાસુરસ્યૈદમ્ ।

૫।૧૨્દ્/ પ્રાણૈઃ અપરિત્યક્તં ગ્રહતાં યાતં વદન્ત્યેકે ॥ ॥

૫।૨અબ્/ ઇન્દુઅર્કમણ્ડલાકૃતિઃ અસિતત્વાત્ કિલ ન દૃશ્યતે ગગને ।
૫।૨્દ્/ અન્યત્ર પર્વકાલાદ્ વરપ્રદાનાત્ કમલયોનેઃ ॥ ॥

૫।૩અબ્/ મુખપુચ્છવિભક્તાંગં ભુજંગમાકારમુપદિશન્ત્યન્યે ।
૫।૩્દ્/ કથયન્ત્યમૂર્તમપરે તમોમયં સૈંહિકેયાખ્યાખ્યમ્ ॥ ॥

૫।૪અબ્/ યદિ મૂર્તો ભવિચારી શિરોઽથવા ભવતિ મણ્ડલી રાહુઃ ।
૫।૪્દ્/ ભગણાર્ધેનાન્તરિતૌ (તો) ગૃહ્ણાતિ કથં નિયતચારઃ ॥ ॥

૫।૫અબ્/ અનિયતચારઃ ખલુ ચેદુપલબ્ધિઃ સંખ્યયા કથં તસ્ય ।
૫।૫્દ્/ પુચ્છાનનાભિધાનોઽન્તરેણ કસ્માન્ ન ગૃહ્ણાતિ ॥ ॥

૫।૬અબ્/ અથ તુ ભુજગેન્દ્રરૂપઃ પુચ્છેન મુખેન વા સ ગૃહ્ણાતિ ।
૫।૬્દ્/ મુખપુચ્છાન્તરસંસ્થં સ્થગયતિ કસ્માન્ ન ભગણાર્ધમ્ ॥ ॥

૫।૭અબ્/ રાહુદ્વયં યદિ સ્યાદ્ ગ્રસ્તેઽસ્તમિતેઽથવા ઉદિતે ચન્દ્રે ।
૫।૭્દ્/ તત્સમગતિનાન્યેન ગ્રસ્તઃ સૂર્યોઽપિ દૃશ્યતે ॥ ॥

૫।૮અબ્/ ભૂચ્છાયાં સ્વગ્રહણે ભાસ્કરમર્કગ્રહે પ્રવિશતીન્દુઃ ।
૫।૮્દ્/ પ્રગ્રહણમતઃ પશ્ચાન્ નેન્દોઃ ભાનોશ્ચ પૂર્વાર્ધાત્ ॥ ॥

૫।૯અબ્/ વૃક્ષસ્ય સ્વચ્છાયા યથા એકપાર્શ્વે (ન) ભવતિ દીર્ઘચયા (દીર્ઘા ચ) ।
૫।૯્દ્/ નિશિ નિશિ તદ્વદ્ ભૂમેઃ આવરણવશાદ્ દિનેશસ્ય ॥ ॥

૫।૧૦અબ્/ સૂર્યાત્ સપ્તમરાશૌ યદિ ચૌદગ્દક્ષિણેન નાતિગતઃ ।
૫।૧૦્દ્/ ચન્દ્રઃ પૂર્વાભિમુખશ્છાયામૌર્વીમ્ તદા વિશતિ ॥ ॥

૫।૧૧અબ્/ ચન્દ્રોઽધઃસ્થઃ સ્થગયતિ રવિમંબુદવત્ સમાગતઃ પશ્ચાત્ ।
૫।૧૧્દ્/ પ્રતિદેશમતશ્ચિત્રં દૃષ્ટિવશાદ્ ભાસ્કરગ્રહણમ્ ॥ ॥

૫।૧૨અબ્/ આવરણં મહદિન્દોઃ કુણ્ઠવિષાણઃ તતોઽર્ધસંચ્છન્નઃ ।
૫।૧૨્દ્/ સ્વલ્પમ્ રવેઃ યતોઽતઃ તીક્ષ્ણવિષાણો રવિઃ ભવતિ ॥ ॥

૫।૧૩અબ્/ એવમુપરાગકારણમુક્તમિદં દિવ્યદૃગ્ભિઃ આચાર્યૈઃ ।
૫।૧૩્દ્/ રાહુઃ અકારણમસ્મિન્ ઇત્યુક્તઃ શાસ્ત્રસદ્ભાવઃ ॥ ॥

૫।૧૪અબ્/ યોઽસૌઅસુરો રાહુઃ તસ્ય વરો બ્રહ્મણાઽયમાજ્ઞપ્તઃ ।
૫।૧૪્દ્/ આપ્યાયનમુપરાગે દત્તહુતાંશેન તે ભવિતા ॥ ॥

પ।૧૫અબ્/ તસ્મિન્ કાલે સાન્નિધ્યમસ્ય તેનૌપચર્યતે રાહુઃ ।
પ।૧૫ચ્દ્/ યામ્યોત્તરા શશિગતિઃ ગણિતેઽપિ ઉપચર્યતે તેન ॥ ॥

પ।૧૬અબ્/ ન કથંચિદપિ નિમિત્તૈઃ ગ્રહણં વિજ્ઞાયતે નિમિત્તાનિ ।
પ।૧૬ચ્દ્/ અન્યસ્મિન્ અપિ કાલે ભવન્ત્યથૌત્પાતરૂપાણિ ॥ ॥

પ।૧૭અબ્/ પંચગ્રહસંયોગાન્ ન કિલ ગ્રહણસ્ય સંભવો ભવતિ ।
પ।૧૭ચ્દ્/ તૈલં ચ જલેઽષ્ટમ્યાં ન વિચિન્ત્યમિદં વિપશ્ચિદ્ભિઃ ॥ ॥

પ।૧૮અબ્/ અવનત્યાઽર્કે ગ્રાસો દિગ્જ્ઞેયા વલનયા અવનત્યા ચ ।
પ।૧૮ચ્દ્/ તિથ્યવસાનાદ્ વેલા કરણે કથિતાનિ તાનિ મયા ॥ ॥

પ।૧૯અબ્/ ષણ્માસોત્તરવૃદ્ધ્યા પર્વેશાઃ સપ્ત દેવતાઃ ક્રમશઃ ।
પ।૧૯ચ્દ્/ બ્રહ્મશશીન્દ્રકુબેરા વરુણાગ્નિયમાશ્ચ વિજ્ઞેયાઃ ॥ ॥

પ।૨૦અબ્/ બ્રાહ્મે દ્વિજપશુવૃદ્ધિઃ ક્ષેમારોગ્યાણિ (દ્વિજપશુવૃદ્ધિક્ષેમારોગ્યાણિ) સસ્યસમ્પત્ચ ।
પ।૨૦ચ્દ્/ તદ્વત્ સૌમ્યે તસ્મિન્ પીડા વિદુષામવૃષ્ટિશ્ચ ॥ ॥

પ।૨૧અબ્/ ઐન્દ્રે ભૂપવિરોધઃ શારદસસ્યક્ષયો ન ચ ક્ષેમમ્ ।
પ।૨૧ચ્દ્/ કૌબેરેઽર્થપતીનામર્થવિનાશઃ સુભિક્ષં ચ ॥ ॥

પ।૨૨અબ્/ વારુણમવનીશાશુભમન્યેષાં ક્ષેમસસ્યવૃદ્ધિકરમ્ ।
પ।૨૨ચ્દ્/ આગ્નેયં મિત્રાખ્યં સસ્યારોગ્યાભયાંબુકરમ્ ॥ ॥

પ।૨૩અબ્/ યામ્યં કરોત્યવૃષ્ટિં દુર્ભિક્ષં સંક્ષયં ચ સસ્યાનામ્ ।
પ।૨૩ચ્દ્/ યદતઃ પરં તદશુભં ક્ષુત્મારાવૃષ્ટિદં પર્વ ॥ ॥

પ।૨૪અબ્/ વેલાહીને પર્વણિ ગર્ભવિપત્તિશ્ચ શસ્ત્રકોપશ્ચ ।
પ।૨૪ચ્દ્/ અતિવેલે કુસુમફલક્ષયો ભયં સસ્યનાશશ્ચ ॥ ॥

પ।૨૫અબ્/ હીનાતિરિક્તકાલે ફલમુક્તં પૂર્વશાસ્ત્રદૃષ્ટત્વાત્ ।
પ।૨૫ચ્દ્/ સ્ફુટગણિતવિદઃ કાલઃ કથંચિદપિ નાન્યથા ભવતિ ॥ ॥

પ।૨૬અબ્/ યદ્યેકસ્મિન્ માસે ગ્રહણં રવિસોમયોઃ તદા ક્ષિતિપાઃ ।
પ।૨૬ચ્દ્/ સ્વબલક્ષોભૈઃ સંક્ષયમાયાન્ત્યતિશસ્ત્રકોપશ્ચ ॥ ॥

પ।૨૭અબ્/ ગ્રસ્તાવુદિતાસ્તમિતૌ શારદધાન્યાવનીશ્વરક્ષયદૌ ।
પ।૨૭ચ્દ્/ સર્વગ્રસ્તૌ દુર્ભિક્ષમરકદૌ પાપસન્દૃષ્ટૌ ॥ ॥

પ।૨૮અબ્/ અર્ધોદિતૌપરક્તો નૈકૃતિકાન્ હન્તિ સર્વયજ્ઞાંશ્ચ ।
પ।૨૮ચ્દ્/ અગ્ન્યુપજીવિગુણાધિકવિપ્રાશ્રમિણો યુગેઽભ્યુદિતઃ (અયુગાભ્યુદિતઃ) ॥ ॥

પ।૨૯અબ્/ કર્ષકપાખણ્ડિ (પાષણ્ડિ) વણિક્ક્ષત્રિયબલનાયકાન્ દ્વિતીયાંશે (દ્વિતીયેડંશે) ।
પ।૨૯ય્દ્/ કારુકશૂદ્રમ્લેચ્છાન્ ખતૃતીયાંશે સમન્ત્રિજનાન્ ॥ ॥

પ।૩૦અબ્/ મધ્યાહ્ને નરપતિમધ્યદેશહા શોભનશ્ચ ધાન્યાર્ઘઃ ।
પ।૩૦ય્દ્/ તૃણભુગમાત્યાન્તઃપુરવૈશ્યઘ્નઃ પંચમે ખાંશે ।
પ।૩૧અબ્/ સ્ત્રીશૂદ્રાન્ ષષ્ઠેડંશે દસ્યુપ્રત્યન્તહા અસ્તમયકાલે ।
પ।૩૧ય્દ્/ યસ્મિન્ ખાંશે મોક્ષઃ તત્પ્રોક્તાનાં શિવં ભવતિ ॥ ॥

પ।૩૨અબ્/ દ્વિજનૃપતીન્ ઉદગયને વિટ્શૂદ્રાન્ દક્ષિણાયને હન્તિ ।
પ।૩૨ય્દ્/ રાહુરુદગાદિદૃષ્ટઃ પ્રદક્ષિણં હન્તિ વિપ્રાદીન્ ॥ ॥

પ।૩૩અબ્/ મ્લેચ્છાન્ વિદિક્સ્થિતો યાયિનશ્ચ હન્યાદ્ ધુતાશસક્તાંશ્ચ ।
પ।૩૩ય્દ્/ સલિલચરદન્તિઘાતી યામ્યેનૌદગ્ ગવામશુભઃ ॥ ॥

પ।૩૪અબ્/ પૂર્વેણ સલિલપૂર્ણાં કરોતિ વસુધાં સમાગતો દૈત્યઃ ।
પ।૩૪ય્દ્/ પશ્ચાત્ કર્ષકસેવકબીજવિનાશાય નિર્દિષ્ટઃ ॥ ॥

પ।૩૫અબ્/ પાંચાલકલિંગશૂરસેનાઃ કાંબોજૌડ્રકિરાતશસ્ત્રવાર્ત્તાઃ ।
પ।૩૫ય્દ્/ જીવન્તિ ચ યે હુતાશવૃત્ત્યા તે પીડામુપયાન્તિ મેષસંસ્થે ॥ ॥

પ।૩૬અબ્/ ગોપાઃ પશવોડથ ગોમિનો મનુજા યે ચ મહત્ત્વમાગતાઃ ।
પ।૩૬ય્દ્/ પીડામુપયાન્તિ ભાસ્કરે ગ્રસ્તે શીતકરેડથવા વૃષે ॥ ॥

પ।૩૭અબ્/ મિથુને પ્રવરાંગના નૃપા નૃપમાત્રા બલિનઃ કલાવિદઃ ।
પ।૩૭ય્દ્/ યમુનાતટજાઃ સબાહ્લિકા મત્સ્યાઃ સુહ્મજનૈઃ સમન્વિતાઃ ॥ ॥

પ।૩૮અબ્/ આભીરાન્ શબરાન્ સપહ્લવાન્ મલ્લાન્ મત્સ્યકુરુંછકાન્ અપિ ।
પ।૩૮ય્દ્/ પાંચાલાન્ વિકલાંશ્ચ પીડયત્યન્નાં ચાપિ નિહન્તિ કર્કટે ॥ ॥

પ।૩૯અબ્/ સિંહે પુલિન્દગણમેકલસત્ત્વયુક્તાન્ રાજોપમાન્ નરપતીન્ વનગોચરાંશ્ચ ।
પ।૩૯ય્દ્/ ષષ્ઠે તુ સસ્યકવિલેખકગેયસક્તાન્ હન્ત્યશ્મકત્રિપુરશાલિયુતાંશ્ચ દેશાન્ ॥ ॥

પ।૪૦અબ્/ તુલાધરેડવન્ત્યપરાન્ત્યસાધૂન્ વણિગ્દશાર્ણાન્ મરુત (ભરુક) કચ્છપાંશ્ચ ।
પ।૪૦ય્દ્/ અલિનિ અથૌદુંબરમદ્રચોલાન્ દ્રુમાન્ સયૌધેયવિષાયુધીયાન્ ॥ ॥

પ।૪૧અબ્/ ધન્વિનિ અમાત્યવરવાજિવિદેહમલ્લાન્ પાંચાલવૈદ્યવણિજો વિષમાયુધજ્ઞાન્ ।
પ।૪૧ય્દ્/ હન્યાન્ મૃગે તુ ઝષમન્ત્રિકુલાનિ નીચાન્ મન્ત્રૌષધીષુ
કુશલાન્ સ્થવિરાયુધીયાન્ ॥ ॥

૫।૪૨અબ્/ કુંભેઽન્તર્ગિરિજાન્ સપશ્ચિમજનાન્ ભારોદ્વહાં તસ્કરાન્
આભીરાન્ દરદ આર્યસિંહપુરકાન્ હન્યાત્ તથા બર્બરાન્ ।
૫।૪૨ચ્દ્/ મીને સાગરકૂલસાગરજલદ્રવ્યાણિ વન્યાન્ (માન્યાન્)
જનાન્ પ્રાજ્ઞાન્ વાર્યુપજીવિનશ્ચ ભફલં કૂર્મોપદેશાદ્ વદેત્ ॥ ॥

૫।૪૩અબ્/ સવ્યાપસવ્યલેહગ્રસનનિરોધાવમર્દનારોહાઃ ।
૫।૪૩ચ્દ્/ આઘ્રાતં મધ્યતમઃ તમોઽન્ત્ય ઇતિ તે દશ ગ્રાસાઃ ॥ ॥

૫।૪૪અબ્/ સવ્યગતે તમસિ જગજ્જલપ્લુતં ભવતિ મુદિતમભયં ચ ।
૫।૪૪ચ્દ્/ અપસવ્યે નરપતિતસ્કરાવમર્દૈઃ પ્રજાનાશઃ ॥ ॥

૫।૪૫અબ્/ જિહ્વોપલેઢિ (જિહ્વેવલેઢિ) પરિતઃ તિમિરનુદો મણ્ડલં યદિ સ લેહઃ ।
૫।૪૫ચ્દ્/ પ્રમુદિતસમસ્તભૂતા પ્રભૂતતોયા ચ તત્ર મહી ॥ ॥

૫।૪૬અબ્/ ગ્રસનમિતિ યદા ત્ર્યંશઃ પાદો વા ગૃહ્યતેઽથવા અપિ અર્ધમ્ ।
૫।૪૬ચ્દ્/ સ્ફીતનૃપવિત્તહાનિઃ પીડા ચ સ્ફીતદેશાનામ્ ॥ ॥

૫।૪૭અબ્/ પર્યન્તેષુ ગૃહીત્વા મધ્યે પિણ્ડીકૃતં તમઃ તિષ્ઠેત્ ।
૫।૪૭ચ્દ્/ સ નિરોધો વિજ્ઞેયઃ પ્રમોદકૃત્ સર્વભૂતાનામ્ ॥ ॥

૫।૪૮અબ્/ અવમર્દનમિતિ નિઃશેષમેવ સંછાદ્ય યદિ ચિરં તિષ્ઠેત્ ।
૫।૪૮ચ્દ્/ હન્યાત્ પ્રધાનભૂપાન્ પ્રધાનદેશાંશ (પ્રધાનદેશાન્ પ્રધાનભૂપાંશ) ચ તિમિરમયઃ ॥ ॥

૫।૪૯અબ્/ વૃત્તે ગ્રહે યદિ તમઃ તત્ક્ષણમાવૃત્ય દૃશ્યતે ભૂયઃ ।
૫।૪૯ચ્દ્/ આરોહણમિત્યન્યોન્યમર્દનૈઃ ભયકરં રાજ્ઞામ્ ॥ ॥

૫।૫૦અબ્/ દર્પણ ઇવએકદેશે સબાષ્પ (સવાષ્પ) નિઃશ્વાસમારુતોપહતઃ ।
૫।૫૦ચ્દ્/ દૃશ્યેત આઘ્રાતં તત્ સુવૃષ્ટિવૃદ્ધ્યાવહં જગતઃ ॥ ॥

૫।૫૧અબ્/ મધ્યે તમઃ પ્રવિષ્ટં વિતમસ્કં મણ્ડલં ચ યદિ પરિતઃ
૫।૫૧ચ્દ્/ તન્મધ્યદેશનાશં કરોતિ કુક્ષ્યામયભયં ચ ॥ ॥

૫।૫૨અબ્/ પર્યન્તેષુઅતિબહુલં સ્વલ્પં મધ્યે તમઃ તતોઽન્ત્યાખ્યે ।
૫।૫૨ચ્દ્/ સસ્યાનામીતિભયં ભયમસ્મિં તસ્કરાણાં ચ ॥ ॥

૫।૫૩અબ્/ શ્વેતે ક્ષેમસુભિક્ષં બ્રાહ્મણપીડાં ચ નિર્દિશેદ્ રાહૌ ।
૫।૫૩ચ્દ્/ અગ્નિભયમનલવર્ણે પીડા ચ હુતાશવૃત્તીનામ્ ॥ ॥

૫।૫૪અબ્/ હરિતે રોગૌલ્બણતા (ઉલ્વણતા) સસ્યાનામીતિભિશ્ચ વિધ્વંસઃ ।
૫।૫૪ચ્દ્/ કપિલે શીઘ્રગસત્ત્વમ્લેચ્છધ્વંશોઽથ દુર્ભિક્ષમ્ ॥ ॥

૫।૫૫અબ્/ અરુણકિરણાનુરૂપે દુર્ભિક્ષાવૃષ્ટયો વિહગપીડા ।
૫।૫૫ચ્દ્/ આધૂમ્રે ક્ષેમસુભિક્ષમાદિશેત્મન્દવૃષ્ટિં ચ ॥ ॥

૫।૫૬અબ્/ કાપોતારુણકપિલશ્યાવાભે ક્ષુદ્ભયં વિનિર્દેશ્યમ્ ।
૫।૫૬ચ્દ્/ કાપોતઃ શૂદ્રાણાં વ્યાધિકરઃ કૃષ્ણવર્ણશ્ચ ॥ ॥

૫।૫૭અબ્/ વિમલકમણિપીતાભો વૈશ્યધ્વંસી ભવેત્ સુભિક્ષાય ।
૫।૫૭ચ્દ્/ સાર્ચિષ્મત્યગ્નિભયં ગૈરિકરૂપે તુ યુદ્ધાનિ ॥ ॥

૫।૫૮અબ્/ દૂર્વાકાણ્ડશ્યામે હારિદ્રે વાપિ નિર્દિશેત્મરકમ્ ।
૫।૫૮ચ્દ્/ અશનિભયસમ્પ્રદાયી પાટલ (પાટલિ) કુસુમોપમો રાહુઃ ॥ ॥

૫।૫૯અબ્/ પાંશુવિલોહિતરૂપઃ ક્ષત્રધ્વંસાય ભવતિ વૃષ્ટેશ્ચ ।
૫।૫૯ચ્દ્/ બાલરવિકમલસુરચાપરૂપભૃત્શસ્ત્રકોપાય ॥ ॥

૫।૬૦અબ્/ પશ્યન્ ગ્રસ્તં સૌમ્યો ઘૃતમધુતૈલક્ષયાય રાજ્ઞાં ચ ।
૫।૬૦ચ્દ્/ ભૌમઃ સમરવિમર્દં શિખિકોપં તસ્કરભયં ચ ॥ ॥

૫।૬૧અબ્/ શુક્રઃ સસ્યવિમર્દં નાનાક્લેશાંશ્ચ જનયતિ ધરિત્ર્યામ્ ।
૫।૬૧ચ્દ્/ રવિજઃ કરોત્યવૃષ્ટિં દુર્ભિક્ષં તસ્કરભયં ચ ॥ ॥

૫।૬૨અબ્/ યદશુભમવલોકનાભિરુક્તં ગ્રહજનિતં ગ્રહણે પ્રમોક્ષણે વા ।
૫।૬૨ચ્દ્/ સુરપતિગુરુણાવલોકિતે તત્શમમુપયાતિ જલૈઃ ઇવાગ્નિઃ ઇદ્ધઃ ॥ ॥

૫।૬૩અબ્/ ગ્રસ્તે ક્રમાન્ નિમિત્તૈઃ પુનઃ ગ્રહો માસષટ્કપરિવૃદ્ધ્યા ।
૫।૬૩ચ્દ્/ પવનૌલ્કાપાતરજઃ ક્ષિતિકંપતમોઽશનિનિપાતૈઃ ॥ ॥

૫।૬૪અબ્/ આવન્તિકા જનપદાઃ કાવેરીનર્મદાતટાશ્રયિણઃ ।
૫।૬૪ચ્દ્/ દૃપ્તાશ્ચ મનુજપતયઃ પીડ્યન્તે ક્ષિતિસુતે ગ્રસ્તે ॥ ॥

૫।૬૫અબ્/ અન્તર્વેદીં સરયૂં નેપાલં પૂર્વસાગરં શોણમ્ ।
૫।૬૫ચ્દ્/ સ્ત્રીનૃપયોધકુમારાન્ સહ વિદ્વદ્ભિઃ બુધો હન્તિ ॥ ॥

૫।૬૬અબ્/ ગ્રહણૌપગતે જીવે વિદ્વન્નૃપમન્ત્રિગજહયધ્વંસઃ ।
૫।૬૬ચ્દ્/ સિન્ધુતટવાસિનામપિ ઉદગ્દિશં સંશ્રિતાનાં ચ ॥ ॥

૫।૬૭અબ્/ ભૃગુતનયે રાહુગતે દાશેરક (દસેરકાઃ) કૈકયાઃ સયૌધેયાઃ ।
૫।૬૭ચ્દ્/ આર્યાવર્તાઃ શિબયઃ સ્ત્રીસચિવગણાશ્ચ પીડ્યન્તે ॥ ॥

૫।૬૮અબ્/ સૌરે મરુભવપુષ્કરસૌરાષ્ટ્રિક (રાષ્ટ્રા) ધાતવોઽર્બુદાન્ત્યજનાઃ ।
૫।૬૮ચ્દ્/ ગોમન્તપારિયાત્રાશ્રિતાઃ (ગોમન્તઃ પારિયાત્રા) ચ નાશં વ્રજન્ત્યાશુ ॥ ॥

પ। ૬૯અ કાર્ત્તિક્યામનલોપજીવિમગધાન્ પ્રાચ્યાધિપાન્ કોશલાન્ ।
પ। ૬૯બ્ કલ્માષાન્ અથ શૂરસેનસહિતાન્ કાશીશ્ચ સન્તાપયેત્ ।
પ। ૬૯ચ્ હન્યાદ્ (હન્યાદ્ ચ) આશુ કલિંગદેશનૃપતિં સામાત્યભૃત્યં તમો ।
પ। ૬૯દ્ દૃષ્ટં ક્ષત્રિયતાપદં જનયતિ ક્ષેમં સુભિક્ષાન્વિતમ્ ॥ ॥

પ। ૭૦અબ્/ કાશ્મીરકાન્ કૌશલકાન્ સપુણ્ડ્રાન્ મૃગાંશ્ચ હન્યાદપરાન્તકાંશ્ચ ।
પ। ૭૦ચ્દ્/ યે સોમપાઃ તાંશ્ચ નિહન્તિ સૌમ્યે સુવૃષ્ટિકૃત્ ક્ષેમસુભિક્ષકૃત્ચ ॥ ॥

પ। ૭૧અબ્/ પૌષે દ્વિજક્ષત્રજનોપરોધઃ સસૈન્ધવાખ્યાઃ કુકુરા વિદેહાઃ ।
પ। ૭૧ચ્દ્/ ધ્વંસં વ્રજન્ત્યત્ર ચ મન્દવૃષ્ટિં ભયં ચ વિન્દ્યાદસુભિક્ષયુતમ્ ॥ ॥

પ। ૭૨અ માઘે તુ માતૃપિતૃભક્તવસિષ્ઠગોત્રાન્
પ। ૭૨બ્ સ્વાધ્યાયધર્મનિરતાન્ કરિણઃ તુરંગાન્ ।
પ। ૭૨ચ્ વંગાંગકાશિમનુજાંશ્ચ દુનોતિ રાહુઃ
પ। ૭૨દ્ વૃષ્ટિં ચ કર્ષકજનાભિમતાં (અનુમતાં) કરોતિ ॥ ॥

પ। ૭૩અબ્/ પીડાકરં ફાલ્ગુનમાસિ પર્વ વંગાશ્મકાવન્તિક (વન્તક) મેકલાનામ્ ।
પ। ૭૩ચ્દ્/ નૃત્ય (નૃત્ત) જ્ઞસસ્યપ્રવરાંગનાનાં ધનુષ્કરક્ષત્રતપસ્વિનાં ચ ॥ ॥

પ। ૭૪અ ચૈત્ર્યાં (ચૈત્રે) તુ ચિત્રકરલેખગેયસક્તાન્ ।
પ। ૭૪બ્ રૂપોપજીવિનિગમજ્ઞહિરણ્યપણ્યાન્ ।
પ। ૭૪ચ્ પૌણ્ડ્રૌડ્રકૈકયજનાન્ અથ ચાશ્મકાંશ્ચ
પ। ૭૪દ્ તાપઃ સ્પૃશત્યમરપોઽત્ર વિચિત્રવર્ષી ॥ ॥

પ। ૭૫અબ્/ વૈશાખમાસે (માસિ) ગ્રહણે વિનાશમાયાન્તિ કર્પાસતિલાઃ સમુદ્ગાઃ ।
પ। ૭૫ચ્દ્/ ઇક્ષ્વાકુયાઉધેયશકાઃ કલિંગાઃ સોપપ્લવાઃ (સોપદ્રવાઃ) કિન્તુ સુભિક્ષમસ્મિન્ ॥ ॥

પ। ૭૬અબ્/ જ્યેષ્ઠે નરેન્દ્રદ્વિજરાજપત્ન્યઃ સસ્યાનિ વૃષ્ટિશ્ચ મહાગણાશ્ચ ।
પ। ૭૬ચ્દ્/ પ્રધ્વંસમાયાન્તિ નરાશ્ચ સૌમ્યાઃ સાલ્વૈઃ સમેતાશ્ચ નિષાદસંઘાઃ ॥ ॥

પ। ૭૭અબ્/ આષાઢપર્વણિ ઉદપાનવપ્રનદીપ્રવાહાન્ ફલમૂલવાર્ત્તાન્ ।
પ। ૭૭ચ્દ્/ ગાન્ધારકાશ્મીરપુલિન્દચીનાન્ હતાન્ વદેદ્ મણ્ડલવર્ષમસ્મિન્ ॥ ॥

પ। ૭૮અ કાશ્મીરાન્ સપુલિન્દચીનયવનાન્ હન્યાત્ કુરુક્ષેત્રજાન્
પ। ૭૮બ્ ગાન્ધારાન્ અપિ મધ્યદેશસહિતાન્ વૃષ્ટો ગ્રહઃ શ્રાવણે ।
પ। ૭૮ચ્ કાંબોજૈકશફાંશ્ચ શારદમપિ ત્યક્ત્વા યથોક્તાન્ ઇમાન્
પ। ૭૮દ્ અન્યત્ર પ્રચુરાન્નહૃષ્ટમનુજૈઃ ધાત્રીં કરોત્યાવૃતામ્ ॥ ॥

૫।૭૯અ કલિંગવંગાન્ મગધાન્ સુરાષ્ટ્રાન્
૫।૭૯બ્ મ્લેચ્છાન્ સુવીરાન્ દરદાશ્મકાંશ (દરદાજ્છકાંશ) ચ ।
૫।૭૯ય્ સ્ત્રીણાં ચ ગર્ભાન્ અસુરો નિહન્તિ
૫।૭૯દ્ સુભિક્ષકૃદ્ ભાદ્રપદેઽભ્યુપેતઃ ॥ ॥

૫।૮૦અ કાંબોજચીનયવનાન્ સહ શલ્યહૃદ્ભિઃ
૫।૮૦બ્ બાહ્લીક (વાલ્હીક) સિન્ધુતટવાસિજનાંશ્ચ હન્યાત્ ।
૫।૮૦ય્ આનર્ત્ત (આનર્ત) પૌણ્ડ્રભિષજશ્ચ તથા કિરાતાન્
૫।૮૦દ્ દૃષ્ટોઽસુરોઽશ્વયુજિ ભૂરિસુભિક્ષકૃગ ॥ ॥

૫।૮૧અબ્/ હનુકુક્ષિપાયુભેદા દ્વિઃ દ્વિઃ સંછર્દનં ચ જરણં ચ ।
૫।૮૧ય્દ્/ મધ્યાન્તયોશ્ચ વિદરણમિતિ દશ શશિસૂર્યયોઃ મોક્ષાઃ ॥ ॥

૫।૮૨અબ્/ આગ્નેય્યામપગમનં દક્ષિણહનુભેદસંજ્ઞિતં શશિનઃ ।
૫।૮૨ય્દ્/ સસ્યવિમર્દો મુખરુગ્ નૃપપીડા સ્યાત્ સુવૃષ્ટિશ્ચ ॥ ॥

૫।૮૩અબ્/ પૂર્વોત્તરેણ વામો હનુભેદો નૃપકુમારભયદાયી ।
૫।૮૩ય્દ્/ મુખરોગં શસ્ત્રભયં તસ્મિન્ વિન્દ્યાત્ સુભિક્ષં ચ ॥ ॥

૫।૮૪અબ્/ દક્ષિણકુક્ષિવિભેદો દક્ષિણપાર્શ્વેન યદિ ભવેન્ મોક્ષઃ ।
૫।૮૪ય્દ્/ પીડા નૃપપુત્રાણામભિયોજ્યા દક્ષિણા રિપવઃ ॥ ॥

૫।૮૫અબ્/ વામઃ તુ કુક્ષિભેદો યદ્યુત્તરમાર્ગસંસ્થિતો રાહુઃ ।
૫।૮૫ય્દ્/ સ્ત્રીણાં ગર્ભવિપત્તિઃ સસ્યાનિ ચ તત્ર મધ્યાનિ ॥ ॥

૫।૮૬અબ્/ નૈરૃતવાયવ્યસ્થૌ દક્ષિણવામૌ તુ પાયુભેદૌ દ્વૌ ।
૫।૮૬ય્દ્/ ગુહ્યરુગ્ અલ્પા વૃષ્ટિઃ દ્વયોઃ તુ રાજ્ઞીક્ષયો વામે ॥ ॥

૫।૮૭અબ્/ પૂર્વેણ પ્રગ્રહણં કૃત્વા પ્રાગ્ એવ ચાપસર્પેત ।
૫।૮૭ય્દ્/ સંછર્દનમિતિ તત્ક્ષેમસસ્યહાર્દિપ્રદં જગતઃ ॥ ॥

૫।૮૮અબ્/ પ્રાક્ પ્રગ્રહણં યસ્મિન્ પશ્ચાદપસર્પણં તુ તજ્જરણમ્ ।
૫।૮૮ય્દ્/ ક્ષુત્શસ્ત્રભયૌદ્વિગ્ના ન (ઉદ્વિગ્નાઃ ક્વ) શરણમુપયાન્તિ તત્ર જનાઃ ॥ ॥

૫।૮૯અબ્/ મધ્યે યદિ પ્રકાશઃ પ્રથમં તન્મધ્યવિદરણં નામ ।
૫।૮૯ય્દ્/ અન્તઃકોપકરં સ્યાત્ સુભિક્ષદં નાતિવૃષ્ટિકરમ્ ॥ ॥

૫।૯૦અબ્/ પર્યન્તેષુ વિમલતા બહુલં મધ્યે તમોઽન્તિ (અન્ત) અદરણાખ્યઃ ।
૫।૯૦ય્દ્/ મધ્યાખ્યદેશનાશઃ શારદસસ્યક્ષયશ્ચાસ્મિન્ ॥ ॥

૫।૯૧અબ્/ એતે સર્વે મોક્ષા વક્તવ્યા ભાસ્કરેઽપિ કિન્ત્વત્ર ।
૫।૯૧ય્દ્/ પૂર્વા દિક્ શશિનિ યથા તથા રવૌ પશ્ચિમા કલ્પ્યા ॥ ॥

૫।૯૨અબ્/ મુક્તે સપ્તાહન્તઃ પાંશુનિપાતોઽન્નસંક્ષયં કુરુતે ।
૫।૯૨ય્દ્/ નીહારો રોગભયં ભૂકંપઃ પ્રવરનૃપમૃત્યુમ્ ॥ ॥

૫।૯૩અબ્/ ઉલ્કા મન્ત્રિવિનાશં નાનાવર્ણા ઘનાશ્ચ ભયમતુલમ્ ।
૫।૯૩ય્દ્/ સ્તનિતં ગર્ભવિનાશં વિદ્યુન્નૃપદંષ્ટ્રિપરિપીડામ્ ॥ ॥

૫।૯૪અબ્/ પરિવેષો રુક્પીડાં દિગ્દાહો નૃપભયં ચ સાગ્નિભયં ।
૫।૯૪ય્દ્/ રૂક્ષો વાયુઃ પ્રબલશ્ચૌરસમુત્થં ભયં ધત્તે ॥ ॥

૫।૯૫અબ્/ નિર્ઘાતઃ સુરચાપં દણ્ડશ્ચ ક્ષુદ્ભયં સપરચક્રમ્ ।
૫।૯૫ય્દ્/ ગ્રહયુદ્ધે (ગ્રહયુદ્ધં) નૃપયુદ્ધં કેતુશ્ચ તદેવ સન્દૃષ્ટઃ ॥ ॥

૫।૯૬અબ્/ અવિકૃતસલિલનિપાતૈઃ (નિપાતે) સપ્તાહાન્તઃ સુભિક્ષમાદેશ્યમ્ ।
૫।૯૬ય્દ્/ યગાશુભં ગ્રહણજં તત્ સર્વં નાશન્ ઉપયાતિ ॥ ॥

૫।૯૭અબ્/ સોમગ્રહે નિવૃત્તે પક્ષાન્તે યદિ ભવેદ્ ગ્રહોઽર્કસ્ય ।
૫।૯૭ય્દ્/ તત્રાનયઃ પ્રજાનાં દંપત્યોઃ વૈરમન્યોન્યમ્ ॥ ॥

૫।૯૮અબ્/ અર્કગ્રહાત્ તુ શશિનો ગ્રહણં યદિ દૃશ્યતે તતો વિપ્રાઃ ।
૫।૯૮ય્દ્/ નૈકક્રતુફલભાજો ભવન્તિ મુદિતાઃ પ્રજાશ્ચૈવ ॥ ॥

sએપરતે અધ્યાય ૬ ભૌમચારાધ્યાયઃ

૬।૧અબ્/ યદ્યુદયર્ક્ષાદ્ વક્રં કરોતિ નવમાષ્ટસપ્તમર્ક્ષેષુ ।
૬।૧ય્દ્/ તદ્વક્ત્રાં (તદ્વક્રં) ઉષ્ણમુદયે પીડાકરમગ્નિવાર્ત્તાનામ્ ॥ ॥

૬।૨અબ્/ દ્વાદશદશમૈકાદશનક્ષત્રાદ્ વક્રિતે કુજેઽશ્રુમુખમ્ ।
૬।૨ય્દ્/ દૂષયતિ રસાન્ ઉદયે કરોતિ રોગાન્ અવૃષ્ટિં ચ ॥ ॥

૬।૩અબ્/ વ્યાલં ત્રયોદશર્ક્ષાગતુર્દશાદ્ વા વિપચ્યતેઽસ્તમયે ।
૬।૩ય્દ્/ દંષ્ટ્રિવ્યાલમૃગેભ્યઃ કરોતિ પીડાં સુભિક્ષં ચ ॥ ॥

૬।૪અબ્/ રુધિરાનનમિતિ વક્ત્રં પંચદશાત્ ષોડશાગ વિનિવૃત્તે ।
૬।૪ય્દ્/ તત્કાલં મુખરોગં સભયં ચ સુભિક્ષમાવહતિ ॥ ॥

૬।૫અબ્/ અસિમુશલં સપ્તદશાદષ્ટાદશતોઽપિ વા તદનુવક્રે ।
૬।૫ય્દ્/ દસ્યુગુણેભ્યઃ પીદાં કરોત્યવૃષ્ટિં સશસ્ત્રભયામ્ ॥ ॥

૬।૬અબ્/ ભાગ્યાર્યમા ઉદિતે યદિ નિવર્તતે વૈશ્વદૈવતે ભૌમઃ ।

૬।૬च्द्/ પ્રાજાપત્યેऽસ્તમિતઃ ત્રીન્ અપિ લોકાન્ નિપીડયતિ ॥ ॥

૬।૭અબ્/ શ્રવણૌદિતસ્ય વક્રં પુષ્યે મૂર્ધાભિષિક્તપીડાકૃત્ ।
૬।૭ચ્દ્/ યસ્મિન્ ઋક્ષેऽભ્યુદિતઃ તદ્દિગ્વ્યૂહાન્ જનાન્ હન્તિ ॥ ॥

૬।૮અબ્/ મધ્યે ન યદિ મઘાનાં ગતાગતં લોહિતઃ કરોતિ તતઃ ।
૬।૮ચ્દ્/ પાણ્ડ્યો નૃપો વિનશ્યતિ શસ્ત્રૌઘોગાદ્ ભયમવૃષ્ટિં ॥ ॥

૬।૯અબ્/ ભિત્ત્વા મઘા (મઘાં) વિશાખાં ભિન્દન્ ભૌમઃ કરોતિ દુર્ભિક્ષમ્ ।
૬।૯ચ્દ્/ મરકં કરોતિ ઘોરં યદિ ભિત્ત્વા રોહિણીં યાતિ ॥ ॥

૬।૧૦અબ્/ દક્ષિણતો રોહિણ્યાઃ ચરન્ મહીજોર્ઘવૃષ્ટિનિગ્રહકૃત્ ।
૬।૧૦ચ્દ્/ ધૂમાયન્ સશિખો વા વિનિહન્યાત્ પારિયાત્રસ્થાન્ ॥ ॥

૬।૧૧અબ્/ પ્રાજાપત્યે શ્રવણે મૂલે ત્રિષુ ચૌત્તરેષુ (તિસૃષૂત્તરાસુ) શાક્રે ચ ।
૬।૧૧ચ્દ્/ વિચરન્ ઘનનિવહાનામુપઘાતકરઃ ક્ષમાતનયઃ ॥ ॥

૬।૧૨અબ્/ ચારોદયાઃ પ્રશસ્તાઃ શ્રવણમઘાદિત્યહસ્તમૂલેષુ (મૂલહસ્તેષુ) ।
૬।૧૨ચ્દ્/ એકપદાશ્વિશાખાપ્રાજાપત્યેષુ ચ કુજસ્ય ॥ ॥

૬।૧૩અ વિપુલવિમલમૂર્તિઃ કિંશુકાશોકવર્ણઃ
૬।૧૩બ્ સ્ફુટરુચિરમયૂખઃ તમ્રતામ્રપ્રભાભઃ ।
૬।૧૩ચ્ વિચરતિ યદિ માર્ગં ચૌત્તરં મેદિનીજઃ
૬।૧૩દ્ શુભકૃદવનિપાનાં હાર્દિદશ્ચ પ્રજાનામ્ ॥ ॥

sએપરતે અધ્યાય ૭ બુધચારાધ્યાયઃ
૭।૧અબ્/ નૌત્પાતપરિત્યક્તઃ કદાચિદપિ ચન્દ્રજો વ્રજત્યુદયમ્ ।
૭।૧ચ્દ્/ જલદહનપવનભયકૃદ્ ધાન્યાર્ઘક્ષયવિવૃદ્ધૌ વા ॥ ॥

૭।૨અબ્/ વિચરન્ શ્રવણધનિષ્ઠાપ્રજાપત્યેન્દુવૈશ્વદેવાનિ (વિશ્વદૈવાનિ) ।
૭।૨ચ્દ્/ મૃદ્નન્ હિમકરતનયઃ કરોત્યવૃષ્ટિં સરોગભયામ્ ॥ ॥

૭।૩અબ્/ રૌદ્રાદીનિ મઘાન્તાનિ ઉપાશ્રિતે ચન્દ્રજે પ્રજાપીડા ।
૭।૩ચ્દ્/ શસ્ત્રનિપાતક્ષુદ્ભયરોગાનાવૃષ્ટિસન્તાપૈઃ ॥ ॥

૭।૪અબ્/ હસ્તાદીનિ ચરન્ (વિચરન્) ષડ્ક્ષાણિ ઉપપીડયન્ ગવામશુભઃ ।
૭।૪ચ્દ્/ સ્નેહરસાર્ઘવિવૃદ્ધિં કરોતિ ચૌર્વીં પ્રભૂતાન્નામ્ ॥ ॥

૭।૫અબ્/ આર્યમ્ણં હૌતભુજં ભદ્રપદામુત્ત્રરાં યમેશં ચ ।
૭।૫ચ્દ્/ ચન્દ્રસ્ય સુતો નિઘ્નન્ પ્રાણભૃતાં ધાતુસંક્ષયકૃત્ ॥ ॥

૭।૬અબ્/ આશ્વિનવારુણમૂલાનિ ઉપમૃદ્નન્ રેવતીં ચ ચન્દ્રસુતઃ ।
૭।૬ય્દ્/ પણ્યભિષગ્નૌજીવિકસલિલજતુરગૌપઘાતકરઃ ॥ ॥

૭।૭અબ્/ પૂર્વાદ્ય્વૃક્ષત્રિતયાદેકમપીન્દોઃ સુતોઽભિમૃદ્નીયાત્ ।
૭।૭ય્દ્/ ક્ષુત્શસ્ત્રતસ્કરામયભયપ્રદાયી ચરન્ જગતઃ ॥ ॥

૭।૮અબ્/ પ્રાકૃતવિમિશ્રસંક્ષિપ્તતીક્ષ્ણયોગાન્તઘોરપાપાખ્યાઃ ।
૭।૮ય્દ્/ સપ્ત પરાશરતન્ત્રે નક્ષત્રૈઃ કીર્તિતા ગતયઃ ॥ ॥

૭।૯અબ્/ પ્રાકૃતસંજ્ઞા વાયવ્યયામ્યપૈતામહાનિ બહુલાશ્ચ ।
૭।૯ય્દ્/ મિશ્રા ગતિઃ પ્રદિષ્ટા શશિશિવપિતૃભુજગદેવાનિ (દૈવાનિ) ।
૭।૧૦અબ્/ સંક્ષિપ્તાયાં પુષ્યઃ પુનર્વસુઃ ફલ્ગુનીદ્વયં ચેતિ ।
૭।૧૦ય્દ્/ તીક્ષ્ણાયાં ભદ્રપદાદ્વયં સશાક્રાશ્વયુક્ પૌષ્ણમ્ ॥ ॥

૭।૧૧અબ્/ યોગાન્તિકેતિ મૂલં દ્વે ચાષાઢે ગતિઃ સુતસ્યેન્દોઃ ॥ ॥

૭।૧૧ય્દ્/ ઘોરા શ્રવણઃ ત્વાષ્ટ્રઅં વસુદૈવં (દેવં) વારુણં ચૈવ ॥ ॥

૭।૧૨અબ્/ પાપાખ્યા સાવિત્રં મૈત્રં શક્રાગ્નિદૈવતં ચેતિ ।
૭।૧૨ય્દ્/ ઉદયપ્રવાસદિવસૈઃ સ એવ ગતિલક્ષણં પ્રાહ ॥ ॥

૭।૧૩અબ્/ ચત્વારિંશત્ (૪૦) ત્રિંશદ્ (૩૦) દ્વિસમેતા વિંશતિ (૨૨)ઃ દ્વિનવકં ચ ।
૭।૧૩ય્દ્/ નવ માસાર્ધં દશ ચૈકસંયુતાઃ પ્રાકૃતાદ્યાનામ્ ॥ ॥

૭।૧૪અબ્/ પ્રાકૃતગત્યામારોગ્યવૃષ્ટિસસ્યપ્રવૃદ્ધયઃ ક્ષેમમ્ ।
૭।૧૪ય્દ્/ સંક્ષિપ્તમિશ્રયોઃ મિશ્રમેતદન્યાસુ વિપરીતમ્ ॥ ॥

૭।૧૫અબ્/ ઋજ્વીઅતિવક્રાવક્રા વિકલા ચ મતેન દેવલસ્યૈતાઃ ।
૭।૧૫ય્દ્/ પંચચતુર્દ્વ્યેકાહા ઋજ્વ્યાદીનાં ષડભ્યસ્તાઃ ॥ ॥

૭।૧૬અબ્/ ઋજ્વી હિતા પ્રજાનામતિવક્રાઽર્ઘં ગતિઃ વિનાશયતિ ।
૭।૧૬ય્દ્/ શસ્ત્રભયદા ચ વક્રા વિકલા ભયરોગસંજનની ॥ ॥

૭।૧૭અબ્/ પૌષાષાઢશ્રાવણવૈશાખેષ્વિન્દુજઃ સમાઘેષુ ।
૭।૧૭ય્દ્/ વૃષ્તો ભયાય જગતઃ શુભફલકૃત્ પ્રોષિતઃ તેષુ ॥ ॥

૭।૧૮અબ્/ કાર્તિકે (કાર્ત્તિકે) ઽશ્વયુજિ વા યદિ માસે દૃશ્યતે તનુભવઃ શિશિરાંશોઃ ।
૭।૧૮ય્દ્/ શસ્ત્રચૌરહુતભુગ્ગદતોયક્ષુદ્ભયાનિ ચ તદા વિદધાતિ
૭।૧૯અબ્/ રુદ્ધાનિ સૌમ્યેઽસ્તગતે (અસ્તમિતે) પુરાણિ યાનિ ઉદ્ગતે તાનિ ઉપયાન્તિ મોક્ષમ્ ।
૭।૧૯ય્દ્/ અન્યે તુ પશ્ચાદુદિતે વદન્તિ લાભઃ પુરાણાં ભવતિ તજ્ઞાઃ ॥ ॥

૭।૨૦અબ્/ હેમકાન્તિઃ અથવા શુકવર્ણઃ સસ્યકેન મણિના સદૃશો વા ।
૭।૨૦ય્દ્/ સ્નિગ્ધમૂર્તિઃ અલઘુશ્ચ હિતાય વ્યત્યયે ન શુભકૃત્શશિપુત્રઃ ॥ ॥

sએપરતે અધ્યાય ૮ બૃહસ્પતિચારાધ્યાયઃ
૮।૧અબ્/ નક્ષત્રેણ સહૌદયમુપગચ્છતિ યેન દેવપતિમન્ત્રી ।
૮।૧ય્દ્/ તત્સંજ્ઞં વક્તવ્યં વર્ષં માસક્રમેણૈવ ॥ ॥

૮।૨અબ્/ વર્ષાણિ કાર્ત્તિકાદીનિ આગ્નેયાદ્ ભદ્વયાનુયોગીનિ ।
૮।૨ય્દ્/ ક્રમશઃ ત્રિભં તુ પંચમમુપાન્ત્યમન્ત્યં ચ યદ્ વર્ષમ્ ॥ ॥

૮।૩અબ્/ શકટાનલોપજીવકગોપીડા વ્યાધિશસ્ત્રકોપશ્ચ ।
૮।૩ય્દ્/ વૃદ્ધિઃ તુ રક્તપીતકકુસુમાનાં કાર્ત્તિકે વર્ષે ॥ ॥

૮।૪અબ્/ સૌમ્યેઽબ્દેઽનાવૃષ્ટિઃ મૃગાખુશલભાણ્ડજૈશ્ચ સસ્યવધઃ ।
૮।૪ય્દ્/ વ્યાધિભયં મિત્રૈઃ અપિ ભૂપાનાં જાયતે વૈરમ્ ॥ ॥

૮।૫અબ્/ શુભકૃજ્જગતઃ પૌષો નિવૃત્તવૈરાઃ પરસ્પરં ક્ષિતિપાઃ ।
૮।૫ય્દ્/ દ્વિત્રિગુણો ધાન્યાર્ઘઃ પૌષ્ટિકકર્મપ્રસિદ્ધિશ્ચ ॥ ॥

૮।૬અબ્/ પિતૃપૂજાપરિવૃદ્ધિઃ માઘે હાર્દિશ્ચ સર્વભૂતાનામ્ ।
૮।૬ય્દ્/ આરોગ્યવૃષ્ટિધાન્યાર્ઘસમ્પદો મિત્રલાભશ્ચ ॥ ॥

૮।૭અબ્/ ફાલ્ગુનવર્ષે વિન્દ્યાત્ ક્વચિત્ ક્વચિત્ ક્ષેમવૃષ્ટિસસ્યાનિ ।
૮।૭ય્દ્/ દૌર્ભાગ્યં પ્રમદાનાં પ્રબલાશ્ચૌરા નૃપાશ્ચોગ્રાઃ ॥ ॥

૮।૮અબ્/ ચૈત્રે મન્દા વૃષ્ટિઃ પ્રિયમન્નં ક્ષેમમવનિપા મૃદવઃ ।
૮।૮ય્દ્/ વૃદ્ધિશ્ચ કોશધાન્યસ્ય ભવતિ પીડા ચ રૂપવતામ્ ॥ ॥

૮।૯અબ્/ વૈશાખે ધર્મરતા (ધર્મપરા) વિગતભયાઃ પ્રમુદિતાઃ પ્રજાઃ સનૃપાઃ ।
૮।૯ય્દ્/ યજ્ઞક્રિયાપ્રાવૃત્તિઃ નિષ્પત્તિઃ સર્વસસ્યાનામ્ ॥ ॥

૮।૧૦અબ્/ જ્યૈષ્ઠે જાતિકુલધનશ્રેણીશ્રેષ્ઠા નૃપાઃ સધર્મજ્ઞાઃ ।
૮।૧૦ય્દ્/ પીડ્યન્તે ધાન્યાનિ ચ હિત્વા કંગું શમીજાતિમ્ ॥ ॥

૮।૧૧અબ્/ આષાઢે જાયન્તે સસ્યાનિ ક્વચિદવૃષ્ટિઃ અન્યત્ર ।
૮।૧૧ય્દ્/ યોગક્ષેમં મધ્યં વ્યગ્રાશ્ચ ભવન્તિ ભૂપાલાઃ ॥ ॥

૮।૧૨અબ્/ શ્રાવણવર્ષે ક્ષેમં સમ્યક્ સસ્યાનિ પાકમુપયાન્તિ ।
૮।૧૨ય્દ્/ ક્ષુદ્રા યે પાખણ્ડાઃ (પાષણ્ડાઃ) પીડ્યન્તે યે ચ તદ્ભક્તાઃ ॥ ॥

૮।૧૩અબ્/ ભાદ્રપદે વલ્લીજં નિષ્પત્તિં યાતિ પૂર્વસસ્યં ચ ।

૮।૧૩ચ્દ્/ ન ભવત્યપરં સસ્યં ક્વચિત્ સુભિક્ષં ક્વચિગ ભયમ્ ॥ ॥

૮।૧૪અબ્/ આશ્વયુજેऽબ્દેऽજસ્રં પતતિ જલં પ્રમુદિતાઃ પ્રજાઃ ક્ષેમમ્ ।
૮।૧૪ચ્દ્/ પ્રાણચયઃ પ્રાણભૃતામ્ સર્વેષામન્નબાહુલ્યમ્ ॥ ॥

૮।૧૫અબ્/ ઉદગારોગ્યસુભિક્ષક્ષેમકરો વાક્પતિશ્ચરન્ ભાનામ્ ।
૮।૧૫ચ્દ્/ યામ્યે તદ્વિપરીતો મધ્યેન તુ મધ્યફલદાયી ॥ ॥

૮।૧૬અબ્/ વિચરન્ ભદ્વયમિષ્ટઃ તત્સાર્ધં વત્સરેણ મધ્યફલઃ ।
૮।૧૬ચ્દ્/ સસ્યાનાં વિધ્વંસી વિચરેદધિકં યદિ કદાચિત્ ॥ ॥

૮।૧૭અબ્/ અનલભયમનલવર્ણે વ્યાધિઃ પીતે રણાગમઃ શ્યામે ।
૮।૧૭ચ્દ્/ હરિતે ચ તસ્કરેભ્યઃ પીડા રક્તે તુ શસ્ત્રભયમ્ ॥ ॥

૮।૧૮અબ્/ ધૂમાભેऽનાવૃષ્ટિઃ ત્રિદશગુરૌ નૃપવધો દિવા દૃષ્ટે ।
૮।૧૮ચ્દ્/ વિપુલેऽમલે સુતારે રાત્રૌ દૃષ્ટે પ્રજાઃ સ્વસ્થાઃ ॥ ॥

૮।૧૯અ રોહિણ્યોऽનલભં ચ વત્સરતનુઃ નાભિઃ ત્વષાઢદ્વયં
૮।૧૯બ્ સાર્પં હૃત્પિતૃદૈવતં ચ કુસુમં શુદ્ધૈઃ શુભં તૈઃ ફલમ્ ।
૮।૧૯ચ્ દેહે ક્રૂરનિપીડિતેऽગ્ન્યનિલજં નાભ્યાં ભયં ક્ષુત્કૃતં
૮।૧૯દ્ પુષ્યે મૂલફલક્ષયોऽથ હૃદયે સસ્યસ્ય નાશો ધ્રુવમ્ ॥ ॥

૮।૨૦અ ગતાનિ વર્ષાણિ શકેન્દ્રકાલાદ્
૮।૨૦બ્ ધતાનિ રુદ્રૈઃ ગુણયેગતુર્ભિઃ ।
૮।૨૦ચ્ નવાષ્ટપંચાષ્ટ (૮૫૮૯)યુતાનિ કૃત્વા
૮।૨૦દ્ વિભાજયેત્ શૂન્યશરાગરામૈઃ (૩૭૫૦) ॥ ॥

૮।૨૧અ લબ્ધેન (ફલેન) યુક્તં શકભૂપાલં (ભૂપકાલં)
૮।૨૧બ્ સંશોધ્ય ષષ્ટ્યા વિષયૈઃ વિભજ્ય ।
૮।૨૧ચ્ યુગાનિ નારાયણપૂર્વકાણિ
૮।૨૧દ્ લબ્ધાનિ શેષાઃ ક્રમશઃ સમાઃ સ્યુઃ ॥ ॥

૮।૨૨અબ્/ એકૈકમબ્દેષુ નવાહતેષુ દત્ત્વા પૃથગ્ દ્વાદશકં ક્રમેણ ।
૮।૨૨ચ્દ્/ હૃત્વા ચતુર્ભિઃ વસુદેવતાદ્યાનિ ઉડૂનિ શેષાંશકપૂર્વમબ્દમ્ ॥ ॥

૮।૨૩અબ્/ વિષ્ણુઃ સુરેજ્યો બલભિદ્ ધુતાશઃ ત્વષ્ટૌત્તરપ્રોષ્ઠપદાધિપશ્ચ ।
૮।૨૩ચ્દ્/ ક્રમાદ્ યુગેશાઃ પિતૃવિશ્વસોમ (સોમાઃ) શક્રાનલાખ્યાશ્વિભાગાઃ પ્રદિષ્ટાઃ ॥ ॥

૮।૨૪અબ્/ સંવત્સરોऽગ્નિઃ પરિવત્સરોऽર્ક ઇદાદિકઃ શીતમયૂખમાલી ।

૮।૨૪ય્દ્/ પ્રજાપતિશ્ચાપ્યનુવત્સરઃ સ્યાદિદ્વત્સરઃ શૈલસુતાપતિશ્ચ ॥ ॥

૮।૨૫અબ્/ વૃષ્ટિઃ સમાદ્યે પ્રમુખે દ્વિતીયે પ્રભૂતતોયા કથિતા તૃતીયે ।
૮।૨૫ય્દ્/ પશ્ચાજ્જલં મુંચતિ યગતુર્થં સ્વલ્પોદકં પંચમમબ્દમુક્તમ્ ॥ ॥

૮।૨૬અબ્/ ચત્વારિ મુખ્યાનિ યુગાનિ અથૈષાં વિષ્ણુ ઇન્દ્રજીવાનલદૈવતાનિ ।
૮।૨૬ય્દ્/ ચત્વારિ મધ્યાનિ ચ મધ્યમાનિ ચત્વારિ ચાન્ત્યાનિ અધમાનિ
વિન્દ્યાત્ ॥ ॥

૮।૨૭અબ્/ આધ્યં ધનિષ્ટાંશમભિપ્રપન્નો માઘે યદા યાત્યુદયં સુરેજ્યઃ ।
૮।૨૭ય્દ્/ ષષ્ટ્યબ્દપૂર્વઃ પ્રભવઃ સ નામ્ના પ્રપદ્યતે (પ્રવર્તતે) ભૂતહિતઃ
તદાબ્દઃ ॥ ॥

૮।૨૮અબ્/ ક્વચિત્ ત્વવૃષ્ટિઃ પવનાગ્નિકોપઃ સન્તીતયઃ શ્લેષ્મકૃતાશ્ચ રોગાઃ ।
૮।૨૮ય્દ્/ સંવત્સરેઽસ્મિન્ પ્રભવે પ્રવૃત્તે ન દુઃખમાપ્નોતિ જનઃ તથાપિ ॥ ॥

૮।૨૯અબ્/ તસ્માદ્ દ્વિતીયો વિભવઃ પ્રદિષ્ટઃ શુક્લઃ તૃતીયઃ પરતઃ પ્રમોદઃ ।
૮।૨૯ય્દ્/ પ્રજાપતિશ્ચેતિ યથોત્તરાણિ શસ્તાનિ વર્ષાણિ ફલાનિ અથૈષાં (ચૈષાં) ॥ ॥

૮।૩૦અબ્/ નિષ્પન્નશાલીક્ષુયવાદિસસ્યાં ભયૈઃ વિમુક્તામુપશાન્તવૈરામ્ ॥ ॥

૮।૩૦ય્દ્/ સંહૃષ્ટલોકાં કલિદોષમુક્તાં ક્ષત્રં તદા શાસ્તિ ચ ભૂતધાત્રીમ્ ॥ ॥

૮।૩૧અબ્/ આદ્યો અંગિરાઃ શ્રીમુખભાવસાહ્વૌ યુવા સુધાતેતિ (યુવાથ ધાતેતિ) યુગે દ્વિતીયે ।
૮।૩૧ય્દ્/ વર્ષાણિ પંચૈવ યથાક્રમેણ ત્રીણિ અત્ર શસ્તાનિ સમે પરે દ્વે ॥ ॥

૮।૩૨અબ્/ ત્રિષ્વાદ્યવર્ષેષુ (અંગિરાદ્યેષુ, આદ્યવર્ષેષુ) નિકામવર્ષી
દેવી નિરાતંકભયઃ (ભયાઃ) ચ લોકઃ ।
૮।૩૨ય્દ્/ અબ્દદ્વયેઽન્ત્યેઽપિ સમા સુવૃષ્ટિઃ કિન્ત્વત્ર રોગાઃ સમરાગમશ્
ચ ॥ ॥

૮।૩૩અબ્/ શાક્રે યુગે પૂર્વમથઈશ્વરાખ્યં વર્ષં દ્વિતીયં બહુધાન્યમ્
આહુઃ ।
૮।૩૩ય્દ્/ પ્રમાથિનં વિક્રમમપિ અથાન્યદ્ (અતોઽન્યદ્) વર્ષં ચ વિન્દ્યાદ્
ગુરુચારયોગાત્ ॥ ॥

૮।૩૪અબ્/ આદ્યં દ્વિતીયં ચ શુભે તુ વર્ષે કૃતાનુકારં કુરુતઃ પ્રજાનામ્ ।
૮।૩૪ય્દ્/ પાપઃ પ્રમાથી વૃષવિક્રમૌ તુ સુભિક્ષદૌ રોગભયપ્રદૌ ચ ॥ ॥

૮।૩૫અબ્/ શ્રેષ્ઠં ચ ચતુર્થસ્ય યુગસ્ય પૂર્વં યગિત્રભાનું કથયન્તિ વર્ષમ્ ।

૮।૩૫ય્દ્/ મધ્યં દ્વિતીયં તુ સુભાનુસંજ્ઞં રોગપ્રદં મૃત્યુકરં નતં ચ (ન તગ) ॥ ॥

૮।૩૬અબ્/ તારણં તદનુ ભૂરિવારિદં સસ્યવૃદ્ધિમુદિતાતિ (મુદિતં ચ) પાર્થિવમ્ ।
૮।૩૬ય્દ્/ પંચમં વ્યયમુશન્તિ શોભનં મન્મથપ્રબલમુત્સવાકુલમ્ ॥ ॥

૮।૩૭અબ્/ ત્વાષ્ટ્રે યુગે સર્વજિદાદ્ય ઉક્તઃ સંવત્સરોઽન્યઃ ખલુ
સર્વધારી ।
૮।૩૭ય્દ્/ તસ્માદ્ વિરોધી વિકૃતઃ ખરશ્ચ શસ્તો દ્વિતીયોઽત્ર ભયાય
શેષાઃ ॥ ॥

૮।૩૮અબ્/ નન્દનોઽથ વિજયો જયઃ તથા મન્મથોઽસ્ય પરતશ્ચ દુર્મુખઃ ।
૮।૩૮ય્દ્/ કાન્તમત્ર યુગ આદિતઃ ત્રયં મન્મથઃ સમફલોઽધમોઽપરઃ ॥ ॥

૮।૩૯અબ્/ હેમલંબ ઇતિ સપ્તમે યુગે સ્યાદ્ વિલંબિ પરતો વિકારિ ચ ।
૮।૩૯ય્દ્/ શર્વરીતિ તદનુ પ્લવઃ સ્મૃતો વત્સરો ગુરુવશેન પંચમઃ ॥ ॥

૮।૪૦અ ઈતિપ્રાયા (ઇતિપ્રાયઃ) પ્રચુરપવના વૃષ્ટિઃ અબ્દે તુ પૂર્વે
૮।૪૦બ્ મન્દં સસ્યં ન બહુસલિલં વત્સરેઽતો દ્વિતીયે ।
૮।૪૦ય્ અત્યુદ્વેગઃ પ્રચુરસલિલઃ સ્યાત્ તૃતીયશ્ચતુર્થો
૮।૪૦દ્ દુર્ભિક્ષાય પ્લવ ઇતિ તતઃ શોભનો ભૂરિતોયઃ ॥ ॥

૮।૪૧અબ્/ વૈશ્વે યુગે શોકહૃદ્ (શોભકૃદ્) ઇત્યથાદ્યઃ સંવત્સરોઽતઃ શુભકૃદ્ દ્વિતીયઃ ।
૮।૪૧ય્દ્/ ક્રોધી તૃતીયઃ પરતઃ ક્રમેણ વિશ્વાવસુશ્ચેતિ પરાભવશ્ચ ॥ ॥

૮।૪૨અબ્/ પૂર્વાપરૌ પ્રીતિકરૌ પ્રજાનામેષાં તૃતીયો બહુદોષદોઽબ્દઃ ।
૮।૪૨ય્દ્/ અન્ત્યૌ સમૌ કિન્તુ પરાભવેઽગ્નિઃ શસ્ત્રામયાર્તિઃ દ્વિજગોભયં ચ ॥ ॥

૮।૪૩અબ્/ આદ્યઃ પ્લવંગો નવમે યુગેઽબ્દઃ સ્યાત્ કીલકોઽન્યઃ પરતશ્ચ સૌમ્યઃ ।
૮।૪૩ય્દ્/ સાધારણો રોધકૃર્દિત્યથૈવં શુભપદૌ (અથાબ્દઃ શુભપ્રદૌ) કીલકસૌમ્યસંજ્ઞૌ ॥ ॥

૮।૪૪અબ્/ કષ્ટઃ પ્લવંગો બહુશઃ પ્રજાનાં સાધારણેઽલ્પં જલમીતયશ્ચ ।
૮।૪૪ય્દ્/ યઃ પંચમો રોધકૃદિત્યથાબશ્ચિત્રમ્ જલમ્ તત્ર ચ સસ્યસમ્પત્ ॥ ॥

૮।૪૫અબ્/ ઇન્દ્રાગ્નિદૈવં દશમં યુગં યત્તત્રાદ્યવર્ષં (યત્ તરાદ્યમબ્દં) પરિધાવિસંજ્ઞમ્ ।
૮।૪૫ય્દ્/ પ્રમાદિનં વિક્રમમપિ અતોઽન્યત્ (પ્રમાદ્યથાનન્દમતઃ પરં યત્) ।
સ્યાદ્ રાક્ષસં ચાનલસંજ્ઞિતમ્ ચ ॥ ॥

૮।૪૬અબ્/ પરિધાવિનિ મધ્યદેશનાશો નૃપહાનિઃ જલમલ્પમગ્નિકોપઃ ।
૮।૪૬ય્દ્/ અલસઃ તુ જનઃ પ્રમાદિસંજ્ઞે ડમરં રક્તકપુષ્પબીજનાશઃ ॥ ॥

૮।૪૭અબ્/ વિક્રમઃ (તત્પરઃ) સકલલોકનન્દનો રાક્ષસઃ ક્ષયકરોઽનલઃ તથા ।
૮।૪૭ય્દ્/ ગ્રીષ્મધાન્યજનનોઽત્ર રાક્ષસો વહ્નિકોપમરકપ્રદો ઽનલઃ ॥ ॥

૮।૪૮અબ્/ એકાદશે પિંગલકાલયુક્તસિદ્ધાર્થરૌદ્રાઃ ખલુ દુર્મતિશ્ચ ।
૮।૪૮ય્દ્/ આદ્યે તુ વ્ષૃટિઃ મહતી સચૌરા શ્વાસો હનૂકંપયુતશ્ચ કાસઃ ॥ ॥

૮।૪૯અબ્/ યત્ કાલયુક્તં તદનેકદોષં સિદ્ધાર્થસંજ્ઞે બહવો ગુણાશ્ચ ।
૮।૪૯ય્દ્/ રૌદ્રોઽતિરૌદ્રઃ ક્ષયકૃત્ પ્રદિષ્ટો યો દુર્મતિઃ મધ્યમવૃષ્ટિકૃત્ સઃ ॥ ॥

૮।૫૦અબ્/ ભાગ્યે યુગે દુન્દુભિસંજ્ઞમાદ્યં સસ્યસ્ય વૃદ્ધિં મહતીં કરોતિ ।
૮।૫૦ય્દ્/ અંગારસંજ્ઞં (ઉદ્ગારિસંજ્ઞં) તદનુ ક્ષયાય નરેશ્વરાણાં વિષમા ચ વૃષ્ટિઃ ॥ ॥

૮।૫૧અબ્/ રક્તાક્ષમબ્દં કથિતં તૃતીયં તસ્મિન્ ભયં દંષ્ટ્રિકૃતં ગદાશ્ચ ।
૮।૫૧ય્દ્/ ક્રોધં બહુક્રોધકરં ચતુર્થં રાષ્ટ્રાણિ શૂન્યીકુરુતે વિરોધૈઃ ॥ ॥

૮।૫૨અ ક્ષયમિતિ યુગસ્યાન્ત્યસ્યાન્ત્યં બહુક્ષયકારકં
૮।૫૨બ્ જનયતિ ભયં તદ્વિપ્રાણાં કૃષીબલવૃદ્ધિદમ્ ।
૮।૫૨ય્ ઉપચયકરં વિટ્શૂદ્રાણાં પરસ્વહૃતાં તથા
૮।૫૨દ્ કથિતમખિલં ષષ્ટ્યબ્દે યત્ તદત્ર સમાસતઃ ॥ ॥

૮।૫૩અબ્/ અકલુષાંશુજટિલઃ પૃથુમૂર્તિઃ કુમુદકુન્દકુસુમસ્ફટિકાભઃ ।
૮।૫૩ય્દ્/ ગ્રહહતો ન યદિ સત્પથવર્તી હિતકરો (હતકિરો) ઽમરગુરુઃ મનુજાનામ્ ॥ ॥

sએપરતે અધ્યાય ૯ શુક્રચારાધ્યાયઃ
૯।૧અબ્/ નાગગજૈરાવતવૃષભગોજરદ્ગવમૃગાજદહનાખ્યાઃ ।
૯।૧ય્દ્/ અશ્વિન્યાદ્યાઃ કૈશ્ચિત્ ત્રિભાઃ ક્રમાદ્ વીથયઃ કથિતાઃ ॥ ॥

૯।૨અબ્/ નાગા તુ પવનયામ્યાનલાનિ પૈતામહાત્ ત્રિભાઃ તિસ્રઃ ।
૯।૨ય્દ્/ ગોવીથ્યામશ્વિન્યઃ પૌષ્ણં દ્વે ચાપિ ભદ્રપદે ॥ ॥

૯।૩અબ્/ જારદ્ગવ્યાં શ્રવણાત્ ત્રિભં મૃગાખ્યા ત્રિભં તુ મૈત્રાદ્યમ્ ।
૯।૩ય્દ્/ હસ્તવિશાખાત્વાષ્ટ્રાણિ અજૈત્યષાઢાદ્વયં દહના ॥ ॥

૯।૪અબ્/ તિસ્રઃ તિસ્રઃ તાસાં ક્રમાદુદઙ્મધ્યયામ્યમાર્ગસ્થાઃ ।
૯।૪ય્દ્/ તાસામપિ ઉત્તરમધ્યદક્ષિણેન સ્થિતૈકૈકા (દક્ષિનાવસ્તિતૈકૈકા) ॥ ॥

૯।૫અબ્/ વીથીમાર્ગાન્ અપરે કથયન્તિ યથાસ્થિતાન્ ભમાર્ગસ્ય ।
૯।૫ય્દ્/ નક્ષત્રાણાં તારા યામ્યોત્તરમધ્યમાઃ તદ્વત્ ॥ ॥

૯।૬અબ્/ ઉત્તરમાર્ગો યામ્યાદિ નિગદિતો મધ્યમઃ તુ ભાગ્યાદ્યઃ ।

૯।૬ય્દ્/ દક્ષિણમાર્ગો આષાઢાદિ કૈશ્ચિદેવં કૃવા માર્ગાઃ ॥ ॥

૯।૭અબ્/ જ્યૌતિષં (જ્યોતિસં) આગમશાસ્ત્રં વિપ્રતિપત્તૌ ન યોગ્યમસ્માકમ્ ।
૯।૭ય્દ્/ સ્વયમેવા વિકલ્પયિતું કિન્તુ બહૂનાં મતં વક્ષ્યે ॥ ॥

૯।૮અબ્/ ઉત્તરવીથિષુ શુક્રઃ સુભિક્ષશિવકૃદ્ ગતોઽસ્તમુદયમ્ ચ (વા) ।
૯।૮ય્દ્/ મધ્યાસુ મધ્યફલદઃ કષ્ટફલો દક્ષિણસ્થાસુ ॥ ॥

૯।૯અબ્/ અત્યુત્તમોત્તમોનં સમમધ્યન્યૂનમધમકષ્ટફલમ્ ।
૯।૯ય્દ્/ કષ્ટતરં (તમં) સૌમ્યાદ્યાસુ વીથિષુ યથાક્રમં બ્રૂયાત્ ॥ ॥

૯।૧૦અબ્/ ભરણીપૂર્વં મણ્ડલમ્ ઋક્ષચતુષ્કં સુભિક્ષકરમાદ્યમ્ ।
૯।૧૦ય્દ્/ વંગાંગમહિષબાહ્લિક (વાહ્લિક) કલિંગદેશેષુ ભયજનનમ્ ॥ ॥

૯।૧૧અબ્/ અત્રો ઉદિતમારોહેદ્ ગ્રહોઽપરો યદિ સિતં તતો હન્યાત્ ।
૯।૧૧ય્દ્/ ભદ્રાશ્વશૂરસેનકયૌધેયકકોટિવર્ષનૃપાન્ ॥ ॥

૯।૧૨અબ્/ ભચતુષ્ટયમાર્દ્રાદ્યં દ્વિતીયમમિતાંબુસસ્યસમ્પત્ત્યૈ ।
૯।૧૨ય્દ્/ વિપ્રાણામશુભકરં વિશેષતઃ ક્રૂરચેષ્ટાનામ્ ॥ ॥

૯।૧૩અબ્/ અન્યેનાત્રાક્રાન્તે મ્લેચ્છાટવિકશ્વ (કાશ્વ) જીવિગોમન્તાન્ ।
૯।૧૩ય્દ્/ ગોનર્દનીચશૂદ્રાન્ વૈદેહાંશ્ચાનયઃ સ્પૃશતિ ॥ ॥

૯।૧૪અબ્/ વિચરન્ મઘાદિપંચકમુદિતઃ સસ્યપ્રણાશકૃત્શુક્રઃ ।
૯।૧૪ય્દ્/ ક્ષુત્તસ્કરભયજનનો નીચોન્નતિસંકરકરશ્ચ ॥ ॥

૯।૧૫અબ્/ પિત્ર્યાદ્યેઽવષ્ટંભો હન્ત્યન્યેનાવિકાન્ શબરશૂદ્રાન્ ।
૯।૧૫ય્દ્/ પુણ્ડ્રાપરાન્ત્યશૂલિકવનવાસિદ્રવિડસામુદ્રાન્ ॥ ॥

૯।૧૬અબ્/ સ્વાત્યાદ્યં ભત્રિતયં મણ્ડલમેતગતુર્થમભયકરમ્ ।
૯।૧૬ય્દ્/ બ્રહ્મક્ષત્રસુભિક્ષાભિવૃદ્ધ્યે મિત્રભેદાય ॥ ॥

૯।૧૭અબ્/ અત્રાક્રાન્તે મૃત્યુઃ કિરાતભર્તુઃપિનષ્ટિ ચૈક્ષ્વાકૂન્ ।
૯।૧૭ય્દ્/ પ્રત્યન્તાવન્તિપુલિન્દતંગણાન્ શૂરસેનાંશ્ચ ॥ ॥

૯।૧૮અબ્/ જ્યેષ્ઠાદ્યં પંચર્ક્ષં ક્ષુત્તસ્કરરોગદમ્ પ્રબાધયતે ।
૯।૧૮ય્દ્/ કાશ્મીરાશ્મકમત્સ્યાન્ સચારુદેવીન્ અવન્તીંશ્ચ ॥ ॥

૯।૧૯અબ્/ અત્રારોહેદ્ દ્રવિડાભીરાંબષ્ઠ (આરોહેડત્રાભીરાન્ દ્રવિડાંબષ્ઠ) ત્રિગર્તસૌરાષ્ટ્રાન્ ।
૯।૧૯ય્દ્/ નાશયન્તિ સિન્ધુસૌવીરકાંશ્ચ કાશીશ્વરસ્ય વધઃ ॥ ॥

૯।૨૦અબ્/ ષષ્ઠં ષણ્નક્ષત્રં શુભમેતન્ મણ્ડલં ધનિષ્ઠાદ્યમ્ ।
૯।૨૦ચ્દ્/ ભૂરિધનગોકુલાકુલમનલ્પધાન્યં ક્વચિત્ સભયમ્ ॥ ॥

૯।૨૧અબ્/ અત્રારોહેચ્ (આરોહે) શૂલિકગાન્ધારાવન્તયઃ પ્રપીડ્યન્તે ।
૯।૨૧ચ્દ્/ વૈદેહવધઃ પ્રત્યન્તયવનશકદાસપરિવૃદ્ધિઃ ॥ ॥

૯।૨૨અબ્/ અપરસ્યાં સ્વાત્યાદ્યં જ્યેષ્ઠાદ્યં ચાપિ મણ્ડલં શુભદમ્ ।
૯।૨૨ચ્દ્/ પિત્ર્યાદ્યં પૂર્વસ્યાં શેષાણિ યથોક્તફલદાનિ ॥ ॥

૯।૨૩અબ્/ દૃષ્ટોઽનસ્તમિતે (ઽનસ્તગતેઽર્કે) ભયકૃત્ ક્ષુદ્રોગકૃત્ સમસ્તમહઃ ।
૯।૨૩ચ્દ્/ અર્ધદિવસે (દિવસં) ચ સેન્દુઃ નૃપબલપુરભેદકૃત્શુક્રઃ ॥ ॥

૯।૨૪અબ્/ ભિન્દન્ ગતોઽનલર્ક્ષં કૂલાતિક્રાન્તવારિવાહાભિઃ ।
૯।૨૪ચ્દ્/ અવ્યક્તતુંગનિમ્ના સમા સરિદ્ભિઃ ભવતિ ધાત્રી ॥ ॥

૯।૨૫અબ્/ પ્રાજાપત્યે શકટે ભિન્ને કૃત્વેવ પાતકં વસુધા ।
૯।૨૫ચ્દ્/ કેશાસ્થિશકલશબલા કાપાલમિવ વ્રતં ધત્તે ॥ ॥

૯।૨૬અબ્/ સૌમ્યોપગતો રસસસ્યસંક્ષયાયોશનાઃ સમુદ્દિષ્ટઃ ।
૯।૨૬ચ્દ્/ આર્દ્રાગતઃ તુ કોશલકલિંગહા સલિલનિકરકરઃ ॥ ॥

૯।૨૭અબ્/ અશ્મકવૈદર્ભાણાં પુનઃ વસુસ્થે સિતે મહાનનયઃ ।
૯।૨૭ચ્દ્/ પુષ્યે પુષ્ટા વૃષ્ટિઃ વિદ્યાધરગણવિમર્દશ્ચ ॥ ॥

૯।૨૮અબ્/ આશ્લેષાસુ ભુજંગમદારુણપીડાવહશ્ચરન્ શુક્રઃ ।
૯।૨૮ચ્દ્/ ભિન્દન્ મઘાં મહામાત્રદોષકૃદ્ ભૂરિવૃષ્ટિકરઃ ॥ ॥

૯।૨૯અબ્/ ભાગ્યે શબરપુલિન્દપ્રધ્વંસકરોઽંબુનિવહમોક્ષાય ।
૯।૨૯ચ્દ્/ આર્યમ્ણે કુરુજાંગલપાંચાલઘ્નઃ સલિલદાયી ॥ ॥

૯।૩૦અબ્/ કૌરવચિત્રકરાણાં હસ્તે પીડા જલસ્ય ચ નિરોધઃ ।
૯।૩૦ચ્દ્/ કૂપકૃદણ્ડજપીડા ચિત્રાસ્થે શોભના વૃષ્ટિઃ ॥ ॥

૯।૩૧અબ્/ સ્વાતૌ પ્રભૂતવૃષ્ટિઃ દૂતવણિઙ્નાવિકાન્ સ્પૃશત્યનયઃ ।
૯।૩૧ચ્દ્/ ઐન્દ્રાગ્નેઽપિ સુવૃષ્ટિઃ વણિજાં ચ ભયં વિજાનીયાત્ ॥ ॥

૯।૩૨અબ્/ મૈત્રે ક્ષત્રવિરોધો જ્યેષ્ઠાયાં ક્ષત્રમુખ્યસન્તાપઃ ।
૯।૩૨ચ્દ્/ મૌલિકભિષજામ્ મૂલે ત્રિષ્વપિ ચૈતેષ્વનાવૃષ્ટિઃ ॥ ॥

૯।૩૩અબ્/ આપ્યે સલિલજપીડા વિશ્વેશે વ્યાધયઃ પ્રકુપ્યન્તિ ।
૯।૩૩ચ્દ્/ શ્રવણે શ્રવણવ્યાધિઃ પાખણ્ડિ (પાષણ્ડિ) ભયં ધનિષ્ઠાસુ ॥ ॥

૯|૩૪અબ્/ શતભિષજિ શૌણ્ડિકાનામજૈકભે (અજૈકપે) દ્યૂતજીવિનાં પીડાં (પીડા) ।
૯|૩૪ય્દ્/ કુરુપાંચાલાનામપિ કરોતિ ચાસ્મિન્ સિતઃ સલિલમ્ ॥ ॥

૯|૩૫અબ્/ આહિર્બુધ્નિે ફલમૂલતાપકૃદ્ યાયિનામ્ ચ રેવત્યામ્ ।
૯|૩૫ય્દ્/ અશ્વિન્યાં હયપાનાં યામ્યે તુ કિરાતયવનાનામ્ ॥ ॥

૯|૩૬અબ્/ ચતુર્દશીં પંચદશીં (ચતુર્દશે પંચદશે તથાષ્ટમે)-
તમિસ્રપક્ષસ્ય તિથિં (તિથૌ) ભૃગોઃ સુતઃ ।
૯|૩૬ય્દ્/ યદા વ્રજેદ્ દર્શનમસ્તમેતિ વા તદા મહી વારિમયીવ લક્ષ્યતે ॥ ॥

૯|૩૭અબ્/ ગુરુઃ ભૃગુશ્ચાપરપૂર્વકાષ્ઠયોઃ પરસ્પરં સપ્તમરાશિગૌ યદા ।
૯|૩૭ય્દ્/ તદા પ્રજા રુગ્ભયશોકપીડિતા ન વારિ પશ્યન્તિ પુરન્દરોજ્ઝિતમ્ ॥ ॥

૯|૩૮અબ્/ યદા સ્થિતા જીવબુધારસૂર્યજાઃ સિતસ્ય સર્વેઽગ્રપથાનુવર્તિનઃ ।
૯|૩૮ય્દ્/ નૃનાગવિદ્યાધરસંગરાઃ તદા ભવન્તિ વાતાશ્ચ સમુચ્છ્રિતાન્તકાઃ ॥ ॥

૯|૩૯અબ્/ ન મિત્રભાવે સુહૃદો વ્યવસ્થિતાઃ ક્રિયાસુ સમ્યગ્ ન રતા દ્વિજાતયઃ ।
૯|૩૯ય્દ્/ ન ચાલ્પમપિ અંબુ દદાતિ વાસવો ભિનત્તિ વજ્રેણ શિરાંસિ ભૂભૃતામ્ ॥ ॥

૯|૪૦અબ્/ શનૈશ્ચરે મ્લેચ્છવિડાલકુઞ્જરાઃ ખરા મહિષ્યોઽસિતધાન્યશૂકરાઃ ।
૯|૪૦ય્દ્/ પુલિન્દશૂદ્રાશ્ચ સદક્ષિણાપથાઃ ક્ષયં વ્રજન્ત્યક્ષિમરુદ્ગદૌદ્ભવૈઃ ॥ ॥

૯|૪૧અબ્/ નિહન્તિ શુક્રઃ ક્ષિતિજેઽગ્રતઃ પ્રજાં (પ્રજા) હુતાશશસ્ત્રક્ષુદવૃષ્ટિતસ્કરૈઃ ।
૯|૪૧ય્દ્/ ચરાચરં વ્યક્તમથૌત્તરાપથં દિશોઽગ્નિવિદ્યુદ્રજસા ચ પીડયેત્ ॥ ॥

૯|૪૨અબ્/ બૃહસ્પતૌ હન્તિ પુરઃસ્થિતે સિતઃ સિતં સમસ્તં દ્વિજગોસુરાલયાન્ ।
૯|૪૨ય્દ્/ દિશં ચ પૂર્વાં કરકાસૃજોઽંબુદા ગલે ગદા ભૂરિ ભવેગ શારદમ્ ॥ ॥

૯|૪૩અ સૌમ્યોઽસ્તોદયોઃ પુરો ભૃગુસુતસ્યાવસ્થિતઃ તોયકૃદ્
૯|૪૩બ્ રોગાન્ પિત્તજકામલાંશ (કામલાં કામલાંશોઃ કામલાઃ) ચ કુરુતે પુષ્ણાતિ ચ ગ્રૈષ્મિકાન્ (ગ્રૈષ્મિકં) ।
૯|૪૩ય્ હન્યાત્ પ્રવ્રજિતાગ્નિહોત્રિકભિષગ્રંગોપજીવ્યાન્ હયાન્
૯|૪૩દ્ વૈશ્યાન્ ગાઃ સહ વાહનૈઃ નરપતીન્ પીતાનિ પશ્ચાદ્ દિશમ્ ॥ ॥

૯|૪૪અ શિખિભયમનલાભે શસ્ત્રકોપશ્ચ રક્તે
૯|૪૪બ્ કનકનિકષગૌરે વ્યાધયો દૈત્યપૂજ્યે ।
૯|૪૪ય્ હરિતકપિલરૂપે શ્વાસકાસપ્રકોપઃ
૯|૪૪દ્ પતતિ ન સલિલં ખાદ્ ભસ્મરૂક્ષાસિતાભે ॥ ॥

૯।૪૫અબ્/ દધિકુમુદશશાંકાન્તિભૃત્ સ્ફુટવિકસત્કિરણો બૃહત્તનુઃ ।
૯।૪૫ચ્દ્/ સુગતિઃ અવિકૃતો જયાન્વિતઃ કૃતયુગરૂપકરઃ સિતાહ્વયઃ ॥ ॥

sએપરતે અધ્યાય ૧૦ શનૈશ્ચરચારાધ્યાયઃ
૧૦।૧અબ્/ શ્રવણાનિલહસ્તાર્દ્રાભરણીભાગ્યોપગઃ સુતોઽર્કસ્ય ।
૧૦।૧ચ્દ્/ પ્રચુરસલિલોપગૂઢાં કરોતિ ધાત્રીં યદિ સ્નિગ્ધઃ ॥ ॥

૧૦।૨અબ્/ અહિવરુણપુરન્દરદૈવતેષુ સુક્ષેમકૃન્ ન ચાતિ જલમ્ ।
૧૦।૨ચ્દ્/ ક્ષુત્શસ્ત્રાવૃષ્ટિકરો મૂલે પ્રત્યેકમપિ વક્ષ્યે ॥ ॥

૧૦।૩અબ્/ તુરગતુરગોપચારકકવિવૈદ્યામાત્યહાર્કજોઽશ્વિગતઃ ।
૧૦।૩ચ્દ્/ યામ્યે નર્તકવાદકગેયજ્ઞાક્ષુદ્રનૈકૃતિકાન્ ॥ ॥

૧૦।૪અબ્/ બહુલાસ્થે પીડ્યન્તે સૌરેઽગ્ન્યુપજીવિનશ્ચમૂપાશ્ચ ।
૧૦।૪ચ્દ્/ રોહિણ્યાં કોશલમદ્રકાશિપંચાલશાકટિકાઃ ॥ ॥

૧૦।૫અબ્/ મૃગશિરસિ વત્સયાજકયજમાનાર્યજનમધ્યદેશાઃ ચ ।
૧૦।૫ચ્દ્/ રૌદ્રસ્થે પારતરમઠાસ્તૈલિકરજક (પારતરાતૈલિકરજક) ચૌરાશ્ચ ॥ ॥

૧૦।૬અબ્/ આદિત્યે પાંચનદપ્રત્યન્તસુરાષ્ટ્રસિન્ધુસૌવીરાઃ ।
૧૦।૬ચ્દ્/ પુષ્યે ઘાણ્ઠિકઘૌષિકયવનવણિક્કિતવકુસુમાનિ ॥ ॥

૧૦।૭અબ્/ સાર્પે જલરુહસર્પાઃ પિત્ર્યે બાહ્લીકચીનગાન્ધારાઃ ।
૧૦।૭ચ્દ્/ શૂલિકપારતવૈશ્યાઃ કોષ્ઠાગારાણિ વણિજશ્ચ ॥ ॥

૧૦।૮અબ્/ ભાગ્યે રસવિક્રયિણઃ પણ્યસ્ત્રીકન્યકામહારાષ્ટ્રાઃ ।
૧૦।૮ચ્દ્/ આર્યમણે નૃપગુડલવણભિક્ષુકાંબૂનિ તક્ષશિલા ॥ ॥

૧૦।૯અબ્/ હસ્તે નાપિતચાક્રિકચૌરભિષક્સૂચિકા દ્વિપગ્રાહાઃ ।
૧૦।૯ચ્દ્/ બન્ધક્યઃ કૌશલકા માલાકારાશ્ચ પીડ્યન્તે ॥ ॥

૧૦।૧૦અબ્/ ચિત્રાસ્થે પ્રમદાજનલેખકચિત્રજ્ઞાચિત્રભાણ્ડાનિ ।
૧૦।૧૦ચ્દ્/ સ્વાતૌ માગધચરદૂતસૂતપોતપ્લવનટાદ્યાઃ ॥ ॥

૧૦।૧૧અબ્/ ઐન્દ્રાગ્નાખ્યે ત્રૈગર્તચીનકૌલૂતકુંકુમં લાક્ષા ।
૧૦।૧૧ચ્દ્/ સસ્યાનિ અથ માઞ્જિષ્ઠં કૌસુંભં ચ ક્ષયં યાતિ ॥ ॥

૧૦।૧૨અબ્/ મૈત્રે કુલૂતતંગણખસકાશ્મીરાઃ સમન્ત્રિચક્રચરાઃ ।
૧૦।૧૨ચ્દ્/ ઉપતાપં યાન્તિ ચ ઘાણ્ટિકા વિભેદશ્ચ મિત્રાણામ્ ॥ ॥

૧૦।૧૩અબ્/ જ્યેષ્ઠાસુ નૃપપુરોહિતનૃપસત્કૃતશૂરગણકુલશ્રેણ્યઃ ।

૧૦।૧૩ય્દ્/ મૂલે તુ કાશિકોશલપાંચાલફલૌષધીયોધાઃ ॥ ॥

૧૦।૧૪અબ્/ આપ્યે અંગવંગકૌશલગિરિવ્રજા મગધપુણ્ડ્રમિથિલાશ્ચ ।
૧૦।૧૪ય્દ્/ ઉપતાપં યાન્તિ જના વસન્તિ યે તામ્રલિપ્ત્યાં ચ ॥ ॥

૧૦।૧૫અબ્/ વિશ્વેશ્વરેઽર્કપુત્રશ્ચરન્ દશાર્ણાન્ નિહન્તિ યવનાંશ્ચ ।
૧૦।૧૫ય્દ્/ ઉજ્જયિનીં શબરાન્ પારિયાત્રિકાન્ કુન્તિભોજાંશ્ચ ॥ ॥

૧૦।૧૬અબ્/ શ્રવણે રાજાધિકૃતાન્ વિપ્રાગ્ર્યભિષક્પુરોહિતકલિંગાન્ ।
૨૬।૮ય્ તદ્વદ્ દેશા વર્ષમાસા દિશશ્ચ
૨૬।૮દ્ શેષદ્રવ્યાણિ આત્મરૂપસ્થિતાનિ ॥ ॥

૨૬।૯અબ્/ હૈમી પ્રધાના રજતેન મધ્યા તયોઃ અલાભે ખદિરેણ કાર્યા ।
૨૬।૯ય્દ્/ વિદ્ધઃ પુમાન્ યેન શરેણ સા વા તુલા પ્રમાણેન ભવેદ્ વિતસ્તિઃ ॥ ॥

૨૬।૧૦અબ્/ હીનસ્ય નાશોઽભ્યધિકસ્ય વૃદ્ધિઃ તુલ્યેન તુલ્યં તુલિતં તુલાયામ્ ।
૨૬।૧૦ય્દ્/ એતત્તુલાકોશરહસ્યમુક્તં પ્રાજેશયોગેઽપિ નરો વિદધ્યાત્ ॥ ॥

૨૬।૧૧અ સ્વાતાવષાઢાસ્વથ રોહિણીષુ
૨૬।૧૧બ્ પાપગ્રહા યોગગતા ન શસ્તાઃ ।
૨૬।૧૧ય્ ગ્રાહ્યં તુ યોગદ્વયમપિ ઉપોષ્ય
૨૬।૧૧દ્ યદાધિમાસો દ્વિગુણીકરોતિ ॥ ॥

૨૬।૧૨અ ત્રયોઽપિ યોગાઃ સદૃશાઃ ફલેન
૨૬।૧૨બ્ યદા તદા વાચ્યમસંશયેન ।
૨૬।૧૨ય્ વિપર્યયે યત્ત્વિહ રોહિણીજં
૨૬।૧૨દ્ ફલં તદેવાભ્યધિકં નિગદ્યમ્ ॥ ॥

૨૬।૧૩અબ્/ નિષ્પત્તિઃ અગ્નિકોપો વૃષ્ટિઃ મન્દાથ મધ્યમા શ્રેષ્ઠા ।
૨૬।૧૩ય્દ્/ બહુજલપવના પુષ્ટા શુભા ચ પૂર્વાદિભિઃ પવનૈઃ ॥ ॥

૨૬।૧૪અબ્/ વૃત્તાયામાષાઢ્યામ્ કૃષ્ણચતુર્થ્યામજૈકપાદર્ક્ષે ।

૨૬।૧૪ચ્દ્/ યદિ વર્ષતિ પર્જન્યઃ પ્રાવૃટ્ શસ્તા ન ચેન્ ન તતઃ ॥ ॥

૨૬।૧૫અબ્/ આષાઢ્યામ્ પૌર્ણમાસ્યાં તુ યદ્યૈશાનોઽનિલો ભવેત્ ।
૨૬।૧૫ચ્દ્/ અસ્તં ગચ્છતિ તીક્ષ્ણાંશૌ સસ્યસમ્પત્તિરુત્તમા ॥ ॥

sએપરતે અધ્યાય ૨૭ વાતચક્રાધ્યાયઃ
૨૭।૧અબ્/ આષાઢપૌર્ણમાસ્યાં તુ યદ્યૈશાનોઽનિલો ભવેત્ ।
૨૭।૧ચ્દ્/ અસ્તં ગચ્છતિ તીક્ષ્ણાંશૌ સસ્ય સમ્પત્તિરુત્તમા ॥ ॥

૨૭।૨અ પૂર્વઃ પૂર્વસમુદ્રવીચિશિખરપ્રસ્ફાલનાઘૂર્ણિતશ્
૨૭।૨બ્ ચન્દ્રાર્કાંશુસટાકલાપકલિતો (સટાભિઘાતકલિતો) વાયુઃ યદાકાશતઃ ।
૨૭।૨ચ્ નૈકાન્તસ્થિતનીલમેઘપટલા (પટલાં) શારદ્યસંવર્ધિતા (સંવર્ધિતાં)
૨૭।૨દ્ વાસન્તૌત્કટસસ્યમણ્ડિતતલા સર્વા મહી શોભતે (તલાં વિદ્યાત્ તદા મેદિનીં) ॥ ॥

૨૭।૩અ યદા વહ્નૌ (અગ્નેયો) વાયુઃ વહતિ ગગને ખણ્ડિતતનુઃ (મલયશિખરાસ્ફાલનપટુઃ)
૨૭।૩બ્ પ્લવત્યસ્મિન્ યોગે ભગવતિ પતંગે પ્રવસતિ ।
૨૭।૩ચ્ તદા નિત્યોદ્દીપ્તા જ્વલનશિખરાલિંગિતતલા
૨૭।૩દ્ સ્વગાત્રૌચ્છ્વાસૈઃ (ઉષ્મોચ્છાસૈઃ) વમતિ વસુધા ભસ્મનિકરમ્ ॥ ॥

૨૭।૪અ તાલીપત્રલતાવિતાનતરુભિઃ શાખામૃગાન્નર્તયન્
૨૭।૪બ્ યોગેઽસ્મિન્ પ્લવતિ ધ્વનિઃ સપરુષો (ધ્વનન્સુપરુષો) વાયુઃ યદા દક્ષિણઃ ।
૨૭।૪ચ્ તદ્વદ્ યોગસમુત્થિતઃ તુ (સર્વોદ્યોગસમુન્નતાશ્ચ) ગજવત્તાલાંકુશૈઃ ઘટ્ટિતાઃ
૨૭।૪દ્ કીનાશા ઇવ મન્દવારિકણિકા (કણિકાન્) મુંચન્તિ મેઘાઃ તદા ॥ ॥

૨૭।૫અ સૂક્ષ્મૈલાલવલીલવંગનિચયાન્ વ્યાઘૂર્ણયન્ સાગરે
૨૭।૫બ્ ભાનોઃ અસ્તમયે પ્લવત્યવિરતો વાયુઃ યદા નૈરૃતઃ
૨૭।૫ચ્ ક્ષુત્તૃષ્ણાવૃત (તૃષ્ણામૃત) માનુષાસ્થિશકલપ્રસ્તારભારચ્છદા
૨૭।૫દ્ મત્તા પ્રેતવધૂરિવોગ્રચપલા ભૂમિઃ તદા લક્ષ્યતે ॥ ॥

૨૭।૬અ યદા રેણૂત્પાતૈઃ પ્રવિચલસટાટોપચપલઃ (પ્રવિકટસટાટોપચપલઃ)
૨૭।૬બ્ પ્રવાતઃ પશ્ચાગેદ્ (પશ્ચાર્ધે) દિનકરકરાપાતસમયે ।
૨૭।૬ચ્ તદા સસ્યોપેતા પ્રવરનિકરાબદ્ધસમરા (પ્રવરનૃપ્રાબદ્ધસમરા)
૨૭।૬દ્ ક્ષિતિઃ સ્થાનસ્થાનેષ્વ (ધરા સ્થાને સ્થાનેષ્વ્) અવિરતવસામાંસરુધિરા ॥ ॥

૨૭।૭અ આષાઢીપર્વકાલે યદિ કિરણપતેઃ અસ્તકાલોપપત્તૌ
૨૭।૭બ્ વાયવ્યો વૃદ્ધવેગઃ પવનઘનવપુઃ પન્નગાર્દ્ધાનુકારિ (પ્લવતિ ઘનરિપુઃ પન્નગાદાનુકારી) ।
૨૭।૭ચ્ જાનીયાદ્ વારિધારાપ્રમુદિતમુદિતામુક્ત (મુદિતાં મુક્ત) મણ્ડૂકકણ્ઠાં

૨૭।૭દ્ સસ્યૌદ્ભાસએકચિહ્નાં સુખબહુલતયા ભાગ્યસેનામિવૌર્વીમ્ ॥ ॥

૨૭।૮અ મેરુગ્રસ્તમરીચિમણ્ડલતલે ગ્રીષ્માવસાને રવૌ
૨૭।૮બ્ વાત્યામોદિકદંબગન્ધસુરભિઃ વાયુઃ યદા ચોત્તરઃ ।
૨૭।૮ય્ વિદ્યુદ્ભ્રાન્તિસમસ્તકાન્તિકલના મત્તાઃ તદા તોયદા
૨૭।૮દ્ ઉન્મત્તા ઇવ નષ્ટચન્દ્રકિરણાં ગાં પૂરયન્ત્યંબુભિઃ ॥ ॥

૨૭।૯અબ્/ વૃત્તાયામાષાઢ્યાં કૃષ્ણચતુર્થ્યામજૈકપાદર્ક્ષે
(ઐશાનો યદિ શીતલોઽમરગણૈઃ સંસેવ્યમાનો ભવેત્) ।
૨૭।૯ય્દ્/ યદિ વર્ષતિ પર્જન્યઃ પ્રાવૃત્ શસ્તા ન ચેન્ ન તદા
(પુન્નાગાગુરુપારિજાતસુરભિર્વાયુઃ પ્રચણ્ડધ્વનિઃ ॥ ॥

૨૭।૧૦અબ્/ નષ્ટચન્દ્રાર્કકિરનં નષ્ટતારં ન ચેન્ નભઃ (આપૂર્ણોદકયૌવના વસુમતી સમ્પન્નસસ્યાકુલા) ।
૨૭।૧૦ય્દ્/ ન તાં ભદ્રપદાં મન્યે યત્ર દેવો ન વર્ષતિ
(ધર્મિષ્ઠાઃ પ્રણતારયો નૃપતયો રક્ષન્તિ વર્ણાં તદા) ॥ ॥

sએપરતે અધ્યાય ૨૮ સદ્યોવર્ષણાધ્યાયઃ
૨૮।૧અ વર્ષાપ્રશ્ને સલિલનિલયં રાશિમાશ્રિત્ય ચન્દ્રો
૨૮।૧બ્ લગ્નં યાતો ભવતિ યદિ વા કેન્દ્રગઃ શુક્લપક્ષે ।
૨૮।૧ય્ સૌમ્યૈઃ દૃષ્ટઃ પ્રચુરમુદકં પાપદૃષ્ટોઽલ્પમંભઃ
૨૮।૧દ્ પ્રાવૃટ્કાલે સૃજતિ ન ચિરાત્ચન્દ્રવદ્ ભાર્ગવોઽપિ ॥ ॥

૨૮।૨અ આર્દ્રં દ્રવ્યં સ્પૃશતિ યદિ વા વારિ તત્સંજ્ઞકં વા
૨૮।૨બ્ તોયાસન્નો ભવતિ યદિ વા તોયકાર્યોન્મુખો વા ।
૨૮।૨ય્ પ્રષ્ટા વાચ્યઃ સલિલમચિરાદસ્તિ નિઃસંશયેન
૨૮।૨દ્ પૃચ્છાકાલે સલિલમિતિ વા શ્રૂયતે યત્ર શબ્દઃ ॥ ॥

૨૮।૩અ ઉદયશિખરિસંસ્થો દુર્નિરીક્ષ્યોઽતિદીપ્ત્યા
૨૮।૩બ્ દ્રુતકનકનિકાશઃ સ્નિગ્ધવૈદૂર્યકાન્તિઃ ।
૨૮।૩ય્ તદહનિ કુરુતેઽંભઃ તોયકાલે વિવસ્વાન્
૨૮।૩દ્ પ્રતપતિ યદિ ચૌચ્ચૈઃ ખં ગતોઽતીવ તીક્ષ્ણમ્ ॥ ॥

૨૮।૪અ વિરસમુદકં ગોનેત્રાભં વિયદ્વિમલા દિશો
૨૮।૪બ્ લવણવિકૃતિઃ કાકાણ્ડાભં યદા ચ ભવેન્નભઃ ।
૨૮।૪ય્ પવનવિગમઃ પોપ્લૂયન્તે ઝષાઃ સ્થલગામિનો
૨૮।૪દ્ રસનમસકૃત્મણ્ડૂકાનાં જલાગમહેતવઃ ॥ ॥

૨૮।૫અ માર્જારો ભૃશમવનિં નખૈઃ લિક્ખન્તો (લિખન્તે)

૨૮।૫બ્ લોહાનાં મલનિચયઃ સવિસ્રગન્ધઃ ।

૨૮।૫ય્ રથ્યાયાં શિશુરચિતાઃ (શિશુનિચિતાઃ) ચ સેતુબન્ધાઃ ।

૨૮।૫દ્ સમ્પ્રાપ્તં જલમચિરાન્નિવેદયન્તિ ॥ ॥

૨૮।૬અબ્/ ગિરયોઽઞ્જનચૂર્ણસન્નિભા (અઞ્જનપુઞ્જસન્નિભા) યદિ વા બાષ્પનિરુદ્ધકન્દરાઃ ।

૨૮।૬ય્દ્/ કૃકવાકુવિલોચનૌપમાઃ પરિવેષાઃ શશિનશ્ચ વૃષ્ટિદાઃ ॥ ॥

૨૮।૭અ વિના ઉપઘાતેન પિપીલિકાનામ્

૨૮।૭બ્ અણ્ડૌપસંક્રાન્તિઃ અહિવ્યવાયઃ ।

૨૮।૭ય્ દ્રુમાવરોહઃ (દ્રુમાધિરોહઃ) ચ ભુજંગમાનાં

૨૮।૭દ્ વૃષ્ટેઃ નિમિત્તાનિ ગવાં પ્લુતં ચ ॥ ॥

૨૮।૮અ તરુશિખરઓપગતાઃ કૃકલાસા

૨૮।૮બ્ ગગનતલસ્થિતદૃષ્ટિનિપાતાઃ ।

૨૮।૮ય્ યદિ ચ ગવાં રવિવીક્ષણમૂર્ધ્વં

૨૮।૮દ્ નિપતતિ વારિ તદા ન ચિરેણ ॥ ॥

૨૮।૯અબ્/ નૈચ્છન્તિ વિનિર્ગમં ગૃહાદ્ ધુન્વન્તિ શ્રવણાન્ ખુરાન્ અપિ ।

૨૮।૯ય્દ્/ પશવઃ પશુવગ કુક્કુરા (કુર્કુરા) યદ્યંભઃ પતતીતિ નિર્દિશેત્ ॥ ॥

૨૮।૧૦અ યદા સ્થિતા ગૃહપટલેષુ કુક્કુરા (કુર્કુરા)

૨૮।૧૦બ્ રુદન્તિ (ભવન્તિ) વા યદિ વિતતં વિયત્મુખાઃ (દિવોન્મુખાઃ) ।

૨૮।૧૦ય્ દિવા તડિદ્ યદિ ચ પિનાકિદિગ્ભવા

૨૮।૧૦દ્ તદા ક્ષમા ભવતિ સમૈવ વારિણા (સ આતોવારોંઆ) ॥ ॥

૨૮।૧૧અ શુકકપોતવિલોચનસન્નિભો

૨૮।૧૧બ્ મધુનિભશ્ચ યદા હિમદીધિતિઃ ।

૨૮।૧૧ય્ પ્રતિશશી ચ યદા દિવિ રાજતે

૨૮।૧૧દ્ પતતિ વારિ તદા ન ચિરેણ ચ (ચિરાદ્ દિવઃ) ॥ ॥

૨૮।૧૨અ સ્તનિતં નિશિ વિદ્યુતો દિવા

૨૮।૧૨બ્ રુધિરનિભા યદિ દણ્ડવત્સ્થિતાઃ ।

૨૮।૧૨ય્ પવનઃ પુરતશ્ચ શીતલો

૨૮।૧૨દ્ યદિ સલિલસ્ય તદાઽઽગમો ભવેત્ ॥ ॥

૨૮।૧૩અ વલ્લીનાં ગગનતલૌન્મુખાઃ પ્રવાલાઃ

૨૮।૧૩બ્ સ્નાયન્તે યદિ જલપાંશુભિઃ વિહંગાઃ ।
૨૮।૧૩ય્ સેવન્તે યદિ ચ સરીસૃપાઃ તૃણાગ્રાણ્ય્-
૨૮।૧૩દ્ આસન્નો ભવતિ તદા જલસ્ય પાતઃ ।
૨૮।૧૪અ મયૂરશુકચાષચાતકસમાનવર્ણા યદા
૨૮।૧૪બ્ જપાકુસુમપંકજદ્યુતિમુષશ્ચ સન્ધ્યાઘનાઃ ।
૨૮।૧૪ય્ જલોર્મિનગનક્રકચ્છપવરાહમીનોપમાઃ
૨૮।૧૪દ્ પ્રભૂતપુટસંચયા ન તુ ચિરેણ યચ્છન્ત્યપઃ ॥ ॥

૨૮।૧૫અ પર્યન્તેષુ સુધાશશાંકધવલા મધ્યેઽઞ્જનાલિત્વિષઃ
૨૮।૧૫બ્ સ્નિગ્ધા નૈકપુટાઃ ક્ષરજ્જલકણાઃ સોપાનવિચ્છેદિનઃ ।
૨૮।૧૫ય્ માહેન્દ્રીપ્રભવાઃ પ્રયાન્ત્યપરતઃ પ્રાગ્ વા અંબુપાશૌદ્ભવા
૨૮।૧૫દ્ યે તે વારિમુચઃ ત્યજન્તિ ન ચિરાદંભઃ પ્રભૂતં ભુવિ ॥ ॥

૨૮।૧૬અબ્/ શક્રચાપપરિઘપ્રતિસૂર્યા રોહિતોઽથ તડિતઃ પરિવેષઃ ।
૨૮।૧૬ય્દ્/ ઉદ્ગમાસ્તમયે યદિ ભાનોઃ આદિશેત્ પ્રચુરમંબુ તદાશુ ॥ ॥

૨૮।૧૭અ યદિ તિત્તિરપત્રનિભં ગગનં
૨૮।૧૭બ્ મુદિતાઃ પ્રવદન્તિ ચ પક્ષિગણાઃ ।
૨૮।૧૭ય્ ઉદયાસ્તમયે સવિતુઃ દ્યુનિશં
૨૮।૧૭દ્ વિસૃજન્તિ ઘના ન ચિરેણ જલમ્ ॥ ॥

૨૮।૧૮અ યદ્યમોઘકિરણાઃ સહસ્રગોઃ
૨૮।૧૮બ્ અસ્તભૂધરકરા ઇવૌચ્છ્રિતાઃ ।
૨૮।૧૮ય્ ભૂમં ચ રસતે યદાંબુદઃ
૨૮।૧૮દ્ તન્મહદ્ ભવતિ વૃષ્ટિલક્ષણં ॥ ॥

૨૮।૧૯અબ્/ પ્રાવૃષિ શીતકરો ભૃગુપુત્રાત્ સપ્તમરાશિગતઃ શુભદૃષ્ટઃ ।
૨૮।૧૯ય્દ્/ સૂર્યસુતાન્ નવપંચમગો વા સપ્તમગશ્ચ જલાઽઽગમનાય ॥ ॥

૨૮।૨૦અબ્/ પ્રાયો ગ્રહાણામુદયાસ્તકાલે સમાગમે મણ્ડલસંક્રમે ચ ।
૨૮।૨૦ય્દ્/ પક્ષક્ષયે તીક્ષ્ણકરાયનાન્તે વૃષ્ટિઃ ગતેઽર્કે નિયમેન ચાર્દ્રામ્ ॥ ॥

૨૮।૨૧અબ્/ સમાગમે પતતિ જલં જ્ઞશુક્રયોઃ જ્ઞજીવયોઃ ગુરુસિતયોશ્ચ સંગમે ।
૨૮।૨૧ય્દ્/ યમારયોઃ પવનહુતાશજં ભયં હ્યદૃષ્ટયોઃ અસહિતયોશ્ચ સદ્ગ્રહૈઃ ॥ ॥

૨૮।૨૨અબ્/ અગ્રતઃ પૃષ્ઠતો વાપિ ગ્રહાઃ સૂર્યાવલંબિનઃ ।
૨૮।૨૨ય્દ્/ યદા તદા પ્રકુર્વન્તિ મહીમેકાર્ણવામિવ ॥ ॥

૨૮।૨૩અબ્/ પ્રવિશતિ યદિ ખદ્યોતો જલદસમીપેષુ રજનીષુ ।
૨૮।૨૩ય્દ્/ કેદારપૂરમધિકં વર્ષતિ દેવઃ તદા ન ચિરાત્ ॥ ॥

૨૮।૨૪અબ્/ વર્ષત્યપિ રટતિ યદા ગોમાયુશ્ચ પ્રદોષવેલાયામ્ ।
૨૮।૨૪ય્દ્/ સપ્તાહં દુર્દિનમપિ તદા પયો નાત્ર સન્દેહઃ ॥ ॥

ઽએપરતે અધ્યાય ૨૯ કુસુમલતાધ્યાયઃ
૨૯।૧અબ્/ ફલકુસુમસમ્પ્રવૃદ્ધિં વનસ્પતીનાં વિલોક્ય વિજ્ઞેયમ્ ।
૨૯।૧ય્દ્/ સુલભત્વં દ્રવ્યાણાં નિષ્પત્તિશ્ચાપિ સસ્યાનામ્ ॥ ॥

૨૯।૨અબ્/ શાલેન કલમશાલી રક્તાશોકેન રક્તશાલિશ્ચ ।
૨૯।૨ય્દ્/ પાણ્ડૂકઃ ક્ષીરિકયા નીલાશોકેન સૂકરકઃ ॥ ॥

૨૯।૩અબ્/ ન્યગ્રોધેન તુ યવકઃ તિન્દુકવૃદ્ધ્યા ચ ષષ્ટિકો ભવતિ ।
૨૯।૩ય્દ્/ અશ્વત્થેન જ્ઞેયા નિષ્પત્તિઃ સર્વસસ્યાનામ્ ॥ ॥

૨૯।૪અબ્/ જંબૂભિઃ તિલમાષાઃ શિરીષવૃદ્ધ્યા ચ કંગુનિષ્પત્તિઃ ।
૨૯।૪ય્દ્/ ગોધૂમાશ્ચ મધૂકૈઃ યવવૃદ્ધિઃ સપ્તપર્ણેન ॥ ॥

૨૯।૫અબ્/ અતિમુક્તકકુન્દાભ્યાં કર્પાસં સર્ષપાન્ વદેદશનૈઃ ।
૨૯।૫ય્દ્/ બદરીભિશ્ચ કુલત્થાંશ્ચિરવિલ્વેન (ચિરબિલ્વેન) આદિશેત્મુદ્ગાન્ ॥ ॥

૨૯।૬અબ્/ અતસી વેતસપુષ્પૈઃ પલાશકુસુમૈશ્ચ કોદ્રવા જ્ઞેયાઃ ।
૨૯।૬ય્દ્/ તિલકેન શંખમૌક્તિકરજતાનિ અથ ચૈંગુદેન શણાઃ (શણઃ) ॥ ॥

૨૯।૭અબ્/ કિરણશ્ચ હસ્તિકર્ણૈઃ આદેશ્યા વાજિનોઽશ્વકર્ણેન ।
૨૯।૭ય્દ્/ ગાવશ્ચ પાટલાભિઃ કદલીભિઃ અજાવિકં ભવતિ ॥ ॥

૨૯।૮અબ્/ ચંપકકુસુમૈઃ કનકં વિદ્રુમસમ્પગ બન્ધુજીવેન ।
૨૯।૮ય્દ્/ કુરવક (કુરુવક) વૃદ્ધ્યા વજં વૈદૂર્યં નિન્દિકાવર્તૈઃ ॥ ॥

૨૯।૯અબ્/ વિન્ધાગ સિન્ધુવારેણ મૌક્તિકં કારુકાઃ (કુંકુમં) કુસુંભેન ।
૨૯।૯ય્દ્/ રક્તોત્પલેન રાજા મન્ત્રી નીલોત્પલેનોક્તઃ ॥ ॥

૨૯।૧૦અબ્/ શ્રેષ્ઠી સુવર્ણપુષ્પાત્ (પુષ્પૈઃ) પદ્મૈઃ વિપ્રાઃ પુરોહિતાઃ કુમુદૈઃ ।
૨૯।૧૦ય્દ્/ સૌગન્ધિકેન બલપતિઃ અર્કેણ હિરણ્યપરિવૃદ્ધિઃ ॥ ॥

૨૯।૧૧અબ્/ આમ્રૈઃ ક્ષેમં ભલ્લાતકૈઃ ભયં પીલુભિઃ તથારોગ્યમ્ ।
૨૯।૧૧ય્દ્/ ખદિરશમીભ્યાં દુર્ભિક્ષમર્જુનૈઃ શોભના વૃષ્ટિઃ ॥ ॥

૨૯।૧૨અબ્/ પિચુમન્દનાગકુસુમૈઃ સુભિક્ષમથ મારુતઃ કપિત્થેન ।

૨૯।૧૨ય્દ્/ નિચુલેનાવૃષ્ટિભયં વ્યાધિભયં ભવતિ કુટજેન ॥ ॥

૨૯।૧૩અબ્/ દૂર્વાકુશકુસુમાભ્યામિક્ષુઃ વહ્નિશ્ચ કોવિદારેણ ।
૨૯।૧૩ય્દ્/ શ્યામાલતાભિવૃદ્ધ્યા બન્ધક્યો વૃદ્ધિમાયાન્તિ ॥ ॥

૨૯।૧૪અ યસ્મિન્ કાલે (દેશે) સ્નિગ્ધનિશ્છિદ્રપત્રાઃ
૨૯।૧૪બ્ સંદૃશ્યન્તે વૃક્ષગુલ્મા લતાશ્ચ ।
૨૯।૧૪ય્ તસ્મિન્ વૃષ્ટિઃ શોભના સપ્રદિષ્ટા
૨૯।૧૪દ્ રૂક્ષૈશ્છિદ્રૈઃ અલ્પમંભઃ પ્રદિષ્ટમ્ ॥ ॥

sએપરતે અધ્યાય ૩૦ સન્ધ્યાલક્ષણાધ્યાયઃ
૩૦।૧અબ્/ અર્ધાસ્તમિતાનુદિતાત્ સૂર્યાદસ્પષ્ટભં નભો યાવત્ ।
૩૦।૧ય્દ્/ તાવત્ સન્ધ્યાકાલશ્ચિહ્નૈઃ એતૈઃ ફલં ચાસ્મિન્ ॥ ॥

૩૦।૨અબ્/ મૃગશકુનિ (શકુન) પવનપરિવેષપરિધિપરિઘાભ્રવૃક્ષસુરચાપૈઃ ।
૩૦।૨ય્દ્/ ગન્ધર્વનગરરવિકરદણ્ડરજઃ સ્નેહવર્ણૈશ્ચ ॥ ॥

૩૦।૩અબ્/ ભૈરવમુચ્ચૈઃ વિરુવન્ મૃગોઽસકૃદ્ ગ્રામઘાતમાચષ્ટે ।
૩૦।૩ય્દ્/ રવિદીપ્તો દક્ષિણતો મહાસ્વનઃ સૈન્યઘાતકરઃ ॥ ॥

૩૦।૪અબ્/ અપસવ્યે સંગ્રામઃ સવ્યે સેનાસમાગમઃ શાન્તે ।
૩૦।૪ય્દ્/ મૃગચક્રે પવને વા સન્ધ્યાયાં મિશ્રગે વૃષ્ટિઃ ॥ ॥

૩૦।૫અબ્/ દીપ્તમૃગાણ્ડજવિરુતા પ્રાક્ સન્ધ્યા દેશનાશમાખ્યાતિ ।
૩૦।૫ય્દ્/ દક્ષિણદિક્સ્થૈઃ વિરુતા ગ્રહણાય પુરસ્ય દીપ્તાસ્યૈઃ ॥ ॥

૩૦।૬અબ્/ ગૃહતરુતોરણમથને સપાંશુલોષ્ટોત્કરેઽનિલે પ્રબલે ।
૩૦।૬ય્દ્/ ભૈરવરાવે રૂક્ષે ખગપાતિનિ ચાશુભા સન્ધ્યા ॥ ॥

૩૦।૭અબ્/ મન્દપવનાવઘટ્ટિતચલિતપલાશદ્રુમા વિપવના વા ।
૩૦।૭ય્દ્/ મધુરસ્વરશાન્તવિહંગમૃગરુતા પૂજિતા સન્ધ્યા ॥ ॥

૩૦।૮અબ્/ સન્ધ્યાકાલે સ્નિગ્ધા દણ્ડતડિત્મત્સ્યપરિધિપરિવેષાઃ ।
૩૦।૮ય્દ્/ સુરપતિચાપૈરાવતરવિકિરણાશ્ચાશુ વૃષ્ટિકરઃ ॥ ॥

૩૦।૯અબ્/ વિચ્છિન્નવિષમવિધ્વસ્તવિકૃતકુટિલાપસવ્યપરિવૃત્તાઃ ।
૩૦।૯ય્દ્/ તનુહ્રસ્વવિકલકલુષાશ્ચ વિગ્રહાવૃષ્ટિદાઃ કિરણાઃ ॥ ॥

૩૦।૧૦અબ્/ ઉદ્યોતિનઃ પ્રસન્ના ઋજવો દીર્ઘાઃ પ્રદક્ષિણાવર્તાઃ ।
૩૦।૧૦ય્દ્/ કિરણાઃ શિવાય જગતો વિતમસ્કે નભસિ ભાનુમતઃ ॥ ॥

૩૦।૧૧અબ્/ શુક્લાઃ કરા દિનકૃતો દિવાદિમધ્યાન્તગામિનઃ સ્નિગ્ધાઃ ।
૩૦।૧૧ચ્દ્/ અવ્યુચ્છિન્ના ઋજવો વૃષ્ટિકરાઃ તે ત્વ (હિ) અમોઘાખ્યાઃ ॥ ॥

૩૦।૧૨અબ્/ કલ્માષબભ્રુકપિલા વિચિત્રમાઞ્જિષ્ઠહરિતશબલાભાઃ ।
૩૦।૧૨ચ્દ્/ ત્રિદિવાનુબન્ધિનોઽવૃષ્ટયેઽલ્પભયદાઃ તુ સપ્તાહાત્ ॥ ॥

૩૦।૧૩અબ્/ તામ્રા બલપતિમૃત્યું પીતારુણસન્નિભાશ્ચ તદ્ વ્યસનમ્ ।
૩૦।૧૩ચ્દ્/ હરિતાઃ પશુસસ્યબધં ધૂમસવર્ણા ગવાં નાશમ્ ॥ ॥

૩૦।૧૪અબ્/ માઞ્જિષ્ટાભાઃ શસ્ત્રાગ્નિસંભ્રમં બભ્રવઃ પવનવૃષ્ટિમ્ ।
૩૦।૧૪ચ્દ્/ ભસ્મસદૃશાઃ ત્વવૃષ્ટિં તનુભાવં શબલકલ્માષાઃ ॥ ॥

૩૦।૧૫અ બન્ધૂકપુષ્પાઞ્જનચૂર્ણસન્નિભં
૩૦।૧૫બ્ સાન્ધ્યં રજોઽભ્યેતિ યદા દિવાકરમ્ ।
૩૦।૧૫ચ્ લોકાઃ તદા રોગશતૈઃ નિપીડ્યતે
૩૦।૧૫દ્ શુક્લં રજો લોકવિવૃદ્ધિશાન્તયે ॥ ॥

૩૦।૧૬અબ્/ રવિકિરણજલદમરુતાં સંઘાતો દણ્ડવત્ સ્થિતો દણ્ડઃ ।
૩૦।૧૬ચ્દ્/ સ વિદિક્સ્થિતો નૃપાણામશુભો દિક્ષુ દ્વિજાદીનામ્(દ્વિજાતીનાં) ॥ ॥

૩૦।૧૭અબ્/ શસ્ત્રભયાતંકકરો દૃષ્ટઃ પ્રાન્મધ્યસન્ધિષુ દિનસ્ય ।
૩૦।૧૭ચ્દ્/ શુક્લાદ્યો વિપ્રાદીન્ યદભિમુખઃ તાં નિહન્તિ દિશમ્ ॥ ॥

૩૦।૧૮અબ્/ દધિસદૃશાગ્રો નીલો ભાનુચ્છાદી ખમધ્યગોભ્રતરુઃ ।
૩૦।૧૮ચ્દ્/ પીતચ્છુરિતાશ્ચ ઘના ઘનમૂલા ભૂરિવૃષ્ટિકરાઃ ॥ ॥

૩૦।૧૯અબ્/ અનુલોમગેઽભ્રવૃક્ષે શમં ગતે યાયિનો નૃપસ્ય બધઃ ।
૩૦।૧૯ચ્દ્/ બાલતરુપ્રતિરૂપિણિ યુવરાજામાત્યયોઃ મૃત્યુઃ ॥ ॥

૩૦।૨૦અબ્/ કુવલયવૈદૂર્યાંબુજકિઞ્જલ્કાભા પ્રભઞ્જનૌન્મુક્તા ।
૩૦।૨૦ચ્દ્/ સન્ધ્યા કરોતિ વૃષ્ટિં રવિકિરણૌદ્ભાસિતા સદ્યઃ ॥ ॥

૩૦।૨૧અબ્/ અશુભાકૃતિઘનગન્ધર્વનગરનીહારધૂમપાંશુયુતા (પાંશુધૂમયુતા) ।
૩૦।૨૧ચ્દ્/ પ્રાવૃષિ કરોત્યવગ્રહમન્યતૌ શસ્ત્રકોપકરી ॥ ॥

૩૦।૨૨અબ્/ શિશિરાદિષુ વર્ણાઃ શોણપીતસિતચિત્રપદ્મરુધિરનિભાઃ ।
૩૦।૨૨ચ્દ્/ પ્રકૃતિભવાઃ સન્ધ્યાયાં સ્વર્તૌ શસ્તા વિકૃતિઃ અન્યા ॥ ॥

૩૦।૨૩અબ્/ આયુધભૃન્ નરરૂપં છિન્નાભ્રં પરભયાય રવિગામિ ।
૩૦।૨૩ચ્દ્/ સિતખપુરેઽર્કાક્રાન્તે પુરલાભો ભેદને નાશઃ ॥ ॥

૩૦।૨૪અ સિતસિતાન્તઘનાવરણં રવેઃ
૩૦।૨૪બ્ ભવતિ વૃષ્ટિકરં યદિ સવ્યતઃ ।
૩૦।૨૪ય્ યદિ ચ વીરણગુલ્મનિભૈઃ ઘનૈઃ
૩૦।૨૪દ્ દિવસભર્તુઃ અદીપ્તદિગુદ્ભવૈઃ ॥ ॥

૩૦।૨૫અબ્/ નૃપવિપત્તિકરઃ પરિઘઃ સિતઃ ક્ષતજતુલ્યવપુઃ બલકોપકૃત્ ।
૩૦।૨૫ય્દ્/ કનકરૂપધરો બલવૃદ્ધિદઃ સવિતુરુદ્ગમકાલસમુત્થિતઃ ॥ ॥

૩૦।૨૬અ ઉભયપાર્શ્વગતૌ પરિધી રવેઃ
૩૦।૨૬બ્ પ્રચુરતોયકરૌ (કૃતૌ) વપુષાન્વિતૌ ।
૩૦।૨૬ય્ અથ સ મસ્તકકુપ્પરિચારિણઃ
૩૦।૨૬દ્ પરિઘયોઽસ્તિ કણોઽપિ ન વારિણઃ ॥ ॥

૩૦।૨૭અબ્/ ધ્વજાતપત્રપર્વતદ્વિપાશ્વરૂપધારિણઃ ।
૩૦।૨૭ય્દ્/ જયાય સન્ધ્યયોઃ ઘના રણાય રક્તસન્નિભાઃ ॥ ॥

૩૦।૨૮અબ્/ પલાલધૂમસંચયસ્થિતૌપમા બલાહકાઃ ।
૩૦।૨૮ય્દ્/ બલાન્ચરૂક્ષમૂર્તયો વિવર્ધયન્તિ ભૂભૃતામ્ ॥ ॥

૩૦।૨૯અબ્/ વિલંબિનો દ્રુમૌપમાઃ ખરારુણપ્રકાશિનઃ ।
૩૦।૨૯ય્દ્/ ઘનાઃ શિવાય સન્ધ્યયોઃ પુરૌપમાઃ શુભાવહાઃ ॥ ॥

૩૦।૩૦અબ્/ દીપ્તવિહંગશિવામૃગઘુષ્ટા દણ્ડરજઃપરિઘાદિયુતા ચ ।
૩૦।૩૦ય્દ્/ પ્રત્યહમર્કવિકારયુતા વા દેશનરેશસુભિક્ષબધાય ॥ ॥

૩૦।૩૧અ પ્રાચી તત્ક્ષણમેવ નક્તમપરા સન્ધ્યા ત્ર્યહાદ્ વા ફલં
૩૦।૩૧બ્ સપ્તાહાત્ પરિવેષરેણુપરિઘાઃ કુર્વન્તિ સદ્યો ન ચેત્ ।
૩૦।૩૧ય્ તદ્વત્ સૂર્યકરેન્દ્રકાર્મુકતડિત્પ્રત્યર્કમેઘાનિલાઃ
૩૦।૩૧દ્ તસ્મિન્ એવ દિનેઽષ્ટમેઽથ વિહગાઃ સપ્તાહપાકા મૃગાઃ ॥ ॥

૩૦।૩૨અ એકં દીપ્ત્યા યોજનં ભાતિ સન્ધ્યા
૩૦।૩૨બ્ વિદ્યુદ્ભાસા ષટ્ પ્રકાશીકરોતિ ।
૩૦।૩૨ય્ પંચાબ્દાનાં ગર્જિતં યાતિ શબ્દો
૩૦।૩૨દ્ નાસ્તીયત્તા કેચિદ્ (કાચિદ્) ઉલ્કાનિપાતે ॥ ॥

૩૦।૩૩અ પ્રત્યર્કસંજ્ઞઃ પરિધિઃ તુ તસ્ય
૩૦।૩૩બ્ ત્રિયોજનાભઃ (ત્રિયોજના ભા) પરિઘસ્ય પંચ ।
૩૦।૩૩ય્ ષટ્પંચદૃશ્યં પરિવેષચક્રં

૩૦।૩૩દ્ દશામરેશસ્ય ધનુઃ વિભાતિ ॥ ॥

sએપરતે અધ્યાય ૩૧ દિગ્દાહલક્ષણાધ્યાયઃ

૩૧।૧અબ્/ દાહો દિશાં રાજભયાય પીતો દેશસ્ય નાશાય હુતાશવર્ણઃ ।

૩૧।૧ય્દ્/ યશ્ચારુણઃ સ્યાદપસવ્યવાયુઃ સસ્યસ્ય નાશં સ કરોતિ દૃષ્ટઃ ॥ ॥

૩૧।૨અ યોઽતીવ દીપ્ત્યા કુરુતે પ્રકાશં

૩૧।૨બ્ છાયામપિ વ્યઞ્જયતેઽર્કવદ્ યઃ ।

૩૧।૨ય્ રાજ્ઞો મહદ્ વેદયતે ભયં સ

૩૧।૨દ્ શસ્ત્રપ્રકોપં ક્ષતજાનુરૂપઃ ॥ ॥

૩૧।૩અ પ્રાક્ ક્ષત્રિયાણાં સનરેશ્વરાણાં

૩૧।૩બ્ પ્રાગ્ દક્ષિણે શિલ્પિકુમારપીડા ।

૩૧।૩ય્ યામ્યે સહોગ્રૈઃ પુરુષૈઃ તુ વૈશ્યા

૩૧।૩દ્ દૂતાઃ પુનઃ ભૂપ્રમદાશ્ચ કોણે ॥ ॥

૩૧।૪અ પશ્ચાત્ તુ શૂદ્રાઃ કૃષિજીવિનશ્ચ

૩૧।૪બ્ ચૌરાઃ તુરંગૈઃ સહ વાયુદિક્સ્થે

૩૧।૪ય્ પીડાં વ્રજન્ત્યુત્તરતશ્ચ વિપ્રાઃ

૩૧।૪દ્ પાખણ્ડિનો (પાષણ્ડિનો) વાણિજકાશ્ચ શાર્વ્યામ્ ॥ ॥

૩૧।૫અ નભઃ પ્રસન્નં વિમલાનિ ભાનિ

૩૧।૫બ્ પ્રદક્ષિણં વાતિ સદાગતિશ્ચ ।

૩૧।૫ય્ દિશાં ચ દાહઃ કનકાવદાતો

૩૧।૫દ્ હિતાય લોકસ્ય સપાર્થિવસ્ય ॥ ॥

sએપરતે અધ્યાય ૩૨ ભૂકંપલક્ષણાધ્યાયઃ

૩૨।૧અબ્/ ક્ષિતિકંપમાહુઃ એકે બૃહદન્તર્જલનિવાસિસત્ત્વકૃતમ્ ।

૩૨।૧ય્દ્/ ભૂભારખિન્નદિગ્ગજવિશ્રામસમુદ્ભવં ચાન્યે ॥ ॥

૩૨।૨અબ્/ અનિલોઽનિલેન નિહતઃ ક્ષિતૌ પતન્ સસ્વનં કરોત્યન્યે (એકે) ।

૩૨।૨ય્દ્/ કેચિત્ ત્વદૃષ્ટકારિતમિદમન્યે પ્રાહુઃ આચાર્યાઃ ॥ ॥

૩૨।૩અબ્/ ગિરિભિઃ પુરા સપક્ષૈઃ વસુધા પ્રપતદ્ભિરુત્પદ્ભિશ્ચ ।

૩૨।૩ય્દ્/ આકંપિતા પિતામહમાહામરસદસિ સવ્રીડમ્ ॥ ॥

૩૨।૪અબ્/ ભગવન્ નામ મમએતત્ત્વયા કૃતં યદચલૈતિ તન્ ન તથા ।

૩૨।૪ય્દ્/ ક્રિયતેઽચલૈશ્ચલદ્ભિઃ શક્તાહં નાસ્ય ખેદસ્ય ॥ ॥

૩૨।૫અબ્/ તસ્યાઃ સગદ્ગદગિરં (સગડ્ગદગિરં) કિંચિત્ સ્ફુરિતાધરં વિનતમીષત્ ।
૩૨।૫ય્દ્/ સાશ્રુવિલોચનમાનનમાલોક્ય પિતામહઃ પ્રાહ ॥ ॥

૩૨।૬અબ્/ મન્યું હરેન્દ્ર ધાત્ર્યાઃ ક્ષિપ કુલિશં શૈલપક્ષભંગાય ।
૩૨।૬ય્દ્/ શક્રઃ કૃતમિત્યુક્ત્વા મા ભૈઃ ઇતિ વસુમતીમાહ ॥ ॥

૩૨।૭અબ્/ કિન્ત્વનિલદહનસુરપતિવરુણાઃ સદસત્ફલાવબોધાર્થમ્ ।
૩૨।૭ય્દ્/ પ્રાગ્ દ્વિત્રિચતુર્ભાગેષુ દિનનિશોઃ કંપયિષ્યન્તિ ॥ ॥

૩૨।૮અબ્/ ચત્વાર્યાર્યમણાદ્યાનિ આદિત્યં મૃગશિરોઽશ્વયુક્ ચેતિ ।
૩૨।૮ય્દ્/ મણ્ડલમેતદ્ વાયવ્યમસ્ય રૂપાણિ સપ્તાહાત્ ॥ ॥

૩૨।૯અબ્/ ધૂમાકુલીકૃતાશે નભસિ નભસ્વાન્ રજઃ ક્ષિપન્ ભૌમમ્ ।
૩૨।૯ય્દ્/ વિરુજન્ દ્રુમાંશ્ચ વિચરતિ રવિઃ અપટુકરાવભાસી ચ ॥ ॥

૩૨।૧૦અબ્/ વાયવ્યે ભૂકંપે સસ્યાંબુવનૌષધીક્ષયોઽભિહિતઃ ।
૩૨।૧૦ય્દ્/ શ્વયથુશ્વાસૌન્માદજ્વરકાસભવો (ભવા) વણિક્પીડા ॥ ॥

૩૨।૧૧અબ્/ રૂપાયુધભૃદ્વૈદ્યાસ્ત્રીકવિગાન્ધર્વપણ્યશિલ્પિજનાઃ ।
૩૨।૧૧ય્દ્/ પીડ્યન્તે સૌરાષ્ટ્રકકુરુમઘદશાર્ણમત્સ્યાશ્ચ ॥ ॥

૩૨।૧૨અબ્/ પુષ્યાગ્નેયવિશાખાભરણીપિત્ર્યાજભાગ્યસંજ્ઞાનિ ।
૩૨।૧૨ય્દ્/ વર્ગો હૌતભુજોઽયં કરોતિ રૂપાણિ અથૈતાનિ ॥ ॥

૩૨।૧૩અબ્/ તારા ઉલ્કાપાતાવૃતમાદીપ્તમિવાંબરં સદિગ્દાહમ્ ।
૩૨।૧૩ય્દ્/ વિચરતિ મરુત્સહાયઃ સપ્તાર્ચિઃ સપ્તદિવસાન્તઃ ॥ ॥

૩૨।૧૪અબ્/ આગ્નેયેઽંબુદનાશઃ સલિલાશયસંક્ષયો નૃપતિવૈરમ્ ।
૩૨।૧૪ય્દ્/ દદ્રૂવિચર્ચિકાજ્વરવિસર્પિકાઃ પાણ્ડુરોગશ્ચ ॥ ॥

૩૨।૧૫અબ્/ દીપ્તૌજસઃ પ્રચણ્ડાઃ પીડ્યન્તે ચાશ્મકાંગબાહ્લીકાઃ ।
૩૨।૧૫ય્દ્/ તંગણકલિંગવંગદ્રવિડાઃ શબરા અનેકવિધાઃ (શબરાશ્ચ નૈકવિધાઃ) ॥ ॥

૩૨।૧૬અબ્/ અભિજિત્શ્રવણધનિષ્ઠાપ્રાજાપત્યેન્દ્રવૈશ્વમૈત્રાણિ ।
૩૨।૧૬ય્દ્/ સુરપતિમણ્ડલમેતદ્ ભવન્તિ ચાપ્યસ્ય રૂપાણિ (ચ અસ્ય સ્વરૂપાણિ) ॥ ॥

૩૨।૧૭અબ્/ ચલિતાચલવર્ષ્માણો ગંભીરવિરાવિણઃ તડિદ્વન્તઃ (તડિત્વન્તઃ) ।
૩૨।૧૭ય્દ્/ ગવલાલિકુલાહિનિભા વિસૃજન્તિ પયઃ પયોવાહાઃ ॥ ॥

૩૨।૧૮અબ્/ એન્દ્રં સ્તુત (શ્રુતિ) કુલજાતિખ્યાતાવનિપાલગણપવિધ્વંસિ ।
૩૨।૧૮ય્દ્/ અતિસારગલગ્રહવદનરોગકૃચ્છર્દિકોપાય ॥ ॥

૩૨।૧૯અબ્/ કાશિયુગન્ધરપૌરવકિરાતકીરાભિસારહલમદ્રાઃ ।
૩૨।૧૯ય્દ્/ અર્બુદસુરાષ્ટ્ર (સુવાસ્તુ) માલવપીડાકરમિષ્ટવૃષ્ટિકરમ્ ॥ ॥

૩૨।૨૦અબ્/ પૌષ્ણાપ્યાર્દ્રાશ્લેષામૂલાહિર્બુધ્ન્યવરુણદેવાનિ ।
૩૨।૨૦ય્દ્/ મણ્ડલમેતદ્ વારુણમસ્યાપિ ભવન્તિ રૂપાણિ ॥ ॥

૩૨।૨૧અબ્/ નીલોત્પલાલિભિન્નાઞ્જનત્વિષો મધુરરાવિણો બહુલાઃ ।
૩૨।૨૧ય્દ્/ તડિદુદ્ભાસિતદેહા ધારાંકુર (કુશ) વર્ષિણો જલદાઃ ॥ ॥

૩૨।૨૨અબ્/ વારુણમર્ણવસરિદાશ્રિતઘ્નમતિવૃષ્ટિદં વિગતવૈરમ્ ।
૩૨।૨૨ય્દ્/ ગોનર્દચેદિકુકુરાન્ કિરાતવૈદેહકાન્ હન્તિ ॥ ॥

૩૨।૨૩અબ્/ ષડ્ભિઃ માસૈઃ કંપો દ્વાભ્યાં પાકં ચ યાતિ નિર્ઘાતઃ ।
૩૨।૨૩ય્દ્/ અન્યાન્ અપિ ઉત્પાતાન્ જગુઃ અન્યે મણ્ડલૈઃ એતૈઃ ॥ ॥

૩૨।૨૪અબ્/ ઉલ્કા હરિશ્ચન્દ્રપુરં રજશ્ચ નિર્ઘાતભૂકંપકકુપ્પ્રદાહાઃ ।
૩૨।૨૪ય્દ્/ વાતોઽતિચણ્ડો ગ્રહણં રવીન્દ્વોઃ નક્ષત્રતારાગણવૈકૃતાનિ ॥ ॥

૩૨।૨૫અબ્/ વ્યભ્રે વૃષ્ટિઃ વૈકૃતં વાતવૃષ્ટિઃ ધૂમોઽનગ્નેઃ વિસ્ફુલિઙ્ગાર્ચિષો વા ।
૩૨।૨૫ય્દ્/ વન્યં સત્ત્વં ગ્રામમધ્યે વિશેદ્વા રાત્રાવૈન્દ્રં કાર્મુકં દૃશ્યતે વા ॥ ॥

૩૨।૨૬અબ્/ સન્ધ્યાવિકારાઃ પરિવેષખણ્ડા નદ્યઃ પ્રતીપા દિવિ તૂર્યનાદાઃ ।
૩૨।૨૬અબ્/ અન્યગ યત્સ્યાત્ પ્રકૃતેઃ પ્રતીપં તન્મણ્ડલૈઃ એવ ફલં નિગાદ્યમ્ ॥ ॥

૩૨।૨૪અબ્/ હન્ત્યૈન્દ્રો વાયવ્યં વાયુશ્ચાપ્યૈન્દ્રમેવમન્યોન્યમ્ ।
૩૨।૨૪ય્દ્/ વારુણહૌતભુજાવપિ વેલાનક્ષત્રજાઃ કંપાઃ ॥ ॥

૩૨।૨૫અબ્/ પ્રથિતનરેશ્વરમરણવ્યસનાનિ આગ્નેયવાયુમણ્ડલયોઃ ।
૩૨।૨૫ય્દ્/ ક્ષુદ્ભયમરકાવૃષ્ટિભિરુપતાપ્યન્તે જનાશ્ચ અપિ ॥ ॥

૩૨।૨૬અબ્/ વારુણપૌરન્દરયોઃ સુભિક્ષશિવવૃષ્ટિહાર્દયો લોકે ।
૩૨।૨૬ય્દ્/ ગાવોઽતિભૂરિપયસો નિવૃત્તવૈરાશ્ચ ભૂપાલાઃ ॥ ॥

૩૨।૨૭અબ્/ પક્ષૈશ્ચતુર્ભિઃ અનિલઃ ત્રિભિઃ અગ્નિઃ દેવરાટ્ ચ સપ્તાહાત્ ।
૩૨।૨૭ય્દ્/ સદ્યઃ ફલતિ ચ વરુણો યેષુ ન કાલોઽદ્ભુતેષૂક્તઃ ॥ ॥

૩૨।૨૮અબ્/ ચલયતિ પવનઃ શતદ્વયં શતમનલો દશયોજનાન્વિતમ્ ।
૩૨।૨૮ય્દ્/ સલિલપતિઃ અશીતિસંયુતં કુલિશધરોઽભ્યધિકં ચ ષષ્ટિતઃ (ષષ્ટિકં) ॥ ॥

૩૨।૨૯અબ્/ ત્રિચતુર્થસપ્તમદિને માસે પક્ષે તથા ત્રિપક્ષે ચે ।

૩૨।૨૯ય્દ્/ યદિ ભવતિ ભૂમિકંપઃ પ્રધાનનૃપનાશનો ભવતિ ॥ ॥

sએપરતે અધ્યાય ૩૩ ઉલ્કાલક્ષણાધ્યાયઃ

૩૩।૧અબ્/ દિવિ ભુક્તશુભફલાનાં પતતાં રૂપાણિ યાનિ તાનિ ઉલ્કાઃ ।

૩૩।૧ય્દ્/ ધિષ્ણ્યૌલ્કાશનિવિદ્યુત્તારા ઇતિ પંચધા ભિન્નાઃ ॥ ॥

૩૩।૨અબ્/ ઉલ્કા પક્ષેણ ફલં તદ્વદ્ ધિષ્ણ્યાશનિઃ ત્રિભિઃ પક્ષૈઃ ।

૩૩।૨ય્દ્/ વિદ્યુદહોભિઃ ષડ્ભિઃ તદ્વત્ તારા વિપાચયતિ ॥ ॥

૩૩।૩અબ્/ તારા ફલપાદકરી ફલાર્ધદાત્રી પ્રકીર્તિતા ધિષ્ણ્યા ।

૩૩।૩ય્દ્/ તિસ્રઃ સમ્પૂર્ણફલા વિદ્યુદથૌલ્કાશનિશ્ચેતિ ॥ ॥

૩૩।૪અબ્/ અશનિઃ સ્વનેન મહતા નૃગજાશ્વમૃગાશ્મવેશ્મતરુપશુષુ ।

૩૩।૪ય્દ્/ નિપતતિ વિદારયન્તી ધરાતલં ચક્રસંસ્થાના ॥ ॥

૩૩।૫અબ્/ વિદ્યુત્ સત્ત્વત્રાસં જનયન્તી તટતટસ્વના સહસા ।

૩૩।૫ય્દ્/ કુતિલવિશાલા નિપતતિ જીવેન્ધનરાશિષુ જ્વલિતા ॥ ॥

૩૩।૬અબ્/ ધિષ્ણ્યા કૃશાલ્પપુચ્છા ધનૂંષિ દશ દૃશ્યતેઽન્તરાભ્યધિકમ્ ।

૩૩।૬ય્દ્/ જ્વલિતાંગારનિકાશા દ્વૌ હસ્તૌ સા પ્રમાણેન ॥ ॥

૩૩।૭અબ્/ તારા હસ્તં દીર્ઘા શુક્લા તામ્રાબ્જતન્તુરૂપા વા ।

૩૩।૭ય્દ્/ તિર્યગધશ્ચ ઊર્ધ્વં વા યાતિ વિયત્યુહ્યમાના ઇવ ॥ ॥

૩૩।૮અબ્/ ઉલ્કા શિરસિ વિશાલા નિપતન્તી વર્ધતે પ્રતનુપુચ્છા ॥ ॥

૩૩।૮ય્દ્/ દીર્ઘા ચ ભવતિ (ભવતિ ચ) પુરુષં ભેદા બહવો ભવત્યસ્યાઃ ॥ ॥

૩૩।૯અબ્/ પ્રેતપ્રહરણખરકરભનક્રકપિદંષ્ટ્રિલાંગલમૃગાભાઃ ।

૩૩।૯ય્દ્/ ગોધાહિધૂમરૂપાઃ પાપા યા ચૌભયશિરસ્કા ॥ ॥

૩૩।૧૦અબ્/ ધ્વજઝષગિરિકરિ (કરિગિરિ) કમલેન્દુતુરગસન્તપ્તરજતહંસાભાઃ ।

૩૩।૧૦ય્દ્/ શ્રીવૃક્ષ (વત્સ, શ્રીવૃક્ષ) વજ્રશંખસ્વસ્તિકરૂપાઃ શિવસુભિક્ષાઃ ॥ ॥

૩૩।૧૧અબ્/ અંબરમધ્યાદ્ બહ્વ્યો નિપતન્ત્યો રાજરાષ્ટ્રનાશાય ।

૩૩।૧૧ય્દ્/ બંભ્રમતી ગગનોપરિ વિભ્રમમાખ્યાતિ લોકસ્ય ॥ ॥

૩૩।૧૨અબ્/ સંસ્પૃશતી ચન્દ્રાર્કૌ તદ્વિસૃતા વા સભૂપ્રકંપા ચ ।

૩૩।૧૨ય્દ્/ પરચક્રાગમનૃપવધદુર્ભિક્ષાવૃષ્ટિભયજનની ॥ ॥

૩૩।૧૩અબ્/ પૌરૈતરઘ્નમુલ્કાપસવ્યકરણં દિવાકરહિમાંશવોઃ ।

૩૩।૧૩ય્દ્/ ઉલ્કા શુભદા પુરતો દિવાકરવિનિઃસૃતા યાતુઃ ॥ ॥

૩૩।૧૪અબ્/ શુક્લા રક્તા પીતા કૃષ્ણા ચૌલ્કા દ્વિજાદિવર્ણઘ્ની ।
૩૩।૧૪ય્દ્/ ક્રમશશ્ચૈતાન્ હન્યુઃ મૂર્ધોરઃપાર્શ્વપુચ્છસ્થાઃ ॥ ॥

૩૩।૧૫અબ્/ ઉત્તરદિગાદિપતિતા વિપ્રાદીનામનિષ્ટદા રૂક્ષા ।
૩૩।૧૫ય્દ્/ ઋજ્વી સ્નિગ્ધાખણ્ડા નીચોપગતા ચ તદ્વૃદ્ધ્યૈ ॥ ॥

૩૩।૧૬અબ્/ શ્યાવારુણ (શ્યામા વારુણ) નીલાસૃગ્દહનાસિતભસ્મસન્નિભા રૂક્ષા ।
૩૩।૧૬ય્દ્/ સન્ધ્યાદિનજા વક્રા દલિતા ચ પરાગમભયાય ॥ ॥

૩૩।૧૭અબ્/ નક્ષત્રગ્રહઘાતૈઃ (ઘાતે) તદ્ભક્તીનાં ક્ષયાય નિર્દિષ્ટા ।
૩૩।૧૭ય્દ્/ ઉદયે ઘ્નતી રવીન્દૂ પૌરૈતરમૃત્યવેઽસ્તે વા ॥ ॥

૩૩।૧૮અબ્/ ભાગ્યાદિત્યધનિષ્ટામૂલેષૂલ્કાહતેષુ યુવતીનામ્ ।
૩૩।૧૮ય્દ્/ વિપ્રક્ષત્રિયપીડા પુષ્યાનિલવિષ્ણુદેવેષુ ॥ ॥

૩૩।૧૯અબ્/ ધ્રુવસૌમ્યેષુ નૃપાણામુગ્રેષુ સદારુણેષુ ચૌરાણામ્ ।
૩૩।૧૯ય્દ્/ ક્ષિપ્રેષુ કલાવિદુષાં પીડા સાધારણે ચ હતે ॥ ॥

૩૩।૨૦અબ્/ કુર્વન્ત્યેતાઃ પતિતા દેવપ્રતિમાસુ રાજરાષ્ટ્રભયમ્ ।
૩૩।૨૦ય્દ્/ શક્રોપરિ નૃપતીનાં ગૃહેષુ તત્સ્વામિનાં પીડામ્ ॥ ॥

૩૩।૨૧અબ્/ આશાગ્રહોપઘાતે તદ્દેશ્યાનાં ખલે કૃષિરતાનામ્ ।
૩૩।૨૧ય્દ્/ ચૈત્યતરૌ સમ્પતિતા સત્કૃતપીડાં કરોત્યુલ્કા ॥ ॥

૩૩।૨૨અબ્/ દ્વારિ પુરસ્ય પુરક્ષયમથેન્દ્રકીલે જનક્ષયોઽભિહિતઃ ।
૩૩।૨૨ય્દ્/ બ્રહ્માયતને વિપ્રાન્ વિનિહન્યાદ્ ગોમિનો ગોષ્ઠે ॥ ॥

૩૩।૨૩અબ્/ ક્ષ્વેડાસ્ફોટિતવાદિતગીતોત્કુષ્ટસ્વના ભવન્તિ યદા ।
૩૩।૨૩ય્દ્/ ઉલ્કાનિપાતસમયે ભયાય રાષ્ટ્રસ્ય સનૃપસ્ય ॥ ॥

૩૩।૨૪અ યસ્યાશ્ચિરં તિષ્ઠતિ ખેઽનુષંગો
૩૩।૨૪બ્ દણ્ડાકૃતિઃ સા નૃપતેઃ ભયાય ।
૩૩।૨૪ય્ યા ચોહ્યતે તન્તુધૃતા ઇવ ખસ્થા
૩૩।૨૪દ્ યા વા મહેન્દ્રધ્વજતુલ્યરૂપા ॥ ॥

૩૩।૨૫અબ્/ શ્રેષ્ઠિનઃ પ્રતીપગા તિર્યગા નૃપાંગનાનાં (નૃપાંગનાઃ) ।
૩૩।૨૫ય્દ્/ હન્ત્યધોમુખી નૃપાન્ બ્રાહ્મણાન્ અથ ઊર્ધ્વગા ॥ ॥

૩૩।૨૬અબ્/ બર્હિ (વર્હિ) પુચ્છરૂપિણી લોકસંક્ષયાવહા ।

૩૩।૨૬ચ્દ્/ સર્પવત્ પ્રસર્પતી (પ્રસર્પિણી) યોષિતામનિષ્ટદા ॥ ॥

૩૩।૨૭અબ્/ હન્તિ મણ્ડલા પુરં છત્રવત્ પુરોહિતમ્ ।
૩૩।૨૭ચ્દ્/ વંશગુલ્મવત્ સ્થિતા રાષ્ટ્રદોષકારિણી ॥ ॥

૩૩।૨૮અબ્/ વ્યાલસૂકરૌપમા વિસ્ફુલિંગમાલિની ।
૩૩।૨૮ચ્દ્/ ખણ્ડશોઽથવા ગતા સસ્વના ચ પાપદા ॥ ॥

૩૩।૨૯અબ્/ સુરપિતચાપપ્રતિમા રાજ્યં નભસિ વિલીના જલદાન્ હન્તિ ।
૩૩।૨૯ચ્દ્/ પવનવિલોમા કુટિલં યાતા ન ભવતિ શસ્તા વિનિવૃત્તા વા ॥ ॥

૩૩।૩૦અબ્/ અભિભવતિ યતઃ પુરં બલં વા ભવતિ ભયં તત એવ પાર્થિવસ્ય ।
૩૩।૩૦ચ્દ્/ નિપતતિ ચ યયા દિશા પ્રદીપ્તા જયતિ રિપૂન્ અચિરાત્ તયા પ્રયાતઃ ॥ ॥

ઽએપરતે અધ્યાય ૩૪ પરિવેષલક્ષણાધ્યાયઃ
૩૪।૧અબ્/ સમ્મૂર્ચ્છિતા રવીન્દ્વોઃ કિરણાઃ પવનેન મણ્ડલીભૂતાઃ ।
૩૪।૧ચ્દ્/ નાનાવર્ણાકૃતયઃ તન્વભ્રે વ્યોમ્નિ પરિવેષાઃ ॥ ॥

૩૪।૨અબ્/ તે રક્તનીલપાણ્ડુરકાપોતાભ્રાભશબલહરિત (હરિ) શુક્લાઃ ।
૩૪।૨ચ્દ્/ ઇન્દ્રયમવરુણનિરૃતિશ્વસનેશપિતામહાંબુ (અગ્નિ) કૃતાઃ ॥ ॥

૩૪।૩અબ્/ ધનદઃ કરોતિ મેચકમન્યોન્યગુણાશ્રયેણ ચાપ્યન્યે ।
૩૪।૩ચ્દ્/ પ્રવિલીયતે મુહુર્મુહુઃ અલ્પફલઃ સોઽપિ વાયુકૃતઃ ॥ ॥

૩૪।૪અબ્/ ચાષશિખિરજતતૈલક્ષીરજલાભઃ સ્વકાલસંભૂતઃ ।
૩૪।૪ચ્દ્/ અવિકલવૃત્તઃ સ્નિગ્ધઃ પરિવેષઃ શિવસુભિક્ષકરઃ ॥ ॥

૩૪।૫અબ્/ સકલગગનાનુચારી નૈકાભઃ ક્ષતજસન્નિભો રૂક્ષઃ ।
૩૪।૫ચ્દ્/ અસકલશકટશરાસનશૃંગાટકવત્ સ્થિતઃ પાપઃ ॥ ॥

૩૪।૬અબ્/ શિખિગલસમેઽતિવર્ષ્ણે બહુવર્ણે નૃપવધો ભયં ધૂમ્રે ।
૩૪।૬ચ્દ્/ હરિચાપનિભે યુદ્ધાનિ અશોકકુસુમપ્રભે ચાપિ ॥ ॥

૩૪।૭અબ્/ વર્ણેનએકેન યદા બહુલઃ સ્નિગ્ધઃ ક્ષુરાભ્રકાકીર્ણઃ ।
૩૪।૭ચ્દ્/ સ્વઋતૌ સદ્યો વર્ષં કરોતિ પીતશ્ચ દીપ્તાર્કઃ ॥ ॥

૩૪।૮અબ્/ દીપ્તમૃગવિહંગ (વિહંગમૃગ) રુતઃ કલુષઃ સન્ધ્યાત્રયોત્થિતોઽતિમહાન્ ।
૩૪।૮ચ્દ્/ ભયકૃત્ તડિદુલ્કાદ્યૈઃ હતો નૃપં હન્તિ શસ્ત્રેણ ॥ ॥

૩૪।૯અબ્/ પ્રતિદિનમર્કહિમાંશ્વોઃ અહર્નિશં રક્તયોઃ નરેન્દ્રવધઃ ।
૩૪।૯ચ્દ્/ પરિવિષ્ટયોઃ અભીક્ષણં લગ્નાસ્તમય (અસ્તનભઃ) સ્થયોઃ તદ્વત્ ॥ ॥

૩૪।૧૦અબ્/ સેનાપતેઃ ભયકરો દ્વિમણ્ડલો નાતિશસ્ત્રકોપકરઃ ।
૩૪।૧૦ય્દ્/ ત્રિપ્રભૃતિ શસ્ત્રકોપં યુવરાજભયં નગરરોધમ્ ॥ ॥

૩૪।૧૧અબ્/ વૃષ્ટિઃ ત્ર્યહેણ માસેન વિગ્રહો વા ગ્રહેન્દુભનિરોધે ।
૩૪।૧૧ય્દ્/ હોરાજન્માધિપયોઃ જન્મર્ક્ષે વાંશુભો (વાશુભો) રાજ્ઞઃ ॥ ॥

૩૪।૧૨અબ્/ પરિવેષમણ્ડલગતો રવિતનયઃ ક્ષુદ્રધાન્યનાશકરઃ ।
૩૪।૧૨ય્દ્/ જનયતિ ચ વાતવૃષ્ટિં સ્થાવરકૃષિકૃન્ નિહન્તા ચ ॥ ॥

૩૪।૧૩અબ્/ ભૌમે કુમારબલપતિસૈન્યાનાં વિદ્રવોઽગ્નિશસ્ત્રભયમ્ ।
૩૪।૧૩ય્દ્/ જીવે પરિવેષગતે પુરોહિતામાત્યનૃપપીડા ॥ ॥

૩૪।૧૪અબ્/ મન્ત્રિસ્થાવરલેખકપરિવૃદ્ધિશ્ચન્દ્રજે સુવૃષ્ટિશ્ચ ।
૩૪।૧૪ય્દ્/ શુક્રે યાયિક્ષત્રિયરાજ્ઞી (રાજ્ઞાં) પીડા પ્રિયં ચાન્નમ્ ॥ ॥

૩૪।૧૫અબ્/ ક્ષુદનલમૃત્યુનરાધિપશસ્ત્રેભ્યો જાયતે ભયં કેતૌ ।
૩૪।૧૫ય્દ્/ પરિવિષ્ટે ગર્ભભયં રાહૌ વ્યાધિઃ નૃપભયં ચ ॥ ॥

૩૪।૧૬અબ્/ યુદ્ધાનિ વિજાનીયાત્ પરિવેષાભ્યન્તરે દ્વયોઃ ગ્રહયોઃ ।
૩૪।૧૬ય્દ્/ દિવસકૃતઃ શશિનો વા ક્ષુદવૃષ્ટિભયં ત્રિષુ પ્રોક્તમ્ ॥ ॥

૩૪।૧૭અબ્/ યાતિ ચતુર્ષુ નરેન્દ્રઃ સામાત્યપુરોહિતો વશં મૃત્યોઃ ।
૩૪।૧૭ય્દ્/ પ્રલયમિવ વિદ્ધિ જગતઃ પંચાદિષુ મણ્ડલસ્થેષુ ॥ ॥

૩૪।૧૮અબ્/ તારાગ્રહસ્ય કુર્યાત્ પૃથગ્ એવ સમુત્થિતો નરેન્દ્રવધમ્ ।
૩૪।૧૮ય્દ્/ નક્ષત્રાણામથવા યદિ કેતોઃ નૌદયો ભવતિ ॥ ॥

૩૪।૧૯અબ્/ વિપ્રક્ષત્રિયવિટ્શૂદ્રહા ભવેત્ પ્રતિપદાદિષુ ક્રમશઃ ।
૩૪।૧૯ય્દ્/ શ્રેણીપુરકોશાનાં પંચમ્યાદિષ્વશુભકારી ॥ ॥

૩૪।૨૦અબ્/ યુવરાજસ્યાષ્ટમ્યાં પરતઃ ત્રિષુ પાર્થિવસ્ય દોષકરઃ ॥ ॥

૩૪।૨૦ય્દ્/ પુરરોધો દ્વાદશ્યાં સૈન્યક્ષોભઃ ત્રયોદશ્યામ્ ॥ ॥

૩૪।૨૧અબ્/ નરપતિપત્નીપીડાં પરિવેષોઽભ્યુત્થિતશ્ચતુર્દશ્યામ્ ।
૩૪।૨૧ય્દ્/ કુર્યાત્ તુ પંચદશ્યાં પીડાં મનુજાધિપસ્યએવ ॥ ॥

૩૪।૨૨અબ્/ નાગરકાણામભ્યન્તરસ્થિતા યાયિનાં ચ બાહ્યસ્થા ।
૩૪।૨૨ય્દ્/ પરિવેષમધ્યરેખા વિજ્ઞેયાક્રન્દસારાણામ્ ॥ ॥

૩૪।૨૩અબ્/ રક્તઃ શ્યામો રૂક્ષશ્ચ ભવતિ યેષાં પરાજયઃ તેષામ્ ।
૩૪।૨૩ય્દ્/ સ્નિગ્ધઃ શ્વેતો દ્યુતિમાન્ યેષાં ભાગો જયઃ તેષામ્ ॥ ॥

sએપરતે અધ્યાય ૩૫ ઇન્દ્રાયુદ્ધલક્ષણાધ્યાયઃ
૩૫।૧અબ્/ સૂર્યસ્ય વિવિધવર્ણાઃ પવનેન વિઘટ્ટિતાઃ કરાઃ સાભ્રે ।
૩૫।૧ય્દ્/ વિયતિ ધનુઃસંસ્થાના યે દૃશ્યન્તે તદિન્દ્રધનુઃ ॥ ॥

૩૫।૨અબ્/ કેચિદનન્તકુલૌરગનિઃશ્વાસૌદ્ભૂતમાહુઃ આચાર્યાઃ ।
૩૫।૨ય્દ્/ તદ્ યાયિનાં નૃપાણામભિમુખમજયાવહં ભવતિ ॥ ॥

૩૫।૩અબ્/ અચ્છિન્નમવનિગાઢં દ્યુતિમત્ સ્નિગ્ધં ઘનં વિવિધવર્ણમ્ ।
૩૫।૩ય્દ્/ દ્વિરુદિતમનુલોમં ચ પ્રશસ્તમંભઃ પ્રયચ્છતિ ચ ॥ ॥

૩૫।૪અબ્/ વિદિગુદ્ભૂતં દિક્સ્વામિનાશનં વ્યભ્રજં મરકકારિ ।
૩૫।૪ય્દ્/ પાટલપીતકનીલૈઃ શસ્ત્રાગ્નિક્ષુત્કૃતા દોષાઃ ॥ ॥

૩૫।૫અબ્/ જલમધ્યેઽનાવૃષ્ટિઃ ભુવિ સસ્યવધઃ તરૌ શિતે વ્યાધિઃ ।
૩૫।૫ય્દ્/ વાલ્મીકે (વલ્મીકે) શસ્ત્રભયં નિશિ સચિવવધાય ધનુઃ ઐન્દ્રમ્ ॥ ॥

૩૫।૬અબ્/ વૃષ્ટિં કરોત્યવૃષ્ટ્યાં વૃષ્ટિં વૃષ્ટ્યાં નિવારયત્યૈન્દ્યામ્ ।
૩૫।૬ય્દ્/ પશ્ચાત્ સદૈવ વૃષ્ટિં કુલિશભૃતશ્ચાપમાચષ્ટે ॥ ॥

૩૫।૭અ ચાપં મઘોનઃ કુરુતે નિશાયામ્
૩૫।૭બ્ આખણ્ડલાયાં દિશિ ભૂપપીડામ્ ।
૩૫।૭ય્ યામ્યાપરોદક્પ્રભવં નિહન્યાત્
૩૫।૭દ્ સેનાપતિં નાયકમન્ત્રિણૌ ચ ॥ ॥

૩૫।૮અબ્/ નિશિ સુરચાપં સિતવર્ણાદ્યં જનયતિ પીડાં દ્વિજપૂર્વાણામ્ ।
૩૫।૮ય્દ્/ ભવતિ ચ યસ્યાં દિશિ તદ્દેશ્યં નરપતિમુખ્યં નચિરાદ્ ધન્યાત્ ॥ ॥

sએપરતે અધ્યાય ૩૬ ગન્ધર્વનગરલક્ષણાધ્યાયઃ
૩૬।૧અબ્/ ઉદગાદિપુરોહિતનૃપબલપતિયુવરાજદોષદં ખપુરમ્ ।
૩૬।૧ય્દ્/ સિતરક્તપીતકૃષ્ણં વિપ્રાદીનામભાવાય ॥ ॥

૩૬।૨અબ્/ નાગરનૃપતિજયાવહમુદગ્વિદિક્સ્થં વિવર્ણનાશાય ।
૩૬।૨ય્દ્/ શાન્તાશાયાં દૃષ્ટં સતોરણં નૃપતિવિજયાય ॥ ॥

૩૬।૩અબ્/ સર્વદિગુત્થં સતતોથિતં ચ ભયદં નરેન્દ્રરાષ્ટ્રાણામ્ ।
૩૬।૩ય્દ્/ ચૌરાટવિકાન્ હન્યાદ્ ધૂમાનલશક્રચાપાભમ્ ॥ ॥

૩૬।૪અબ્/ ગન્ધર્વનગરમુત્થિતમાપાણ્ડુરમશનિપાતવાતકરમ્ ।
૩૬।૪ય્દ્/ દીપ્તે નરેન્દ્રમૃત્યુઃ વામેઽરિભયં જયઃ સવ્યે ॥ ॥

૩૬।૫અબ્/ અનેકવર્ણાકૃતિ ખે પ્રકાશતે પુરં પતાકાધ્વજતોરણાન્વિતમ્ ।
૩૬।૫ય્દ્/ યદા તદા નાગમનુષ્યવાજિનાં પિબત્યસૃગ્ ભૂરિ રણે વદ્દુન્ધરા ॥ ॥

sએપરતે અધ્યાય ૩૭ પ્રતિસૂર્યલક્ષણાધ્યાયઃ
૩૭।૧અબ્/ પ્રતિસૂર્યકઃ પ્રશસ્તો દિવસકૃદૃતુવર્ણસપ્રભઃ સ્નિગ્ધઃ ।
૩૭।૧ય્દ્/ વૈદૂર્યનિભઃ સ્વચ્છઃ શુક્લશ્ચ ક્ષેમસૌભિક્ષઃ ॥ ॥

૩૭।૨અબ્/ પીતો વ્યાધિં જનયત્યશોકરૂપશ્ચ શસ્ત્રકોપાય ।
૩૭।૨ય્દ્/ પ્રતિસૂર્યાણાં માલા દસ્યુભયાતંકનૃપહન્ત્રી ॥ ॥

૩૭।૩અબ્/ દિવસકૃતઃ પ્રતિસૂર્યો જલકૃદુરગ્દક્ષિણે સ્થિતોઽનિલકૃટ્ ।
૩૭।૩ય્દ્/ ઉભયસ્થઃ સલિલભયં નૃપમુપરિ નિહન્ત્યધો જનહા ॥ ॥

sએપરતે અધ્યાય ૩૮-૧ રજોલક્ષણં
૩૮।૧અબ્/ કથયન્તિ પાર્થિવવધં રજસા ઘનતિમિરસઞ્ચયનિભેન ।
૩૮।૧ય્દ્/ અવિભાવ્યમાનગિરિપુરતરવઃ સર્વા દિશશ્છન્નાઃ ॥ ॥

૩૮।૨અબ્/ યસ્યામ્ દિશિ ધૂમચયઃ પ્રાક્ પ્રભવતિ નાશમેતિ વા યસ્યામ્ ।
૩૮।૨ય્દ્/ આગચ્છતિ સપ્તાહાત્ તત્ર એવ ભયં ન સન્દેહઃ ॥ ॥

૩૮।૩અબ્/ શ્વેતે રજોઘનૌઘે પીડા સ્યાન્ મન્ત્રિજનપદાનાં ચ ।
૩૮।૩ય્દ્/ નચિરાત્ પ્રકોપમુપયાતિ શસ્ત્રમતિસગ઼઼્કુલા સિદ્ધિઃ ॥ ॥

૩૮।૪અબ્/ અર્કોદયે વિજૃંભતિ યદિ દિનમેકં દિનદ્વયં વાપિ ।
૩૮।૪ય્દ્/ સ્થગયન્ન્ ઇવ ગગનતલં ભયમત્યુગ્રં નિવેદયતિ ॥ ॥

૩૮।૫અબ્/ અનવરતસઞ્ચયવહં રજનીમેકાં પ્રધાનનૃપહન્તૃ ।
૩૮।૫ય્દ્/ ક્ષેમાય ચ શેષાણાં વિચક્ષણાનાં નરેન્દ્રાણામ્ ॥ ॥

૩૮।૬અબ્/ રજનીદ્વયં વિસર્પતિ યસ્મિન્ રાષ્ટ્રે રજોઘનં બહુલમ્ ।
૩૮।૬ય્દ્/ પરચક્રસ્ય આગમનં તસ્મિન્ અપિ સન્નિબોદ્ધવ્યમ્ ॥ ॥

૩૮।૭અબ્/ નિપતતિ રજનીત્રિતયં ચતુષ્કમપિ અન્નરસવિનાશાય ।
૩૮।૭ય્દ્/ રાજ્ઞાં સૈન્યક્ષોભો રજસિ ભવેત્ પઞ્ચરાત્રભવે ॥ ॥

૩૮।૮અબ્/ કેત્વાદ્યુદયવિમુક્તં યદા રજો ભવતિ તીવ્રભયદાયિ ।
૩૮।૮ય્દ્/ શિશિરાદન્યત્રર્તૌ ફલમવિકલમાહુ આચાર્યાઃ ॥ ॥

sએપરતે અધ્યાય ૩૮-૨ નિર્ઘાતલક્ષણાધ્યાયઃ
૩૮।૧અબ્/ પવનઃ પવનાભિહતો ગગનાદવનૌ યદા સમાપતતિ ।
૩૮।૧ચ્દ્/ ભવતિ તદા નિર્ઘાતઃ સ ચ પાપો દીપ્તવિહગરુતઃ ॥ ॥

૩૮।૨અબ્/ અર્કોદયેઽધિકરણિકનૃપધનિયોધાંગનાવણિગ્વેશ્યાઃ ।
૩૮।૨ચ્દ્/ આપ્રહરાંશેઽજાવિકમુપહન્યાત્શૂદ્રપૌરાંશ્ચ ॥ ॥

૩૮।૩અબ્/ આમધ્યાહ્નાદ્ રાજોપસેવિનો બ્રાહ્મણાંશ્ચ પીડયતિ ।
૩૮।૩ચ્દ્/ વૈશ્યજલદાં તૃતીયે ચૌરાન્ પ્રહરે ચતુર્થે તુ ॥ ॥

૩૮।૪અબ્/ અસ્તં યાતે નીચાન્ પ્રથમે યામે નિહન્તિ સસ્યાનિ ।
૩૮।૪ચ્દ્/ રાત્રૌ દ્વિતીયયામે પિશાચસંઘાન્ નિપીડયતિ ॥ ॥

૩૮।૫અબ્/ તુરગકરિણઃ તૃતીયે વિનિહન્યાદ્ યાયિનશ્ચતુર્થે ચ ।
૩૮।૫ચ્દ્/ ભૈરવજર્જરશબ્દો યાતિ યતઃ તાં દિશં હન્તિ ॥ ॥

sએપરતે અધ્યાય ૩૯ સસ્યજાતકાધ્યાયઃ
૩૯।૧અબ્/ વૃશ્ચિકવૃષપ્રવેશે ભાનોઃ યે બાદરાયણેનોક્તાઃ ।
૩૯।૧ચ્દ્/ ગ્રીષ્મશરત્સસ્યાનાં સદસદ્યોગાઃ કૃતાઃ ત ઇમે ॥ ॥

૩૯।૨અબ્/ ભાનોઃ અલિપ્રવેશે કેન્દ્રૈઃ તસ્માત્શુભગ્રહાક્રાન્તૈઃ ।
૩૯।૨ચ્દ્/ બલવદ્ભિઃ સૌમ્યૈઃ વા નિરીક્ષિતે (નિરીક્ષિતૈઃ) ગ્રૈષ્મિકવિવૃદ્ધિઃ ॥ ॥

૩૯।૩અબ્/ અષ્ટમરાશિગતેઽર્કે ગુરુશશિનોઃ કુંભસિંહસંસ્થિતયોઃ (સ્થિતયોઃ) ।
૩૯।૩ચ્દ્/ સિંહઘટસંસ્થયોઃ વા નિષ્પત્તિઃ ગ્રીષ્મસસ્યસ્ય ॥ ॥

૩૯।૪અબ્/ અર્કાત્ સિતે દ્વિતીયે બુધેઽથવા યુગપદેવ વા સ્થિતયોઃ ।
૩૯।૪ચ્દ્/ વ્યયગતયોઃ અપિ તદ્વન્ નિષ્પત્તિઃ અતીવ ગુરુદૃષ્ટ્યા ॥ ॥

૩૯।૫અબ્/ શુભમધ્યેઽલિનિ સૂર્યાદ્ ગુરુશશિનોઃ સપ્તમે પરા સમ્પત્ ।
૩૯।૫ચ્દ્/ અલ્યાદિસ્થે સવિતરિ ગુરૌ દ્વિતીયેઽર્ધનિષ્પત્તિઃ ॥ ॥

૩૯।૬અબ્/ લાભહિબુકાર્થયુક્તૈઃ સૂર્યાદલિગાત્ સિતેન્દુશશિપુત્રૈઃ ।
૩૯।૬ચ્દ્/ સસ્યસ્ય પરા સમ્પત્ કર્મણિ જીવે ગવાં ચાગ્ર્યા ॥ ॥

૩૯।૭અબ્/ કુંભે ગુરુઃ ગવિ શશી સૂર્યોઽલિમુખે કુજાર્કજૌ મકરે ।
૩૯।૭ચ્દ્/ નિષ્પત્તિઃ અસ્તિ મહતી પશ્ચાત્ પરચક્રભયરોગમ્ ॥ ॥

૩૯।૮અબ્/ મધ્યે પાપગ્રહયોઃ સૂર્યઃ સસ્યં વિનાશયત્યલિગઃ ।
૩૯।૮ચ્દ્/ પાપઃ સપ્તમરાશૌ જાતં જાતં વિનાશયતિ ॥ ॥

૩૯।૯અબ્/ અર્થસ્થાને ક્રૂરઃ સૌમ્યૈઃ અનિરીક્ષિતઃ પ્રથમજાતમ્ ।
૩૯।૯cદ્/ સસ્યં નિહન્તિ પશ્ચાદુપ્તં નિષ્પાદયેદ્ વ્યક્તમ્ ॥ ॥

૩૯।૧૦અબ્/ જામિત્રકેન્દ્રસંસ્થૌ ક્રૂરૌ સૂર્યસ્ય વૃશ્ચિકસ્થસ્ય ।
૩૯।૧૦cદ્/ સસ્યવિપત્તિં કુરુતઃ સૌમ્યૈઃ દૃષ્ટૌ ન સર્વત્ર ॥ ॥

૩૯।૧૧અબ્/ વૃશ્ચિકસંસ્થાદર્કાત્ સપ્તમષષ્ઠૌપગૌ યદા ક્રૂરૌ ।
૩૯।૧૧cદ્/ ભવતિ તદા નિષ્પત્તિઃ સસ્યાનામર્ઘપરિહાનિઃ ॥ ॥

૩૯।૧૨અબ્/ વિધિનાનેનૈવ રવિઃ વૃષપ્રવેશે શરત્સમુત્થાનામ્ ।
૩૯।૧૨cદ્/ વિજ્ઞેયઃ સસ્યાનાં નાશાય શિવાય વા તજ્જ્ઞૈઃ ॥ ॥

૩૯।૧૩અબ્/ ત્રિષુ મેષાદિષુ સૂર્યઃ સૌમ્યયુતો વીક્ષિતોઽપિ વા વિચરન્ ।
૩૯।૧૩cદ્/ ગ્રૈષ્મિક (ગ્રષ્મિક) ધાન્યં કુરુતે સમર્ઘં (સમર્થં) અભયૌપયોગ્યં ચ ॥ ॥

૩૯।૧૪અબ્/ કાર્મુકમૃગઘટસંસ્થઃ શારદસસ્યસ્ય (શારદસ્ય) તદ્વદેવ રવિઃ ।
૩૯।૧૪cદ્/ સંગ્રહકાલે જ્ઞેયો વિપર્યયઃ ક્રૂરદૃગ્યોગાત્ (યાગાત્) ॥ ॥

sએપરતે અધ્યાય ૪૦ દ્રવ્યનિશ્ચયાધ્યાયઃ
૪૦।૧અબ્/ યે યેષાં દ્રવ્યાણામધિપતયો રાશયઃ સમુદ્દિષ્ટાઃ ।
૪૦।૧cદ્/ મુનિભિઃ શુભાશુભાર્થં તાન્ આગમતઃ પ્રવક્ષ્યામિ ॥ ॥

૪૦।૨અબ્/ વસ્ત્રાવિકકુતુપાનાં મસૂરગોધૂમરાલકયવાનામ્ ।
૪૦।૨cદ્/ સ્થલસંભવૌષધીનાં કનકસ્ય ચ કીર્તિતો મેષઃ ॥ ॥

૪૦।૩અબ્/ ગવિ વસ્ત્રકુસુમગોધૂમશાલિયવમહિષસુરભિતનયાઃ સ્યુઃ ।
૪૦।૩cદ્/ મિથુનેઽપિ ધાન્યશારદવલ્લીશાલૂકકર્પાસાઃ ॥ ॥

૪૦।૪અબ્/ કર્કિણિ કોદ્રવકદલીદૂર્વાફલકન્દપત્રચોચાનિ ।
૪૦।૪cદ્/ સિંહે તુષધાન્યરસાઃ સિંહાદીનાં ત્વચઃ સગુડાઃ ॥ ॥

૪૦।૫અબ્/ ષષ્ઠેઽતસીકલાયાઃ કુલત્થગોધૂમમુદ્ગનિષ્પાવાઃ ।
૪૦।૫cદ્/ સપ્તમરાશૌ માષા યવગોધૂમાઃ સસર્ષપાશ્ચૈવ (ગોધૂમાઃ સર્ષપાઃ સયવાઃ) ॥ ॥

૪૦।૬અબ્/ અષ્ટમરાશાવિક્ષુઃ સૈક્યં લોહાનિ અજાવિકં ચાપિ ।
૪૦।૬cદ્/ નવમે તુ તુરગલવણાંબરાસ્ત્રતિલધાન્યમૂલાનિ ॥ ॥

૪૦।૭અબ્/ મકરે તરુગુલ્માદ્યં સૈક્યૈક્ષુસુવર્ણકૃષ્ણલોહાનિ ।
૪૦।૭cદ્/ કુંભે સલિલજફલકુસુમરત્નચિત્રાણિ રૂપાણિ ॥ ॥

૪૦।૮અબ્/ મીને કપાલસંભવરત્નાનિ અંબૂદ્ભવાનિ વજ્રાણિ ।

૪૦।૮ય્દ્/ સ્નેહાશ્ચ નૈકરૂપા વ્યાખ્યાતા મત્સ્યજાતં ચ ॥ ॥

૪૦।૯અબ્/ રાશેશ્ચતુર્દશાર્થાયસપ્તનવપંચમસ્થિતો જીવઃ ।
૪૦।૯ય્દ્/ દ્વ્યેકાદશદશપંચાષ્ટમેષુ શશિજશ્ચ વૃદ્ધિકરઃ ॥ ॥

૪૦।૧૦અબ્/ ષટ્સપ્તમગો હાનિં વૃદ્ધિં શુક્રઃ કરોતિ શેષેષુ ।
૪૦।૧૦ય્દ્/ ઉપચયસંસ્થાઃ ક્રૂરાઃ શુભદાઃ શેષેષુ હાનિકરાઃ ॥ ॥

૪૦।૧૧અબ્/ રાશેઃ યસ્ય ક્રૂરાઃ પીડાસ્થાનેષુ સંસ્થિતા બલિનઃ ।
૪૦।૧૧ય્દ્/ તત્પ્રોક્તદ્રવ્યાણાં મહાર્ઘતા દુર્લભત્વં ચ ॥ ॥

૪૦।૧૨અબ્/ ઇષ્ટસ્થાને સૌમ્યા બલિનો યેષાં ભવન્તિ રાશીનામ્ ।
૪૦।૧૨ય્દ્/ તદ્દ્રવ્યાણાં વૃદ્ધિઃ સામર્ઘ્યં વલ્લભત્વં ચ (સામર્થયમદુર્લભત્વં ચ) ॥ ॥

૪૦।૧૩અબ્/ ગોચરપીડાયામપિ રાશિઃ બલિભિઃ શુભગ્રહૈઃ દૃષ્ટઃ ।
૪૦।૧૩ય્દ્/ પીડાં ન કરોતિ તથા ક્રૂરૈઃ એવં વિપર્યાસઃ ॥ ॥

sએપરતે અધ્યાય ૪૧ અર્ઘકાણ્ડાધ્યાયઃ
૪૧।૧અબ્/ અતિવૃષ્ટ્યુલ્કાદણ્ડાન્ પરિવેષગ્રહણપરિધિપૂર્વાંશ્ચ ।
૪૧।૧ય્દ્/ દૃષ્ટ્વા અમાવાસ્યાયામુત્પાતાન્ પૌણમાસ્યાં (પૂર્ણમાસ્યાં) ચ ॥ ॥

૪૧।૨અબ્/ બ્રૂયાદર્ઘવિશેષાન્ પ્રતિમાસં રાશિષુ ક્રમાત્ સૂર્યે ।
૪૧।૨ય્દ્/ અન્યતિથાવુત્પાતા યે તે ડમરાર્તયે રાજ્ઞામ્ ॥ ॥

૪૧।૩અબ્/ મેષોપગતે સૂર્યે ગ્રીષ્મજધાન્યસ્ય સંગ્રહં કૃત્વા (કુર્યાત્) ।
૪૧।૩ય્દ્/ વનમૂલફલસ્ય વૃષે ચતુર્થમાસે તયોઃ લાભઃ ॥ ॥

૪૧।૪અબ્/ મિથુનસ્થે સર્વરસાન્ ધાન્યાનિ ચ સંગ્રહં સમુપનીય ।
૪૧।૪ય્દ્/ ષષ્ઠે માસે વિપુલં વિક્રેતા (વિક્રીણન્) પ્રાપ્નુયાલ્લાભમ્ ॥ ॥

૪૧।૫અબ્/ કર્કિણિ અર્કે મધુગન્ધતૈલઘૃતફાણિતાનિ વિનિધાય ।
૪૧।૫ય્દ્/ દ્વિગુણા દ્વિતીયમાસે લબ્ધિઃ હીનાધિકે છેદઃ ॥ ॥

૪૧।૬અબ્/ સિંહે સુવર્ણમણિચર્મવર્મશસ્ત્રાણિ મૌક્તિકં રજતમ્ ।
૪૧।૬ય્દ્/ પંચમમાસે લબ્ધિઃ વિક્રેતુઃ અતોઽન્યથા છેદઃ ॥ ॥

૪૧।૭અબ્/ કન્યાગતે દિનકરે ચામરખરકરભવાજિનાં ક્રેતા ।
૪૧।૭ય્દ્/ ષષ્ઠે માસે દ્વિગુણં લાભમવાપ્નોતિ વિક્રીણન્ ॥ ॥

૪૧।૮અબ્/ તૌલિનિ તાન્તવભાણ્ડં મણિકંબલકાચપીતકુસુમાનિ ।
૪૧।૮ય્દ્/ આદદ્યાદ્ ધાન્યાનિ ચ વર્ષાર્ધાદ્ (ષણ્માસાદ્) દ્વિગુણિતા વૃદ્ધિઃ ॥ ॥

૪૧।૯અબ્/ વૃશ્ચિકસંસ્થે સવિતરિ ફલકન્દકમૂલવિવિધરત્નાનિ ।
૪૧।૯ચ્દ્/ વર્ષદ્વયમુષિતાનિ દ્વિગુણં લાભં પ્રયચ્છન્તિ ॥ ॥

૪૧।૧૦અબ્/ ચાપગતે ગૃહ્ણીયાત્ કુંકુમ (કુંકમ) શંખપ્રવાલકાચાનિ ।
૪૧।૧૦ચ્દ્/ મુક્તાફલાનિ ચા તતો વર્ષાર્ધાદ્ દ્વિગુણતાં યાન્તિ ॥ ॥

૪૧।૧૧અબ્/ મૃગઘટસંસ્થે સવિતરિ ગૃહ્ણીયાલ્ (મૃગઘટગે ગૃહ્ણીયાદ્ દિવાકરે) લોહભાણ્ડધાન્યાનિ ।
૪૧।૧૧ચ્દ્/ સ્થિત્વા માસં દદ્યાલ્લાભાર્થી દ્વિગુણમાપ્નોતિ ॥ ॥

૪૧।૧૨અબ્/ સવિતરિ ઝષમુપયાતે મૂલફલં કન્દભાણ્ડરત્નાનિ ।
૪૧।૧૨ચ્દ્/ સંસ્થાપ્ય વત્સરાર્ધં લાભકમિષ્ટં સમાપ્નોતિ ॥ ॥

૪૧।૧૩અબ્/ રાશૌ રાશૌ યસ્મિન્ શિશિરમયૂખઃ સહસ્રકિરણો વા ।
૪૧।૧૩ચ્દ્/ યુક્તોઽધિમિત્રદૃષ્ટઃ તત્રાયં લાભકો દિષ્ટઃ ॥ ॥

૪૧।૧૪અ સવિતૃસહિતઃ સમ્પૂર્ણો વા શુભૈઃ યુતવીક્ષિતઃ
૪૧।૧૪બ્ શિશિરકિરણઃ સદ્યોઽર્ઘસ્ય પ્રવૃદ્ધિકરઃ સ્મૃતઃ ।
૪૧।૧૪ચ્ અશુભસહિતઃ સન્દૃષ્ટો વા હિનસ્ત્યથવા રવિઃ
૪૧।૧૪દ્ પ્રતિગૃહગતાન્ ભાવાન્ બુદ્ધ્વા વદેત્ સદસત્ફલમ્ ॥ ॥

sએપરતે અધ્યાય ૪૨ ઇન્દ્રધ્વજસમ્પદ્ઃ
૪૨।૧અબ્/ બ્રહ્માણમૂચુઃ અમરા ભગવન્ શક્તાઃ સ્મ નાસુરાન્ સમરે ।
૪૨।૧ચ્દ્/ પ્રતિયોધયિતુમતઃ ત્વાં શરણ્યશરણં સમુપયાતાઃ ॥ ॥

૪૨।૨અબ્/ દેવાન્ ઉવાચ ભગવાન્ ક્ષીરોદે કેશવઃ સ વઃ કેતુમ્ ।
૪૨।૨ચ્દ્/ યં દાસ્યતિ તં દૃષ્ટ્વા નાજૌ સ્થાસ્યન્તિ વો દૈત્યાઃ ॥ ॥

૪૨।૩અબ્/ લબ્ધવરાઃ ક્ષીરોદં ગત્વા તે તુષ્ટુવુઃ સુરાઃ સેન્દ્રાઃ ।
૪૨।૩ચ્દ્/ શ્રીવત્સાંકં કૌસ્તુભમણિકિરણોદ્ભાસિતૌરસ્કમ્ ॥ ॥

૪૨।૪અબ્/ શ્રીપતિમચિન્ત્યમસમં સમં તતઃ (સમન્તતઃ) સર્વદેહિનાં સૂક્ષ્મમ્ ।
૪૨।૪ચ્દ્/ પરમાત્માનમનાદિં વિષ્ણુમવિજ્ઞાતપર્યન્તમ્ ॥ ॥

૪૨।૫અબ્/ તૈઃ સંસ્તુતઃ સ દેવઃ તુતોષ નારાયણો દદૌ ચૈષામ્ ।
૪૨।૫ચ્દ્/ ધ્વજમસુરસુરવધૂમુખકમલવનતુષારતીક્ષ્ણાંશુમ્ ॥ ॥

૪૨।૬અબ્/ તં વિષ્ણુતેજોભવમષ્ટચક્રે રથે સ્થિતં ભાસ્વતિ રત્નચિત્રે ।
૪૨।૬ચ્દ્/ દેદીપ્યમાનં શરદીવ સૂર્યં ધ્વજં સમાસાદ્ય મુમોદ શક્રઃ ॥ ॥

૪૨।૭અબ્/ સ કિંકિણીજાલપરિષ્કૃતેન (પરિસ્કૃતેન) સ્રક્છત્રઘણ્ટાપિટકાન્વિતેન ।
૪૨।૭ચ્દ્/ સમુચ્છ્રિતેનામરરાડ્ધ્વજેન નિન્યે વિનાશં સમરેઽરિસૈન્યમ્ ॥ ॥

૪૨।૮અબ્/ ઉપરિચરસ્યામરપો વસોઃ દદૌ ચેદિપસ્ય વેણુમયીમ્ ।
૪૨।૮ચ્દ્/ યષ્ટિં તાં સ નરેન્દ્રો વિધિવત્ સમ્પૂજયામાસ ॥ ॥

૪૨।૯અબ્/ પ્રીતો મહેન મઘવા (મઘવાન્) પ્રાહએવં યે નૃપાઃ કરિષ્યન્તિ ।
૪૨।૯ચ્દ્/ વસુવદ્વસુમન્તઃ તે ભુવિ સિદ્ધાજ્ઞા ભવિષ્યન્તિ ॥ ॥

૪૨।૧૦અબ્/ મુદિતાઃ પ્રજાશ્ચ તેષાં ભયરોગવિવર્જિતાઃ પ્રભૂતાન્નાઃ ।
૪૨।૧૦ચ્દ્/ ધ્વજએવ ચાભિધાસ્યતિ જગતિ નિમિત્તૈઃ ફલં સદસત્ ॥ ॥

૪૨।૧૧અબ્/ પૂજા તસ્ય નરેન્દ્રૈઃ બલવૃદ્ધિજયાર્થિભિઃ યથા પૂર્વમ્ ।
૪૨।૧૧ચ્દ્/ શક્રાજ્ઞયા પ્રયુક્તા તામાગમતઃ પ્રવક્ષ્યામિ ॥ ॥

૪૨।૧૨અબ્/ તસ્ય વિધાનં શુભકરણદિવસનક્ષત્રમંગલમુહૂર્તૈઃ ।
૪૨।૧૨ચ્દ્/ પ્રાસ્થાનિકૈઃ વનમિયાદ્ દૈવજ્ઞઃ સૂત્રધારશ્ચ ॥ ॥

૪૨।૧૩અબ્/ ઉદ્યાનદેવતાલયપિતૃવનવલ્મીકમાર્ગચિતિજાતાઃ ।
૪૨।૧૩ચ્દ્/ કુબ્જ ઊર્ધ્વશુષ્કકણ્ટકિવલ્લીવન્દાકયુક્તાશ્ચ ॥ ॥

૪૨।૧૪અબ્/ બહુવિહગાલયકોટરપવનાનલપીડિતાશ્ચ યે તરવઃ ।
૪૨।૧૪ચ્દ્/ યે ચ સ્યુઃ સ્ત્રીસંજ્ઞા ન તે શુભાઃ શક્રકેત્વર્થે ॥ ॥

૪૨।૧૫અબ્/ શ્રેષ્ઠોઽર્જુનોઽજકર્ણઃ (અશ્વકમઃ) પ્રિયકધવૌદુંબરાશ્ચ પંચૈતે ।
૪૨।૧૫ચ્દ્/ એતેષામેકતમં (અન્યતમં) પ્રશસ્તમથવાપરં વૃક્ષમ્ ॥ ॥

૪૨।૧૬અબ્/ ગૌરાસિતક્ષિતિભવં સમ્પૂજ્ય યથાવિધિ દ્વિજઃ પૂર્વમ્ ।
૪૨।૧૬ચ્દ્/ વિજને સમેત્ય રાત્રૌ સ્પૃષ્ટ્વા બ્રૂયાદિમં મન્ત્રમ્ ॥ ॥

૪૨।૧૭અબ્/ યાનીહ વૃક્ષે ભૂતાનિ તેભ્યઃ સ્વસ્તિ નમોઽસ્તુ વઃ ।
૪૨।૧૭ચ્દ્/ ઉપહારં ગૃહીત્વા ઇમં ક્રિયતાં વાસપર્યયઃ ॥ ॥

૪૨।૧૮અબ્/ પાર્થિવઃ ત્વાં વરયતે સ્વસ્તિ તેઽસ્તુ નગોત્તમ ।
૪૨।૧૮ચ્દ્/ ધ્વજાર્થં દેવરાજસ્ય પૂજા ઇયં પ્રતિગૃહ્યતામ્ ॥ ॥

૪૨।૧૯અબ્/ છિન્દ્યાત્ પ્રભાતસમયે વૃક્ષમુદક્ પ્રાન્ મુખોઽપિ વા ભૂત્વા ।
૪૨।૧૯ચ્દ્/ પરશોઃ જર્જરશબ્દો નેષ્ટઃ સ્નિગ્ધો ઘનશ્ચ હિતઃ ॥ ॥

૪૨।૨૦અબ્/ નૃપજયદમવિધ્વસ્તં પતનમનાકુંચિતં ચ પૂર્વોદક્ ।
૪૨।૨૦ચ્દ્/ અવિલગ્નં ચાન્યતરૌ વિપરીતમતઃ ત્યજેત્ પતિતમ્ ॥ ॥

૪૨।૨૧અબ્/ છિત્ત્વાગ્રે ચતુરંગુલમષ્ટૌ મૂલે જલે ક્ષિપેદ્ યષ્ટિમ્ ।
૪૨।૨૧ચ્દ્/ ઉદ્ધૃત્ય પુરદ્વારં શકટેન નયેન્ મનુષ્યૈઃ વા ॥ ॥

૪૨।૨૨અબ્/ અરભંગે બલભેદો નેમ્યા નાશો બલસ્ય વિજ્ઞેયઃ ।
૪૨।૨૨ચ્દ્/ અર્થક્ષયોઽક્ષયભંગે તથાણિભંગે ચ વર્દ્ધકિનઃ ॥ ॥

૪૨।૨૩અબ્/ ભાદ્રપદશુક્લપક્ષસ્યાષ્ટમ્યાં નાગરૈઃ વૃતો રાજા ।
૪૨।૨૩ચ્દ્/ દૈવજ્ઞસચિવકંચુકિવિપ્રપ્રમુખૈઃ સુવેષધરૈઃ ॥ ॥

૪૨।૨૪અબ્/ અહતાંબરસંવીતાં યષ્ટિં પૌરન્દરીં પુરં પૌરૈઃ ।
૪૨।૨૪ચ્દ્/ સ્રગ્ગન્ધધૂપયુક્તાં પ્રવેશયેત્શંખતૂર્યરવૈઃ ॥ ॥

૪૨।૨૫અબ્/ રુચિરપતાકાતોરણવનમાલાલંકૃતં પ્રહૃષ્ટજનમ્ ।
૪૨।૨૫ચ્દ્/ સમ્માર્જિતાર્ચિતપથં સુવેષગણિકાજનાકીર્ણમ્ ॥ ॥

૪૨।૨૬અબ્/ અભ્યર્ચિતાપણગૃહં પ્રભૂતપુણ્યાહવેદનિર્ઘોષમ્ ।
૪૨।૨૬ચ્દ્/ નટનર્તકગેયજ્ઞૈઃ આકીર્ણચતુષ્પથં નગરમ્ ॥ ॥

૪૨।૨૭અબ્/ તત્ર પતાકાઃ શ્વેતા ભવન્તિ વિજયાય (વિજયાય ભવન્તિ) રોગદાઃ પીતાઃ ।
૪૨।૨૭ચ્દ્/ જયદાશ્ચ ચિત્રરૂપા રક્તાઃ શસ્ત્રપ્રકોપાય ॥ ॥

૪૨।૨૮અબ્/ યષ્ટિં પ્રવેશયન્તીં નિપાતયન્તો ભયાય નાગાદ્યાઃ ।
૪૨।૨૮ચ્દ્/ બાલાનાં તલશબ્દે સંગ્રામઃ સત્ત્વયુદ્ધે વા ॥ ॥

૪૨।૨૯અબ્/ સન્તક્ષ્ય પુનઃ તક્ષા વિધિવદ્ યષ્ટિં પ્રરોપયેદ્ યન્ત્રે ।
૪૨।૨૯ચ્દ્/ જાગરમેકાદશ્યાં નરેશ્વરઃ કારયેગાસ્યામ્ ॥ ॥

૪૨।૩૦અબ્/ સિતવસ્ત્રૌષ્ણીષધરઃ પુરોહિતઃ શાક્રવૈષ્ણવૈઃ મન્ત્રૈઃ ।
૪૨।૩૦ચ્દ્/ જુહુયાદગ્નિં સાંવત્સરો નિમિત્તાનિ ગૃહ્ણીયાત્ ॥ ॥

૪૨।૩૧અબ્/ ઇષ્ટદ્રવ્યાકારઃ સુરભિઃ સ્નિગ્ધો ઘનોઽનલોઽર્ચિષ્માન્ ।
૪૨।૩૧ચ્દ્/ શુભકૃદતોઽન્યોઽનિષ્ટો (નેષ્ટો) યાત્રાયાં વિસ્તરોઽભિહિતઃ ॥ ॥

૪૨।૩૨અ સ્વાહાવસાનસમયે સ્વયમુજ્જ્વલાર્ચિઃ
૪૨।૩૨બ્ સ્નિગ્ધઃ પ્રદક્ષિણશિખો હુતભુગ્ નૃપસ્ય ।
૪૨।૩૨ચ્ ગંગાદિવાકરસુતાજલચારુહારાં
૪૨।૩૨દ્ ધાત્રીં સમુદ્રરશનાં (સમુદ્રરસનાં) વશગાં કરોતિ ॥ ॥

૪૨।૩૩અ ચામીકરાશોકકુરણ્ટકાબ્જ

૪૨।૩૩બ્ વૈદૂર્યનીલોત્પલસન્નિભેઽગ્નૌ ।
૪૨।૩૩ચ્ ન ધ્વાન્તમન્તર્ભવનેઽવકાશં
૪૨।૩૩દ્ કરોતિ રત્નાંશુહતં નૃપસ્ય ॥ ॥

૪૨।૩૪અ યેષાં રથૌઘાર્ણવમેઘદન્તિનાં
૪૨।૩૪બ્ સમસ્વનોઽગ્નિઃ યદિ વાપિ દુન્દુભેઃ ।
૪૨।૩૪ચ્ તેષાં મદાન્ધેભઘટાવઘટ્ટિતા
૪૨।૩૪દ્ ભવન્તિ યાને તિમિરોપમા દિશઃ ॥ ॥

૪૨।૩૫અબ્/ ધ્વજકુંભહયેભભૂભૃતામનુરૂપે વશમેતિ ભૂભૃતામ્ ।
૪૨।૩૫ચ્દ્/ ઉદયાસ્તધરાધરાઽધરા હિમવદ્વિન્ધ્યપયોધરા ધરા ॥ ॥

૪૨।૩૬અબ્/ દ્વિરદમદમહીસરોજલાજા (જલાજૈઃ) ઘૃતમધુના ચ હુતાશને સગન્ધે ।
૪૨।૩૬ચ્દ્/ પ્રણતનૃપશિરોમણિપ્રભાભિઃ ભવતિ પુરસ્છુરિતેવ ભૂઃ નૃપસ્ય ॥ ॥

૪૨।૩૭અબ્/ ઉક્તં યદુત્તિષ્ઠતિ શક્રકેતૌ શુભાશુભં સપ્તમરીચિરૂપૈઃ ।
૪૨।૩૭ચ્દ્/ તજ્જન્મયજ્ઞાગ્રહશાન્તિયાત્રાવિવાહકાલેષ્વપિ ચિન્તનીયમ્ ॥ ॥

૪૨।૩૮અબ્/ ગુડપૂપપાયસાદ્યૈઃ વિપ્રાન્ અભ્યર્ચ્ય દક્ષિણાભિશ્ચ ।
૪૨।૩૮ચ્દ્/ શ્રવણેન દ્વાદશ્યામુત્થાપ્યોઽન્યત્ર વા શ્રવણાત્ ॥ ॥

૪૨।૩૯અબ્/ શક્રકુમાર્યઃ કાર્યાઃ પ્રાહ મનુઃ સપ્ત પંચ વા તજ્ઞૈઃ ।
૪૨।૩૯ચ્દ્/ નન્દોપનન્દસંજ્ઞે પાદોનાર્ધે ધ્વજોચ્છ્રાયાત્ (પાદેનાર્ધેન ચોચ્છ્રાયાત્) ॥ ॥

૪૨।૪૦અબ્/ ષોડશભાગાભ્યધિકે જયવિજયે દ્વે વસુન્ધરે ચાન્યે ।
૪૨।૪૦ચ્દ્/ અધિકા શક્રજનિત્રી મધ્યેઽષ્ટાંશેન ચૈતાસામ્ ॥ ॥

૪૨।૪૧અબ્/ પ્રીતૈઃ કૃતાનિ વિબુધૈઃ યાનિ પુરા ભૂષણાનિ સુરકેતોઃ ।
૪૨।૪૧ચ્દ્/ તાનિ ક્રમેણ દદ્યાત્ પિટકાનિ વિચિત્રરૂપાણિ ॥ ॥

૪૨।૪૨અબ્/ રક્તાશોકનિકાશં ચતુરસ્રં (ચતુરશ્રં) વિશ્વકર્મણા પ્રથમમ્ ।
૪૨।૪૨ચ્દ્/ રશના (રસના) સ્વયંભુવા શંકરેણ ચાનેકવર્ણગા દત્તા (ચાનેકવર્ણધરી) ॥ ॥

૪૨।૪૩અબ્/ અષ્ટાશ્રિ નીલરક્તં તૃતીયમિન્દ્રેણ ભૂષણં દત્તમ્ ।
૪૨।૪૩ચ્દ્/ અસિતં યમશ્ચતુર્થં મસૂરકં કાન્તિમદયચ્છત્ ॥ ॥

૪૨।૪૪અબ્/ મઞ્જિષ્ઠાભં વરુણઃ ષડશ્રિ તત્પંચમં જલોર્મિનિભમ્ ।
૪૨।૪૪ચ્દ્/ મયૂરં કેયૂરં ષષ્ઠે વાયુઃ જલદનીલમ્ ॥ ॥

૪૨।૪૫અબ્/ સ્કન્ધઃ સ્વં કેયૂરં સપ્તમમદદદ્ ધ્વજાય બહુચિત્રમ્ ।

૪૨।૪૫ય્દ્/ અષ્ટમમનલજ્વાલાસંકાશં હવ્યભુગ્વૃત્તં (દત્તં) ॥ ॥

૪૨।૪૬અબ્/ વૈદૂર્યસદૃશમિન્દ્રો (ઇન્દુઃ) નવમં ગ્રૈવેયકં દદાવન્યત્ ।
૪૨।૪૬ય્દ્/ રથચક્રાભં દશમં સૂર્યઃ ત્વષ્ટા પ્રભાયુક્તમ્ ॥ ॥

૪૨।૪૭અબ્/ એકાદશમુદ્ધંશં વિશ્વેદેવાઃ સરોજસંકાશમ્ ।
૪૨।૪૭ય્દ્/ દ્વાદશમપિ ચ નિવેશમ્ ઋષયો (નિવંશં મુનયો) નીલોત્પલાભાસમ્ ॥ ॥

૪૨।૪૮અબ્/ કિંચિદધઊર્ધ્વનિર્મિતં (નિર્નતં) ઉપરિ વિશાલં ત્રયોદશં કેતોઃ ।
૪૨।૪૮ય્દ્/ શિરસિ બૃહસ્પતિશુક્રૌ લાક્ષારસસન્નિભં દદતુઃ ॥ ॥

૪૨।૪૯અબ્/ યદિ યદ્ યેન વિભૂષણં (વિનિર્મિતં) અમરેણ વિનિર્મિતંવિભૂષણં) ધ્વજસ્યાર્થે ।
૪૨।૪૯ય્દ્/ તત્તત્ તદ્દૈવત્યં વિજ્ઞાતવ્યં વિપશ્ચિદ્ભિઃ ॥ ॥

૪૨।૫૦અબ્/ ધ્વજપરિમાણત્ર્યંશઃ પરિધિઃ પ્રથમસ્ય ભવતિ પિટકસ્ય ।
૪૨।૫૦ય્દ્/ પરતઃ પ્રથમાત્ પ્રથમાદષ્ટાંશાષ્ટાંશહીનાનિ ॥ ॥

૪૨।૫૧અબ્/ કુર્યાદહનિ ચતુર્થે પૂરણમિન્દ્રધ્વજસ્ય શાસ્ત્રજ્ઞઃ ।
૪૨।૫૧ય્દ્/ મનુના ચાગમગીતાન્ મન્ત્રાન્ એતાન્ પઠેન્ નિયતઃ ॥ ॥

૪૨।૫૨અબ્/ હરાર્કવૈવસ્વતશક્રસોમૈઃ ધનેશવૈશ્વાનરપાશભૃદ્ભિઃ ।
૪૨।૫૨ય્દ્/ મહર્ષિસંઘૈઃ સદિગપ્સરોભિઃ શુક્રાંગિરઃસ્કન્દમરુદ્ગણૈશ્ચ ॥ ॥

૪૨।૫૩અબ્/ યથા ત્વમૂર્જસ્કરણૈકરૂપૈઃ સમર્ચિતઃ ત્વાભરણૈરુદારૈઃ ।
૪૨।૫૩ય્દ્/ તથેહ તાનિ આભરણાનિ યાગે (દેવ) શુભાનિ સમ્પ્રીતમના ગૃહાણ ॥ ॥

૪૨।૫૪અબ્/ અજોઽવ્યયઃ શાશ્વત એકરૂપો વિષ્ણુઃ વરાહઃ પુરુષઃ પુરાણઃ ।
૪૨।૫૪ય્દ્/ ત્વમન્તકઃ સર્વહરઃ કૃશાનુઃ સહસ્રશીર્ષઃ (શીર્ષા) શતમન્યુઃ ઈડ્યઃ ॥ ॥

૪૨।૫૫અબ્/ કવિં સપ્તજિહ્વં ત્રાતારમિન્દ્રં સ્વવિતારં (અવિતારં) સુરેશમ્ ।
૪૨।૫૫ય્દ્/ હ્વયામિ શક્રં વૃત્રહણં સુષેણમસ્માકં વીરા ઉત્તરા (ઉત્તરે) ભવન્તુ ॥ ॥

૪૨।૫૬અબ્/ પ્રપૂરણે ચોચ્છ્રયણે પ્રવેશે સ્નાને તથા માલ્યવિધૌ વિસર્ગે ।
૪૨।૫૬ય્દ્/ પઠેદિમાન્ નૃપતિઃ સોપવાસો મન્ત્રાન્ શુભાન્ પુરુહૂતસ્ય કેતોઃ ॥ ॥

૪૨।૫૭અબ્/ ક્ષત્રધ્વજાદર્શફલાર્ધચન્દ્રૈઃ વિચિત્રમાલાકદલીક્ષુદણ્ડૈઃ ।
૪૨।૫૭ય્દ્/ સવ્યાલસિંહૈઃ પિટકૈઃ ગવાક્ષૈઃ અલંકૃતં દિક્ષુ ચ લોકપાલૈઃ ॥ ॥

૪૨।૫૮અ અચ્છિન્નરજ્જું દૃઢકાષ્ઠમાતૃકં
૪૨।૫૮બ્ સુશ્લિષ્ટયન્ત્રાર્ગલપાદતોરણમ્ ।
૪૨।૫૮ય્ ઉત્થાપયેલ્લક્ષ્મ સહસ્રચક્ષુષઃ

૪૨।૫૮દ્ સારદ્રુમાભગ્નકુમારિકાન્વિતમ્ ॥ ॥

૪૨।૫૯અ અવિરતજનરાવં મંગલાશીઃપ્રણામૈઃ ।
૪૨।૫૯બ્ પટુપટહમૃદંગૈઃ શંખભેર્યાદિભિશ્ચ ।
૪૨।૫૯ય્ શ્રુતિવિહિતવચોભિઃ પાપઠદ્ભિશ્ચ વિપ્રૈઃ
૪૨।૫૯દ્ અશુભવિહત (રહિત) શબ્દં કેતુમુત્થાપયેચ્ (ઉત્થાપયીત) ચ ॥ ॥

૪૨।૬૦અ ફલદધિઘૃતલાજાક્ષૌદ્રપુષ્પાગ્રહસ્તૈઃ
૪૨।૬૦બ્ પ્રણિપતિતશિરોભિઃ તુષ્ટ (તુષ્ટુ) વદ્ભિશ્ચ પૌરૈઃ ।
૪૨।૬૦ય્ વૃત (ધૃત) મનિમિષભર્તુઃ કેતુમીશઃ પ્રજાનામ્
૪૨।૬૦દ્ મરિનગરનતાગ્રં કારયેદ્ દ્વિડ્બધાય (વધાય) ॥ ॥

૪૨।૬૧અ નાતિદ્રુતં ન ચ વિલંબિતમપ્રકંપમ્
૪૨।૬૧બ્ અધ્વસ્તમાલ્યપિટકાદિવિભૂષણમ્ ચ ।
૪૨।૬૧ય્ ઉત્થાનમિષ્ટમશુભં યદતોઽન્યથા સ્યાત્
૪૨।૬૧દ્ તચ્છાન્તિભિઃ નરપતેઃ શમયેત્ પુરોધાઃ ॥ ॥

૪૨।૬૨અ ક્રવ્યાદકૌશિકકપોતકકાકકંકૈઃ
૪૨।૬૨બ્ કેતુસ્થિતૈઃ મહદુશન્તિ ભયં નૃપસ્ય ।
૪૨।૬૨ય્ ચાષેણ ચાપિ યુવરાજભયં વદન્તિ
૪૨।૬૨દ્ શ્યેનો વિલોચનભયં નિપતન્ કરોતિ ॥ ॥

૪૨।૬૩અ છત્રભંગપતને નૃપમૃત્યુઃ
૪૨।૬૩બ્ તસ્કરાન્ મધુ કરોતિ નિલીનમ્ ।
૪૨।૬૩ય્ હન્તિ ચાપ્યથ પુરોહિતમુલ્કા
૪૨।૬૩દ્ પાર્થિવસ્ય મહિષીમશનિશ્ચ ॥ ॥

૪૨।૬૪અ રાજ્ઞીવિનાશં પતિતા પતાકા
૪૨।૬૪બ્ કરોત્યવૃષ્ટિં પિટકસ્ય પાતઃ ।
૪૨।૬૪ય્ મધ્યાગ્રમૂલેષુ ચ કેતુભંગો
૪૨।૬૪દ્ નિહન્તિ મન્ત્રિક્ષિતિપાલપૌરાન્ ॥ ॥

૪૨।૬૫અ ધૂમાવૃતે શિખિભયં તમસા ચ મોહો
૪૨।૬૫બ્ વ્યાલૈશ્ચ ભગ્નપતિતૈઃ ન ભવત્યમાત્યાઃ ।
૪૨।૬૫ય્ ગ્લાયન્ત્યુદક્પ્રભૃતિ ચ ક્રમશો દ્વિજાદ્યાન્ (દ્વિજાદ્યા)
૪૨।૬૫દ્ ભંગે તુ બન્ધકિબધઃ (વધઃ) કથિતઃ કુમાર્યાઃ ॥ ॥

૪૨।૬૬અ રજ્જૂત્સંગચ્છેદને બાલપીડા
૪૨।૬૬બ્ રાજ્ઞો માતુઃ પીડનં માતૃકાયાઃ ।
૪૨।૬૬ય્ યદ્યત્ કુર્યુશ્ચારણા બાલકા (બાલકાશ્ચારણા) વા
૪૨।૬૬દ્ તત્તત્ તાદૃગ્ ભાવિ પાપં શુભં વા ॥ ॥

૪૨।૬૭અ દિનચતુષ્ટયમુત્થિતમર્ચિતં
૪૨।૬૭બ્ સમભિપૂજ્ય નૃપોઽહનિ પંચમે ।
૪૨।૬૭ય્ પ્રકૃતિભિઃ સહ લક્ષ્મ વિસર્જયેદ્
૪૨।૬૭દ્ બલભિદઃ સ્વબલાભિવિવૃદ્ધયે ॥ ॥

૪૨।૬૮અબ્/ ઉપરિચરવસુપ્રવર્તિતં નૃપતિભિઃ અપિ અનુસન્તતં કૃતમ્ ।
૪૨।૬૮ય્દ્/ વિધિમિમમનુમન્ય પાર્થિવો ન રિપુકૃતં ભયમાપ્નુયાદિતિ ॥ ॥

sએપરતે અધ્યાય ૪૩ નીરાજનાધ્યાયઃ
૪૩।૧અબ્/ ભગવતિ જલધરપક્ષ્મક્ષપાકરાર્કેક્ષણે કમલનાભે ।
૪૩।૧ય્દ્/ ઉન્મીલયતિ તુરંગ (તુરંગન) કરિનરનીરાજનં કુર્યાત્ ॥ ॥

૪૩।૨અબ્/ દ્વાદશ્યામષ્ટમ્યાં કાર્તિક (કાર્ત્તિક) શુક્લસ્ય પંચદશ્યાં વા ।
૪૩।૨ય્દ્/ આશ્વયુજે વા કુર્યાન્ નીરાજનસંજ્ઞિતાં શાન્તિમ્ ॥ ॥

૪૩।૩અબ્/ નગરોત્તરપૂર્વદિશિ પ્રશસ્તભૂમૌ પ્રશસ્તદારુમયમ્ ।
૪૩।૩ય્દ્/ ષોડશહસ્તોચ્છ્રાયં દશવિપુલં તોરણં કાર્યમ્ ॥ ॥

૪૩।૪અબ્/ સર્જોદુંબરકકુભશાખામય (શાખાકકુભમયં) શાન્તિસદ્મ કુશબહુલમ્ ।
૪૩।૪ય્દ્/ વંશવિનિર્મિતમત્સ્યધ્વજચક્રાલંકૃતદ્વારમ્ ॥ ॥

૪૩।૫અબ્/ પ્રતિસરયા તુરગાણાં ભલ્લાતકશાલિકુષ્ઠસિદ્ધાર્થાન્ ।
૪૩।૫ય્દ્/ કણ્ઠેષુ નિબધ્નીયાત્ પુષ્ટ્યર્થં શાન્તિગૃહગાણામ્ ॥ ॥

૪૩।૬અબ્/ રવિવરુણવિશ્વદેવપ્રજેશપુરુહૂતવૈષ્ણવૈઃ મન્ત્રૈઃ ।
૪૩।૬ય્દ્/ સપ્તાહં શાન્તિગૃહે કુર્યાત્શાન્તિં તુરંગાણામ્ ॥ ॥

૪૩।૭અબ્/ અભ્યર્ચિતા ન પરુષં વક્તવ્યા નાપિ તાડનીયાઃ તે ।
૪૩।૭ય્દ્/ પુણ્યાહશંખતૂર્યધ્વનિગીતરવૈઃ વિમુક્તભયાઃ ॥ ॥

૪૩।૮અબ્/ પ્રાપ્તે અષ્ટમેઽહ્નિ કુર્યાદુદન્મુખં તોરણસ્ય દક્ષિણતઃ ।
૪૩।૮ય્દ્/ કુશચીરાવૃતમાશ્રમમગ્નિં પુરતોઽસ્ય વેદ્યાં ચ ॥ ॥

૪૩।૯અબ્/ ચન્દનકુષ્ઠસમંગાહરિતાલમનઃશિલાપ્રિયંગુવચાઃ ।

૪૩।૯ય્દ્/ દન્ત્યમૃતાઞ્જનરજનીસુવર્ણપુષ્પ્યગ્નિપુષ્પાગ્નિ) મન્થાશ્વ ॥ ॥

૪૩।૧૦અબ્/ શ્વેતાં સપૂર્ણકોશાં કટંભરાત્રાયમાણસહદેવીઃ ।
૪૩।૧૦ય્દ્/ નાગકુસુમં સ્વગુપ્તાં શતાવરીં સોમરાજીં ચ ॥ ॥

૪૩।૧૧અબ્/ કલશેષ્વેતાઃ (એતાન્) કૃત્વા સંભારાન્ ઉપહરેદ્ વલિં (બલિં) સમ્યક્ ॥ ॥

૪૩।૧૧ય્દ્/ ભક્ષ્યૈઃ નાનાકારૈઃ મધુપાયસયાવકપ્રચુરૈઃ ॥ ॥

૪૩।૧૨અબ્/ ખદિરપલાશૌદુંબરકાશ્મર્યશ્વત્થનિર્મિતાઃ સમિધઃ ।
૪૩।૧૨ય્દ્/ સ્રુક્ કનકાદ્ રજતાદ્ વા કર્તવ્યા ભૂતિકામેન ॥ ॥

૪૩।૧૩અબ્/ પૂર્વાભિમુખઃ શ્રીમાન્ વૈયાઘ્રે ચર્મણિ સ્થિતો રાજા ।
૪૩।૧૩ય્દ્/ તિષ્ઠેદનલસમીપે તુરગભિષગ્દૈવવિત્સહિતઃ ॥ ॥

૪૩।૧૪અબ્/ યાત્રાયાં યદભિહિતં ગ્રહયજ્ઞવિધૌ મહેન્દ્રકેતૌ ચ ।
૪૩।૧૪ય્દ્/ વેદીપુરોહિતાનલલક્ષણમસ્મિં તદવધાર્યમ્ ॥ ॥

૪૩।૧૫અબ્/ લક્ષણયુક્તં તુરગં દ્વિરદવરં ચૈવ દીક્ષિતં સ્નાતમ્ ।
૪૩।૧૫ય્દ્/ અહતસિતાંબરગન્ધસ્રગ્ધૂમ (ધૂપા)અભ્યર્ચિતં કૃત્વા ।
૪૩।૧૬અબ્/ આશ્રમતોરણમૂલં સમુપનયેત્ સાન્ત્વયન્ શનૈઃ વાચા ।
૪૩।૧૬ય્દ્/ વાદિત્રશંખપુણ્યાહનિઃસ્વનાપૂરિતદિગન્તમ્ ॥ ॥

૪૩।૧૭અબ્/ યદ્યાનીતઃ તિષ્ઠેદ્ દક્ષિણચરણં હયઃ સમુત્ક્ષિપ્ય ।
૪૩।૧૭ય્દ્/ સ જયતિ તદા નરેન્દ્રઃ શત્રૂન્ નચિરાદ્ (અચિરાદ્) વિના યત્નાત્ ॥ ॥

૪૩।૧૮અબ્/ ત્રસ્યન્ નૈષ્ટો રાજ્ઞઃ પરિશેષં ચેષ્ટિતં દ્વિપહયાનામ્ ।
૪૩।૧૮ય્દ્/ યાત્રાયાં વ્યાખ્યાતં તદિહ વિચિન્ત્યં યથાયુક્તિ ॥ ॥

૪૩।૧૯અબ્/ પિણ્ડમભિમન્ત્ર્ય દદ્યાત્ પુરોહિતો વાજિને સ યદિ જિઘ્રેત્ ।
૪૩।૧૯ય્દ્/ અશ્નીયાદ્ વા જયકૃદ્ વિપરીતોઽતોઽન્યથાભિહિતઃ ॥ ॥

૪૩।૨૦અબ્/ કલશૌદકેષુ શાખામાપ્લાવ્યૌદુંબરીં સ્પૃશેત્ તુરગાન્ ।
૪૩।૨૦ય્દ્/ શાન્તિકપૌષ્ટિકમન્ત્રૈઃ એવં સેનાં સનૃપનાગામ્ ॥ ॥

૪૩।૨૧અબ્/ શાન્તિં રાષ્ટ્રવિવૃદ્ધ્યૈ કૃત્વા ભૂયોઽભિચારકૈઃ મન્ત્રૈઃ ।
૪૩।૨૧ય્દ્/ મૃત્મયમરિં વિભિન્દ્યાત્શૂલેનોરઃસ્થલે વિપ્રઃ ॥ ॥

૪૩।૨૨અબ્/ ખલિનં હયાય દદ્યાદભિમન્ત્ર્ય પુરોહિતઃ તતો રાજા ।
૪૩।૨૨ય્દ્/ આરુહ્યૌદક્પૂર્વાં યાયાન્ નીરાજિતઃ સબલઃ ॥ ॥

૪૩।૨૩અબ્/ મૃદંગશંખધ્વનિહૃષ્ટકુઞ્જરસ્રવન્મદામોદસુગન્ધમારુતઃ ।
૪૩।૨૩ય્દ્/ શિરોમણિપ્રાન્ત (વ્રાત) ચલત્ પ્રભાચયૈઃ જ્વલન્ વિવિસ્વાન્ ઇવ તોયદાત્યયે ॥ ॥

૪૩।૨૪અબ્/ હંસપંક્તિભિઃ ઇતઃ તતોઽદ્રિરાટ્ સમ્પતદ્ભિઃ ઇવ શુક્લચામરૈઃ ॥ ॥

૪૩।૨૪ય્દ્/ મૃષ્ટગન્ધપવનાનુવાહિભિઃ ધૂયમાનરુચિરસ્રગંબરઃ ।
૪૩।૨૫અબ્/ નૈકવર્ણમણિવજ્રભૂષિતૈઃ ભૂષિતો મુકુટકુણ્ડલાંગદૈઃ ।
૪૩।૨૫ય્દ્/ ભૂરિરત્નકિરણાનુરઞ્જિતઃ શક્રકાર્મુકરુચિં (રુચં) સમુદ્વહન્ ॥ ॥

૪૩।૨૬અબ્/ ઉત્પતદ્ભિઃ ઇવ ખં તુરંગમૈઃ દારયદ્ભિઃ ઇવ દન્તિભિઃ ધરામ્ ।
૪૩।૨૬ય્દ્/ નિર્જિતારિભિઃ ઇવામરૈઃ નરૈઃ શક્રવત્ પરિવૃતો વ્રજેન્ નૃપઃ ॥ ॥

૪૩।૨૭અબ્/ સવજ્રમુક્તાફલભૂષણોઽથવા સિતસ્રગુષ્ણીષવિલેપનાંબરઃ ।
૪૩।૨૭ય્દ્/ ધૃતાતપત્રો ગજપૃષ્ઠમાશ્રિતો ઘનોપરીવેન્દુતલે ભૃગોઃ સુતઃ ॥ ॥

૪૩।૨૮અબ્/ સમ્પ્રહૃષ્ટનરવાજિકુઞ્જરં નિર્મલપ્રહરણાંશુભાસુરમ્ ।
૪૩।૨૮ય્દ્/ નિર્વિકારમરિપક્ષભીષણં યસ્ય સૈન્યમચિરાત્ સ ગાં જયેત્ ॥ ॥

sએપરતે અધ્યાય ૪૪ ખઞ્જનકલક્ષણાધ્યાયઃ
૪૪।૧અબ્/ ખઞ્જનકો નામાયં યો વિહગઃ તસ્ય દર્શને પ્રથમે ।
૪૪।૧ય્દ્/ પ્રોક્તાનિ યાનિ મુનિભિઃ ફલાનિ તાનિ પ્રવક્ષ્યામિ ॥ ॥

૪૪।૨અબ્/ સ્થૂલોઽભ્યુન્નતકણ્ઠઃ કૃષ્ણગલો ભદ્રકારકો ભદ્રઃ ।
૪૪।૨ય્દ્/ આકણ્ઠમુખાત્ કૃષ્ણઃ સમ્પૂર્ણઃ પૂરયત્યાશામ્ ॥ ॥

૪૪।૩અબ્/ કૃષ્ણો ગલેઽસ્ય બિન્દુઃ સિતકરટાન્તઃ સ રિક્તકૃદ્ રિક્તઃ ।
૪૪।૩ય્દ્/ પીતો ગોપીત ઇતિ ક્લેશકરઃ ખઞ્જનો દૃષ્ટઃ ॥ ॥

૪૪।૪અબ્/ અથ મધુરસુરભિફલકુસુમતરુષુ સલિલાશયેષુ પુણ્યેષુ ।
૪૪।૪ય્દ્/ કરિતુરગભુજગમૂર્ધ્નિ પ્રાસાદોદ્યાનહર્મ્યેષુ ॥ ॥

૪૪।૫અબ્/ ગોગોષ્ઠસત્સમાગમયજ્ઞોત્સવપાર્થિવદ્વિજસમીપે ।
૪૪।૫ય્દ્/ હસ્તિતુરંગમશાલાછત્રધ્વજચામરાદ્યેષુ ॥ ॥

૪૪।૬અબ્/ હેમસમીપસિતાંબરકમલોત્પલપૂજિતોપલિપ્તેષુ ।
૪૪।૬ય્દ્/ દધિપાત્રધાન્યકૂટેષુ ચ શ્રિયં ખઞ્જનઃ કુરુતે ॥ ॥

૪૪।૭અબ્/ પંકે સ્વાદ્વન્નાપ્તિઃ ગોરસસમ્પગ ગોમયોપગતે ।
૪૪।૭ય્દ્/ શાદ્વલગે વસ્ત્રાપ્તિઃ શકટસ્થે દેશવિભ્રંશઃ ॥ ॥

૪૪।૮અબ્/ ગૃહપટલેઽર્થભ્રંશો બધ્રે (વધ્રે) બન્ધોઽશુચૌ ભવતિ રોગઃ ।

૪૪।૮ય્દ્/ પૃષ્ઠે ત્વજાવિકાનાં પ્રિયસંગમમાવહત્યાશુ ॥ ॥

૪૪।૯અબ્/ મહિષૌષ્ટ્રગર્દભાસ્થિશ્મશાનગૃહકોણશર્કરાટ્ટ (અદ્રિ) સ્થઃ ।
૪૪।૯ય્દ્/ પ્રાકારભસ્મકેશેષુ ચાશુભો મરણરુગ્ભયદઃ ॥ ॥

૪૪।૧૦અબ્/ પક્ષૌ ધુન્વન્ ન શુભઃ શુભઃ પિબન્ વારિ નિમ્નગાસંસ્થઃ ।
૪૪।૧૦ય્દ્/ સૂર્યોદયે પ્રશસ્તો (ઽથ શસ્તો) નૈષ્ટફલઃ ખઞ્જનોઽસ્તમયે ॥ ॥

૪૪।૧૧અબ્/ નીરાજને નિવૃત્તે યયા દિશા ખઞ્જનં નૃપો યાન્તમ્ ।
૪૪।૧૧ય્દ્/ પશ્યેત્ તયા ગતસ્ય ક્ષિપ્રમરાતિઃ વશમુપૈતિ ॥ ॥

૪૪।૧૨અ તસ્મિન્ નિધિઃ ભવતિ મૈથુનમેતિ યસ્મિન્
૪૪।૧૨બ્ યસ્મિં તુ છર્દયતિ તત્ર તલેઽસ્તિ કાચમ્ ।
૪૪।૧૨ય્ અંગારમપિ ઉપદિશન્તિ પુરીષણેઽસ્ય
૪૪।૧૨દ્ તત્કૌતુકાપનયનાય ખનેદ્ ધરિત્રીમ્ ॥ ॥

૪૪।૧૩અબ્/ મૃતવિકલવિભિન્નરોગિતઃ સ્વતનુસમાનફલપ્રદઃ ખગઃ ।
૪૪।૧૩ય્દ્/ ધનકૃદભિનિલીયમાનકો વિયતિ ચ બન્ધુસમાગમપ્રદઃ ॥ ॥

૪૪।૧૪અબ્/ નૃપતિઃ અપિ શુભં શુભપ્રદેશે ખગમવલોક્ય મહીતલે વિદધ્યાત્ ।
૪૪।૧૪ય્દ્/ સુરભિકુસુમધૂપયુક્તમર્ઘં શુભમભિનન્દિં (અભિનન્દિતં) એવમેતિ વૃદ્ધિમ્ ॥ ॥

૪૪।૧૫અબ્/ અશુભમપિ વિલોક્ય ખઞ્જનં દ્વિજગુરુસાધુસુરાર્ચને રતઃ ।
૪૪।૧૫ય્દ્/ ન નૃપતિઃ અશુભં સમાપ્નુયાત્ (સમાપ્નુયાન્) ન યદિ દિનાનિ ચ સપ્ત માંસભુક્ ॥ ॥

૪૪।૧૬અબ્/ આવર્ષાત્ પ્રથમે દર્શને ફલં પ્રતિદિનં તુ દિનશેષાત્ (દિનશેષે) ।
૪૪।૧૬ય્દ્/ દિક્સ્થાનમૂર્તિલગ્નઋક્ષશાન્તદીપ્તાદિભિશ્ચૌહ્યમ્ ॥ ॥

sએપરતે અધ્યાય ૪૫ ઉત્પાતાધ્યાયઃ
૪૫।૧અબ્/ યાન્ અત્રેઃ (અત્રિ) ઉત્પાતાન્ ગર્ગઃ પ્રોવાચ તાન્ અહં વક્ષ્યે ।
૪૫।૧ય્દ્/ તેષાં સંક્ષેપોઽયં પ્રકૃતેઃ અન્યત્વમુત્પાતઃ ॥ ॥

૪૫।૨અબ્/ અપચારેણ નરાણામુપસર્ગઃ પાપસંચયાદ્ ભવતિ ।
૪૫।૨ય્દ્/ સંસૂચયન્તિ દિવ્યાન્તરિક્ષભૌમાઃ ત ઉત્પાતાઃ (તદુત્પાતાઃ) ॥ ॥

૪૫।૩અબ્/ મનુજાનામપચારાદપરક્તા દેવતાઃ સૃજન્ત્યેતાન્ ।
૪૫।૩ય્દ્/ તત્પ્રતિઘાતાય નૃપઃ શાંસ્તિં રાષ્ટ્રે પ્રયુઞ્જીત ॥ ॥

૪૫।૪અબ્/ દિવ્યં ગ્રહઋક્ષવૈકૃતમુલ્કાનિર્ઘાતપવનપરિવેષાઃ ।
૪૫।૪ય્દ્/ ગન્ધર્વપુરપુરન્દરચાપાદિ યદાન્તરિક્ષં તત્ ॥ ॥

૪૫।૫અબ્/ ભૌમં ચરસ્થિરભવં તત્શાન્તિભિઃ આહતં શમમુપૈતિ ।
૪૫।૫ચ્દ્/ નાભસમુપૈતિ મૃદુતાં શામ્યતિ નો દિવ્યમિત્યેકે ॥ ॥

૪૫।૬અબ્/ દિવ્યમપિ શમમુપૈતિ પ્રભૂતકનકાન્નગોમહીદાનૈઃ ।
૪૫।૬ચ્દ્/ રુદ્રાયતને ભૂમૌ ગોદોહાત્ કોટિહોમાગ ॥ ॥

૪૫।૭અબ્/ આત્મસુતકોશવાહનપુરદારપુરોહિતેષુ લોકે ચ (લોકેષુ) ।
૪૫।૭ચ્દ્/ પાકમુપયાતિ દૈવં પરિકલ્પિતમષ્ટધા નૃપતેઃ ॥ ॥

૪૫।૮અબ્/ અનિમિત્તભંગચલનસ્વેદાશ્રુનિપાતજલ્પનાદ્યાનિ ।
૪૫।૮ચ્દ્/ લિંગાર્ચાયતનાનાં નાશાય નરેશદેશાનામ્ ॥ ॥

૪૫।૯અબ્/ દૈવતયાત્રાશકટાક્ષચક્રયુગકેતુભંગપતનાનિ ।
૪૫।૯ચ્દ્/ સમ્પર્યાસનસાદનસંગઃ (સંગાઃ) ચ ન દેશનૃપશુભદાઃ ॥ ॥

૪૫।૧૦અબ્/ ઋષિધર્મપિતૃબ્રહ્મપ્રોદ્ભૂતં વૈકૃતં દ્વિજાતીનામ્ ।
૪૫।૧૦ચ્દ્/ યદ્ રુદ્રલોકપાલોદ્ભવં પશૂનામનિષ્ટં તત્ ॥ ॥

૪૫।૧૧અબ્/ ગુરુસિતશનૈશ્ચરોત્થં પુરોધસાં વિષ્ણુજં ચ લોકાનામ્ ।
૪૫।૧૧ચ્દ્/ સ્કન્દવિશાખસમુત્થં માણ્ડલિકાનાં નરેન્દ્રાણામ્ ॥ ॥

૪૫।૧૨અબ્/ વેદવ્યાસે મન્ત્રિણિ વિનાયકે વૈકૃતં ચમૂનાથે ।
૪૫।૧૨ચ્દ્/ ધાતરિ સવિશ્વકર્મણિ લોકાભાવાય નિર્દિષ્ટમ્ ॥ ॥

૪૫।૧૩અબ્/ દેવકુમારકુમારીવનિતાપ્રેષ્યેષુ વૈકૃતં યત્ સ્યાત્ ।
૪૫।૧૩ચ્દ્/ તન્ નરપતેઃ કુમારકકુમારિકાસ્ત્રીપરિજનાનામ્ ॥ ॥

૪૫।૧૪અબ્/ રક્ષઃ પિશાચગૃહ્યકનાગાનામેવં (એતદ્) એવ નિર્દિષ્ટં (નિર્દેશ્યં) ।
૪૫।૧૪ચ્દ્/ માસૈશ્ચાપ્યષ્ટાભિઃ સર્વેષામેવ ફલપાકઃ ॥ ॥

૪૫।૧૫અબ્/ બુદ્ધ્વા દેવવિકારં શુચિઃ પુરોધાઃ ત્ર્યહૌષિતઃ સ્નાતઃ ।
૪૫।૧૫ચ્દ્/ સ્નાનકુસુમાનુલેપનવસ્ત્રૈઃ અભ્યર્ચયેત્ પ્રતિમામ્ ॥ ॥

૪૫।૧૬અબ્/ મધુપર્કેણ પુરોધા ભક્ષ્યૈઃ (બક્ષૈઃ) બલિભિશ્ચ વિધિવદુપતિષ્ઠેત્ ।
૪૫।૧૬ચ્દ્/ સ્થાલીપાકં જુહુયાદ્ વિધિવન્ મન્ત્રૈશ્ચ તલ્લિંગૈઃ ॥ ॥

૪૫।૧૭અ ઇતિ વિબુધવિકારે શાન્તયઃ સપ્તરાત્રં
૪૫।૧૭બ્ દ્વિજવિબુધગણાર્ચા ગીતનૃત્યૌત્સવાશ્ચ ।
૪૫।૧૭ચ્ વિધિવદવનિપાલૈઃ યૈઃ પ્રયુક્તા ન તેષાં
૪૫।૧૭દ્ ભવતિ દુરિતપાકો દક્ષિણાભિશ્ચ રુદ્ધઃ ॥ ॥

૪૫।૧૮અબ્/ રાષ્ટ્રે યસ્યાનગ્નિઃ પ્રદીપ્યતે દીપ્યતે ચ નેન્ધનવાન્ ।
૪૫।૧૮ચ્દ્/ મનુજેશ્વરસ્ય પીડા તસ્ય ચ રાષ્ટ્રસ્ય વિજ્ઞેયા ॥ ॥

૪૫।૧૯અબ્/ જલમાંસાર્દ્રજ્વલને નૃપતિવધઃ પ્રહરણે રણો રૌદ્રઃ ।
૪૫।૧૯ચ્દ્/ સૈન્યગ્રામપુરેષુ ચ નાશો વહ્નેઃ ભયં કુરુતે ॥ ॥

૪૫।૨૦અબ્/ પ્રાસાદભવનતોરણકેત્વાદિષ્વનનલેન દિગ્ધેષુ ।
૪૫।૨૦ચ્દ્/ તડિતા વા ષણ્માસાત્ પરચક્રસ્યાગમો નિયમાત્ ॥ ॥

૪૫।૨૧અબ્/ ધૂમોઽનગ્નિસમુત્થો રજસ્તમશ્ચાહ્નિજં મહાભયદમ્ ।
૪૫।૨૧ચ્દ્/ વ્યભ્રે નિશ્યુડુનાશો દર્શનમપિ ચાહ્નિ દોષકરમ્ ॥ ॥

૪૫।૨૨અબ્/ નગરચતુષ્પાદણ્ડ (દાણ્ડ) જમનુજાનાં ભયકરં જ્વલનમાહુઃ ।
૪૫।૨૨ચ્દ્/ ધૂમાગ્નિવિસ્ફુલિંગૈઃ શય્યાંબરકેશગૈઃ મૃત્યુઃ ॥ ॥

૪૫।૨૩અબ્/ આયુધજ્વલનસર્પણસ્વનાઃ ક્ષનિર્ગમનવેપનાનિ વા ।
૪૫।૨૩ચ્દ્/ વૈકૃતાનિ યદિ વાયુધેઽપરાણિ આશુ રૌદ્રરણસંકુલં વદેત્ ॥ ॥

૪૫।૨૪અ મન્ત્રૈઃ આગ્નેયૈઃ (વાહ્નૈઃ) ક્ષીરવૃક્ષાત્ સમિદ્ભિઃ
૪૫।૨૪બ્ હોતવ્યોઽગ્નિઃ સર્ષપૈઃ સર્પિષા ચ ।
૪૫।૨૪ય્ અગ્ન્યાદીનાં વૈકૃતે શાન્તિઃ એવં
૪૫।૨૪દ્ દેયં ચાસ્મિન્ કાંચનં બ્રાહ્મણેભ્યઃ ॥ ॥

૪૫।૨૫અબ્/ શાખાભંગેઽકસ્માદ્ વૃક્ષાણાં નિર્દિશેદ્ રણોદ્યોગમ્ ।
૪૫।૨૫ચ્દ્/ હસન દેશભ્રંશં રુદિતે ચ વ્યાધિબાહુલ્યમ્ ॥ ॥

૪૫।૨૬અબ્/ રાષ્ટ્રવિભેદઃ ત્વનૃતૌ બાલવધોઽતીવ કુસુમિતે બાલે ।
૪૫।૨૬ચ્દ્/ વૃક્ષાત્ ક્ષીરસ્રાવે સર્વદ્રવ્યક્ષયો ભવતિ ॥ ॥

૪૫।૨૭અબ્/ મદ્યે વાહનનાશઃ સંગ્રામઃ શોણિતે મધુનિ રોગઃ ।
૪૫।૨૭ચ્દ્/ સ્નેહે દુર્ભિક્ષભયં મહદ્ભયં નિઃસ્રુતે (નિઃસૃતે) સલિલે ॥ ॥

૪૫।૨૮અબ્/ શુષ્કવિરોહે વીર્યાન્નસંક્ષયઃ શોષણે ચ વિરુજાનામ્ ।
૪૫।૨૮ચ્દ્/ પતિતાનામુત્થાને સ્વયં ભયં દૈવજનિતં ચ ॥ ॥

૪૫।૨૯અબ્/ પૂજિતવૃક્ષે હ્યનૃતૌ કુસુમફલં નૃપવધાય નિર્દિષ્ટમ્ ।
૪૫।૨૯ચ્દ્/ ધૂમઃ તસ્મિન્ જ્વાલાઽથવા ભવેન્ નૃપવધાયૈવ ॥ ॥

૪૫।૩૦અબ્/ સર્પત્સુ તરુષુ જલ્પત્સુ વાપિ જનસંક્ષયો વિનિર્દિષ્ટઃ ।
૪૫।૩૦ચ્દ્/ વૃક્ષાણાં વૈકૃત્યે દશભિઃ માસૈઃ ફલવિપાકઃ ॥ ॥

૪૫।૩૧અબ્/ સ્રગ્ગન્ધધૂપાંબરપૂજિતસ્ય છત્રં વિધાયોપરિ પાદપસ્ય ।
૪૫।૩૧ચ્દ્/ કૃત્વા શિવં રુદ્રજપોઽત્ર કાર્યો રુદ્રેભ્ય ઇત્યત્ર ષડ્ એવ હોમાઃ (ષડંગહોમઃ) ॥ ॥

૪૫।૩૨અબ્/ પાયસેન મધુનાપિ (મધુના ચ) ભોજયેદ્ બ્રાહ્મણાન્ ઘૃતયુતેન ભૂપતિઃ ।
૪૫।૩૨ચ્દ્/ મેદિની નિગદિતાત્ર દક્ષિણા વૈકૃતે તરુકૃતે હિતાર્થિભિઃ ॥ ॥

૪૫।૩૩અબ્/ નાલેઽબ્જયવાદીનામેકસ્મિન્ દ્વિત્રિસંભવો મરણમ્ ।
૪૫।૩૩ચ્દ્/ કથયતિ તદધિપતીનાં યમલં જાતં ચ કુસુમફલમ્ ॥ ॥

૪૫।૩૪અબ્/ અતિવૃદ્ધિઃ સસ્યાનાં નાનાફલકુસુમસંભવો (ભવો) વૃક્ષે ।
૪૫।૩૪ચ્દ્/ ભવતિ હિ યદ્યેકસ્મિન્ પરચક્રસ્યાગમ્મો નિયમાત્ ॥ ॥

૪૫।૩૫અબ્/ અર્ઘેન યદા તૈલં ભવતિ તિલાનામતૈલતા વા સ્યાત્ ।
૪૫।૩૫ચ્દ્/ અન્નસ્ય ચ વૈરસ્યં તદા તુ વિન્દ્યાદ્ ભયં સુમહત્ ॥ ॥

૪૫।૩૬અબ્/ વિકૃતકુસુમં ફલમ્ વા ગ્રામાદથવા પુરાદ્ વહિઃ કાર્યમ્ ।
૪૫।૩૬ચ્દ્/ સૌમ્યોઽત્ર ચરુઃ કાર્યો નિર્વાપ્યો વા પશુઃ શાન્ત્યૈ ॥ ॥

૪૫।૩૭અ સસ્યે ચ દૃષ્ટ્વા વિકૃતિં પ્રદેયં
૪૫।૩૭બ્ તત્ક્ષેત્રમેવ પ્રથમં દ્વિજેભ્યઃ ।
૪૫।૩૭ચ્ તસ્યૈવ મધ્યે ચરુમત્ર ભૌમં
૪૫।૩૭દ્ કૃવા ન દોષં સમુપૈતિ તજ્જં (તજ્જાન્) ॥ ॥

૪૫।૩૮અબ્/ દુર્ભિક્ષમનાવૃષ્ટાવતિવૃષ્ટૌ (અનાવૃષ્ટ્યામતિવૃષ્ટ્યાં)
ક્ષુદ્ભયં પરભયં ચ (સપરચક્રં) ।
૪૫।૩૮ચ્દ્/ રોગો હ્યનૃતુભવાયાં નૃપતિવધો (નૃપવધો) ઽનભ્રજાતાયામ્ ॥ ॥

૪૫।૩૯અબ્/ શીતોષ્ણવિપર્યાસો (વિપર્યાસે) નો સમ્યગૃતુષુ ચ સમ્પ્રવૃત્તેષુ ।
૪૫।૩૯ચ્દ્/ ષણ્માસાદ્ રાષ્ટ્રભયં રોગભયં દૈવજનિતં ચ ॥ ॥

૪૫।૪૦અબ્/ અન્યઋતૌ સપ્તાહં પ્રબન્ધવર્ષે પ્રધાનનૃપમરણમ્ ।
૪૫।૪૦ચ્દ્/ રક્તે શસ્ત્રોદ્યોગો માંસાસ્થિવસાદિભિઃ મરકઃ ॥ ॥

૪૫।૪૧અબ્/ ધાન્યહિરણ્યત્વક્ફલકુસુમાદ્યૈઃ વર્ષિતૈઃ ભયં વિન્દ્યાત્ ।
૪૫।૪૧ચ્દ્/ અંગારપાંશુવર્ષે વિનાશમાયાતિ તન્નગરમ્ ॥ ॥

૪૫।૪૨અબ્/ ઉપલા વિના જલધરૈઃ વિકૃતા વા પ્રાણિનો યદા વૃષ્ટાઃ ।
૪૫।૪૨ચ્દ્/ છિદ્રં વાપ્યતિવૃષ્ટૌ સસ્યાનામીતિસંજનનમ્ ॥ ॥

૪૬।૪૩અબ્/ ક્ષીરઘૃતક્ષૌદ્રાણાં દધ્નો રુધિરોષ્ણવારિણાં (વારિણો) વર્ષે ।

૪૬।૪૩ચ્દ્/ દેશવિનાશો જ્ઞેયોઽસૃગ્વર્ષે ચ અપિ નૃપયુદ્ધમ્ ॥ ॥

૪૫।૪૩અબ્/ યદ્યમલેઽર્કે છાયા ન દૃશ્યતે પ્રતીપા વા ।
૪૫।૪૩ચ્દ્/ દેશસ્ય તદા સુમહદ્ભયમાયાતં વિનિર્દેશ્યમ્ ॥ ॥

૪૫।૪૪અબ્/ વ્યભ્રે નભસીન્દ્રધનુર્દિવા યદા દૃશ્યતેઽથવા રાત્રૌ ।
૪૫।૪૪ચ્દ્/ પ્રાચ્યામપરસ્યાં વા તદા ભવેત્ ક્ષુદ્ભ્યં સુમહત્ ॥ ॥

૪૫।૪૫અબ્/ સૂર્યેન્દુપર્જન્યસમીરણાનાં યાગઃ (યોગઃ) સ્મૃતો વૃષ્ટિવિકારકાલે ।
૪૫।૪૫ચ્દ્/ ધાન્યાન્નગોકાંચનદક્ષિણાશ્ચ દેયાઃ તતઃ શાન્તિમુપૈતિ પાપમ્ ॥ ॥

૪૫।૪૬અબ્/ અપસર્પણં નદીનામ્ નગરાદચિરેણ શૂન્યતાં કુરુતે ।
૪૫।૪૬ચ્દ્/ શોષશ્ચાશોષ્યાણામન્યેષાં વા હ્રદાદીનામ્ ॥ ॥

૪૫।૪૭અબ્/ સ્નેહાસૃગ્માંસવહાઃ સંકુલકલુષાઃ પ્રતીપગાશ્ચાપિ ।
૪૫।૪૭ચ્દ્/ પરચક્રસ્યાગમનં નદ્યઃ કથયન્તિ ષણ્માસાત્ ॥ ॥

૪૫।૪૮અબ્/ જ્વાલાધૂમક્વાથારુદિતૌત્ક્રુષ્ટાનિ ચૈવ કૂપાનામ્ ।
૪૫।૪૮ચ્દ્/ ગીતપ્રજલ્પિતાનિ ચ જનમરકાયૌપદિષ્ટાનિ (પ્રદિષ્ટાનિ) ॥ ॥

૪૫।૪૯અબ્/ સલિલ (તોય) ઉત્પત્તિઃ અખાતે ગન્ધરસવિપર્યયે ચ તોયાનામ્ ।
૪૫।૪૯ચ્દ્/ સલિલાશયવિકૃતૌ વા મહદ્ભયં તત્ર શન્તિમિમાં (ઇયં) ॥ ॥

૪૫।૫૦અબ્/ સલિલવિકારે કુર્યાત્ પૂજાં વરુણસ્ય વારુણૈઃ મન્ત્રૈઃ ।
૪૫।૫૦ચ્દ્/ તૈઃ એવ ચ જપહોમં શમમેવં પાપમુપયાતિ ॥ ॥

૪૫।૫૧અબ્/ પ્રસવવિકારે સ્ત્રીણાં દ્વિત્રિચતુષ્પ્રભૃતિસમ્પ્રસૂતૌ વા ।
૪૫।૫૧ચ્દ્/ હીનાતિરિક્તકાલે ચ દેશકુલસંક્ષયો ભવતિ ॥ ॥

૪૫।૫૨અબ્/ વડવા ઉષ્ટ્રમહિષગોહસ્તિનીષુ યમલૌદ્ભવે રણમરણં (મરણં) એષામ્ ।
૪૫।૫૨ચ્દ્/ ષણ્માસાત્ સૂતિફલં શાન્તૌ શ્લોકૌ ચ ગર્ગોક્તૌ ॥ ॥

૪૫।૫૩અબ્/ નાર્યઃ પરસ્ય વિષયે ત્યક્તવ્યાઃ તા હિતાર્થિના ।
૪૫।૫૩ચ્દ્/ તર્પયેગ દ્વિજાન્ કામૈઃ શાન્તિં ચૈવાત્ર કારયેત્ ॥ ॥

૪૫।૫૪અબ્/ ચતુષ્પાદાઃ સ્વયૂથેભ્યઃ ત્યક્તવ્યાઃ પરભૂમિષુ ।
૪૫।૫૪ચ્દ્/ નગરં સ્વામિનં યૂથમન્યથા તુ વિનાશયેત્ ॥ ॥

૪૫।૫૫અબ્/ પરયોનાવભિગમનં ભવતિ તિરશ્ચામસાધુ ધેનૂનામ્ ।
૪૫।૫૫ચ્દ્/ ઉક્ષાણો વાન્યોન્યં પિબતિ શ્વા વા સુરભિપુત્રમ્ ॥ ॥

૪૫।૫૬અબ્/ માસત્રયેણ વિન્દ્યાત્ તસ્મિન્ નિઃસંશયં પરાગમનમ્ ।
૪૫।૫૬ચ્દ્/ તત્પ્રતિઘાતાયૈતૌ શ્લોકૌ ગર્ગેણ નિર્દિષ્ટૌ ॥ ॥

૪૫।૫૭અબ્/ ત્યાગો વિવાસનં દાનં તત્તસ્યાશુ શુભં ભવેત્ ।
૪૫।૫૭ચ્દ્/ તર્પયેદ્ બ્રાહ્મણાંશ્ચાત્ર જપહોમાંશ્ચ કારયેત્ ॥ ॥

૪૫।૫૮અબ્/ સ્થાલીપાકેન ધાતારં પશુના ચ પુરોહિતઃ ।
૪૫।૫૮ચ્દ્/ પ્રાજાપત્યેન મન્ત્રેણ યજેદ્ બહ્વન્નદક્ષિણમ્ ॥ ॥

૪૫।૫૯અબ્/ યાનં વાહવિયુક્તં યદિ ગચ્છેન્ ન વ્રજેગ વાહયુતમ્ ।
૪૫।૫૯ચ્દ્/ રાષ્ટ્રભયં ભવતિ તદા ચક્રાણાં સાદભંગે ચ ॥ ॥

૪૫।૬૦અબ્(૪૬।૬૧અબ્)/ ગીતરવતૂર્યશબ્દા નભસિ યદા વા ચરસ્થિરાન્યત્વમ્ ।
૪૫।૬૦ચ્દ્(૪૬।૬૧ચ્દ્)/ મૃત્યુઃ તદા ગદા વા વિસ્વતૂર્યે (વિસ્વરતાર્યે) પરાભિભવઃ ॥ ॥

૪૫।૬૧અબ્(૪૬।૬૨અબ્)/ અનભિહતતૂર્યનાદઃ શબ્દો વા તાડિતેષુ યદિ ન સ્યાત્ ।
૪૫।૬૧ચ્દ્(૪૬।૬૨ઐ)/ વ્યુત્પત્તૌ વા તેષાં પરાગમો નૃપતિમરણં વા ॥ ॥

૪૫।૬૨અબ્/ ગોલાંગલયોઃ સંગે દર્વીશૂર્પાદ્યુપસ્કરવિકારે ।
૪૫।૬૨ચ્દ્/ ક્રોષ્ટુકનાદે ચ તથા શસ્ત્રભયં મુનિવચશ્ચેદમ્ ॥ ॥

૪૫।૬૩અબ્/ વાયવ્યેષ્વેષુ ન્પતિઃ વાયું શક્તુભિઃ અર્ચયેત્ ।
૪૫।૬૩ચ્દ્/ આવાયોઃ ઇતિ પંચર્ચો જપ્તવ્યાઃ (જાપ્યાશ્ચ) પ્રયતૈઃ દ્વિજૈઃ ॥ ॥

૪૫।૬૪અબ્/ બ્રાહ્મણાન્ પરમાન્નેન દક્ષિણાભિશ્ચ તર્પયેત્ ।
૪૫।૬૪ચ્દ્/ બહ્વન્નદક્ષિણા હોમાઃ કર્તવ્યાશ્ચ પ્રયત્નતઃ ॥ ॥

૪૫।૬૫અબ્/ પુરપક્ષિણો વનચરા વન્યા વા નિર્ભયા વિશન્તિ પુરમ્ ।
૪૫।૬૫ચ્દ્/ નક્તં વા દિવસચરાઃ ક્ષપાચરા વા ચરન્ત્યહનિ ॥ ॥

૪૫।૬૬અબ્/ સન્ધ્યાદ્વયેઽપિ મણ્ડલમાબધ્નન્તો મૃગા વિહંગા વા ।
૪૫।૬૬ચ્દ્/ દીપ્તાયાં દિશ્યથવા ક્રોશન્તઃ સંહતા ભયદાઃ ॥ ॥

૪૫।૬૭અબ્/ શ્યેનાઃ (શ્વાનઃ) પ્રરુદન્ત ઇવ દ્વારે ક્રોશન્તિ જંબુકા દીપ્તાઃ ।
૪૫।૬૭ચ્દ્/ પ્રવિશેન્ નરેન્દ્રભવને કપોતકઃ કૌશિકો યદિ વા ॥ ॥

૪૫।૬૮અબ્/ કુક્કુટરુતં પ્રદોષે હેમન્તાદૌ ચ કોકિલાલાપાઃ ।
૪૫।૬૮ચ્દ્/ પ્રતિલોમમણ્ડલચરાઃ શ્યેનાદ્યાશ્ચાંબરે ભયદાઃ ॥ ॥

૪૫।૬૯અબ્/ ગૃહચૈત્યતોરણેષુ દ્વારેષુ ચ પક્ષિસંઘસમ્પાતઃ (સમ્પાતાઃ) ।
૪૫।૬૯ચ્દ્/ મધુવલ્મીકાંભોરુહસમુદ્ભવઃ (સમુદ્ભવાઃ) ચાપિ નાશાય ॥ ॥

૪૫।૭૦અબ્/ શ્વભિઃ અસ્થિશવાવયવપ્રવેશનં મન્દિરેષુ મરકાય ।
૪૫।૭૦ચ્દ્/ પશુશસ્ત્રવ્યાહારે નૃપમૃત્યુઃ મુનિવચશ્ચેદમ્ ॥ ॥

૪૫।૭૧અબ્/ મૃગપક્ષિવિકારેષુ કુર્યાદ્ ધીમાન્ (ધોમાન્) સદક્ષિણાન્ ।
૪૫।૭૧ચ્દ્/ દેવાઃ કપોત ઇતિ ચ જપ્તવ્યાઃ પંચભિઃ દ્વિજૈઃ ॥ ॥

૪૫।૭૨અબ્/ સુદેવા ઇતિ ચૈકેન દેયા ગાવઃ સદક્ષિણાઃ (ચ દક્ષિણા) ।
૪૫।૭૨ચ્દ્/ જપેત્શાકુનસૂક્તં વા મનો વેદશિરાંશિ ચ ॥ ॥

૪૫।૭૩અબ્/ શક્રધ્વજેન્દ્રકીલસ્તંભદ્વારપ્રપાતભંગેષુ ।
૪૫।૭૩ચ્દ્/ તદ્વત્ કપાટતોરણકેતૂનાં નરપતેઃ મરણમ્ ॥ ॥

૪૫।૭૪અબ્/ સન્ધ્યાદ્વયસ્ય દીપ્તિઃ ધૂમૌત્પત્તિશ્ચ કાનનેઽનગ્નૌ ।
૪૫।૭૪ચ્દ્/ છિદ્રાભાવે ભૂમેઃ દરણં કંપશ્ચ ભયકારી ॥ ॥

૪૫।૭૫અ પાખણ્ડાણાં (પાષણ્ડાણાં) નાસ્તિકાનાં ચ ભક્તઃ
૪૫।૭૫બ્ સાધ્વાચારપ્રોજ્ઝિતઃ ક્રોધશીલઃ ।
૪૫।૭૫ચ્ ઈર્ષ્યુઃ ક્રૂરો વિગ્રહાસક્તચેતા
૪૫।૭૫દ્ યસ્મિન્ રાજા તસ્ય દેશસ્ય નાશઃ ॥ ॥

૪૫।૭૬અબ્/ પ્રહર હર છિન્ધિ ભિન્ધીત્યાયુધકાષ્ઠાશ્મપાણયો બાલાઃ ।
૪૫।૭૬ચ્દ્/ નિગદન્તઃ પ્રહરન્તે તત્રાપિ ભયં ભવત્યાશુ ॥ ॥

૪૫।૭૭અબ્/ અંગારગૈરિકાદ્યૈઃ વિકૃતપ્રેતાભિલેખનં યસ્મિન્ ।
૪૫।૭૭ચ્દ્/ નાયકચિત્રિતમથવા ક્ષયે ક્ષયં યાતિ ન ચિરેણ ॥ ॥

૪૫।૭૮અબ્/ લૂતાપટાંગશબલં ન સન્ધ્યયોઃ પૂજિતં કલહયુક્તમ્ ।
૪૫।૭૮ચ્દ્/ નિત્યૌચ્છિષ્ટસ્ત્રીકં ચ યદ્ગૃહં તત્ક્ષયં યાતિ ॥ ॥

૪૫।૭૯અબ્/ દૃષ્ટેષુ યાતુધાનેષુ નિર્દિશેન્ મરકમાશુ સમ્પ્રાપ્તમ્ ।
૪૫।૭૯ચ્દ્/ પ્રતિઘાતાયૈતેષાં ગર્ગઃ શાન્તિં ચકારૈમામ્ ॥ ॥

૪૫।૮૦અબ્/ મહાશાન્ત્યોઽથ બલયો ભોજ્યાનિ સુમહાન્તિ ચ ।
૪૫।૮૦ચ્દ્/ કારયેત મહેન્દ્રં ચ માહેન્દ્રીં (મહેન્દ્રીભિઃ) ચ સમર્ચયેત્ ॥ ॥

૪૫।૮૧અબ્/ નરપતિદેશવિનાશે કેતોરુદયેઽથવા ગ્રહેઽર્કેન્દ્વોઃ ।
૪૫।૮૧ચ્દ્/ ઉત્પાતાનાં પ્રભવઃ સ્વઋતુભવશ્ચાપ્યદોષાય ॥ ॥

૪૫।૮૨અબ્/ યે ચ ન દોષાન્ જનયન્ત્યુત્પાતાઃ તાન્ ઋતુસ્વભાવકૃતાન્ ।

૪૫।૮૨ય્દ્/ ઋષિપુત્રકૃતૈઃ શ્લોકૈઃ વિદ્યાદેતૈઃ સમાસૌક્તૈઃ ॥ ॥

૪૫।૮૩અબ્/ વજ્રાશનિમહીકંપસન્ધ્યાનિર્ઘાતનિઃસ્વનાઃ ।
૪૫।૮૩ય્દ્/ પરિવેષરજોધૂમરક્તાર્કાસ્તમય (અસ્તમન) ઉદયાઃ ॥ ॥

૪૫।૮૪અબ્/ દ્રુમેભ્યોઽન્નરસસ્નેહબહુપુષ્પફલૌદ્ગમાઃ ।
૪૫।૮૪ય્દ્/ ગોપક્ષિમદવૃદ્ધિશ્ચ શિવાય મધુમાધવે ॥ ॥

૪૫।૮૫અબ્/ તારા ઉલ્કાપાતકલુષં કપિલાર્કેન્દુમણ્ડલમ્ ।
૪૫।૮૫ય્દ્/ અનગ્નિજ્વલનસ્ફોટધૂમરેણ્વનિલાહતમ્ ॥ ॥

૪૫।૮૬અબ્/ રક્તપદ્મારુણા (અરુણં) સન્ધ્યા (સન્ધ્યં) નભઃ ક્ષુબ્ધાર્ણવૌપમમ્ ।
૪૫।૮૬ય્દ્/ સરિતાં ચાંબુસંશોષં દૃષ્ટ્વા ગ્રીષ્મે શુભં વદેત્ ॥ ॥

૪૫।૮૭અબ્/ શક્રાયુધપરીવેષવિદ્યુત્શુષ્કવિરોહણમ્ ।
૪૫।૮૭ય્દ્/ કંપૌદ્વર્તનવૈકૃત્યં રસનં દરણં ક્ષિતેઃ ॥ ॥

૪૫।૮૮અબ્/ સરોનદ્યુદપાનાનાં વૃદ્ધ્યૂર્ધ્વતરણપ્લવાઃ ।
૪૫।૮૮ય્દ્/ સરણં ચાદ્રિગેહાનાં વર્ષાસુ ન ભયાવહમ્ ॥ ॥

૪૫।૮૯અબ્/ દિવ્યસ્ત્રીભૂતગન્ધર્વવિમાનાદ્ભુતદર્શનમ્ ।
૪૫।૮૯ય્દ્/ ગ્રહનક્ષત્રતારાણાં દર્શનં ચ દિવાઽંબરે ॥ ॥

૪૫।૯૦અબ્/ ગીતવાદિત્રનિર્ઘોષા વનપર્વતસાનુષુ ।
૪૫।૯૦ય્દ્/ સસ્યવૃદ્ધિઃ અપાં હાનિઃ અપાપાઃ શરદિ સ્મૃતાઃ ॥ ॥

૪૫।૯૧અબ્/ શીતાનિલતુષારત્વં નર્દનં મૃગપક્ષિણામ્ ।
૪૫।૯૧ય્દ્/ રક્ષોયક્ષાદિસત્ત્વાનાં દર્શનં વાગ્ અમનુષી ॥ ॥

૪૫।૯૨અબ્/ દિશો ધૂમાન્ધકારાશ્ચ સનભોવનપર્વતાઃ ।
૪૫।૯૨ય્દ્/ ઉચ્ચૈઃ સૂર્યોદયાસ્તૌ ચ હેમન્તે શોભનાઃ સ્મૃતાઃ ॥ ॥

૪૫।૯૩અબ્/ હિમપાતાનિલોત્પાતા વિરૂપાદ્ભુતદર્શનમ્ ।
૪૫।૯૩ય્દ્/ કૃષ્ણાઞ્જનાભમાકાશં તારા ઉલ્કાપાતપિઞ્જરમ્ ॥ ॥

૪૫।૯૪અબ્/ ચિત્રગર્ભોદ્ભવાઃ સ્ત્રીષુ ગોઽજાશ્વમૃગપક્ષિષુ ।
૪૫।૯૪ય્દ્/ પત્રાંકુરલતાનાં ચ વિકારાઃ શિશિરે શુભાઃ ॥ ॥

૪૫।૯૫અબ્/ ઋતુસ્વભાવજા હ્યેતે દૃષ્ટાઃ સ્વઋતૌ શુભપ્રદાઃ ।
૪૫।૯૫ય્દ્/ ઋતોઃ અન્યત્ર ચૌત્પાતા દૃષ્ટાઃ તે ચાતિદારુણાઃ (બૃશદારુનાઃ) ॥ ॥

૪૫।૯૬અબ્/ ઉન્મત્તાનાં ચ યા ગાથાઃ શિશૂનાં યગ ભાષિતં (ભાષિતં ચ યત્) ।
૪૫।૯૬ય્દ્/ સ્ત્રિયો યગ પ્રભાષન્તે તસ્ય નાસ્તિ વ્યતિક્રમઃ ॥ ॥

૪૫।૯૭અબ્/ પૂર્વં ચરતિ દેવેષુ પશ્ચાગરતિ (ગચ્છતિ) માનુષાન્ ।
૪૫।૯૭ય્દ્/ નાચોદિતા વાગ્ વદતિ સત્યા હ્યેષા સરસ્વતી ॥ ॥

૪૫।૯૮અ ઉત્પાતાન્ ગણિતવિવર્જિતોઽપિ બુદ્ધ્વા
૪૫।૯૮બ્ વિખ્યાતો ભવતિ નરેન્દ્રવલ્લભશ્ચ ।
૪૫।૯૮ય્ એતત્ તન્મુનિવચનં રહસ્યમુક્તં
૪૫।૯૮દ્ યજ્ઞાત્વા ભવતિ નરઃ ત્રિકાલદર્શી ॥ ॥

sએપરતે અધ્યાય ૪૬ મયૂરચિત્રકાધ્યાયઃ
૪૬।૧અબ્/ દિવ્યાન્તરિક્ષાશ્રયમુક્તમાદૌ મયા ફલં શસ્તમશોભનં ચ ।
૪૬।૧ય્દ્/ પ્રાયેણ ચારેષુ સમાગમેષુ યુદ્ધેષુ માર્ગાદિષુ વિસ્તરેણ ॥ ॥

૪૬।૨અ ભૂયો વરાહમિહિરસ્ય ન યુક્તમેતત્
૪૬।૨બ્ કર્તું સમાસકૃદસવિતિ તસ્ય દોષઃ ।
૪૬।૨ય્ તજ્ઞૈઃ ન વાચ્યમિદમુક્તફલાનુગીતિ
૪૬।૨દ્ યદ્ બર્હિ (વર્હિ) ચિત્રકમિતિ પ્રથિતં વરાંગમ્ ॥ ॥

૪૬।૩અબ્/ સ્વરૂપમેવ તસ્ય તત્પ્રકીર્તિતાનુકીર્તનમ્ ।
૪૬।૩ય્દ્/ બ્રવીમ્યહં ન ચેદિદં તથાઽપિ મેઽત્ર વાચ્યતા ॥ ॥

૪૬।૪અબ્/ ઉત્તરવીથિગતા દ્યુતિમન્તઃ ક્ષેમશુભિક્ષશિવાય સમસ્તાઃ ।
૪૬।૪ય્દ્/ દક્ષિણમાર્ગગતા દ્યુતિહીનાઃ ક્ષુદ્ભયતસ્કરમૃત્યુકરાઃ તે ॥ ॥

૪૬।૫અબ્/ કોષ્ઠાગારગતે ભૃગુપુત્રે પુષ્યસ્થે ચ ગિરામ્ પ્રભવિષ્ણૌ ।
૪૬।૫ય્દ્/ નિર્વૈરાઃ ક્ષિતિપાઃ સુખભાજઃ સંહૃષ્ટાશ્ચ જના ગતરોગાઃ ॥ ॥

૪૬।૬અબ્/ પીડયન્તિ યદિ કૃત્તિકાં મઘાં રોહિણીં શ્રવમેન્દ્રમેવ વા ।
૪૬।૬ય્દ્/ પ્રોજ્ઝ્ય સૂર્યમપરે ગ્રહાઃ તદા પશ્ચિમા દિગ્ અનયેન પીડ્યતે ॥ ॥

૪૬।૭અ પ્રાચ્યાં ચેદ્ ધ્વજવદવસ્થિતા દિનાન્તે
૪૬।૭બ્ પ્રાચ્યાનાં ભવતિ હિ વિગ્રહો નૃપાણામ્ ।
૪૬।૭ય્ મધ્યે ચેદ્ ભવતિ હિ મધ્યદેશપીઠા (પીડા)
૪૬।૭દ્ રૂક્ષૈઃ તૈઃ ન તુ રુચિમન્ (રુચિરૈઃ) મયૂખવદ્ભિઃ ॥ ॥

૪૬।૮અબ્/ દક્ષિણાં કકુભમાશ્રિતઃ (આશ્રિતૈઃ) તુ તૈઃ દક્ષિણાપથપયોમુચાં ક્ષયઃ ।
૪૬।૮ય્દ્/ હીનરૂક્ષતનુભિશ્ચ વિગ્રહઃ સ્થૂલદેહકિરણાન્વિતૈઃ શુભમ્ ॥ ॥

૪૬।૯અબ્/ ઉત્તરમાર્ગે સ્પષ્ટમયૂખાઃ શાન્તિકરાઃ તે તન્ નૃપતીનામ્ ।
૪૬।૯ચ્દ્/ હ્રસ્વશરીરા ભસ્મસવર્ણા દોષકરાઃ સ્યુઃ દેશનૃપાણામ્ ॥ ॥

૪૬।૧૦અ નક્ષત્રાણાં તારકાઃ સગ્રહાણામ્
૪૬।૧૦બ્ ધૂમજ્વાલાવિસ્ફુલિંગાન્વિતાશ્ચેત્ ।
૪૬।૧૦ચ્ આલોકં વા નિર્નિમિત્તં ન યાન્તિ
૪૬।૧૦દ્ યાતિ ધ્વંસં સર્વલોકઃ સભૂપઃ ॥ ॥

૪૬।૧૧અ દિવિ ભાતિ યદા તુહિનાંશુયુગં
૪૬।૧૧બ્ દ્વિજવૃદ્ધિઃ અતીવ તદાશુ શુભા ।
૪૬।૧૧ચ્ તદનન્તરવર્ણરણોઽર્કયુગે
૪૬।૧૧દ્ જગતઃ પ્રલયઃ ત્રિચતુષ્પ્રભૃતિ ॥ ॥

૪૬।૧૨અ મુનીન્ અભિજિતં ધ્રુવં મઘવતશ્ચ ભં સંસ્પૃશન્
૪૬।૧૨બ્ શિખી ધનવિનાશકૃત્ કુશલકર્મહા શોકદઃ ।
૪૬।૧૨ચ્ ભુજંગં (ભુજંગભં) અથ સંસ્પૃશેદ્ ભવતિ વૃષ્ટિનાશો ધ્રુવં
૪૬।૧૨દ્ ક્ષયં વ્રજતિ વિદ્રુતો જનપદશ્ચ બાલાકુલઃ ॥ ॥

૪૬।૧૩અબ્/ પ્રાગ્દ્વારેષુ ચરન્ રવિપુત્રો નક્ષત્રેષુ કરોતિ ચ વક્રમ્ ।
૪૬।૧૩ચ્દ્/ દુર્ભિક્ષં કુરુતે મહદુગ્રં (ભયમુગ્રં) મિત્રાણાં ચ વિરોધમવૃષ્ટિમ્ ॥ ॥

૪૬।૧૪અબ્/ રોહિણીશકટમર્કનન્દનો યદિ ભિનત્તિ રુધિરોઽથવા શિખી ।
૪૬।૧૪ચ્દ્/ કિં વદામિ યદનિષ્ટસાગરે જગદશેષમુઅપયાતિ સંક્ષયમ્ ॥ ॥

૪૬।૧૫અબ્/ ઉદયતિ સતતં યદા શિખી ચરતિ ભચક્રમશેષમેવ વા ।
૪૬।૧૫ચ્દ્/ અનુભવતિ પુરાકૃતં તદા ફલમશુભં સચરાચરં જગત્ ॥ ॥

૪૬।૧૬અ ધનુઃસ્થાયી રૂક્ષો રુધિરસદૃશઃ ક્ષુદ્ભયકરો
૪૬।૧૬બ્ બલોદ્યોગં ચન્દ્રઃ (ચેન્દુઃ) કથયતિ જયં જ્યાઽસ્ય ચ યતઃ ।
૪૬।૧૬ચ્ ગવાં(અવાક્) શ્ૃંગો ગોઘ્નો નિધનમપિ સસ્યસ્ય કુરુતે
૪૬।૧૬દ્ જ્વલન્ ધૂમાયન્ વા નૃપતિમરણાયૈવ ભવતિ ॥ ॥

૪૬।૧૭અબ્/ સ્નિગ્ધઃ સ્થૂલઃ સમશ્ૃંગો વિશાલઃ તુંગશ્ચૌદગ્વિચરન્ નાગવીથ્યામ્ ।
૪૬।૧૭ચ્દ્/ દૃષ્ટઃ સૌમ્યૈઃ અશુભૈઃ વિપ્રયુક્તો લોકાનન્દં કુરુતેઽતીવ ચન્દ્રઃ ॥ ॥

૪૬।૧૮અબ્/ પિત્ર્યમૈત્રપુરુહૂતવિશાખાત્વાષ્ટ્રમેત્ય ચ યુનક્તિ શશાંકઃ ।
૪૬।૧૮ચ્દ્/ દક્ષિણેન ન શુભઃ શુભકૃત્ (શુભો હિતકૃત્) સ્યાદ્ યદ્યુદક્ ચરતિ મધ્યગતો વા ॥ ॥

૪૬।૧૯અબ્/ પરિઘ ઇતિ મેઘરેખા યા તિર્યગ્ભાસ્કરોદયેऽસ્તે વા ।
૪૬।૧૯ય્દ્/ પરિધિઃ તુ પ્રતિસૂર્યો દણ્ડઃ ત્વૃજુઃ ઇન્દ્રચાપનિભઃ ॥ ॥

૪૬।૨૦અબ્/ ઉદયેऽસ્તે વા ભાનોઃ યે દીર્ઘા રશ્મયઃ ત્વમોઘાઃ તે ।
૪૬।૨૦ય્દ્/ સુરચાપખણ્ડમ્ ઋજુ યદ્રોહિતમૈરાવતં દીર્ઘમ્ ॥ ॥

૪૬।૨૧અબ્/ અર્ધાસ્તમયાત્ સન્ધ્યા વ્યક્તીભૂતા ન તારકા યાવત્ ।
૪૬।૨૧ય્દ્/ તેજઃપરિહાનિમુખાદ્ ભાનોઃ અર્ધોદયો યાવત્ ॥ ॥

૪૬।૨૨અબ્/ તસ્મિન્ સન્ધ્યાકાલે ચિહ્નૈઃ એતૈઃ શુભાશુભં વાચ્યમ્ ।
૪૬।૨૨ય્દ્/ સર્વૈઃ એતૈઃ સ્નિગ્ધૈઃ સદ્યો વર્ષં ભયં રૂક્ષૈઃ ॥ ॥

૪૬।૨૩અ અચ્છિન્નઃ પરિઘો વિયગ વિમલં શ્યામા મયૂખા રવેઃ
૪૬।૨૩બ્ સ્નિગ્ધા દીધિતયઃ મિતં (સિતં) સુરધનુર્વિદ્યુગ પૂર્વોત્તરા ।
૪૬।૨૩ય્ સ્નિગ્ધો મેઘતરુઃ દિવાકરકરૈઃ આલિંગિતો વા યદા
૪૬।૨૩દ્ વૃષ્ટિઃ સ્યાદ્ યદિ વાऽર્કમસ્તસમયે મેઘો મહાન્ છાદયેત્ ॥ ॥

૪૬।૨૪અબ્/ ખણ્ડો વક્રઃ કૃષ્ણો હ્રસ્વઃ કાકાદ્યૈઃ વા ચિહ્નૈઃ વિદ્ધઃ ।
૪૬।૨૪ય્દ્/ યસ્મિન્ દેશે રૂક્ષશ્ચાર્કઃ તત્રાભાવઃ પ્રાયો રાજ્ઞઃ ॥ ॥

૪૬।૨૫અબ્/ વાહિનીં સમુપયાતિ પૃષ્ઠતો માંસભુક્ ખગગણો યુયુત્સતઃ ।
૪૬।૨૫ય્દ્/ યસ્ય તસ્ય બલવિદ્રવો મહાન્ અગ્રૈઃ તુ વિજયો વિહંગમૈઃ ॥ ॥

૪૬।૨૬અબ્/ ભાનોરુદયે યદિ વાસ્તમયે ગન્ધર્વપુરપ્રતિમા ધ્વજિની ।
૪૬।૨૬ય્દ્/ વિંબં નિરુણદ્ધિ તદા નૃપતેઃ પ્રાપ્તં સમરં સભયં પ્રવદેત્ ॥ ॥

૪૬।૨૭અબ્/ શસ્તા શાન્તિદ્વિજમૃગઘુષ્ટા સન્ધ્યા સ્નિગ્ધા મૃદુપવના ચ ।
૪૬।૨૭ય્દ્/ પાંશુધ્વસ્તા જનપદનાશં ધત્તે રૂક્ષા રુધિરનિભા વા ॥ ॥

૪૬।૨૮અ યદ્વિસ્તરેણ કથિતં મુનિભિઃ તદસ્મિન્
૪૬।૨૮બ્ સર્વં મયા નિગદિતં પુનરુક્તવર્જમ્ ।
૪૬।૨૮ય્ શ્રુત્વાऽપિ કોકિલરુતં બલિભુગ્વિરૌતિ
૪૬।૨૮દ્ યત્તત્ સ્વભાવકૃતમસ્ય પિકં ન જેતુમ્ ॥ ॥

sએપરતે અધ્યાય ૪૭ પુષ્યસ્નાનાધ્યાયઃ
૪૭।૧અબ્/ મૂલં મનુજાધિપતિઃ પ્રજાતરોઃ તદુપઘાતસંસ્કારાત્ ।
૪૭।૧ય્દ્/ અશુભં શુભં ચ લોકે ભવતિ યતોऽતો નૃપતિચિન્તા ॥ ॥

૪૭।૨અબ્/ યા વ્યાખ્યાતા શાન્તિઃ સ્વયંભુવા સુરગુરોઃ મહેન્દ્રાર્થે ।

૪૭।૨ચ્દ્/ તાં પ્રાપ્ય વૃદ્ધગર્ગઃ પ્રાહ યથા ભાગુરેઃ શ્ૃણુત ॥ ॥

૪૭।૩અબ્/ પુષ્યસ્નાનં નૃપતેઃ કર્તવ્યં દૈવવિત્પુરોધાભ્યામ્ ।
૪૭।૩ચ્દ્/ નાતઃ પરં પવિત્રં સર્વોત્પાતાન્તકરમસ્તિ ॥ ॥

૪૭।૪અબ્/ શ્લેષ્માતકાક્ષકણ્ટકિકટુતિક્તવિગન્ધિપાદપવિહીને ।
૪૭।૪ચ્દ્/ કૌશિકગૃધ્રપ્રભૃતિભિઃ અનિષ્ટવિહગૈઃ પરિત્યક્તે ॥ ॥

૪૭।૫અબ્/ તરુણતરુગુલ્મવલ્લીલતાપ્રતાનાન્વિતે (વૃતે) વનોદ્દેશે ।
૪૭।૫ચ્દ્/ નિરુપહતપત્રપલ્લ્વમનોજ્ઞમધુરદ્રુમપ્રાયે ॥ ॥

૪૭।૬અબ્/ કૃકવાકુજીવજીવકશુકશિખિશતપત્રચાષહારીતૈઃ ।
૪૭।૬ચ્દ્/ ક્રકરચકોરકપિઞ્જલવઞ્જુલપારાવતશ્રીકૈઃ ॥ ॥

૪૭।૭અબ્/ કુસુમરસપાનમત્તદ્વિરેફપુંસ્કોકિલાદિભિશ્ચાન્યૈઃ ।
૪૭।૭ચ્દ્/ વિરુતે વનોપકણ્ઠે ક્ષેત્રાગારે શુચાવથવા ॥ ॥

૪૭।૮અબ્/ હૃદિની (હ્રદિની) વિલાસિનીનાં જલખગનખવિક્ષતેષુ રમ્યેષુ ।
૪૭।૮ચ્દ્/ પુલિનજઘનેષુ કુર્યાદ્ દૃક્મનસોઃ પ્રીતિજનનેષુ ॥ ॥

૪૭।૯અબ્/ પ્રોત્પ્લુતહંસચ્છત્રે કારણ્ડવકુરરસારસોદ્ગીતે ।
૪૭।૯ચ્દ્/ ફુલ્લેન્દીવરનયને સરસિ સહસ્રાક્ષકાન્તિધરે ॥ ॥

૪૭।૧૦અબ્/ પ્રોત્ફુલ્લકમલવદનાઃ કલહંસકલ (અદ્।સ્વન) પ્રભાષિણ્યઃ ।
૪૭।૧૦ચ્દ્/ પ્રોત્તુંગકુડ્મલકુચા યસ્મિન્ નલિનીવિલાસિન્યઃ ॥ ॥

૪૭।૧૧અબ્/ કુર્યાદ્ ગોરોમન્થજફેનલવશકૃત્ખુરક્ષતૌપચિતે ।
૪૭।૧૧ચ્દ્/ અચિરપ્રસૂતહુંકૃતવલ્ગિતવત્સૌત્સવે ગોષ્ઠે ॥ ॥

૪૭।૧૨અબ્/ અથવા સમુદ્રતીરે કુશલાગતરત્નપોત (પોતરત્ન) સંબાધે ।
૪૭।૧૨ચ્દ્/ ઘનનિચુલલીનજલચરસિતખગશબલીકૃતોપાન્તે ॥ ॥

૪૭।૧૩અબ્/ ક્ષમયા ક્રોધ ઇવ જિતઃ સિંહો મૃગ્યાભિભૂયતે યેષુ (યત્ર) ।
૪૭।૧૩ચ્દ્/ દત્તાભયખગમૃગશાવકેષુ તેષ્વાશ્રમેષ્વથવા ॥ ॥

૪૭।૧૪અબ્/ કાંચીકલાપનૂપુરગુરુજઘનૌદ્વહનવિઘ્નિતપદાભિઃ ।
૪૭।૧૪ચ્દ્/ શ્રીમતિ મૃગેક્ષણાભિઃ ગૃહેઽન્યભ્ભૃતવલ્ગુવચનાભિઃ ॥ ॥

૪૭।૧૫અબ્/ પુણ્યેષ્વાયતનેષુ ચ તીર્થેષૂદ્યાનરમ્યદેશેષુ ।
૪૭।૧૫ચ્દ્/ પૂર્વોદક્પ્લવભૂમૌ પ્રદક્ષિણાંભોવહાયાં ચ ॥ ॥

૪૭।૧૬અબ્/ ભસ્માંગારાસ્થ્યૂષરતુષકેશશ્વભ્રકર્કટાવાસૈઃ ।
૪૭।૧૬ય્દ્/ શ્વાવિધ (શ્વાવિન્) મૂષકવિવરૈઃ વલ્મીકૈઃ યા ચ સન્ત્યક્તા ॥ ॥

૪૭।૧૭અબ્/ ધાત્રી ઘના સુગન્ધા સ્નિગ્ધા મધુરા સમા ચ વિજયાય ।
૪૭।૧૭ય્દ્/ સેનાવાસેઽપિ એવં યોજયિતવ્યા યથાયોગમ્ ॥ ॥

૪૭।૧૮અબ્/ નિષ્ક્રમ્ય પુરાન્ નક્તં દૈવજ્ઞામાત્યયાજકાઃ પ્રાચ્યામ્ ।
૪૭।૧૮ય્દ્/ કૌબેર્યાં વા કૃત્વા બલિં દિશીશાધિપાયાં વા ॥ ॥

૪૭।૧૯અબ્/ લાજાક્ષતદધિકુસુમૈઃ પ્રયતઃ પ્રણતઃ પુરોહિતઃ કુર્યાત્ ।
૪૭।૧૯ય્દ્/ આવાહનમથ મન્ત્રઃ તસ્મિન્ મુનિભિઃ સમુદ્દિષ્ટઃ ॥ ॥

(મન્ત્ર ૪૭।૨૦-૨૧)

૪૭।૨૦અબ્/ આગચ્છન્તુ સુરાઃ સર્વે યેઽત્ર પૂજાભિલાષિણઃ ।
૪૭।૨૦ય્દ્/ દિશો નાગા દ્વિજાશ્ચૈવ યે ચાપ્યન્યે (ચાનેયપિ) ઽંશભાગિનઃ ॥ ॥

૪૭।૨૧અબ્/ આવાહ્યએવમ્ તતઃ સર્વાન્ એવં બ્રૂયાત્ પુરોહિતઃ ।
૪૭।૨૧ય્દ્/ શ્વઃ પૂજાં પ્રાપ્ય યાસ્યન્તિ દત્ત્વા શાન્તિં મહીપતેઃ ॥ ॥

૪૭।૨૨અબ્/ આવાહિતેષુ કૃત્વા પૂજાં તાં શર્વરીં વસેયુઃ તે ।
૪૭।૨૨ય્દ્/ સદસત્સ્વપ્નનિમિત્તં યાત્રાયાં સ્વપ્નવિધિરુક્તઃ ॥ ॥

૪૭।૨૩અબ્/ અપરેઽહનિ પ્રભાતે સંભારાન્ ઉપહરેદ્ યથોક્તગુણાન્ ।
૪૭।૨૩ય્દ્/ ગત્વાઽવનિપ્રદેશે શ્લોકાશ્ચાપ્યત્ર મુનિગીતાઃ ॥ ॥

૪૭।૨૪અબ્/ તસ્મિન્ મણ્ડલમાલિખ્ય કલ્પયેત્ તત્ર મેદિનીમ્ ।
૪૭।૨૪ય્દ્/ નાનારત્નાકરવતીં સ્થાનાનિ વિવિધાનિ ચ ॥ ॥

૪૭।૨૫અબ્/ પુરોહિતો યથાસ્થાનં નાગાન્ યક્ષાન્ સુરાન્ પિતુન્ ।
૪૭।૨૫ય્દ્/ ગન્ધર્વાપ્સરસશ્ચૈવ મુનીન્ સિદ્ધાંશ્ચ વિન્યસેત્ ॥ ॥

૪૭।૨૬અબ્/ ગ્રહાંશ્ચ સર્વ (સહ) નક્ષત્રૈ રુદ્રાંશ્ચ સહ માતૃભિઃ ।
૪૭।૨૬ય્દ્/ સ્કન્દં વિષ્ણું વિશાખં ચ લોકપાલાન્ સુરસ્ત્રિયઃ ॥ ॥

૪૭।૨૭અબ્/ વર્ણકૈઃ વિવિધૈઃ કૃત્વા હૃદ્યૈઃ ગન્ધગુણાન્વિતૈઃ ।
૪૭।૨૭ય્દ્/ યથાસ્વં પૂજયેદ્ વિદ્વાન્ ગન્ધમાલ્યાનુલેપનૈઃ ॥ ॥

૪૭।૨૮અબ્/ ભક્ષ્યૈઃ અન્નૈશ્ચ વિવિધૈઃ ફલમૂલામિષૈઃ તથા ।
૪૭।૨૮ય્દ્/ પાનૈશ્ચ (પાનકૈઃ) વિવિધૈઃ હૃદ્યૈઃ સુરાક્ષીરાસવાદિભિઃ ॥ ॥

૪૭।૨૯અબ્/ કથયામ્યતઃ પરમહં પૂજામસ્મિન્ યથાભિલિખિતાનામ્ ।

૪૭।૨૯ય્દ્/ ગ્રહયજ્ઞે યઃ પ્રોક્તો વિધિઃ ગ્રહાણાં સ કર્તવ્યઃ ॥ ॥

૪૭।૩૦અબ્/ માંસઓદનમદ્યૈઃ પિશાચદિતિતનયદાનવાઃ પૂજ્યાઃ ।
૪૭।૩૦ય્દ્/ અભ્યઞ્જનાઞ્જનતિલૈઃ પિતરો માંસઓદનૈશ્ચાપિ ॥ ॥

૪૭।૩૧અબ્/ સામયજુર્ભિઃ મુનયઃ ત્વૃગ્ભિઃ ગન્ધૈશ્ચ ધૂપમાલ્યયુતૈઃ ।
૪૭।૩૧ય્દ્/ અશ્લેષકવર્ણૈઃ ત્રિમધુરેણ ચાભ્યર્ચયેદ્ નાગાન્ ॥ ॥

૪૭।૩૨અબ્/ ધૂપૂજ્યાહુતિમાલ્યૈઃ વિબુધાન્ રત્નઃ (રત્નૈઃ) સ્તુતિપ્રણામૈશ્ચ ।
૪૭।૩૨ય્દ્/ ગન્ધર્વાન્ અપ્સરસો ગન્ધૈઃ માલ્યૈશ્ચ સુસુગન્ધૈઃ ॥ ॥

૪૭।૩૩અબ્/ શેષાં તુ સાર્વવર્ણિકબલિભિઃ પૂજાં ન્યસેગ સર્વેષામ્ ।
૪૭।૩૩ય્દ્/ પ્રતિસરવસ્ત્રપતાકાભૂષણયજ્ઞોપવીતાનિ ॥ ॥

૪૭।૩૪અબ્/ મણ્ડલપશ્ચિમભાગે કૃત્વાગ્નિં દક્ષિણેઽથવા વેદ્યામ્ ।
૪૭।૩૪ય્દ્/ આદદ્યાત્ સંભારાન્ દર્ભાન્ દીર્ઘાન્ અગર્ભાંશ્ચ ॥ ॥

૪૭।૩૫અબ્/ લાજાજ્યાક્ષતદધિમધુસિદ્ધાર્થકગન્ધસુમનસો ધૂપઃ (ધુપાન્) ।
૪૭।૩૫ય્દ્/ ગોરોચનાઞ્જનતિલાઃ (તિલાન્) સ્વર્તુજમધુરાણિ ચ ફલાનિ ॥ ॥

૪૭।૩૬અબ્/ સઘૃતસ્ય પાયસસ્ય ચ તત્ર શરાવાણિ તૈશ્ચ સંભારૈઃ ।
૪૭।૩૬ય્દ્/ પશ્ચિમવેદ્યાં પૂજાં કુર્યાત્ સ્નાનસ્ય સા વેદી ॥ ॥

૪૭।૩૭અબ્/ તસ્યાઃ કોણેષુ દૃઢાન્ કલશાન્ સિતસૂત્રવેષ્ટિતગ્રીવાન્ ।
૪૭।૩૭ય્દ્/ સક્ષીરવૃક્ષપલ્લવફલાપિધાનાન્ વ્યવસ્થાપ્ય ॥ ॥

૪૭।૩૮અબ્/ પુષ્યસ્નાનવિમિશ્રેણાપૂર્ણાન્ અંભસા સરત્નાંશ્ચ ।
૪૭।૩૮ય્દ્/ પુષ્યસ્નાનદ્રવ્યાણિ આદદ્યાદ્ ગર્ગગીતાનિ ॥ ॥

૪૭।૩૯અબ્/ જ્યોતિષ્મતીં ત્રાયમાણામભયામપરાજિતામ્ ।
૪૭।૩૯ય્દ્/ જીવાં વિશ્વેશ્વરીં પાઠાં સમંગાં વિજયાં તથા ॥ ॥

૪૭।૪૦અબ્/ સહાં ચ સહદેવીં ચ પૂર્ણકોશાં શ્તાવરીમ્ ।
૪૭।૪૦ય્દ્/ અરિષ્ટિકાં શિવાં ભદ્રાં તેષુ કુંભેષુ વિન્યસેત્ ॥ ॥

૪૭।૪૧અબ્/ બ્રાહ્મીં ક્ષેમામજાં ચૈવ સર્વબીજાનિ કાંચનીં (કાંચનં) ।
૪૭।૪૧ય્દ્/ મંગલ્યાનિ યથાલાભં સર્વૌષધ્યો રસાઃ (રસાં) તથા ॥ ॥

૪૭।૪૨અબ્/ રત્નાનિ સર્વગન્ધાઃ (સર્વગન્ધાંશ) ચ બિલ્વં ચ સવિકંકતમ્ ।
૪૭।૪૨ય્દ્/ પ્રશસ્તનામ્ન્યશ્ચૌષધ્યો હિરણ્યં મંગલાનિ ચ ॥ ॥

૪૭।૪૩અબ્/ આદાવનડુહશ્ચર્મ જરયા સંહૃતાયુષઃ ।
૪૭।૪૩ચ્દ્/ પ્રશસ્તલક્ષણભૃતઃ પ્રાચીનગ્રીવમાસ્તરેત્ ॥ ॥

૪૭।૪૪અબ્/ તતો વૃષસ્ય યોધસ્ય ચર્મ રોહિતમક્ષતમ્ ।
૪૭।૪૪ચ્દ્/ સિંહસ્યાથ તૃતીયં સ્યાદ્ વ્યાઘ્રસ્ય ચ તતઃ પરમ્ ॥ ॥

૪૭।૪૫અબ્/ ચત્વાર્યેતાનિ ચર્માણિ તસ્યાં વેદ્યામુપાસ્તરેત્ ।
૪૭।૪૫ચ્દ્/ શુભે મુહૂર્તે સમ્પ્રાપ્તે પુષ્યયુક્તે નિશાકરે ॥ ॥

૪૭।૪૬અબ્/ ભદ્રાસનમેકતમેન કારિતં કનકરજતતામ્રાણામ્ ।
૪૭।૪૬ચ્દ્/ ક્ષીરતરુનિર્મિતં વા વિન્યસ્યં ચર્મણામુપરિ ॥ ॥

૪૭।૪૭અબ્/ ત્રિવિધઃ તસ્યૌચ્છ્રાયો હસ્તઃ પાદાધિકોઽર્ધયુક્તશ્ચ ।
૪૭।૪૭ચ્દ્/ માણ્ડલિકાનન્તરજિત્સમસ્તરાજ્યાર્થિનાં શુભદઃ ॥ ॥

૪૭।૪૮અબ્/ અન્તર્ધાય હિરણ્યં તત્રૌપવિશેન્ નરેશ્વરઃ સુમનાઃ ।
૪૭।૪૮ચ્દ્/ સચિવાપ્તપુરોહિતદૈવપૌરકલ્યાણનામવૃતઃ ॥ ॥

૪૭।૪૯અબ્/ વન્દિજનપૌરવિપ્રૈઃ પ્રઘુષ્ટ (વિપ્રપ્રઘુષ્ટ) પુણ્યાહવેદનિર્ઘોષૈઃ ।
૪૭।૪૯ચ્દ્/ સમૃદંગશંખતૂર્યૈઃ મંગલશબ્દૈઃ હતાનિષ્ટઃ ॥ ॥

૪૭।૫૦અબ્/ અહતક્ષૌમનિવસનં પુરોહિતઃ કંબલેન સંછાદ્ય ।
૪૭।૫૦ચ્દ્/ કૃતબલિપૂજં કલશૈઃ અભિષિંચેત્ સર્પિષા પૂર્ણૈઃ ॥ ॥

૪૭।૫૧અબ્/ અષ્ટાવષ્ટાવિંશતિઃ અષ્ટશતં વાપિ કલશપરિમાણમ્ ।
૪૭।૫૧ચ્દ્/ અધિકેઽધિકે ગુણોત્તરમયં ચ મન્ત્રોઽત્ર મુનિગીતઃ ॥ ॥

(મન્ત્ર)

૪૭।૫૨અબ્/ આજ્યં તેજઃ સમુદ્દિષ્ટમાજ્યં પાપહરં પરમ્ ।
૪૭।૫૨ચ્દ્/ આજ્યં સુરાણામાહાર આજ્યે લોકાઃ પ્રતિષ્ઠિતાઃ ॥ ॥

૪૭।૫૩અબ્/ ભૌમાન્તરિક્ષં દિવ્યં વા યત્ તે કલ્મષં (કલ્વિષં) આગતમ્ ।
૪૭।૫૩ચ્દ્/ સર્વં તદાજ્યસંસ્પર્શાત્ પ્રણાશમુપગચ્છતુ ॥ ॥

૪૭।૫૪અબ્/ કંબલમપનીય તતઃ પુષ્યસ્નાનાંબુભિઃ સફલપુષ્પૈઃ ।
૪૭।૫૪ચ્દ્/ અભિષિંચેન્ મનુજેન્દ્રં પુરોહિતોઽનેન મન્ત્રેણ ॥ ॥

(મન્ત્ર)

૪૭।૫૫અબ્/ સુરાઃ ત્વામભિષિંચન્તુ યે ચ સિદ્ધાઃ પુરાતનાઃ ।
૪૭।૫૫ચ્દ્/ બ્રહ્મા વિષ્ણુશ્ચ રુદ્રઃ (શંભુઃ) ચ સાધ્યાશ્ચ સમરુદ્ગણાઃ ॥ ॥

૪૭।૫૬અબ્/ આદિત્યા વસવો રુદ્રા અશ્વિનૌ ચ ભિષગ્વરૌ ।
૪૭।૫૬ચ્દ્/ અદિતિઃ દેવમાતા ચ સ્વાહા સિદ્ધિઃ સરસ્વતી ॥ ॥

૪૭।૫૭અબ્/ કીર્તિઃ લક્ષ્મીઃ ધૃતિઃ શ્રીશ્ચ સિનીવાલી કુહૂઃ તથા ।
૪૭।૫૭ચ્દ્/ દનુશ્ચ સુરસા ચૈવ વિનતા કદ્રુઃ એવ ચ ॥ ॥

૪૭।૫૮અબ્/ દેવપત્ન્યશ્ચ યા નોક્તા દેવમાતર એવ ચ ।
૪૭।૫૮ચ્દ્/ સર્વાઃ ત્વામભિષિંચન્તુ દિવ્યાશ્ચાપ્સરસાં ગણાઃ ॥ ॥

૪૭।૫૯અબ્/ નક્ષત્રાણિ મુહૂર્તાશ્ચ પક્ષાહોરાત્રસન્ધયઃ ।
૪૭।૫૯ચ્દ્/ સંવત્સરા દિનેશાશ્ચ કલાઃ કાષ્ઠાઃ ક્ષણા લવા ।
૪૭।૬૦અબ્(૪૮।૬૯ચ્દ્)/ સર્વે ત્વામભિષિંચન્તુ કાલસ્યાવયવાઃ શુભાઃ ।
૪૭।૬૦ચ્દ્(૪૮।૭૦અબ્)/ એતે ચાન્યે ચ મુનયો વેદવ્રતપરાયણાઃ ॥ ॥

૪૭।૬૧અબ્/ સશિષ્યાઃ તેઽભિષિંચન્તુ સદારાશ્ચ તપોધનાઃ ।
૪૭।૬૧ચ્દ્/ વૈમાનિકાઃ સુરગણા મનવઃ સાગરૈઃ સહ ॥ ॥

૪૭।૬૨અબ્/ સરિતશ્ચ મહાભાગા નાગાઃ કિંપુરુષાશ્તથા ।
૪૭।૬૨ચ્દ્/ વૈખાનસા મહાભાગા દ્વિજા વૈહાયસાશ્ચ યે ॥ ॥

૪૭।૬૩અબ્/ સપ્તર્ષયઃ સદારાશ્ચ ધ્રુવસ્થાનાનિ યાનિ ચ ।
૪૭।૬૩ચ્દ્/ મરીચિઃ અત્રિઃ પુલહઃ પુલસ્ત્યઃ ક્રતુઃ અંગિરાઃ ॥ ॥

૪૭।૬૪અબ્/ ભૃગુઃ સનત્કુમારશ્ચ સનકોઽથ સનન્દનઃ ।
૪૭।૬૪ચ્દ્/ સનાતનશ્ચ દક્ષશ્ચ જૈગીષવ્યો ભગન્દરઃ ॥ ॥

૪૭।૬૫અબ્/ એકતશ્ચ દ્વિતશ્ચૈવ ત્રિતો જાબાલિકશ્યપૌ ।
૪૭।૬૫ચ્દ્/ દુર્વાસા દુર્વિનીતશ્ચ કણ્વઃ કાત્યાયનઃ તથા ॥ ॥

૪૭।૬૬અબ્/ માર્કણ્ડેયો દીર્ઘતપાઃ શુનઃશેફો વિદૂરથઃ ।
૪૭।૬૬ચ્દ્/ ઊર્ધ્વઃ સંવર્તકશ્ચૈવ ચ્યવનોઽત્રિઃ પરાશરઃ ॥ ॥

૪૭।૬૭અબ્/ દ્વૈપાયનો યવક્રીતો દેવરાજઃ સહાનુજઃ ।
૪૭।૬૭ચ્દ્/ પર્વતાઃ તરવો વલ્લ્યઃ પુણ્યાનિ આયતનાનિ ચ ॥ ॥

૪૭।૬૮અબ્/ પ્રજાપતિઃ દિતિશ્ચૈવ ગાવો વિશ્વસ્ય માતરઃ ।
૪૭।૬૮ચ્દ્/ વાહનાનિ ચ દિવ્યાનિ સર્વલોકાશ્ચરાચરાઃ ॥ ॥

૪૭।૬૯અબ્/ અગ્નયઃ પિતરઃ તારા જીમૂતાઃ ખં દિશો જલમ્ ।
૪૭।૬૯ચ્દ્/ એતે ચાન્યે ચ બહવઃ પુણ્યસંકીર્તનાઃ શુભૈઃ (શુભાઃ) ॥ ॥

૪૭।૭૦અબ્/ તોયૈઃ ત્વામભિષિંચન્તુ સર્વોત્પાતનિબર્હણૈઃ ।

૪૭।૭૦ય્દ્/ યથાભિષિક્તો મઘવાન્ એતૈઃ મુદિતમનસૈઃ (કલ્યાણમ્ તે પ્રકુર્વન્તુ આયુરારોગ્યમેવ્વ ચ) ॥ ॥

૪૭।૭૧અબ્/ ઇત્યેતૈશ્ચાન્યૈશ્ચાપ્યથર્વકલ્પ આહિતૈઃ (વિહિતૈઃ) સરુદ્રગણૈઃ ।

૪૭।૭૧ય્દ્/ કૌષ્માણ્ડમહારૌહિણકુબેરહૃદ્યૈઃ સમૃદ્ધ્યા ચ ॥ ॥

૪૭।૭૨અબ્/ આપોહિષ્ઠાતિસૃભિઃ હિરણ્યવર્ણા ઇતિ ચતસૃભિઃ જપ્તમ્ ।

૪૭।૭૨ય્દ્/ કાર્પાસિકવસ્ત્રયુગં બિભૃયાત્ સ્નાતો નરાધિપતિઃ ॥ ॥

૪૭।૭૩અબ્/ પુણ્યાહશંખશબ્દૈઃ આચાન્તોઽભ્યર્ચ્ય દેવગુરુવિપ્રાન્ ।

૪૭।૭૩ય્દ્/ છત્રધ્વજાયુધાનિ ચ તતઃ સ્વપૂજાં પ્રયુઞ્જીત ॥ ॥

૪૭।૭૪અબ્/ આયુષ્યં વર્ચસ્યં રાયસ્પોષાભિઃ ઋગ્ભિઃ એતાભિઃ ।

૪૭।૭૪ય્દ્/ પરિજપ્તં વૈજયિકં નવં વિદધ્યાદલંકારમ્ ॥ ॥

૪૭।૭૫અબ્/ ગત્વા દ્વિતીયવેદીં સમુપવિશેગર્મણાં ઉપરિ રાજા ।

૪૭।૭૫ય્દ્/ દેયાનિ ચૈવ ચર્માણિ ઉપર્યુપર્યેવમેતાનિ ॥ ॥

૪૭।૭૬અબ્/ વૃષસ્ય વૃષદંશસ્ય રુરોશ્ચ પૃષતસ્ય ચ ।

૪૭।૭૬ય્દ્/ તેષામુપરિ સિંહસ્ય વ્યાઘ્રસ્ય ચ તતઃ પરમ્ ॥ ॥

૪૭।૭૭અબ્/ મુખ્યસ્થાને જુહુયાત્ પુરોહિતોઽગ્નિં સમિત્તિલઘૃતાદ્યૈઃ ।

૪૭।૭૭ય્દ્/ ત્રિનયનશક્રબૃહસ્પતિનારાયણનિત્યગતિઋગ્ભિઃ ॥ ॥

૪૭।૭૮અબ્/ ઇન્દ્રધ્વજનિર્દિષ્ટાનિ અગ્નિનિમિત્તાનિ દૈવવિદ્ બ્રૂયાત્ ।

૪૭।૭૮ય્દ્/ કૃત્વાઽશેષસમાપ્તિં પુરોહિતઃ પ્રાઞ્જલિઃ બ્રૂયાત્ ॥ ॥

૪૭।૭૯અબ્/ યાન્તુ દેવગણાઃ સર્વે પૂજામાદાય પાર્થિવાત્ ।

૪૭।૭૯ય્દ્/ સિદ્ધિં દત્ત્વા તુ વિપુલાંસુવિપુલાં) પુનઃ આગમનાય ચ (વૈ) ॥ ॥

૪૭।૮૦અબ્/ નૃપતિઃ અતો દૈવજ્ઞં પુરોહિતં ચાર્ચયેદ્ ધનૈઃ બહુભિઃ ।

૪૭।૮૦ય્દ્/ અન્યાંશ્ચ દક્ષિણીયાન્ યથોચિતં (યથાર્હતઃ) શ્રોત્રિયપ્રભૃતીન્ ॥ ॥

૪૭।૮૧અબ્/ દત્ત્વાઽભયં પ્રજાનામાઘાતસ્થાનગાન્ વિસૃજ્ય પશૂન્ ।

૪૭।૮૧ય્દ્/ બધનમોક્ષં કુર્યાદભ્યનન્તરદોષકૃદ્વર્જમ્ ॥ ॥

૪૭।૮૨અબ્/ એતત્ પ્રયુજ્યમાનં પ્રતિપુષ્યં સુખયશોઽર્થવૃદ્ધિકરમ્ ।

૪૭।૮૨ય્દ્/ પુષ્યાદ્ (પુષ્યં) વિનાર્ધફલદા પૌષી શાન્તિઃ પરા (પુરા) પ્રોક્તા ॥ ॥

૪૭।૮૩અબ્/ રાષ્ટ્રૌત્પાતૌપસર્ગેષુ રાહોઃ કેતોશ્ચ દર્શને ।

૪૭।૮૩ય્દ્/ ગ્રહાવમર્દને ચૈવ પુષ્યસ્નાનં સમાચરેત્ ॥ ॥

૪૭। ૮૪અબ્/ નાસ્તિ લોકે સ ઉત્પાતો યો હ્યનેન ન શામ્યતિ ।
૪૭। ૮૪સ્દ્/ મંગલં ચાપરં નાસ્તિ યદસ્માદતિરિચ્યતે ॥ ॥

૪૭। ૮૫અબ્/ અધિરાજ્યાર્થિનો રાજ્ઞઃ પુત્રજન્મ ચ કાંક્ષતઃ ।
૪૭। ૮૫સ્દ્/ તત્પૂર્વમભિષેકે ચ વિધિઃ એષ પ્રશસ્યતે ॥ ॥

૪૭। ૮૬અબ્/ મહેન્દ્રાર્થમુવાચૈદમ્ બૃહત્કીર્તિઃ બૃહસ્પતિઃ ।
૪૭। ૮૬સ્દ્/ સ્નાનમાયુષ્પ્રજાવૃદ્ધિસૌભાગ્યકરણં પરમ્ ॥ ॥

૪૭। ૮૭અબ્/ અનેનૈવ વિધાનેન હસ્ત્યશ્વં સ્નાપયેત્ તતઃ (સ્નાપયીત યઃ) ।
૪૭। ૮૭સ્દ્/ તસ્યામયવિનિર્મુક્તં પરાં સિદ્ધિમવાપ્નુયાત્ ॥ ॥

sએપરતે અધ્યાય ૪૮ પટ્ટલક્ષણાધ્યાયઃ
૪૮। ૧અબ્/ વિસ્તરશો નિર્દિષ્ટં પટ્ટાણાં લક્ષણં યદાચાર્યૈઃ ।
૪૮। ૧સ્દ્/ તત્ સંક્ષેપઃ ક્રિયતે મયાऽત્ર સકલાર્થસમ્પન્નઃ ॥ ॥

૪૮। ૨અબ્/ પટ્ટઃ શુભદો રાજ્ઞાં મધ્યેऽષ્ટાવંગુલાનિ વિસ્તીર્ણઃ ।
૪૮। ૨સ્દ્/ સપ્ત નરેન્દ્રમહિષ્યાઃ ષડ્ યુવરાજસ્ય નિર્દિષ્ટઃ ॥ ॥

૪૮। ૩અબ્/ ચતુરંગુલવિસ્તારઃ પટ્ટઃ સેનાપતેઃ ભવતિ મધ્યે ।
૪૮। ૩સ્દ્/ દ્વે ચ પ્રસાદપટ્ટઃ પંચૈતે કીર્તિતાઃ પટ્ટાઃ ॥ ॥

૪૮। ૪અબ્/ સર્વે દ્વિગુણાયામા મધ્યાદર્ધેન પાર્શ્વવિસ્તીર્ણાઃ ।
૪૮। ૪સ્દ્/ સર્વે ચ શુદ્ધકાંચનવિનિર્મિતાઃ શ્રેયસો વૃદ્ધ્યૈ ॥ ॥

૪૮। ૫અબ્/ પંચશિખો ભૂમિપતેઃ ત્રિશિખો યુવરાજપાર્થિવમહિષ્યોઃ ।
૪૮। ૫સ્દ્/ એકશિખઃ સૈન્યપતેઃ પ્રસાદપટ્ટો વિના શિખયા ॥ ॥

૪૮। ૬અબ્/ ક્રિયમાણં યદિ પત્રં સુખેન વિસ્તારમેતિ પટ્ટસ્ય ।
૪૮। ૬સ્દ્/ વૃદ્ધિજયૌ ભૂમિપતેઃ તથા પ્રજાનાં ચ સુખસમ્પત્ ॥ ॥

૪૮। ૭અબ્/ જીવિતરાજ્યવિનાશં કરોતિ મધ્યે વ્રણઃ સમુત્પન્નઃ ।
૪૮। ૭સ્દ્/ મધ્યે સ્ફુટિતઃ ત્યાજ્યો વિઘ્નકરઃ પાર્શ્વયોઃ સ્ફુટિતઃ ॥ ॥

૪૮। ૮અબ્/ અશુભનિમિત્તોત્પત્તૌ શાસ્ત્રજ્ઞઃ શાન્તિમાદિશેદ્ રાજ્ઞઃ ।
૪૮। ૮સ્દ્/ શસ્તનિમિત્તઃ પટ્ટો નૃપરાષ્ટ્રવિવૃદ્ધયે ભવતિ ॥ ॥

sએપરતે અધ્યાય ૪૯ ખડ્ગલક્ષણાધ્યાયઃ
૪૯। ૧અબ્/ અંગુલશતાર્ધમુત્તમ ઊનઃ સ્યાત્ પંચવિંશતિઃ (પઞ્ચવિંશતિં) ખડ્ગઃ ।

૪૯।૧ય્દ્/ અંગુલમાનાજ્ઞેયો વ્રણોઽશુભો વિષમપર્વસ્થઃ ॥ ॥

૪૯।૨અબ્/ શ્રીવૃક્ષવર્ધમાનાતપત્રશિવલિંગકુણ્ડલાબ્જાનામ્ ।
૪૯।૨ય્દ્/ સદૃશા વ્રણાઃ પ્રશસ્તા ધ્વજાયુધસ્વસ્તિકાનાં ચ ॥ ॥

૪૯।૩અબ્/ કૃકલાસકાકકંકક્રવ્યાદકબન્ધવૃશ્ચિકાકૃતયઃ ।
૪૯।૩ય્દ્/ ખડ્ગે વ્રણા ન શુભદા વંશાનુગતાઃ પ્રભૂતાશ્ચ ॥ ॥

૪૯।૪અબ્/ સ્ફુટિતો હ્રસ્વઃ કુણ્ઠો વંશચ્છિન્નો ન દૃગ્મનોઽનુગતઃ ।
૪૯।૪ય્દ્/ અસ્વન ઇતિ ચાનિષ્ટઃ પ્રોક્તવિપર્યસ્ત ઇષ્ટફલઃ ॥ ॥

૪૯।૫અબ્/ ક્વણિતં મરણાયૌક્તં પરાજયાય પ્રવર્તનં કોશાત્ ।
૪૯।૫ય્દ્/ સ્વયમુદ્ગીર્ણે યુદ્ધં જ્વલિતે વિજયો ભવતિ ખડ્ગે ॥ ॥

૪૯।૬અ નાકારણં વિવૃણુયાન્ ન વિઘટ્ટયેગ
૪૯।૬બ્ પશ્યેન્ ન તત્ર વદનં ન વદેગ મૂલ્યમ્ ।
૪૯।૬ય્ દેશં ન ચાસ્ય કથયેત્ પ્રતિમાન્ આનયેન્ ન
૪૯।૬દ્ નૈવ સ્પૃશેન્ નૃપતિઃ અપ્રયતોઽસિયષ્ટિમ્ ॥ ॥

૪૯।૭અબ્/ ગોજિહ્વાસંસ્થાનો નીલોત્પલવંશપત્રસદૃશશ્ચ ।
૪૯।૭ય્દ્/ કરવીરપત્રશૂલાગ્રમણ્ડલાગ્રાઃ પ્રશસ્તાઃ સ્યુઃ ॥ ॥

૪૯।૮અબ્/ નિષ્પન્નો ન છેદ્યો નિકષૈઃ કાર્યઃ પ્રમાણયુક્તઃ સઃ ।
૪૯।૮ય્દ્/ મૂલે મ્રિયતે સ્વામી જનની તસ્યાગ્રતશ્છિન્ને ॥ ॥

૪૯।૯અબ્/ યસ્મિન્ ત્સરુપ્રદેશે વ્રણો ભવેત્ તદ્વદેવ ખડ્ગસ્ય ।
૪૯।૯ય્દ્/ વનિતાનામિવ તિલકો ગુહ્યે વાચ્યો મુખે દૃષ્ટ્વા ॥ ॥

૪૯।૧૦અબ્/ અથવા સ્પૃશતિ યદંગં પ્રષ્ટા નિસ્ત્રિંશભૃત્ તદવધાર્ય ।
૪૯।૧૦ય્દ્/ કોશસ્થસ્યાદેશ્યો વ્રણોઽસ્તિ શાસ્ત્રં વિદિત્વેદમ્ ॥ ॥

૪૯।૧૧અબ્/ શિરસિ સ્પૃષ્ટે પ્રથમે અંગુલે દ્વિતીયે લલાટસંસ્પર્શે ।
૪૯।૧૧ય્દ્/ ભ્રૂમધ્યે ચ તૃતીયે નેત્રે સ્પૃષ્ટે ચત્રુથે ચ ॥ ॥

૪૯।૧૨અબ્/ નાસૌષ્ઠ (નાસોષ્ઠ) કપોલહનુશ્રવણગ્રીવાંસકે ચ (અંસકેષુ) પંચાદ્યાઃ ।
૪૯।૧૨ય્દ્/ ઉરસિ દ્વાદશસંસ્થઃ ત્રયોદશે કક્ષયોઃ જ્ઞેયઃ ॥ ॥

૪૯।૧૩અબ્/ સ્તનહૃદયોદરકુક્ષિનાભૌ (કુક્ષિનાભીષુ) તુ ચતુર્દશાદયો જ્ઞેયાઃ ।
૪૯।૧૩ય્દ્/ નાભિમૂલે કઠ્યાં ગુહ્યે ચૈકોનવિંશતિતઃ ॥ ॥

૪૯।૧૪અબ્/ ઊર્વોઃ દ્વાવિંશે સ્યાદૂર્વોઃ મધ્યે વ્રણઃ ત્રયોવિંશે ।

૪૯।૧૪ય્દ્/ જાનુનિ ચ ચતુર્વિંશે જંઘાયાં પંચવિંશે ચ ॥ ॥

૪૯।૧૫અબ્/ જંઘામધ્યે ગુલ્ફે પાષ્ણ્યાં પાદે તદંગુલીષ્વપિ ચ ।
૪૯।૧૫ય્દ્/ ષડ્વિંશતિકાદ્ યાવત્ ત્રિંશદિતિ મતેન ગર્ગસ્ય ॥ ॥

૪૯।૧૬અબ્/ પુત્રમરણં ધનાપ્તિઃ ધનહાનિઃ સમ્પદશ્ચ બન્ધશ્ચ ।
૪૯।૧૬ય્દ્/ એકાદ્યંગુલસંસ્થૈઃ વ્રણૈઃ ફલં નિર્દિશેત્ ક્રમશઃ ॥ ॥

૪૯।૧૭અબ્/ સુતલાભઃ કલહો હસ્તિલબ્ધયઃ પુત્રમરણધનલાભૌ ।
૪૯।૧૭ય્દ્/ ક્રમશો વિનાશવનિતાપ્તિચિત્તદુઃખાનિ ષટ્પ્રભૃતિ ॥ ॥

૪૯।૧૮અબ્/ લબ્ધિઃ હાનિઃ સ્ત્રીલબ્ધયો (હાનિસ્ત્રીલબ્ધયો) બધો વૃદ્ધિમરણપરિતોષાઃ ।
૪૯।૧૮ય્દ્/ જ્ઞેયાશ્ચતુર્દશાદિષુ ધનહાનિશ્ચૈકવિંશે સ્યાત્ ॥ ॥

૪૯।૧૯અબ્/ વિત્તાપ્તિઃ અનિર્વાણં ધનાગમો મૃત્યુસમ્પદોઽસ્વત્વમ્ ।
૪૯।૧૯ય્દ્/ ઐશ્વર્યમૃત્યુરાજ્યાનિ ચ ક્રમાત્ ત્રિંશદિતિ યાવત્ ॥ ॥

૪૯।૨૦અબ્/ પરતો ન વિશેષફલં વિષમસમસ્થાઃ તુ પાપશુભફલદાઃ ।
૪૯।૨૦ય્દ્/ કૈશ્ચિદફલાઃ પ્રદિષ્ટાઃ ત્રિંશત્પરતોઽગ્રમિતિ યાવત્ ॥ ॥

૪૯।૨૧અબ્/ કરવીરૌત્પલગજમદઘૃતકુંકુમકુન્દચંપકસગન્ધઃ ।
૪૯।૨૧ય્દ્/ શુભદોઽનિષ્ટો ગોમૂત્રપંકમેદઃસદૃશગન્ધઃ ॥ ॥

૪૯।૨૨અબ્/ કૂર્મવસાસૃક્ક્ષારોપમશ્ચ ભયદુઃખદો ભવતિ ગન્ધઃ ।
૪૯।૨૨ય્દ્/ વૈદૂર્યકનકવિદ્યુત્પ્રભો જયારોગ્યવૃદ્ધિકરઃ ॥ ॥

૪૯।૨૩અ ઇદમૌશનસં ચ શસ્ત્રપાનં
૪૯।૨૩બ્ રુધિરેણ શ્રિયમિચ્છતઃ પ્રદીપ્તામ્ ।
૪૯।૨૩ય્ હવિષા ગુણવત્સુતાભિલિપ્સોઃ
૪૯।૨૩દ્ સલિલેનાક્ષયમિચ્છતશ્ચ વિત્તમ્ ॥ ॥

૪૯।૨૪અ વડવૌષ્ટ્રકરેણુદુગ્ધપાનં
૪૯।૨૪બ્ યદિ પાપેન સમીહતેઽર્થસિદ્ધિમ્ ।
૪૯।૨૪ય્ ઝષપિત્તમૃગાશ્વબસ્તદુગ્ધૈઃ
૪૯।૨૪દ્ કરિહસ્તચ્છિદયે સતાલગર્ભૈઃ ॥ ॥

૪૯।૨૫અ આર્કં પયો હુડુવિષાણમષીસમેતં
૪૯।૨૫બ્ પારાવતાખુશકૃતા ચ યુતઃ (યુતં) પ્રલેપઃ ।
૪૯।૨૫ય્ શસ્ત્રસ્ય તૈલમથિતસ્ય તતોઽસ્ય પાનં

૪૯।૨૫દ્ પશ્ચાત્શિતસ્ય ન શિલાસુ ભવેદ્ વિઘાતઃ ॥ ॥

૪૯।૨૬અ ક્ષારે કદલ્યા મથિતેન યુક્તે
૪૯।૨૬બ્ દિનૌષિતે પાયિતમાયસં યત્ ।
૪૯।૨૬ય્ સમ્યક્ શિતં ચાશ્મનિ નૈતિ ભંગં
૪૯।૨૬દ્ ન ચાન્યલોહેષ્વપિ તસ્ય કૌણ્ઠ્યમ્ ॥ ॥

sએપરતે અધ્યાય ૫૦ અંગવિદ્યાધ્યાય
૫૯।૧અ દૈવજ્ઞેન શુભાશુભં દિગુદિતસ્થાનહૃતાનીક્ષતા
૫૦।૧બ્ વાચ્યં પ્રષ્ટૃનિજાપરાંગઘટનાં ચાલોક્ય કાલં ધિયા ।
૫૦।૧ય્ સર્વજ્ઞો હિ ચરાચરાત્મકતયા અસૌ સર્વદર્શી વિભુશ્
૫૦।૧દ્ ચેષ્ટાવ્યાહૃતિભિઃ શુભાશુભફલં સન્દર્શયત્યર્થિનામ્ ॥ ॥

૫૦।૨અ સ્થાનં પુષ્પસુહાસિભૂરિફલભૃત્સુસ્નિગ્ધકૃત્તિચ્છદ્
૫૦।૨બ્ સત્પક્ષિચ્યુતશસ્તસંજ્ઞિતતરુચ્છાયૌપગૂઢં સમમ્ ।
૫૦।૨ય્ દેવઋષિદ્વિજસાધુસિદ્ધનિલયં સત્પુષ્પસસ્યૌક્ષિતમ્
૫૦।૨દ્ સત્સ્વાદૂદકનિર્મલત્વજનિતાહ્લાદં ચ સચ્છાદ્વલં (સચ્છાડ્વલં) ॥ ॥

૫૦।૩અબ્/ છિન્નભિન્નકૃમિખાતકણ્ટકિપ્લુષ્ટરૂક્ષકુટિલૈઃ ન સત્ કુજૈઃ ।
૫૦।૩ય્દ્/ ક્રૂરપક્ષિયુતનિન્દ્યનામભિઃ શુષ્કશીર્ણબહુપર્ણચર્મભિઃ (વર્મભિઃ) ॥ ॥

૫૦।૪અ શ્મશાનશૂન્યાયતનં ચતુષ્પથં
૫૦।૪બ્ તથા અમનોજ્ઞં વિષમં સદોષરમ્ ।
૫૦।૪ય્ અવસ્કરાંગારકપાલભસ્મભિશ્
૫૦।૪દ્ ચિતં તુષૈઃ શુષ્કતૃણૈઃ નશોભનમ્ ॥ ॥

૫૦।૫અબ્/ પ્રવ્રજિતનગ્નનાપિતરિપુબન્ધનસૌનિકૈઃ (સૂનિકૈઃ) તથા શ્વપચૈઃ ।
૫૦।૫ય્દ્/ કિતવયતિપીડિતૈઃ યુતમાયુધમાધ્વીકવિક્રયૈઃ ન શુભમ્ ॥ ॥

(દિક્કાલલક્ષણ)
૫૦।૬અ પ્રાગુત્તરેશાશ્ચ દિશઃ પ્રશસ્તાઃ
૫૦।૬બ્ પ્રષ્ટુઃ ન વાય્વંબુયમાગ્નિરક્ષઃ ।
૫૦।૬ય્ પૂર્વાહ્નકાલેઽસ્તિ શુભં ન રાત્રૌ
૫૦।૬દ્ સન્ધ્યાદ્વયે પ્રશ્નકૃતોઽપરાહ્ને ॥ ॥

૫૦।૭અ યાત્રાવિધાને હિ શુભાશુભં યત્
૫૦।૭બ્ પ્રોક્તં નિમિત્તં તદિહાપિ વાચ્યમ્ ।

૫૦|૭ય્ દૃષ્ટ્વા પુરો વા જનતાહૃતં વા
૫૦|૭દ્ પ્રષ્ટુઃ સ્થિતં પાણિતલેઽથ વસ્ત્રે ॥ ॥

(પુંસંજ્ઞકાનિ)
૫૦|૮અ અથાંગાનિ ઊરૂ ઓષ્ઠસ્તનવૃષણપાદં ચ દશના
૫૦|૮બ્ ભુજૌ હસ્તૌ ગણ્ડૌ કચગલનખાંગુષ્ઠમપિ યત્ ।
૫૦|૮ય્ સશંખં કક્ષાંસં શ્રવણ (લલ્પા સશ્રવંઅ) ગુદસન્ધીતિ પુરુષે
(સ્ત્રીસંજ્ઞકાનિ)
૫૦|૮દ્ સ્ત્રિયાં ભ્રૂનાસાસ્ફિગ્વલિકટિસુલેખાંગુલિચયમ્ ॥ ॥

૫૦|૯અ જિહ્વા ગ્રીવા પિણ્ડિકે પાર્ષ્ણિયુગ્મં
૫૦|૯બ્ જંઘે નાભિઃ કર્ણપાલી કૃકાટી ।
(નપુંસક)
૫૦|૯ય્ વક્ત્રં પૃષ્ઠ જત્રુજાનુઅસ્થિપાર્શ્વે
૫૦|૯દ્ હૃત્તાલુઅક્ષી મેહનૌરસ્ત્રિકં ચ ॥ ॥

૫૦|૧૦અબ્/ નપુંસકાખ્યં ચ શિરો લલાટમાશ્વાદ્યસંજ્ઞૈઃ અપરૈશ્ચિરેણ ।
૫૦|૧૦ય્દ્/ સિદ્ધિઃ ભવેજ્જાતુ નપુંસકૈઃ નો રૂક્ષક્ષતૈઃ ભગ્નકૃશૈશ્ચ પૂર્વૈઃ ॥ ॥

૫૦|૧૧અબ્/ સ્પૃષ્ટે વા ચાલિતે વાપિ પાદાંગુષ્ઠેઽક્ષિરુગ્ ભવેત્ ।
૫૦|૧૧ય્દ્/ અંગુલ્યાં દુહિતુઃ શોકં શિરોઘાતે નૃપાદ્ ભયમ્ ॥ ॥

૫૦|૧૨અબ્/ વિપ્રયોગમુરસિ સ્વગાત્રતઃ કર્પટાહૃતિઃ અનર્થદા ભવેત્ ।
૫૦|૧૨ય્દ્/ સ્યાત્ પ્રિયાપ્તિઃ અભિગૃહ્ય કર્પટં પૃચ્છતશ્ચરણપાદયોજિતુઃ ॥ ॥

૫૦|૧૩અબ્/ પાદાંગુષ્ઠેન વિલિખેદ્ ભૂમિં ક્ષેત્રૌત્થચિન્તયા ।
૫૦|૧૩ય્દ્/ હસ્તેન પાદૌ કણ્ડૂયેત્ તસ્ય દાસીમયી (દાસીમયા) ચ સા ॥ ॥

૫૦|૧૪અબ્/ તાલભૂર્જપટદર્શનેઽંશુકં ચિન્તયેત્ કચતુષાસ્થિભસ્મગમ્ ।
૫૦|૧૪ય્દ્/ વ્યાધિઃ આશ્રયતિ રજ્જુજાલકં વલ્કલં ચ સમવેક્ષ્ય બન્ધનમ્ ॥ ॥

૫૦|૧૫અબ્/ પિપ્પલીમરિચશુણ્ઠિવારિદૈ રોધ્રકુષ્ઠવસનાંબુજીરકૈઃ ।
૫૦|૧૫ય્દ્/ ગન્ધમાંસિશતપુષ્પયા વદેત્ પૃચ્છતઃ તગરકેણ ચિન્તયેત્ (ચિન્તનં) ॥ ॥

૫૦|૧૬અબ્/ સ્ત્રીપુરુષદોષપીડિતસર્વાર્થ (અધ્વ) સુતાર્થધાન્યતનયાનામ્ ।
૫૦|૧૬ય્દ્/ દ્વિચતુષ્પદક્ષિતીનાં વિનાશતઃ કીર્તિતૈઃ દૃષ્ટૈઃ ॥ ॥

૫૦|૧૭અબ્/ ન્યગ્રોધમધુકતિન્દુકજંબૂપ્લક્ષામ્રબદર (બદરિ) જાતિફલૈઃ ।
૫૦|૧૭ય્દ્/ ધનકનકપુરુષલોહાંશુકરૂપ્યાઉદુંબરાપ્તિઃ (ઉદુંબરાપ્તિઃ) અપિ કરગૈઃ ॥ ॥

૫૦।૧૮અબ્/ ધાન્યપરિપૂર્ણપાત્રં કુંભઃ પૂર્ણઃ કુટુંબવૃદ્ધિકરૌ ।
૫૦।૧૮ય્દ્/ ગજગોશુનાં પુરીષં ધનયુવતિસુહૃદ્ધિનાશકરમ્ ॥ ॥

૫૦।૧૯અબ્/ પશુહસ્તિમહિષપંકજરજતવ્યાઘ્રૈઃ લભેત દન્દૃષ્ટૈઃ ।
૫૦।૧૯ય્દ્/ અવિધનનિવસનમલયજકૌશેયાભરણસંઘાતમ્ ॥ ॥

૫૦।૨૦અબ્/ પૃચ્છા વૃદ્ધશ્રાવકસુપરિવ્રાડ્દર્શને નૃભિઃ વિહિતા ।
૫૦।૨૦ય્દ્/ મિત્રદ્યૂતાર્થભવા ગણિકાનૃપસૂતિકાર્થકૃતા ॥ ॥

૫૦।૨૧અબ્/ શાક્યૌપાધ્યાયાર્હત્ (આર્હત) નિર્ગ્ર્અન્થિ (નિર્(ગ્ર્)અન્થ) નિમિત્તનિગમકૈવર્તૈઃ ।
૫૦।૨૧ય્દ્/ ચૌરચમૂપતિવણિજાં દાસીયોધાપણસ્થવધ્યાનામ્ ॥ ॥

૫૦।૨૨અબ્/ તાપસે શૌણ્ડિકે દૃષ્ટે પ્રોષિતં પશુપાલનમ્ ।
૫૦।૨૨ય્દ્/ હૃદ્ગતં પ્રચ્છકસ્ય (પૃચ્છકસ્ય) સ્યાદ્ંછવૃટૌ વિપન્નતા ॥ ॥

૫૦।૨૩અબ્/ ઇચ્છામિ પ્રષ્ટું ભણ પશ્યત્વાર્યઃ સમાદિશેત્યુક્તે ॥ ॥

૫૦।૨૩ય્દ્/ સંયોગકુટુંબૌત્થા લાભૈશ્વર્યોદ્ભતા ચિન્તા ॥ ॥

૫૦।૨૪અ નિર્દિશેતિ ગદિતે જયાધ્વજા (જયાધ્વગા)
૫૦।૨૪બ્ પ્રત્યવેક્ષ્ય મમ ચિન્તિતં વદ ।
૫૦।૨૪ય્ આશુ સર્વજનમધ્યગં ત્વયા
૫૦।૨૪દ્ દૃશ્યતામિતિ ચ બન્ધુચૌરજા ॥ ॥

(ચૌરવિજ્ઞાન)

૫૦।૨૫અ અન્તઃસ્થે અંગે સ્વજન ઉદિતો બાહ્યજે બાહ્ય એવ (એવં)
૫૦।૨૫બ્ પાદાંગુષ્ઠાંગુલિકલનયા દાસદાસીજનઃ સ્યાત્ ।
૫૦।૨૫ય્ જંઘે પ્રેષ્યો ભવતિ ભગિની નાભિતો હૃત્સ્વભાર્યા
૫૦।૨૫દ્ પાણ્યંગુષ્ઠાંગુલિચયકૃતસ્પર્શને પુત્રકન્યે ॥ ॥

૫૦।૨૬અબ્/ માતરં જઠરે મૂર્ધ્નિ ગુરું દક્ષિણવામકૌ ।
૫૦।૨૬ય્દ્/ બાહૂ ભ્રાતા અથ તત્પત્ની સ્પૃષ્ટ્વૈવં ચૌરમાદિશેત્ ॥ ॥

(અપહૃતસ્ય લાભ)

૫૦।૨૭અબ્/ અન્તરંગમવમુચ્ય બાહ્યગસ્પર્શનં યદિ કરોતિ પૃચ્છકઃ ।
૫૦।૨૭ય્દ્/ શ્લેષ્મમૂત્રશકૃતઃ ત્યજન્ત્યથો (ત્યજન્નધઃ) પાતયેત્ કરતલસ્થવસ્તુ ચેત્ ॥ ॥

૫૦।૨૮અ ભૃશમવનામિતાંગપરિમોટનતોऽપિ અથવા

૫૦।૨૮બ્ જનધૃતરિક્તભાણ્ડમવલોક્ય ચ ચૌરજનમ્ ।
૫૦।૨૮ચ્ હૃતપતિતક્ષતાસ્મૃતવિનષ્ટભગ્નગત
૫૦।૨૮દ્ ઉન્મુષિતમૃતાદ્યનિષ્ટરવતો લભતે ન હૃતમ્ ॥ ॥

(પીડાર્તાનાં મરણ)
૫૦।૨૯અ નિગદિતમિદં યત્તત્ સર્વં તુષાસ્થિવિષાદિકૈઃ
૫૦।૨૯બ્ સહ મૃતિકરં પીડાર્તાનાં સમં રુદિતક્ષતૈઃ (ક્ષુતૈઃ) ।
(ભોજનજ્ઞાન)
૫૦।૨૯ચ્ અવયવમપિ સ્પૃષ્ટ્વા અન્તઃસ્થં દૃઢં મરુદાહરેદ્
૫૦।૨૯દ્ અતિબહુ તદા ભુક્ત્વા અન્નં સંસ્થિતઃ સુહિતો વદેત્ ॥ ॥

૫૦।૩૦અબ્/ લલાટસ્પર્શનાત્શૂકદર્શનાત્શાલિજૌદનમ્ ।
૫૦।૩૦ચ્દ્/ ઉરઃસ્પર્શાત્ ષષ્ટિક આખ્યં (અન્નં) ગ્રીવાસ્પર્શે ચ યાવકમ્ ॥ ॥

૫૦।૩૧અબ્/ કુક્ષિકુચજઠરજાનુસ્પર્શે માષાઃ પયસ્તિલયવાગ્વઃ ।
૫૦।૩૧ચ્દ્/ આસ્વાદયતે (આસ્વાદયતઃ) ચઓષ્ઠૌ લિહતે મધુરં રસં જ્ઞેયમ્ ॥ ॥

૫૦।૩૨અબ્/ વિસૃક્કે (વિસ્પૃક્કે) સ્ફોટયેજ્જિહ્વામામ્લે વક્ત્રં વિકૂણયેત્ ।
૫૦।૩૨ચ્દ્/ કટુકેઽથ કષાયેઽથ (કટુતિક્તકષાયોષ્ણૈઃ) હિક્કેત્ ક્ષીવેગ સેન્ધવે ॥ ॥

૫૦।૩૩અ શ્લેષ્મત્યાગે શુષ્કતિક્તં તદલ્પં
૫૦।૩૩બ્ શ્રુત્વા ક્ર્વ્યાદં વા પ્રેક્ષ્ય વા માંસમિશ્રમ્ ।
૫૦।૩૩ચ્ ભ્રૂગણ્ડઓષ્ઠસ્પર્શને શાકુનં તદ્
૫૦।૩૩દ્ ભુક્તં તેનેત્યુક્તમેતન્ નિમિત્તમ્ ॥ ॥

૫૦।૩૪અબ્/ મૂર્ધગલકેશહનુશંખકર્ણજંઘં વસ્તિં ચ સ્પૃષ્ટ્વા ।
૫૦।૩૪ચ્દ્/ ગજમહિષમેષશૂકરગોશશમૃગમહિષ માંસયુગ્ ભુક્તમ્ ॥ ॥

૫૦।૩૫અબ્/ દ્ષૃટે શ્રુતેઽપુ અશકુને ગોધામત્સ્યામિષં વદેદ્ ભુક્તમ્ ।
૫૦।૩૫ચ્દ્/ ગર્ભિણ્યા ગર્ભસ્ય ચ નિપતનમેવં પ્રકલ્પયેત્ પ્રશ્ને ॥ ॥

(ગર્ભિણ્યા જન્મ)
૫૦।૩૬અબ્/ પુંસ્ત્રીનપુંસકાખ્યે દૃષ્ટેઽનુમિતે પુરઃસ્થિતે સ્પૃષ્ટે ।
૫૦।૩૬ચ્દ્/ તજ્જન્મ ભવતિ પાનાન્નપુષ્પફલદર્શને ચ શુભમ્ ॥ ॥

૫૦।૩૭અ અંગુષ્ઠેન ભ્રૂદરં વાંગુલિં વા
૫૦।૩૭બ્ સ્પૃષ્ટ્વા પૃચ્છેદ્ ગર્ભચિન્તા તદા સ્યાત્ ।
૫૦।૩૭ચ્ મધ આજ્યાદ્યૈઃ હેમરત્નપ્રવાલૈઃ

૫૦।૩૭દ્ અગ્રસ્થૈઃ વા માતૃધાત્ર્યાત્મજૈશ્ચ ॥ ॥

૫૦।૩૮અ ગર્ભયુતા જઠરે કરગે સ્યાદ્
૫૦।૩૮બ્ દુષ્ટનિમિત્તવશાત્ તદ્દુદાસઃ ।
૫૦।૩૮ય્ કર્ષતિ તજ્જઠરં યદિ પીઠ
૫૦।૩૮દ્ ઉત્પીડનતં કરગે ચ કરેઽપિ ॥ ॥

૫૦।૩૯અબ્/ ઘ્રાણાયા દક્ષિણે દ્વારે સ્પૃષ્ટે માસોત્તરં વદેત્ ।
૫૦।૩૯ય્દ્/ વામેઽબ્દૌ (દ્વૌ) કર્ણ એવં મા દ્વિચતુર્ઘ્નઃ શ્રુતિસ્તને ॥ ॥

૫૦।૪૦અ વેણીમૂલે ત્રીન્ સુતાન્ કન્યકે દ્વે
૫૦।૪૦બ્ કર્ણે પુત્રાન્ પંચ હસ્તે ત્રયં ચ ।
૫૦।૪૦ય્ અંગુષ્ઠાન્તે પંચકં ચાનુપૂર્વ્યા
૫૦।૪૦દ્ પાદાંગુષ્ઠે પાર્ષ્ણિયુગ્મેઽપિ કન્યામ્ ॥ ॥

૫૦।૪૧અબ્/ સવ્યાસવ્ય ઊરુસંસ્પર્શે સૂતે કન્યાસુતદ્વયમ્ ।
૫૦।૪૧ય્દ્/ સ્પૃષ્ટે લલાટમધ્યાન્તે ચતુસ્ત્રિતનયા ભવેત્ ॥ ॥

૫૦।૪૨અબ્/ શિરોલલાટભ્રૂકર્ણગણ્ડં હનુરદા ગલમ્
૫૦।૪૨ય્દ્/ સવ્યાપસવ્યસ્કન્ધશ્ચ હસ્તૌ ચિબુકનાલકમ્ ॥ ॥

(ગર્ભિણ્યાઃ કસ્મિન્ નક્ષત્રે જન્તુઃ જન્મ)
૫૦।૪૩અ ઉરઃ કુચં દક્ષિણમપિ અસવ્યં
૫૦।૪૩બ્ હૃત્પાર્શ્વમેવં જઠરં કટિશ્ચ ।
૫૦।૪૩ય્ સ્ફિક્પાયુસન્ધિ ઊરુયુગં ચ જાનૂ
૫૦।૪૩દ્ જંઘેઽથ પાદાવિતિ કૃત્તિકાદૌ ॥ ॥

૫૦।૪૪અ ઇતિ નિગદિતમેતદ્ ગાત્રસંસ્પર્શલક્ષ્મ
૫૦।૪૪બ્ પ્રકટમભિમતાસ્યૈ વીક્ષ્ય શાસ્ત્રાણિ સમ્યક્ ।
૫૦।૪૪ય્ વિપુલમતિરુદારો વેત્તિ યઃ સર્વમેતન્
૫૦।૪૪દ્ નરપતિજનતાભિઃ પૂજ્યતેઽસૌ સદૈવ ॥ ॥

ઽએપરતે અધ્યાય ૫૧ પિટકલક્ષણાધ્યાયઃ
૫૧।૧અબ્/ સિતરક્તપીતકૃષ્ણા વિપ્રાદીનાં ક્રમેણ પિટકા યે ।
૫૧।૧ય્દ્/ તે ક્રમશઃ પ્રોક્તફલા વર્ણાનાં નાગ્રજાતાનાં (અગ્રજાદીનાં) ॥ ॥

૫૧।૨અ સુસ્નિગ્ધવ્યક્તશોભાઃ શિરસિ ધનચયં મૂર્ધ્નિ સૌભાગ્યમારાદ્
૫૧।૨બ્ દૌર્ભાગ્યં ભ્રૂયુગોત્થાઃ પ્રિયજનઘટનામાશુ દુઃશીલતાં ચ ।

૫૧।૨ચ્ તન્મધ્યોત્થાશ્ચ શોકં નયનપુટગતા નેત્રયોઃ ઇષ્ટદૃષ્ટિં
૫૧।૨દ્ પ્રવ્રજ્યાં શંખદેશેઽશ્રુજલનિપતનસ્થાનગા રાન્તિ ચિન્તાં (સ્થાનગાશ્ચ અતિચિન્તાં) ॥ ॥

૫૧।૩અ ઘ્રાણાગણ્ડે વસનસુતદાશ્ચઓષ્ઠયોઃ અન્નલાભં
૫૧।૩બ્ કુર્યુઃ તદ્વગિબુકતલગા ભૂરિ વિત્તં લલાટે ।
૫૧।૩ચ્ હન્વોઃ એવં ગલકૃઅપદા ભૂષણાનિ અન્નપાને
૫૧।૩દ્ શ્રોત્રે ષડ્ભૂતણ (ષડ્ભૂષણ) ગણમપિ જ્ઞાનમાત્મસ્વરૂપમ્ ॥ ॥

૫૧।૪અ શિરઃસન્ધિગ્રીવાહૃદયકુચપાર્શ્વોરસિ ગતા
૫૧।૪બ્ અયોઘાતં ઘાતં સુતતનયલાભં શુચમપિ ।
૫૧।૪ચ્ પ્રિયપ્રાપ્તિં સ્કન્ધેઽપિ અટનમથ ભિક્ષાર્થમસકૃદ્
૫૧।૪દ્ વિનાશં કક્ષોત્થા વિદધતિ ધનાનાં બહુમુખં (બહુસુખં) ॥ ॥

૫૧।૫અબ્/ દુઃખશત્રુનિચયસ્ય વિનાશં (વિઘાતં) પૃષ્ઠબાહુયુગજા રચયન્તિ ।
૫૧।૫ચ્દ્/ સંયમં ચ મણિબન્ધનજાતા ભૂષણાદ્યમુપબાહુયુગોત્થાઃ ॥ ॥

૫૧।૬અ ધનાપ્તિં સૌભાગ્યં શુચમપિ કરાંગુલ્યુદરગાઃ
૫૧।૬બ્ સુપાનાન્નં નાભૌ તદધ ઇહ ચૌરૈઃ ધનહૃતિમ્ ।
૫૧।૬ચ્ ધનં ધાન્યં બસ્તૌ યુવતિમથ મેઢ્રે સુતનયાન્
૫૧।૬દ્ ધનં સૌભાગ્યં વા ગુદવૃષણજાતા વિદધતિ ॥ ॥

૫૧।૭અબ્/ ઊર્વોઃ યાનાનાંગનાલાભં જાન્વોઃ શત્રુજનાત્ ક્ષતિમ્ ।
૫૧।૭ચ્દ્/ શસ્ત્રેણ જંઘયોઃ ગુલ્ફેઽધ્વબન્ધક્લેશદાયિનઃ ॥ ॥

૫૧।૮અબ્/ સ્ફિક્પાર્ષ્ણિપાદજાતા ધનનાશાગમ્યગમનમધ્વાનમ્ ॥ ॥

૫૧।૮ચ્દ્/ બન્ધનમઙ્ગુલિનિચયેઽઙ્ગુષ્ઠે ચ જ્ઞાતિલોકતઃ પૂજામ્ ॥ ॥

૫૧।૯અબ્/ ઉત્પાતગણ્ડપિટકા દક્ષિણતો વામતઃ ત્વભીઘાતાઃ ।
૫૧।૯ચ્દ્/ ધન્યા ભવન્તિ પુંસાં તદ્વિપરીતાશ્ચ (તુ) નારીણામ્ ॥ ॥

૫૧।૧૦અ ઇતિ પિટકવિભાગઃ પ્રોક્ત આમૂર્ધતોઽયં
૫૧।૧૦બ્ વ્રણતિલકવિભાગોઽપિ એવમેવ પ્રકલ્પ્યઃ ।
૫૧।૧૦ચ્ ભવતિ મશકલક્ષ્માવર્તજન્માપિ તદ્વન્
૫૧।૧૦દ્ નિગદિતફલકારિ પ્રાણિનાં દેહસંસ્થમ્ ॥ ॥

sએપરતે અધ્યાય પર વાસ્તુવિદ્યા
૫૨।૧અબ્/ વાસ્તુજ્ઞાનમથાતઃ કમલભવાન્ મુનિપરંપરાયાતમ્ ।
૫૨।૧ચ્દ્/ ક્રિયતેઽધુના મયા ઇદમ્ વિદગ્ધસાંવત્સરપ્રીત્યૈ ॥ ॥

પ૨।૨અબ્/ કિમપિ કિલ ભૂતમભવદ્ રુન્ધાનં રોદસી શરીરેણ ।
પ૨।૨ચ્દ્/ તદમરગણેન સહસા વિનિગૃહ્યાધોમુખં ન્યસ્તમ્ ॥ ॥

પ૨।૩અબ્/ યત્ર ચ યેન ગૃહીતં વિબુધેનાધિષ્ઠિતઃ સ તત્રૈવ ।
પ૨।૩ચ્દ્/ તદમરમયં વિધાતા વાસ્તુનરં કલ્પયામાસ ॥ ॥

પ૨।૪અબ્/ ઉત્તમમષ્ટાભ્યધિકં હસ્તશતં નૃપગૃહં પૃથુત્વેન ।
પ૨।૪ચ્દ્/ અષ્ટાષ્ટોનાનિ એવં પંચ સપાદાનિ દૈર્ઘ્યેણ ॥ ॥

પ૨।૫અબ્/ ષડ્ભિઃ ષડ્ભિઃ હીના સેનાપતિસદ્મનાં ચતુઃષષ્ટિઃ ।
પ૨।૫ચ્દ્/ એવં પંચ ગૃહાણિ (પંચ એવં વિસ્તારાત્) ષડ્ભાગસમન્વિતા દૈર્ઘ્યમ્ ॥ ॥

પ૨।૬અબ્/ ષષ્ટિશ્ચતુર્ભિઃ હીના (ચતુર્વિહીના) વેશ્માનિ પંચ સચિવસ્ય ।
પ૨।૬ચ્દ્/ સ્વાષ્ટાંશયુતો દૈર્ઘ્યં તદર્ધતો રાજમહિષીણામ્ ॥ ॥

પ૨।૭અબ્/ ષડ્ભિઃ ષડ્ભિશ્ચૈવં યુવરાજસ્યાપવર્જિતા અશીતિઃ ।
પ૨।૭ચ્દ્/ ત્ર્યંશાન્વિતા ચ દૈર્ઘ્યં પંચ તદર્ધૈઃ તદનુજનાનામ્ ॥ ॥

પ૨।૮અબ્/ નૃપસચિવાન્તરતુલ્યં સામન્તપ્રવરરાજપુરુષાણામ્ ।
પ૨।૮ચ્દ્/ નૃપયુવરાજવિશેષઃ કંચુકિવેશ્યાકલાજ્ઞાનામ્ ॥ ॥

પ૨।૯અબ્/ અધ્યક્ષાધિકૃતાનાં સર્વેષાં (સર્વેષામેવ) કોશરતિતુલ્યમ્ ।
પ૨।૯ચ્દ્/ યુવરાજમન્ત્રિવિવરં કર્માન્તાધ્યક્ષદૂતાનામ્ ॥ ॥

પ૨।૧૦અબ્/ ચત્વારિંશદ્ધીના ચતુશ્ચતુર્ભિઃ તુ પંચ યાવદિતિ ।
પ૨।૧૦ચ્દ્/ ષડ્ભાગયુતા દૈર્ઘ્યં દૈવજ્ઞપુરોધસોઃ ભિષજઃ ॥ ॥

પ૨।૧૧અબ્/ વાસ્તુનિ યો વિસ્તારઃ સ એવ ચૌચ્છ્રાયનિશ્ચયઃ શુભદઃ ।
પ૨।૧૧ચ્દ્/ શાલૈકેષુ ગૃહેષ્વપિ વિસ્તારાદ્ દ્વિગુણિતં દૈર્ઘ્યમ્ ॥ ॥

પ૨।૧૨અબ્/ ચાતુર્વર્ણ્યવ્યાસો દ્વાત્રિંશત્ સા (સ્યાત્) ચતુશ્ચતુર્હીના ।
પ૨।૧૨ચ્દ્/ આડોડશાદિતિ પરં ન્યૂનતરમતીવ હીનાનામ્ ॥ ॥

પ૨।૧૩અબ્/ સદશાંશં વિપ્રાણાં ક્ષત્રસ્યાષ્ટાંશસંયુતં દૈર્ઘ્યમ્ ।
પ૨।૧૩ચ્દ્/ ષડ્ભાગયુતં વૈશ્યસ્ય ભવતિ શૂદ્રસ્ય પાદયુતમ્ ॥ ॥

પ૨।૧૪અબ્/ નૃપસેનાપતિગૃહયોઃ અન્તરમાનેન કોશરતિભવને ।
પ૨।૧૪ચ્દ્/ સેનાપતિચાતુર્વર્ણ્યવિવરતો રાજપુરુષાણામ્ ॥ ॥

પ૨।૧૫અબ્/ અથ પારશ (પારસ) વાદીનાં સ્વમાનસંયોગદલસમં ભવનમ્ ।

પ૨।૧૫ય્દ્/ હીનાધિકં સ્વમાનાદશુભકરં વાસ્તુ સર્વેષામ્ ॥ ॥

પ૨।૧૬અબ્/ પશ્ચાશ્રમિણામમિતં ધાન્યાયુધવહ્નિરતિગૃહાણાં ચ ।
પ૨।૧૬ય્દ્/ નૈચ્છન્તિ શાસ્ત્રકારા હસ્તશતાદુચ્છ્રિતં પરતઃ ॥ ॥

પ૨।૧૭અબ્/ સેનાપતિનૃપતીનાં સપ્તતિસહિતે દ્વિધાકૃતે વ્યાસે ।
પ૨।૧૭ય્દ્/ શાલા ચતુર્દશહૃતે પંચત્રિંશદ્ધૃતેઽલિન્દઃ ॥ ॥

પ૨।૧૮અબ્/ હસ્તદ્વાત્રિંશાદિષુ ચતુશ્ચતુસ્ત્રિત્રિકત્રિકાઃ શાલાઃ ।
પ૨।૧૮ય્દ્/ સપ્તદશત્રિતયતિથિત્રયોદશકૃતાંગુલાભ્યધિકાઃ ॥ ॥

પ૨।૧૯અબ્/ ત્રિત્રિદ્વિદ્વિદ્વિસમાઃ ક્ષયક્રમાદંગુલાનિ ચૈતેષામ્ ।
પ૨।૧૯ય્દ્/ વ્યેકા વિંશતિઃ અષ્ટૌ વિંશતિઃ અષ્ટાદશ ત્રિતયમ્ ॥ ॥

પ૨।૨૦અબ્/ શાલાત્રિભાગતુલ્યા કર્તવ્યા વીથિકા બહિર્ભવનાત્ ।
પ૨।૨૦ય્દ્/ યદ્યગ્રતો ભવતિ સા સોષ્ણીષં નામ તદ્વાસ્તુ ॥ ॥

પ૨।૨૧અબ્/ સાયાશ્રયમિતિ પશ્ચાત્ સાવષ્ટંભં તુ પાર્શ્વસંસ્થિતયા ।
પ૨।૨૧ય્દ્/ સુસ્થિતમિતિ ચ સમન્તાત્શાસ્ત્રજ્ઞૈઃ પૂજિતાઃ સર્વાઃ ॥ ॥

પ૨।૨૨અબ્/ વિસ્તારષોડશાંશઃ સચતુર્હસ્તો ભવેદ્ ગૃહૌચ્છ્રાયઃ ।
પ૨।૨૨ય્દ્/ દ્વાદશભાગેનોનો ભૂમૌ ભૂમૌ સમસ્તાનામ્ ॥ ॥

પ૨।૨૩અબ્/ વ્યાસાત્ ષોડશભાગઃ સર્વેષાં સદ્મનાં ભવતિ ભિત્તિઃ ।
પ૨।૨૩ય્દ્/ પક્વૈષ્ટકાકૃતાનાં દારુકૃતાનાં તુ ન વિકલ્પઃ (સવિકલ્પઃ, ન વિકલ્પઃ) ॥ ॥

પ૨।૨૪અબ્/ એકાદશભાગયુતઃ સસપ્તતિઃ નૃપબલેશયોઃ વ્યાસઃ ।
પ૨।૨૪ય્દ્/ ઉચ્છ્રાયો અંગુલતુલ્યો દ્વારસ્યાર્ધેન વિષ્કંભઃ ॥ ॥

પ૨।૨૫અબ્/ વિપ્રાદીનાં વ્યાસાત્ પંચાંશોઽષ્ટાદશાંગુલસમેતઃ ।
પ૨।૨૫ય્દ્/ સાષ્ટાંશો વિષ્કંભો દ્વારસ્ય ત્રિગુણ ઉચ્છ્રાયઃ ॥ ॥

પ૨।૨૬અબ્/ ઉચ્છ્રાયહસ્તસંખ્યાપરિમાણાનિ અંગુલાનિ બાહુલ્યમ્ ।
પ૨।૨૬ય્દ્/ શાખાદ્વયેઽપિ કાર્યં સાર્ધં તત્ સ્યાદુદુંબરયોઃ ॥ ॥

પ૨।૨૭અબ્/ ઉચ્છ્રાયાત્ સપ્તગુણાદશીતિભાગઃ પૃથુત્વમેતેષામ્ ।
પ૨।૨૭ય્દ્/ નવગુણિતેઽશીત્યંશઃ સ્તંભસ્ય દશાંશહીનોઽગ્રે ॥ ॥

પ૨।૨૮અબ્/ સમચતુરસ્રો (સમચતુરશ્રો) રુચકો વજ્રોઽષ્ટાસ્રિઃ (અષ્ટાશ્રિઃ) દ્વિવજ્રકો દ્વિગુણઃ ।
પ૨।૨૮ય્દ્/ દ્વાત્રિંશતા તુ મધ્યે પ્રલીનકો વૃત્ત ઇતિ વૃત્તઃ ॥ ॥

પ૨।૨૯અબ્/ સ્તંભં વિભજ્ય નવધા વહનં ભાગો ઘટોऽસ્ય ભાગોऽન્યઃ ।
પ૨।૨૯ય્દ્/ પદ્મં તથા ઉત્તરોષ્ઠં કુર્યાદ્ ભાગેન ભાગેન ॥ ॥

પ૨।૩૦અબ્/ સ્તંભસમં બાહુલ્યં ભારતુલાનામુપર્યુપર્યાસામ્ ।
પ૨।૩૦ય્દ્/ ભવતિ તુલા ઉપતુલાનામૂનં પાદેન પાદેન ॥ ॥

પ૨।૩૧અબ્/ અપ્રતિષિદ્ધાલિન્દં સમન્તતો વાસ્તુ સર્વતોભદ્રમ્ ।
પ૨।૩૧ય્દ્/ નૃપવિબુધસમૂહાનાં કાર્યં દ્વારૈશ્ચતુર્ભિઃ અપિ ॥ ॥

પ૨।૩૨અબ્/ નન્દ્યાવર્તમલિન્દૈઃ શાલાકુડ્યાત્ પ્રદક્ષિણાન્તગતૈઃ ।
પ૨।૩૨ય્દ્/ દ્વારં પશ્ચિમમસ્મિન્ વિહાય શેષાણિ કાર્યાણિ ॥ ॥

પ૨।૩૩અબ્/ દ્વારાલિન્દોऽન્તગતઃ પ્રદક્ષિણોऽન્યઃ શુભઃ તતશ્ચાન્યઃ ।
પ૨।૩૩ય્દ્/ તસ્મિંશ (તદ્વદ્) ચ વર્ધમાને દ્વારં તુ ન દક્ષિણં કાર્યમ્ ॥ ॥

પ૨।૩૪અબ્/ અપરોऽન્તગતોऽલિન્દઃ પ્રાગન્તગતૌ તદુત્થિતૌ ચાન્યૌ ।
પ૨।૩૪ય્દ્/ તદવધિવિધૃતઃ (વિવૃતઃ) ચાન્યઃ પ્રાગ્દ્વારં સ્વસ્તિકે શુભદં (ऽશુભદં) ॥ ॥

પ૨।૩૫અબ્/ પ્રાક્પશ્ચિમાવલિન્દાવન્તગતૌ તદવધિસ્થિતૌ શેષૌ ।
પ૨।૩૫ય્દ્/ રુચકે દ્વારં ન શુભદમુત્તરતોऽન્યાનિ શસ્તાનિ ॥ ॥

પ૨।૩૬અબ્/ શ્રેષ્ઠં નન્દ્યાવર્તં સર્વેષાં વર્ધમાનસંજ્ઞં ચ ।
પ૨।૩૬ય્દ્/ સ્વસ્તિકરુચકે મધ્યે શેષં શુભદં નૃપાદીનામ્ ॥ ॥

પ૨।૩૭અબ્/ ઉત્તરશાલાહીનં હિરણ્યનાભં ત્રિશાલકં ધન્યમ્ ।
પ૨।૩૭ય્દ્/ પ્રાક્શાલયા વિયુક્તં સુક્ષેત્રં વૃદ્ધિદં વાસ્તુ ॥ ॥

પ૨।૩૮અબ્/ યામ્યાહીનં ચુલ્લી ત્રિશાલકં વિત્તનાશકરમેતત્ ।
પ૨।૩૮ય્દ્/ પક્ષઘ્નમપરયા વર્જિતં સુતધ્વંસવૈરકરમ્ ॥ ॥

પ૨।૩૯અબ્/ સિદ્ધાર્થમપરયામ્યે યમસૂર્યં પશ્ચિમોત્તરે શાલે ।
પ૨।૩૯ય્દ્/ દણ્ડાખ્યમુદક્પૂર્વે વાતાખ્યં પ્રાગ્યુતા યામ્યા ॥ ॥

પ૨।૪૦અબ્/ પૂર્વાપરે તુ શાલે ગૃહચુલ્લી દક્ષિણોત્તરે કાચમ્ ।
પ૨।૪૦ય્દ્/ સિદ્ધાર્થેऽર્થાવાપ્તિઃ યમસૂર્યે ગૃહપતેઃ મૃત્યુઃ ॥ ॥

પ૨।૪૧અબ્/ દણ્ડવધો દણ્ડાખ્યે કલહોદ્વેગઃ સદૈવ વાતાખ્યે ।
પ૨।૪૧ય્દ્/ વિત્તવિનાશશ્ચુલ્લ્યાં જ્ઞાતિવિરોધઃ સ્મૃતઃ કાચે ॥ ॥

પ૨।૪૨અબ્/ એકાશીતિવિભાગે દશ દશ પૂર્વોત્તરાયતા રેખાઃ ।
પ૨।૪૨ય્દ્/ અન્તઃ ત્રયોદશ સુરા દ્વાત્રિંશદ્બાહ્યકોષ્ઠસ્થાઃ ॥ ॥

પ૨।૪૩અબ્/ શિખિપર્જન્યજયન્તેન્દ્રસૂર્યસત્યા ભૃશોઽન્તરિક્ષશ્ચ ।
પ૨।૪૩ચ્દ્/ ઐશાન્યાદિ (ઐશાન્યાદ્યાઃ) ક્રમશો દક્ષિણપૂર્વેઽનિલઃ કોણે ॥ ॥

પ૨।૪૪અબ્/ પૂષા વિતથબૃહત્ક્ષતયમગન્ધર્વાખ્યભૃંગરાજમૃગાઃ ।
પ૨।૪૪ચ્દ્/ પિતૃદૌવારિકસુગ્રીવકુસુમદન્તાંબુપત્યસુરાઃ ॥ ॥

પ૨।૪૫અબ્/ શોષોઽથ પાપયક્ષ્મા રોગઃ કોણે તતોઽહિમુખ્યૌ ચ ।
પ૨।૪૫ચ્દ્/ ભલ્લાટસોમભુજગાઃ તતોઽદિતિઃ દિતિઃ ઇતિ ક્રમશઃ ॥ ॥

પ૨।૪૬અબ્/ મધ્યે બ્રહ્મા નવકોષ્ઠકાધિપોઽસ્યાર્યમા સ્થિતઃ પ્રાચ્યામ્ ।
પ૨।૪૬ચ્દ્/ એકાન્તરાત્ પ્રદક્ષિણમસ્માત્ સવિતા વિવસ્વાંશ્ચ ॥ ॥

પ૨।૪૭અબ્/ વિબુધાધિપતિઃ તસ્માન્ મિત્રોઽન્યો રાજયક્ષ્મનામા ચ ।
પ૨।૪૭ચ્દ્/ પૃથિવી (પૃથ્વી) ધરાપવત્સાવિત્યેતે બ્રહ્મણહ્ પરિધૌ ॥ ॥

પ૨।૪૮અબ્/ આપો નામૈશાને કોણે હૌતાશને ચ સાવિત્રઃ ।
પ૨।૪૮ચ્દ્/ જય ઇતિ ચ નૈરૃતે રુદ્ર આનિલેઽભ્યન્તરપદેષુ ॥ ॥

પ૨।૪૯અબ્/ આપઃ તથાપવત્સઃ પર્જન્યોઽગ્નિઃ દિતિશ્ચ વર્ગોઽયમ્ ।
પ૨।૪૯ચ્દ્/ એવં કોણે કોણે પદિકાઃ સ્યુઃ પંચ પંચ સુરાઃ ॥ ॥

પ૨।પ૦અબ્/ બાહ્યા દ્વિપદાઃ શેષાઃ તે વિબુધા વિંશતિ સમાખ્યાતાઃ ।
પ૨।પ૦ચ્દ્/ શેષાશ્ચત્વારોઽન્યે ત્રિપદા દિક્ષ્વર્યમાદ્યાઃ તે ॥ ॥

પ૨।પ૧અબ્/ પૂર્વોત્તરદિગ્મૂર્ધા પુરુષોઽયમવાન્મુખોઽસ્ય શિરસિ શિખી ।
પ૨।પ૧ચ્દ્/ આપો મુખે સ્તનેઽસ્યાર્યમા હ્યુરસ્યાપવત્સશ્ચ ॥ ॥

પ૨।પ૨અબ્/ પર્જન્યાદ્યા બાહ્યા દૃક્શ્રવણૌરઃસ્થલાંસગા દેવાઃ ।
પ૨।પ૨ચ્દ્/ સત્યાદ્યાઃ પંચ ભુજે હસ્તે સવિતા ચ સાવિત્રઃ (સસાવિત્રઃ) ॥ ॥

પ૨।પ૩અબ્/ વિતથો બૃહત્ક્ષતયુતઃ પાર્શ્વે જઠરે સ્થિતો વિવસ્વાંશ્ચ ।
પ૨।પ૩ચ્દ્/ ઊરૂ જાનુ ચ જંઘે સ્ફિગ્ ઇતિ યમાદ્યૈઃ પરિગૃહીતાઃ ॥ ॥

પ૨।પ૪અબ્/ એતે દક્ષિણપાર્શ્વે સ્થાનેષ્વેવં ચ વામપાર્શ્વસ્થાઃ ।
પ૨।પ૪ચ્દ્/ મેઢ્રે શક્રજયન્તૌ હૃદયે બ્રહ્મા પિતા અંધ્રિગતઃ (અંઘ્રિગતઃ) ॥ ॥

પ૨।પપઅબ્/ અષ્ટાષ્ટકપદમથવા કૃત્વા રેખાશ્ચ કોણગાઃ તિર્યક્ ।
પ૨।પપચ્દ્/ બ્રહ્મા ચતુષ્પદોઽસ્મિન્ અર્ધપદા બ્રહ્મકોણસ્થાઃ ॥ ॥

પ૨।પ૬અબ્/ અષ્ટૌ ચ બહિષ્કોણેષ્વર્ધપદાઃ તદુભયસ્થિતાઃ સાર્ધાઃ ।

૫૨|૫૬ય્દ્/ ઉક્તેભ્યો યે શેષાઃ તે દ્વિપદા વિંશતિઃ તે હિ (ચ) ॥ ॥

૫૨|૫૭અબ્/ સમ્પાતા વંશાનાં મધ્યાનિ સમાનિ યાનિ ચ પદાનામ્ ।
૫૨|૫૭ય્દ્/ મર્માણિ તાનિ વિન્દ્યાન્ ન તાનિ પરિપીડયેત્ (વિન્દ્યાન્ન્ અપરિપીડયેત્) પ્રાજ્ઞઃ ॥ ॥

૫૨|૫૮અબ્/ તાનિ અશુચિભાણ્ડકીલસ્તંભાદ્યૈઃ પીડિતાનિ શલ્યૈશ્ચ ।
૫૨|૫૮ય્દ્/ ગૃહભર્તુઃ તત્તુલ્યે પીડામંગે પ્રયચ્છન્તિ ॥ ॥

૫૨|૫૯અબ્/ કણ્ડૂયતે યદંગં ગૃહભર્તુઃ (ગૃહપતિના) યત્ર વા અમરાહુત્યામ્ ।
૫૨|૫૯ય્દ્/ અશુભં ભવેન્ નિમિત્તં વિકૃતેઃ વા અગ્નેઃ સશલ્યં તત્ ॥ ॥

૫૨|૬૦અબ્/ ધનહાનિઃ દારુમયે પશુપીડા રુગ્ભયાનિ ચાસ્થિકૃતે ।
૫૩|૬૦ય્દ્/ લોહમયે શસ્ત્રભયં કપાલકેશેષુ મૃત્યુઃ સ્યાત્ ॥ ॥

૫૩|૬૧અબ્/ અગ્ગારે સ્તેનભયં ભસ્મનિ ચ વિનિર્દિશેત્ સદાગ્નિભયમ્ ।
૫૩|૬૧ય્દ્/ શલ્યં હિ મર્મસંસ્થં સુવર્ણરજતાદૃતેઽત્યશુભમ્ ॥ ॥

૫૩|૬૨અબ્/ મર્મણ્યમર્મગો વા રુણદ્ધ્યર્થાગમં તુષસમૂહઃ) ।
૫૨|૬૦ય્દ્/ અપિ નાગદન્તકો મર્મસંસ્થિતો દોષકૃદ્ ભવતિ ॥ ॥

૫૨|૬૧અબ્/ રોગાદ્ વાયું પિતૃતો હુતાશનં શોષસૂત્રમપિ વિતથાત્ ।
૫૨|૬૧ય્દ્/ મુખ્યાદ્ ભૃશં જયન્તાગ ભૃંગમદિતેશ્ચ સુગ્રીવમ્ ॥ ॥

૫૨|૬૨અબ્/ તત્સમ્પાતા નવ યે તાનિ અતિમર્માણિ સમ્પ્રદિષ્ટાનિ ।
૫૨|૬૨ય્દ્/ યશ્ચ પદસ્યાષ્ટાંશઃ તત્ પ્રોક્તં મર્મપરિમાણમ્ ॥ ॥

૫૨|૬૩અબ્/ પદહસ્તસંખ્યયા સમ્મિતાનિ વંશો અંગુલાનિ વિસ્તીર્ણઃ ।
૫૨|૬૩ય્દ્/ વંશવ્યાસોઽધ્યર્ધઃ શિરાપ્રમાણં વિનિર્દિષ્ટમ્ ॥ ॥

૫૨|૬૪અબ્/ સુખમિચ્છન્ બ્રહ્માણં યત્નાદ્ રક્ષેદ્ ગૃહી ગૃહાન્તઃસ્થં (ગૃતાન્તસ્થં) ।
૫૨|૬૪ય્દ્/ ઉચ્છિષ્ટાદ્યુપઘાતાદ્ ગૃહપતિરુપતપ્યતે તસ્મિન્ ॥ ॥

૫૨|૬૫અબ્/ દક્ષિણભુજેન હીને વાસ્તુનરેઽર્થક્ષયો અંગનાદાદોષાઃ (અંગનાદોષાઃ) ।
૫૨|૬૫ય્દ્/ વામેઽર્થધાન્યહાનિઃ શિરસિ ગુણૈઃ હીયતે સર્વૈઃ ॥ ॥

૫૨|૬૬અબ્/ સ્ત્રીદોષાઃ સુતમરણં પ્રેષ્યત્વં ચાપિ ચરણવૈકલ્યે ।
૫૨|૬૬ય્દ્/ અવિકલપુરુષે વસતાં માનાર્થયુતાનિ સૌખ્યાનિ ॥ ॥

૫૨|૬૭અબ્/ ગૃહનગરગ્રામેષુ ચ સર્વત્રૈવં પ્રતિષ્ઠિતા દેવાઃ ।
૫૨|૬૭ય્દ્/ તેષુ ચ યથાનુરૂપં વર્ણા વિપ્રાદયો વાસ્યાઃ ।
૫૨|૬૮અબ્/ વાસગૃહાણિ ચ વિન્દ્યાદ્ વિપ્રાદીનામુદગ્દિગાદ્યાનિ ।

પ૨।૬૮ય્દ્/ વિશતાં ચ યથા ભવનં ભવન્તિ તાનિ એવ દક્ષિણતઃ ॥ ॥

પ૨।૬૯અબ્/ નવગુણસૂત્રવિભક્તાનિ અષ્ટગુણેનાથવા ચતુઃષષ્ટેઃ ।
પ૨।૬૯ય્દ્/ દ્વારાણિ યાનિ તેષામનલાદીનાં ફલોપનયઃ ॥ ॥

પ૨।૭૦અબ્/ અનિલભયં સ્ત્રીજનનં (સ્ત્રીજન્મ) પ્રભૂતધનતા નરેન્દ્રવાલ્લભ્યમ્ ।
પ૨।૭૦ય્દ્/ ક્રોધપરતાનૃતત્વં ક્રૌર્યં ચૌર્યં ચ પૂર્વેણ ॥ ॥

પ૨।૭૧અબ્/ અલ્પસુતત્વં પ્રૈષ્યં નીચત્વં ભક્ષ્યપાનસુતવિઋદ્ધિઃ ।
પ૨।૭૧ય્દ્/ રૌદ્રં કૃતઘ્નમધનં સુતવીર્યઘ્નં ચ યામ્યેન ॥ ॥

પ૨।૭૨અબ્/ સુતપીડા રિપુવૃદ્ધિઃ ન સુતધનાપ્તિઃ (ધનસ્તાપ્તિઃ) સુતાર્થફલસમ્પત્ ।
પ૨।૭૨ય્દ્/ ધનસમ્પન્ નૃપતિભયં ધનક્ષયો રોગ ઇત્યપરે ॥ ॥

પ૨।૭૩અબ્/ વધબન્ધો રિપુવૃદ્ધિઃ સુતધનલાભઃ (ધનસુતલાભઃ) સમસ્તગુણસમ્પત્ ।
પ૨।૭૩ય્દ્/ પુત્રધનાપ્તિઃ વૈરં સુતેન દોષાઃ સ્ત્રિયા નૈઃસ્વમ્ ॥ ॥

પ૨।૭૪અબ્/ માર્ગતરુકોણકૂપસ્તંભભ્રમવિદ્ધમશુભ્ભદં દ્વારમ્ ।
પ૨।૭૪ય્દ્/ ઉચ્છ્રાયાદ્ દ્વિગુણમિતાં ત્યક્ત્વા ભૂમિં ન દોષાય ॥ ॥

પ૨।૭પઅબ્/ રથ્યાવિદ્ધં દ્વારં નાશાય કુમારદોષદં તરુણા ।
પ૨।૭પય્દ્/ પંકદ્વારે શોકો વ્યયોऽંબુનિઃસ્રાવિણિ (અંબુનિ શ્રાવિણિ) પ્રોક્તઃ ॥ ॥

પ૨।૭૬અબ્/ કૂપેનાપસ્મારો ભવતિ વિનાશશ્ચ દેવતાવિદ્ધે ।
પ૨।૭૬ય્દ્/ સ્તંભેન સ્ત્રીદોષાઃ કુલનાશો બ્રાહ્મણાભિમુખે (બ્રાહ્મણોऽભિમુખે) ॥ ॥

પ૨।૭૭અબ્/ ઉન્માદઃ સ્વયમુદ્ઘાટિતેऽથ પિહિતે સ્વયં કુલવિનાશઃ ।
પ૨।૭૭ય્દ્/ માનાધિકે નૃપભયં દસ્યુભયં વ્યસનમેવ નીચે ચ (વ્યસનદં નીચં) ॥ ॥

પ૨।૭૮અબ્/ દ્વારં દ્વારસ્યોપરિ યત્તન્ ન શિવાય સંકટં યચ્ચ ।
પ૨।૭૮ય્દ્/ આવ્યાત્તં ક્ષુદ્ભયદં કુબ્જં કુલનાશનં ભવતિ ॥ ॥

પ૨।૭૯અબ્/ પીડાકરમતિપીડિતમન્તર્વિનતં ભવેદભાવાય ।
પ૨।૭૯ય્દ્/ બાહ્યવિનતે પ્રવાસો દિગ્ભ્રાન્તે દસ્યુભિઃ પીડા ॥ ॥

પ૨।૮૦અબ્/ મૂલદ્વારં નાન્યૈઃ દ્વારૈઃ અભિસન્દધીત રૂપઋદ્ધ્યા ।
પ૨।૮૦ય્દ્/ ઘટફલપત્રપ્રમથાદિભિશ્ચ તન્મંગલૈશ્ચિનુયાત્ ॥ ॥

પ૨।૮૧અબ્/ ઐશાન્યાદિષુ કોણેષુ સંસ્થિતા બાહ્યતો ગૃહસ્યૈતાઃ ।
પ૨।૮૧ય્દ્/ ચરકી વિદારિનામા અથ પૂતના રાક્ષસી ચેતિ ॥ ॥

પ૨।૮૨અબ્/ પુરભવનગ્રામાણાં યે કોણાઃ તેષુ નિવસતાં દોષાઃ ।
પ૨।૮૨ચ્દ્/ શ્વપચાદયોઽન્ત્યજાત્યાઃ તેષ્વેવ વિવૃદ્ધિમાયાન્તિ ॥ ॥

પ૨।૮૩અબ્/ યામ્યાદિષ્વશુભફલા જાતાઃ તરવઃ પ્રદક્ષિણેનૈતે ।
પ૨।૮૩ચ્દ્/ ઉદગાદિષુ પ્રશસ્તાઃ પ્લક્ષવટૌદુંબરાશ્વત્થા (ઉદુંબરાક્ષ્વત્થાઃ) ॥ ॥

પ૨।૮૪અબ્/ આસન્નાઃ કણ્ઠકિનો રિપુભયદાઃ ક્ષીરિણોઽર્થનાશાય ।
પ૨।૮૪ચ્દ્/ ફલિનઃ પ્રજાક્ષયકરા દારૂણિ અપિ વર્જયેદેષામ્ ॥ ॥

પ૨।૮પઅબ્/ છિન્દ્યાદ્ યદિ ન તરૂંશ્તાન્ તદન્તરે પૂજિતાન્ વપેદન્યત્ (અન્યાન્) ।
પ૨।૮પચ્દ્/ પુન્નાગાશોકારિષ્ટબકુલપનસાન્ શમીશાલૌ ॥ ॥

પ૨।૮૬અ શસ્તૌષધિદ્રુમલતા મધુરા સુગન્ધા
પ૨।૮૬બ્ સ્નિગ્ધા સમા ન સુષિરા ચ મહી નરાણામ્ ।
પ૨।૮૬ચ્ અપ્યધ્વનિ શ્રમવિનોદમુપાગતાનાં
પ૨।૮૬દ્ ધત્તે શ્રિયં કિમુત શાશ્વતમન્દિરેષુ ॥ ॥

પ૨।૮૭અબ્/ સચિવાલયેઽર્થનાશો ધૂર્તગૃહે સુતવધઃ સમીપસ્થે ।
પ૨।૮૭ચ્દ્/ ઉદ્વેગો દેવકુલે ચતુષ્પદે (ચતુષ્પથે) ભવતિ ચાકીર્તિઃ ॥ ॥

પ૨।૮૮અબ્/ ચૈત્યે ભયં ગ્રહકૃતં વલ્મીકશ્વભ્રસંકુલે વિપદઃ ।
પ૨।૮૮ચ્દ્/ ગર્તાયાં તુ પિપાસા કૂર્માકારે ધનવિનાશઃ ॥ ॥

પ૨।૮૯અબ્/ ઉદગાદિપ્લવમિષ્ટં વિપ્રાદીનાં પ્રદક્ષિણેનૈવ ।
પ૨।૮૯ચ્દ્/ વિપ્રઃ સર્વત્ર વસેદનુવર્ણમથૈષ્ટમન્યેષામ્ ॥ ॥

પ૨।૯૦અબ્/ ગૃહમધ્યે હસ્તમિતં ખાત્વા પરિપૂરિતં પુનઃ શ્વભ્રમ્ ।
પ૨।૯૦ચ્દ્/ યદ્યૂનમનિષ્ટં તત્ સમે સમં ધન્યમધિકં યત્ ॥ ॥

પ૨।૯૧અબ્/ શ્વભ્રમથવા અંબુપૂર્ણં પદશતમિત્વાગતસ્ય યદિ નોનમ્ ।
પ૨।૯૧ચ્દ્/ તદ્ધન્યં યચ્ચ ભવેત્ પલાનિ અપામાઢકં ચતુઃષષ્ટિઃ ॥ ॥

પ૨।૯૨અબ્/ આમે વા મૃત્પાત્રે શ્વભ્રસ્થે દીપવર્તિઃ અભ્યધિકમ્ ।
પ૨।૯૨ચ્દ્/ જ્વલતિ દિશિ યસ્ય શસ્તા સા ભૂમિઃ તસ્ય વર્ણસ્ય ॥ ॥

પ૨।૯૩અબ્/ શ્વભ્રોષિતં ન કુસુમં યસ્ય (યસ્મિન્) પ્રમ્લાયતેઽનુવર્ણસમમ્ ।
પ૨।૯૩ચ્દ્/ તત્તસ્ય ભવતિ શુભદં યસ્ય ચ યસ્મિન્ મનો રમતે ॥ ॥

પ૨।૯૪અબ્/ સિતરક્તપીતકૃષ્ણા વિપ્રાદીનાં પ્રશસ્યતે ભૂમિઃ ।
પ૨।૯૪ચ્દ્/ ગન્ધશ્ચ ભવતિ યસ્યાં (યસ્યા) ઘૃતરુધિરાન્નાદ્યમદ્યસમઃ ॥ ॥

પ૨।૯૫અબ્/ કુશયુક્તા શરબહુલા દૂર્વાકાશાવૃતા ક્રમેણ મહી ।
પ૨।૯૫ચ્દ્/ હ્યનુવર્ણં (અનુવર્ણં) વૃદ્ધિકરી મધુરકષાયામ્લકટુકા ચ ॥ ॥

પ૨।૯૬અબ્/ કૃષ્ટાં પ્રરૂઢબીજાં ગોઽધ્યુષિતાં બ્રાહ્મણૈઃ પ્રશસ્તાં ચ ।
પ૨।૯૬ચ્દ્/ ગત્વા મહીં ગૃહપતિઃ કાલે સાંવત્સરોદ્દિષ્ટે ॥ ॥

પ૨।૯૭અબ્/ ભક્ષ્યૈઃ નાનાકારૈઃ દધ્યક્ષતસુરભિકુસુમધૂપૈશ્ચ ।
પ૨।૯૭ચ્દ્/ દૈવતપૂજાં કૃત્વા સ્થપતીન્ અભ્યર્ચ્ય વિપ્રાંશ્ચ ॥ ॥

પ૨।૯૮અબ્/ વિપ્રઃ સ્પૃષ્ટ્વા શીર્ષં વક્ષશ્ચ ક્ષત્રિયો વિશાશ્ચ ઊરૂ ।
પ૨।૯૮ચ્દ્/ શૂદ્રઃ પાદૌ સ્પૃષ્ટ્વા કુર્યાદ્ રેખાં ગૃહારંભે ॥ ॥

પ૨।૯૯અબ્/ અંગુષ્ઠકેન કુર્યાન્ મધ્યાંગુલ્યાઽથવા પ્રદેશિન્યા ।
પ૨।૯૯ચ્દ્/ કનકમણિરજતમુક્તાદધિકફલકુસુમાક્ષતૈશ્ચ શુભમ્ ॥ ॥

પ૨।૧૦૦અબ્/ શસ્ત્રેણ શસ્ત્રમૃત્યુઃ બન્ધો લોહેન ભસ્મનાગ્નિભયમ્ ।
પ૨।૧૦૦ચ્દ્/ તસ્કરભયં તૃણેન ચ કાષ્ઠૌલ્લિખિતા ચ રાજભયમ્ ॥ ॥

પ૨।૧૦૧અબ્/ વક્રા પાદાલિખિતા શત્રુભયક્લેશદા વિરૂપા ચ ।
પ૨।૧૦૧ચ્દ્/ ચર્માંગારાસ્થિકૃતા દન્તેન ચ ભર્તુઃ (કર્તુઃ) અશિવાય ॥ ॥

પ૨।૧૦૨અબ્/ વૈરમપસવ્યલિખિતા પ્રદક્ષિણં સમ્પદો વિનિર્દેશ્યાઃ ।
પ૨।૧૦૨ચ્દ્/ વાચઃ પરુષા નિષ્ઠીવિતં ક્ષુતં ચાશુભં કથિતમ્ ॥ ॥

પ૨।૧૦૩અબ્/ અર્ધનિચિતં કૃતં વા પ્રવિશન્ સ્થપતિઃ ગૃહે નિમિત્તાનિ ।
પ૨।૧૦૩ચ્દ્/ અવલોકયેદ્ ગૃહપતિઃ ક્વ સંસ્થિતઃ સ્પૃશતિ કિં ચાંગમ્ ॥ ॥

પ૨।૧૦૪અબ્/ રવિદીપ્તે યદિ શકુનિઃ તસ્મિન્ કાલે વિરૌતિ પરુષરવં (પરુષરવઃ) ।
પ૨।૧૦૪ચ્દ્/ સંસ્પૃષ્ટાંગસમાનં તસ્મિન્ દેશેઽસ્થિ નિર્દેશ્યમ્ ॥ ॥

પ૨।૧૦૫અબ્/ શકુનસમયેઽથવાઽન્યે હસ્ત્યશ્વશ્વાદયોઽનુવાશન્તે ।
પ૨।૧૦૫ચ્દ્/ તત્પ્રભવમસ્થિ તસ્મિં તદંગસંભૂતમેવૈતિ ॥ ॥

પ૨।૧૦૬અબ્/ સૂત્રે પ્રસાર્યમાણે ગર્દભરાવોઽસ્થિશલ્યમાચષ્ટે ।
પ૨।૧૦૬ચ્દ્/ શ્વશ◌ૃગાલલંઘિતે વા સૂત્રે શલ્યં વિનિર્દેશ્યમ્ ॥ ॥

પ૨।૧૦૭અબ્/ દિશિ શાન્તાયાં શકુનિઃ (શકુનો) મધુરવિરાવી યદા તદા વાચ્યઃ ।
પ૨।૧૦૭ચ્દ્/ અર્થઃ તસ્મિન્ સ્થાને ગૃહેશ્વરાધિષ્ઠિતે અંગે વા ॥ ॥

પ૨।૧૦૮અબ્/ સૂત્રચ્છેદે મૃત્યુઃ કીલે ચાવાન્મુખે મહગઃ (મહાન્ રોગઃ) ।
પ૨।૧૦૮ચ્દ્/ ગૃહનાથસ્થપતીનાં સ્મૃતિલોપે મૃત્યુઃ આદેશ્યઃ ॥ ॥

પ૨।૧૦૯અબ્/ સ્કન્ધાચ્યુતે શિરોરુક્ કુલોપસર્ગોઽપવર્જિતે કુંભે ।
પ૨।૧૦૯ય્દ્/ ભગ્નેઽપિ ચ કર્મિવધશ્ચ્યુતે કરાદ્ ગૃહપતેઃ મૃત્યુઃ ॥ ॥

પ૨।૧૧૦અબ્/ દક્ષિણપૂર્વે કોણે કૃત્વા પૂજાં શિલાં ન્યસેત્ પ્રથમં (પ્રથમાં) ।
પ૨।૧૧૦ય્દ્/ શેષાઃ પ્રદક્ષિણેન સ્તંભાશ્ચૈવં સમુત્થાપ્ય (સમુત્થાપ્યાઃ) ॥ ॥

પ૨।૧૧૧અબ્/ છત્રસ્રગંબરયુતઃ કૃતધૂપવિલેપનઃ સમુત્થાપ્યઃ ।
પ૨।૧૧૧ય્દ્/ સ્તંભઃ તથૈવ કાર્યો દ્વારોચ્છ્રાયઃ પ્રયત્નેન ॥ ॥

પ૨।૧૧૨અબ્/ વિહગાદિભિઃ અવલીનૈઃ આકંપિતપતિતદુઃસ્થિતૈશ્ચ તથા (ફલં) ।
પ૨।૧૧૨ય્દ્/ શક્રધ્વજસદૃશફલં તદેવ તસ્મિન્ (સદૃશં તસ્મિંશ્ચ શુભં) વિનિર્દિષ્ટમ્ ॥ ॥

પ૨।૧૧૩અબ્/ પ્રાગુત્તરૌન્નતે ધનસુતક્ષયઃ સુતવધશ્ચ દુર્ગન્ધે ।
પ૨।૧૧૩ય્દ્/ વક્રે બન્ધુવિનાશો ન સન્તિ ગર્ભાશ્ચ દિઙ્મૂઢે ॥ ॥

પ૨।૧૧૪અબ્/ ઇચ્છેદ્ યદિ ગૃહવૃદ્ધિં તતઃ સમન્તાદ્ વિવર્ધયેત્ તુલ્યમ્ ।
પ૨।૧૧૪ય્દ્/ એકૌદ્દેશે દોષઃ પ્રાગ્ અથવાઽપિ ઉત્તરે કુર્યાત્ ॥ ॥

પ૨।૧૧પઅબ્/ પ્રાગ્ ભવતિ મિત્રવૈરં મૃત્યુભયં દક્ષિણેન યદિ વૃદ્ધિઃ ।
પ૨।૧૧પય્દ્/ અર્થવિનાશઃ પશ્ચાદુદગ્વિવૃદ્ધિઃ (ઉદગ્વિવૃદ્ધૌ) મનસ્તાપઃ ॥ ॥

પ૨।૧૧૬અબ્/ ઐશાન્યાં દેવહૃહં મહાનસં યદિ ચાપિ કાર્યમાગ્નેય્યામ્ ।
પ૨।૧૧૬ય્દ્/ નૈરૃત્યાં ભાણ્ડૌપસ્કરોઽર્થધાન્યાનિ મારુત્યામ્ ॥ ॥

પ૨।૧૧૭અબ્/ પ્રાચ્યાદિસ્થે સલિલે સુતહાનિઃ શિખિભયં રિપુભયં ચ ।
પ૨।૧૧૭ય્દ્/ સ્ત્રીકલહઃ સ્ત્રીદૌષ્ટ્યં નૈઃસ્વ્યં વિત્તાત્મજવિવૃદ્ધિઃ ॥ ॥

પ૨।૧૧૮અબ્/ ખગનિલયભગ્નસંશુષ્કદગ્ધદેવાલયશ્મશાનસ્થાન્ ।
પ૨।૧૧૮ય્દ્/ ક્ષીરતરુધવવિભીતકનિંબારણિવર્જિતાન્ છિન્ધાત્ (વર્જિતાંશ્ચિછન્ધાત્) ॥ ॥

પ૨।૧૧૯અબ્/ રાત્રૌ કૃતબલિપૂજં પ્રદક્ષિણં છેદયેદ્ દિવા વૃક્ષમ્ ।
પ૨।૧૧૯ય્દ્/ ધન્યમુદક્પ્રાક્પતતં ન ગ્રાહ્યોઽતોઽન્યથા પતિતઃ ॥ ॥

પ૨।૧૨૦અબ્/ છેદો યદ્યવિકારી તતઃ શુભં દારુ તદ્ગૃહૌપયિકમ્ ।
પ૨।૧૨૦ય્દ્/ પીતે તુ મણ્ડલે નિર્દિશેત્ તરોઃ મધ્યગાં ગોધામ્ ॥ ॥

પ૨।૧૨૧અબ્/ મઞ્જિષ્ઠાભે ભેકો નીલે સર્પઃ તથાઽરુણે સરટઃ ।
પ૨।૧૨૧ય્દ્/ મુદ્ગાભેઽશ્મા કપિલે તુ મૂષકોઽંભશ્ચ ખડ્ગાભે ॥ ॥

પ૨।૧૨૨અબ્/ ધાન્યગોગુરુહુતાશસુરાણાં ન સ્વપેદુપરિ નાપ્યનુવંશમ્ ।

૫૨।૧૨૨ય્દ્/ નૌત્તરાપરશિરા ન ચ નગ્નો નૈવ ચાર્દ્રચરણઃ શ્રિયમિચ્છન્ ॥ ॥

૫૨।૧૨૩અબ્/ ભૂરિપુષ્પવિકરં (નિકરં) સતોરણં તોયપૂર્ણકલશૌપશોભિતમ્ ।
૫૨।૧૨૩ય્દ્/ ધૂપગન્ધબલિપૂજિતામરં બ્રાહ્મણધ્વનિયુતં વિશેદ્ ગૃહમ્ ॥ ॥

sએપરતે અધ્યાય ૫૩ દકાર્ગલાધ્યાયઃ
૫૩।૧અબ્/ ધર્મ્યં યશસ્યં ચ વદામ્યતોઽહં દકાર્ગલં (દગાર્ગલં) યેન જલોપલબ્ધિઃ ।
૫૩।૧ય્દ્/ પુંસાં યથાંગેષુ શિરાઃ તથૈવ ક્ષિતાવપિ પ્રોન્નતનિમ્નસંસ્થાઃ ॥ ॥

૫૩।૨અબ્/ એકેન વર્ણેન રસેન ચાંભશ્ચ્યુતં નભસ્તો વસુધાવિશેષાત્ ।
૫૩।૨ય્દ્/ નાનારસત્વં બહુવર્ણતાં ચ ગતં પરીક્ષ્યં ક્ષિતિતુલ્યમેવ ॥ ॥

૫૩।૩અબ્/ પુરુહૂતાનલયમનિરૃતિવરુણપવનેન્દુશંકરા દેવાઃ ।
૫૩।૩ય્દ્/ વિજ્ઞાતવ્યાઃ ક્રમશઃ પ્રાચ્યાદ્યાનાં દિશાં પતયઃ ॥ ॥

૫૩।૪અબ્/ દિક્પતિસંજ્ઞા ચ શિરા નવમી મધ્યે મહાશિરાનામ્ની ।
૫૩।૪ય્દ્/ એતાભ્યોઽન્યાઃ શતશો વિનિઃસૃતા નામભિઃ પ્રથિતાઃ ॥ ॥

૫૩।૫અબ્/ પાતાલાદૂર્ધ્વશિરા શુભા (ઊર્ધ્વશિરાઃ શુભાઃ) ચતુર્દિક્ષુ સંસ્થિતા યાશ્ચ ।
૫૩।૫ય્દ્/ કોણદિગુત્થા ન શુભાઃ શિરાનિમિત્તાનિ અતો વક્ષ્યે ॥ ॥

૫૩।૬અબ્/ યદિ વેતસોઽંબુરહિતે દેશે હસ્તૈઃ ત્રિભિઃ તતઃ પશ્ચાત્ ।
૫૩।૬ય્દ્/ સાર્ધે પુરુષે તોયં વહતિ શિરા પશ્ચિમા તત્ર ॥ ॥

૫૩।૭અબ્/ ચિહ્નમપિ ચાર્ધપુરુષે મણ્ડૂકઃ પાણ્ડુરોઽથ મૃત્ પીતા ।
૫૩।૭ય્દ્/ પુટભેદકશ્ચ તસ્મિન્ પાષાણો ભવતિ તોયમધઃ ॥ ॥

૫૩।૮અબ્/ જંબ્વાશ્ચૌદગ્ ધસ્તૈઃ ત્રિભિઃ શિરાધો નરદ્વયે પૂર્વા ।
૫૩।૮ય્દ્/ મૃલ્લોહગન્ધિકા પાણ્ડુરા ચ (અથ) પુરુષેઽત્ર મણ્ડૂકઃ ॥ ॥

૫૩।૯અબ્/ જંબૂવૃક્ષસ્ય પ્રાગ્ વલ્મીકો યદિ ભવેત્ સમીપસ્થઃ ।
૫૩।૯ય્દ્/ તસ્માદ્ દક્ષિણપાર્શ્વે સલિલં પુરુષદ્વયે સ્વાદુ ॥ ॥

૫૩।૧૦અબ્/ અર્ધપુરુષે ચ મત્સ્યઃ પારાવતસન્નિભશ્ચ પાષાણઃ ।
૫૩।૧૦ય્દ્/ મૃદ્ ભવતિ ચાત્ર નીલા દીર્ઘં કાલં ચ બહુ તોયમ્ ॥ ॥

૫૩।૧૧અબ્/ પશ્ચાદુદુંબરસ્ય ત્રિભિઃ એવ કરૈઃ નરદ્વયે સાર્ધે ।
૫૩।૧૧ય્દ્/ પુરુષે સિતોઽહિરશ્માઞ્જનૌપંપ્ડધઃ શિરા સુજલા ॥ ॥

૫૩।૧૨અબ્/ ઉદગ્ અર્જુનસ્ય દૃશ્યો વલ્મીકો યદિ તતોઽર્જુનાદ્ ધસ્તૈઃ ।
૫૩।૧૨ય્દ્/ ત્રિભિઃ અંબુ ભવતિ પુરુષૈઃ ત્રિભિઃ અર્ધસમન્વિતૈઃ પશ્ચાત્ ॥ ॥

૫૩।૧૩અબ્/ શ્વેતા ગોધાર્ધનરે પુરુષે મૃદ્ ધૂસરા તતઃ કૃષ્ણા ।
૫૩।૧૩ચ્દ્/ પીતા સિતા સસિકતા તતો જલં નિર્દિશેદમિતમ્ ॥ ॥

૫૩।૧૪અબ્/ વલ્મીકૌપચિતાયાં નિર્ગુણ્ડ્યાં દક્ષિણેન કથિતકરૈઃ ।
૫૩।૧૪ચ્દ્/ પુરુષદ્વયે સપાદે સ્વાદુ જલં ભવતિ ચાશોષ્યમ્ ॥ ॥

૫૩।૧૫અબ્/ રોહિતમત્સ્યોઽર્ધનરે મૃત્ કપિલા પાણ્ડુરા તતઃ પરતઃ ।
૫૩।૧૫ચ્દ્/ સિકતા સશર્કરાઽથ ક્રમેણ પરતો ભવત્યંભઃ ॥ ॥

૫૩।૧૬અબ્/ પૂર્વેણ યદિ બદર્યા વલ્મીકો દૃશ્યતે જલં પશ્ચાત્ ।
૫૩।૧૬ચ્દ્/ પુરુષૈઃ ત્રિભિઃ આદેશ્યં શ્વેતા ગૃહગોધિકાર્ધનરે ॥ ॥

૫૩।૧૭અબ્/ સપલાશા બદરી ચેદ્ દિશ્યપરસ્યાં તતો જલં ભવતિ ।
૫૩।૧૭ચ્દ્/ પુરુષત્રયે સપાદે પુરુષેઽત્ર ચ દુણ્ડુભઃ (દુણ્ડુભિઃ) ચિહ્નમ્ ॥ ॥

૫૩।૧૮અબ્/ વિલ્વ (બિલ્વ) ઉદુંબરયોગે વિહાય હસ્તત્રયં તુ યામ્યેન ।
૫૩।૧૮ચ્દ્/ પુરુષૈઃ ત્રિભિઃ અંબુ ભવેત્ કૃષ્ણોઽર્ધનરે ચ મણ્ડૂકઃ ॥ ॥

૫૩।૧૯અબ્/ કાકૌદુંબરિકાયાં વલ્મીકો દૃશ્યતે શિરા તસ્મિન્ ।
૫૩।૧૯ચ્દ્/ પુરુષત્રયે સપાદે પશ્ચિમદિક્સ્થા વહતિ સા ચ ॥ ॥

૫૩।૨૦અબ્/ આપાણ્ડુપીતિકા મૃદ્ગોરસવર્ણશ્ચ ભવતિ પાષાણઃ ।
૫૩।૨૦ચ્દ્/ પુરુષાર્ધે કુમુદનિભો દૃષ્ટિપથં મૂષકો યાતિ ॥ ॥

૫૩।૨૧અબ્/ જલપરિહીને દેશે વૃક્ષઃ કંપિલ્લકો યદા દૃશ્યઃ ।
૫૩।૨૧ચ્દ્/ પ્રાચ્યાં હસ્તત્રિતયે વહતિ શિરા દક્ષિણા પ્રથમમ્ ॥ ॥

૫૩।૨૨અબ્/ મૃન્નીલોત્પલવર્ણા કાપોતા દૃશ્યતે તતઃ (ચૈવ દૃશ્યતે) તસ્મિન્ ।
૫૩।૨૨ચ્દ્/ હસ્તે ઽજગન્ધકો મત્સ્યકઃ (ઽજગન્ધિમત્સ્યો ભવતિ) પયોઽલ્પં ચ સક્ષારમ્ ॥ ॥

૫૩।૨૩અબ્/ શોણાકતરોઃ અપરોત્તરે શિરા દ્વૌ કરાવતિક્રમ્ય ।
૫૩।૨૩ચ્દ્/ કુમુદા નામ શિરા સા પુરુષત્રયવાહિની ભવતિ ॥ ॥

૫૩।૨૪અબ્/ આસન્નો વલ્મીકો દક્ષિણપાર્શ્વે વિભીતકસ્ય યદિ ।
૫૩।૨૪ચ્દ્/ અધ્યર્ધે ભવતિ (તસ્ય) શિરા પુરુષે જ્ઞેયા દિશિ પ્રાચ્યામ્ ॥ ॥

૫૩।૨૫અબ્/ તસ્યૈવ પશ્ચિમાયાં દિશિ વલ્મીકો યદા ભવેદ્ ધસ્તે ।
૫૩।૨૫ચ્દ્/ તત્રૌદગ્ ભવતિ શિરા ચતુર્ભિઃ અર્ધાધિકૈઃ પુરુષૈઃ ॥ ॥

૫૩।૨૬અબ્/ શ્વેતો વિશ્વંભરકઃ પ્રથમે પુરુષે તુ કુંકુમાભોઽશ્મા ।

૫૩।૨૬ય્દ્/ અપરસ્યાં દિશિ ચ શિરા નશ્યતિ વર્ષત્રયેઽતીતે ॥ ॥

૫૩।૨૭અબ્/ સકુશઃ સિત (સકુશાસિત) ઐશાન્યાં વલ્મીકો યત્ર કોવિદારસ્ય ।
૫૩।૨૭ય્દ્/ મધ્યે તયોઃ નરૈઃ અર્ધપંચમૈઃ તોયમક્ષોભ્યમ્ ॥ ॥

૫૩।૨૮અબ્/ પ્રથમે પુરુષે ભુજગઃ કમલોદરસન્નિભો મહી રક્તા ।
૫૩।૨૮ય્દ્/ કુરુવિન્દઃ પાષાણશ્ચિહ્નાનિ એતાનિ વાચ્યાનિ ॥ ॥

૫૩।૨૯અબ્/ યદિ ભવતિ સપ્તપર્ણો વલ્મીકવૃતઃ તદુત્તરે તોયમ્ ।
૫૩।૨૯ય્દ્/ વાચ્યં પુરુષૈઃ પંચભિઃ અત્રાપિ ભવન્તિ ચિહ્નાનિ ॥ ॥

૫૩।૩૦અબ્/ પુરુષાર્ધે મણ્ડૂકો હરિતો હરિતાલસન્નિભા ભૂશ્ચ ।
૫૩।૩૦ય્દ્/ પાષાણોઽભ્રનિકાશઃ સૌમ્યા ચ શિરા શુભાંબુવહા ॥ ॥

૫૩।૩૧અબ્/ સર્વેષાં વૃક્ષાણામધઃ સ્થિતો દર્દુરો યદા દૃશ્યઃ ।
૫૩।૩૧ય્દ્/ તસ્માદ્ ધસ્તે તોયં ચતુર્ભિઃ અર્ધાધિકૈઃ પુરુષૈઃ ॥ ॥

૫૩।૩૨અબ્/ પુરુષે તુ ભવતિ નકુલો નીલો મૃત્પીતિકા તતઃ શ્વેતા ।
૫૩।૩૨ય્દ્/ દર્દુરસમાનરૂપઃ પાષાણો દૃશ્યતે ચાત્ર ॥ ॥

૫૩।૩૩અબ્/ યદ્યહિનિલયો દૃશ્યો દક્ષિણતઃ સંસ્થિતઃ કરઞ્જસ્ય ।
૫૩।૩૩ય્દ્/ હસ્તદ્વયે તુ યામ્યે પુરુષત્રિતયે શિરા સાર્ધે ॥ ॥

૫૩।૩૪અબ્/ કચ્છપકઃ પુરુષાર્ધે પ્રથમં ચૌદ્ભિદ્યતે શિરા પૂર્વા ।
૫૩।૩૪ય્દ્/ ઉદગ્ અન્યા સ્વાદુજલા હરિતોઽશ્માધઃ તતઃ તોયમ્ ॥ ॥

૫૩।૩૫અબ્/ ઉત્તરતશ્ચ મધૂકાદહિનિલયઃ પશ્ચિમે તરોઃ તોયમ્ ।
૫૩।૩૫ય્દ્/ પરિહૃત્ય પંચ હસ્તાન્ અર્ધાષ્ટમપૌરુષાન્ (પૌરુષે) પ્રથમમ્ ॥ ॥

૫૩।૩૬અબ્/ અહિરાજઃ પુરુષેઽસ્મિન્ ધૂમ્રા ધાત્રી કુલુત્થ (કુલત્ત) વર્ણોઽશ્મા ।
૫૩।૩૬ય્દ્/ માહેન્દ્રી ભવતિ શિરા વહતિ સફેનં સદા તોયમ્ ॥ ॥

૫૩।૩૭અબ્/ વલ્મીકઃ સ્નિગ્ધો દક્ષિણેન તિલકસ્ય સકુશદૂર્વશ્ચેત્ ।
૫૩।૩૭ય્દ્/ પુરુષૈઃ પંચભિઃ અંભો દિશિ વારુણ્યાં શિરા પૂર્વા ॥ ॥

૫૩।૩૮અબ્/ સર્પાવાસઃ પશ્ચાદ્ યદા કદંબસ્ય દક્ષિણેન જલમ્ ।
૫૩।૩૮ય્દ્/ પરતો હસ્તત્રિતયાત્ ષડ્ભિઃ પુરુષૈઃ તુરીયોનૈઃ ॥ ॥

૫૩।૩૯અબ્/ કૌબેરી ચાત્ર શિરા વહતિ જલં લોહગન્ધિ ચાક્ષોભ્યમ્ ।
૫૩।૩૯ય્દ્/ કનકનિભો મણ્ડૂકો નરમાત્રે મૃત્તિકા પીતા ॥ ॥

૫૩।૪૦અબ્/ વલ્મીકસંવૃતો યદિ તાલો વા ભવતિ નાલિકેરો વા ।
૫૩।૪૦ય્દ્/ પશ્ચાત્ ષડ્ભિઃ હસ્તૈઃ નરૈશ્ચતુર્ભિઃ શિરા યામ્યા ॥ ॥

૫૩।૪૧અબ્/ યામ્યેન કપિત્થસ્યાહિસંશ્રયશ્ચેદુદગ્ જલં વાચ્યમ્ ।
૫૩।૪૧ય્દ્/ સપ્ત પરિત્યજ્ય કરાન્ ખાત્વા પુરુષાન્ જલં પંચ ॥ ॥

૫૩।૪૨અબ્/ કર્બુરકોઽહિઃ પુરુષે કૃષ્ણા મૃત્ પુટભિદપિ ચ પાષાણઃ ।
૫૩।૪૨ય્દ્/ શ્વેતા મૃત્ પશ્ચિમતઃ શિરા તતશ્ચૌત્તરા ભવતિ ॥ ॥

૫૩।૪૩અબ્/ અશ્મન્તકસ્ય વામે બદરી વા દૃશ્યતેઽહિનિલયો વા ।
૫૩।૪૩ય્દ્/ ષડ્ભિરુદક્ તસ્ય કરૈઃ સાર્ધે પુરુષત્રયે તોયમ્ ।
૫૩।૪૪અબ્/ કૂર્મઃ પ્રથમે પુરુષે પાષાણો ધૂસરઃ સસિકતા મૃત્ ।
૫૩।૪૪ય્દ્/ આદૌ ચ શિરા (શિરા ચ) યામ્યા પૂર્વોત્તરતો દ્વિતીયા ચ ॥ ॥

૫૩।૪૫અબ્/ વામેન હરિદ્રતરોઃ વલ્મીકશ્ચેજ્જલં ભવતિ પૂર્વે (ચેત્ તતો જલં) ।
૫૩।૪૫ય્દ્/ હસ્તત્રિતયે સત્ર્યંશૈઃ પુંભિઃ (પુરુષૈઃ સત્ર્યંશૈઃ) પંચભિઃ ભવતિ ॥ ॥

૫૩।૪૬અબ્/ નીલો ભુજગઃ પુરુષે મૃત્ પીતા મરકતૌપમશ્ચાશ્મા ।
૫૩।૪૬ય્દ્/ કૃષ્ણા ભૂઃ પ્રથમં વારુણી શિરા દક્ષિણેનાન્યા ॥ ॥

૫૩।૪૭અબ્/ જલપરિહીને દેશે દૃશ્યન્તેઽનૂપજાનિ ચેન્ નિમિતાનિ (ચિહ્નાનિ) ।
૫૩।૪૭ય્દ્/ વીરણદૂર્વા મૃદવશ્ચ યત્ર તસ્મિન્ જલં પુરુષે ॥ ॥

૫૩।૪૮અબ્/ ભાર્ંગી ત્રિવૃતા દન્તી સૂકરપાદી ચ લક્ષ્મણા ચૈવ ।
૫૩।૪૮ય્દ્/ નવમાલિકા ચ હસ્તદ્વયેઽંબુ યામ્યે ત્રિભિઃ પુરુષૈઃ ॥ ॥

૫૩।૪૯અબ્/ સ્નિગ્ધાઃ પ્રલંબશાખા વામનવિકટ (વિટ) દ્રુમાઃ સમીપજલાઃ ।
૫૩।૪૯ય્દ્/ સુષિરા જર્જરપત્રા રૂક્ષાશ્ચ જલેન સન્ત્યક્તાઃ ॥ ॥

૫૩।૫૦અબ્/ તિલકામ્રાતકવરુણકભલ્લાતકવિલ્વ (બિલ્વ) તિન્દુકાંકોલાઃ (અગ઼્ક઼ોલ્લાઃ) ।
૫૩।૫૦ય્દ્/ પિણ્ડારશિરીષાઞ્જનપરૂષકા વઞ્જુલોઽતિબલા (વઞ્જુરાતિબલા) ॥ ॥

૫૩।૫૧અબ્/ એતે યદિ સુસ્નિગ્ધા વલ્મીકૈઃ પરિવૃતાઃ તતઃ તોયમ્ ।
૫૩।૫૧ય્દ્/ હસ્તૈઃ ત્રિભિરુત્તરતશ્ચતુર્ભિઃ અર્ધેન ચ નરેણ (નરસ્ય) ॥ ॥

૫૩।૫૨અબ્/ અતૃણે સતૃણા યસ્મિન્ સતૃણે તૃણવર્જિતા મહી યત્ર ।
૫૩।૫૨ય્દ્/ તસ્મિન્ શિરા પ્રદિષ્ટા વક્તવ્યં વા ધનં ચાસ્મિન્ ॥ ॥

૫૩।૫૩અબ્/ કણ્ટક્યકણ્ટકાનાં વ્યત્યાસેઽંભઃ ત્રિભિઃ કરૈઃ પશ્ચાત્ ।
૫૩।૫૩ય્દ્/ ખાત્વા પુરુષત્રિતયં ત્રિભાગયુક્તં ધનં વા સ્યાત્ ॥ ॥

૫૩।૫૪અબ્/ નદતિ મહી ગંભીરં યસ્મિંશ્ચરણાહતા જલં તસ્મિન્ ।
૫૩।૫૪ય્દ્/ સાર્ધૈઃ ત્રિભિઃ મનુષ્યૈઃ કૌબેરી તત્ર ચ શિરા સ્યાત્ ॥ ॥

૫૩।૫૫અબ્/ વૃક્ષસ્યૈકા શાખા યદિ વિનતા ભવતિ પાણ્ડુરા વા સ્યાત્ ।
૫૩।૫૫ય્દ્/ વિજ્ઞાતવ્યં શાખાતલે જલં ત્રિપુરુષં ખાત્વા ॥ ॥

૫૩।૫૬અબ્/ ફલકુસુમવિકારો યસ્ય તસ્ય પૂર્વે શિરા ત્રિભિઃ હસ્તૈઃ ।
૫૩।૫૬ય્દ્/ ભવતિ પુરુષૈશ્ચતુર્ભિઃ પાષાણોઽધઃ ક્ષિતિઃ પીતા ॥ ॥

૫૩।૫૭અબ્/ યદિ કણ્ટકારિકા કણ્ટકૈઃ વિના દૃશ્યતે સિતૈઃ કુસુમૈઃ ।
૫૩।૫૭ય્દ્/ તસ્યાઃ તલેઽંબુ વાચ્યં ત્રિભિઃ નરૈઃ અર્ધપુરુષે ચ ॥ ॥

૫૩।૫૮અબ્/ ખર્જૂરી દ્વિશિરસ્કા યત્ર ભવેજ્જલવિવર્જિતે દેશે ।
૫૩।૫૮ય્દ્/ તસ્યાઃ પશ્ચિમભાગે નિર્દેશ્યં ત્રિપુરુષૈઃ (ત્રિપુરુષે) વારિ ॥ ॥

૫૩।૫૯અબ્/ યદિ ભવતિ કર્ણિકારઃ સિતકુસુમઃ સ્યાત્ પલાશવૃક્ષો વા ।
૫૩।૫૯ય્દ્/ સવ્યેન તત્ર હસ્તદ્વયેઽંબુ પુરુષદ્વયે (પુરુષત્રયે) ભવતિ ॥ ॥

૫૩।૬૦અબ્/ યસ્યામ્ ઊષ્મા (ઊષ્મા યસ્યાં) ધાત્ર્યાં ધૂમો વા તત્ર વારિ નરયુગલે (નરયુગ્મે) ।
૫૩।૬૦ય્દ્/ નિર્દેષ્ટવ્યા ચ શિરા મહતા તોયપ્રવાહેણ ॥ ॥

૫૩।૬૧અબ્/ યસ્મિન્ ક્ષેત્રોદ્દેશે જાતં સસ્યં વિનાશમુપયાતિ ।
૫૩।૬૧ય્દ્/ સ્નિગ્ધમતિપાણ્ડુરં વા મહાશિરા નરયુગે તત્ર ॥ ॥

૫૩।૬૨અબ્/ મરુદેશે ભવતિ શિરા યથા તથાતઃ પરં પ્રવક્ષ્યામિ ।
૫૩।૬૨ય્દ્/ ગ્રીવા કરભાણામિવ ભૂતલસંસ્થાઃ શિરા યાન્તિ ॥ ॥

૫૩।૬૩અબ્/ પૂર્વોત્તરેણ પીલોઃ યદિ વલ્મીકો જલં ભવતિ પશ્ચાત્ ।
૫૩।૬૩ય્દ્/ ઉત્તરગમના ચ શિરા વિજ્ઞેયા પંચભિઃ પુરુષૈઃ ॥ ॥

૫૩।૬૪અબ્/ ચિહ્નં દર્દુર આદૌ મૃત્ કપિલા તત્પરં (મૃત્કપિલાતઃ પરં) ભવેદ્ ધરિતા ।
૫૩।૬૪ય્દ્/ ભવતિ ચ પુરુષે અધૌ ઽશ્મા તસ્ય તલે ઽંભો વિનિર્દેષ્યં (વારિ નિર્દેશ્યં) ॥ ॥

૫૩।૬૫અબ્/ પીલોઃ એવ પ્રાચ્યાં વલ્મીકોઽતોઽર્ધપંચમૈઃ હસ્તૈઃ ।
૫૩।૬૫ય્દ્/ દિશિ યામ્યાયાં તોયં વક્તવ્યં સપ્તભિઃ પુરુષૈઃ ॥ ॥

૫૩।૬૬અબ્/ પ્રથમે પુરુષે ભુજગઃ સિતાસિતો હસ્તમાત્રમૂર્તિશ્ચ ।
૫૩।૬૬ય્દ્/ દક્ષિણતો વહતિ શિરા સક્ષારં ભૂરિ પાનીયમ્ ॥ ॥

૫૩।૬૭અબ્/ ઉત્તરતશ્ચ કરીરસ્યાહિગૃહં (કરીરાદહિનિલયે) દક્ષિણે જલં સ્વાદુ ।
૫૩।૬૭ય્દ્/ દશભિઃ પુરુષૈઃ જ્ઞેયમ્ પુર્ષે પીતોઽત્ર મણ્ડૂકઃ ॥ ॥

૫૩।૬૮અબ્/ રોહીતકસ્ય પશ્ચાદહિવાસશ્ચેત્ ત્રિભિઃ કરૈઃ યામ્યે ।
૫૩।૬૮ચ્દ્/ દ્વાદશ પુરુષાન્ ખાત્વા સક્ષારા પશ્ચિમેન શિરા ॥ ॥

૫૩।૬૯અબ્/ ઇન્દ્રતરોઃ વલ્મીકઃ પ્રાગ્ દૃશ્યઃ પશ્ચિમે શિરા હસ્તે ।
૫૩।૬૯ચ્દ્/ ખાત્વા ચતુર્દશ નરાન્ કપિલા ગોધા નરે પ્રથમે ॥ ॥

૫૩।૭૦અબ્/ યદિ વા સુવર્ણનામ્નઃ તરોઃ ભવેદ્ વામતો ભુજંગગૃહમ્ ।
૫૩।૭૦ચ્દ્/ હસ્તદ્વયે તુ યામ્યે પંચદશનરાવસાનેઽંબુ ॥ ॥

૫૩।૭૧અબ્/ ક્ષારં પયોઽત્ર નકુલોઽર્ધમાનવે તામ્રસન્નિભશ્ચાશ્મા ।
૫૩।૭૧ચ્દ્/ રક્તા ચ ભવતિ વસુધા વહતિ શિરા દક્ષિણા તત્ર ॥ ॥

૫૩।૭૨અબ્/ બદરીરોહિતવૃક્ષૌ સમ્પૃક્તૌ ચેદ્ વિનાપિ વલ્મીકમ્ ।
૫૩।૭૨ચ્દ્/ હસ્તત્રયેઽંબુ પશ્ચાત્ ષોડશભિઃ માનવૈઃ ભવતિ ॥ ॥

૫૩।૭૩અબ્/ સુરસં જલમાદૌ દક્ષિણા શિરા વહતિ ચૌત્તનેણાન્યા ।
૫૩।૭૩ચ્દ્/ પિષ્ટનિભઃ પાષાણો મૃત્ શ્વેતા વૃશ્ચિકોઽર્ધનરે ॥ ॥

૫૩।૭૪અબ્/ સકરીરા ચેદ્ વદરી ત્રિભિઃ કરૈઃ પશ્ચિમેન તત્રાંભઃ ।
૫૩।૭૪ચ્દ્/ અષ્ટાદશભિઃ પુરુષૈઃ અશાની બહુજલા ચ શિરા ॥ ॥

૫૩।૭૫અબ્/ પીલુસમેતા બદરી હસ્તત્રયસમ્મિતે દિશિ પ્રાચ્યામ્ ॥ ॥

૫૩।૭૫ચ્દ્/ વિંશત્યા પુરુષાણામશોષ્યમંભોઽત્ર સક્ષારમ્ ॥ ॥

૫૩।૭૬અબ્/ કકુભકરીરાવેકત્ર સંયુતૌ યત્ર કકુભવિલ્વૌ (બિલ્બૌ) વા ।
૫૩।૭૬ચ્દ્/ હસ્તદ્વયેઽંબુ પશ્ચાન્ નરૈઃ ભવેત્ પંચવિંશત્યા ॥ ॥

૫૩।૭૭અબ્/ વલ્મીકમૂર્ધનિ યદા દૂર્વા ચ કુશાશ્ચ પાણ્ડુરાઃ સન્તિ ।
૫૩।૭૭ચ્દ્/ કૂપો મધ્યે દેયો જલમત્ર નરૈકવિંશત્યા ॥ ॥

૫૩।૭૮અબ્/ ભૂમિઃ કદંબકયુતા (ભૂમી કદંબકયુતા, ભૂમીકદંબકયુતા) વલ્મીકે યત્ર દૃશ્યતે દૂર્વા ।
૫૩।૭૮ચ્દ્/ હસ્તદ્વયેન (હસ્તત્રયેન) યામ્યે નરૈઃ જલં પંચવિંશત્યા ॥ ॥

૫૩।૭૯અબ્/ વલ્મીકત્રયમધ્યે રોહીતકપાદપો યદા ભવતિ ।
૫૩।૭૯ચ્દ્/ નાનાવૃક્ષૈઃ સહિતઃ ત્રિભિઃ જલં તત્ર વક્તવ્યમ્ ॥ ॥

૫૩।૮૦અબ્/ હસ્તચતુષ્કે મધ્યાત્ ષોડશભિશ્ચાંગુલૈરુદગ્ વારિ ।
૫૩।૮૦ચ્દ્/ ચત્વારિંશત્ પુરુષાન્ ખાત્વા ઽશ્માઽધઃ (અશ્માતઃ) શિરા ભવતિ ॥ ॥

૫૩।૮૧અબ્/ ગ્રન્થિપ્રચુરા યસ્મિન્ શમી ભવેદુત્તરેણ વલ્મીકઃ ।
૫૩।૮૧ચ્દ્/ પશ્ચાત્ પંચકરાન્તે શતાર્ધસંખ્યૈઃ નરૈઃ સલિલમ્ ॥ ॥

૫૩।૮૨અબ્/ એકસ્થાઃ પંચ યદા વલ્મીકા મધ્યમો ભવેત્શ્વેતઃ ।
૫૩।૮૨ચ્દ્/ તસ્મિન્ શિરા પ્રદિષ્ટા નરષષ્ટ્યા પંચવર્જિતયા ॥ ॥

૫૩।૮૩અબ્/ સપલાશા યત્ર શમી પશ્ચિમભાગેઽંબુ માનવૈઃ ષષ્ટ્યા ।
૫૩।૮૩ચ્દ્/ અર્ધનરેઽહિઃ પ્રથમં સવાલુકા પીતમૃત્ પરતઃ ॥ ॥

૫૩।૮૪અબ્/ વલ્મીકેન પરિવૃતઃ શ્વેતો રોહીતકો ભવેદ્ યસ્મિન્ ।
૫૩।૮૪ચ્દ્/ પૂર્વેણ હસ્તમાત્રે સપ્તત્યા માનવૈઃ અંબુ ॥ ॥

૫૩।૮૫અબ્/ શ્વેતા કણ્ટકબહુલા યત્ર શમી દક્ષિણેન તત્ર પયઃ ।
૫૩।૮૫ચ્દ્/ નરપંચકસંયુતયા સપ્તત્યાહિઃ નરાર્ધે ચ ॥ ॥

૫૩।૮૬અબ્/ મરુદેશે યચ્ચિહ્નં ન જાંગલે તૈઃ જલં વિનિર્દેશ્યમ્ ।
૫૩।૮૬ચ્દ્/ જંબૂવેતસપૂર્વૈઃ (પૂર્વે) યે પુરુષાઃ તે મરૌ દ્વિગુણાઃ ॥ ॥

૫૩।૮૭અબ્/ જંબૂઃ ત્રિવૃતા મૌર્વી (મૂર્વા) શિશુમારી સારિવા શિવા શ્યામા ।
૫૩।૮૭ચ્દ્/ વીરુધયો વારાહી જ્યોતિષ્મતી ગરુડવેગા ચ (ચ ગરુડવેગા) ॥ ॥

૫૩।૮૮અબ્/ સૂકરિકમાષપર્ણીવ્યાઘ્રપદાશ્ચેતિ યદ્યહેઃ નિલયે ।
૫૩।૮૮ચ્દ્/ વલ્મીકાદુત્તરતઃ ત્રિભિઃ કરૈઃ ત્રિપુરુષે તોયમ્ ॥ ॥

૫૩।૮૯અબ્/ એતદનૂપે વાચ્યં જાંગલભૂમૌ તુ પંચભિઃ પુરુષૈઃ ।
૫૩।૮૯ચ્દ્/ એતૈઃ એવ નિમિત્તૈઃ મરુદેશે સપ્તભિઃ કથયેત્ ॥ ॥

૫૩।૯૦અબ્/ એકનિભા યત્ર મહી તૃણતરુવલ્મીકગુલ્મપરિહીના ।
૫૩।૯૦ચ્દ્/ તસ્યાં યત્ર વિકારો ભવતિ ધરિત્ર્યાં જલં તત્ર ॥ ॥

૫૩।૯૧અબ્/ યત્ર સ્નિગ્ધા નિમ્ના સવાલુકા સાનુનાદિની વા સ્યાત્ ।
૫૩।૯૧ચ્દ્/ તત્ર અર્ધપંચકૈઃ (અર્ધપંચમૈઃ) વારિ માનવૈઃ પંચભિઃ યદિ વા ॥ ॥

૫૩।૯૨અબ્/ સ્નિગ્ધતરૂણાં યામ્યે નરૈશ્ચતુર્ભિઃ જલં પ્રભૂતં ચ ।
૫૩।૯૨ચ્દ્/ તરુગહનેઽપિ હિ વિકૃતો યઃ તસ્માત્ તદ્વદેવ વદેત્ ॥ ॥

૫૩।૯૩અબ્/ નમતે યત્ર ધરિત્રી સાર્ધે પુરુષેઽંબુ જાંગલાનૂપે ।
૫૩।૯૩ચ્દ્/ કીટા વા યત્ર વિનાલયેન બહવોઽંબુ તત્રાપિ ॥ ॥

૫૩।૯૪અબ્/ ઉષ્ણા શીતા ચ મહી શીતોષ્ણાંભઃ ત્રિભિઃ નરૈઃ સાર્ધૈઃ ।
૫૩।૯૪ચ્દ્/ ઇન્દ્રધનુઃ મત્સ્યો વા વલ્મીકો વા ચતુર્હસ્તાત્ ॥ ॥

૫૩।૯૫અબ્/ વલ્મીકાનાં પંક્ત્યાં યદ્યેકોઽભ્યુચ્છ્રિતઃ શિરા તદધઃ ।
૫૩।૯૫ય્દ્/ શુષ્યતિ ન રોહતે વા સસ્યં યસ્યાં ચ તત્રાંભઃ ॥ ॥

૫૩।૯૬અબ્/ ન્યગ્રોધપલાશૌદુંબરૈઃ સમેતૈઃ ત્રિભિઃ જલં તદધઃ ।
૫૩।૯૬ય્દ્/ વટપિપ્પલસમવાયે તદ્વદ્ વાચ્યં શિરા ચૌદક્ ॥ ॥

૫૩।૯૭અબ્/ આગ્નેયે યદિ કોણે ગ્રામસ્ય પુરસ્ય વા ભવેત્ (ભવતિ) કૂપઃ ।
૫૩।૯૭ય્દ્/ નિત્યં સ કરોતિ ભયં દાહં ચ સમાનુષં પ્રાયઃ ॥ ॥

૫૩।૯૮અબ્/ નૈરૃતકોણે બાલક્ષયં ચ વનિતાભયં (વનિતાભયં) ચ વાયવ્યે ।
૫૩।૯૮ય્દ્/ દિક્ત્રયમેતત્ ત્યક્ત્વા શેષાસુ શુભાવહાઃ કૂપાઃ ॥ ॥

૫૩।૯૯અબ્/ સારસ્વતેન મુનિના દકાર્ગકં (દગારગલં) યત્ ક્ર્તં તદવલોક્ય ।
૫૩।૯૯ય્દ્/ આર્યાભિઃ કૃતમેતદ્ વૃત્તૈઃ અપિ માનવં વક્ષ્યે ॥ ॥

૫૩।૧૦૦અ સ્નિગ્ધા યતઃ પાદપગુલ્મવલ્લ્યો
૫૩।૧૦૦બ્ નિશ્છિદ્રપત્રાશ્ચ તતઃ શિરાસ્તિ ।
૫૩।૧૦૦ય્ પદ્મક્ષુરૌશીરકુલાઃ સગુણ્ડ્રાઃ
૫૩।૧૦૦દ્ કાશાઃ કુશા વા નલિકા નલો વા ॥ ॥

૫૩।૧૦૧અ ખર્જૂરજંબૂ અર્જુનવેતસાઃ સ્યુઃ
૫૩।૧૦૧બ્ ક્ષીરાન્વિતા વા દ્રુમગુલ્મવલ્લ્યઃ ।
૫૩।૧૦૧ય્ છત્રૈભનગાઃ શતપત્રનીપાઃ
૫૩।૧૦૧દ્ સ્યુઃ નક્તમાલાશ્ચ સસિન્દુવારાઃ ॥ ॥

૫૩।૧૦૨અ વિભીતકો વા મદયન્તિકા વા
૫૩।૧૦૨બ્ યત્રાસ્તિ તસ્મિન્ પુરુષત્રયેઽંભઃ ।
૫૩।૧૦૨ય્ સ્યાત્ પર્વતસ્યૌપરિ પર્વતોઽન્યઃ
૫૩।૧૦૨દ્ તત્રાપિ મૂલે પુરુષત્રયેઽંભઃ ॥ ॥

૫૩।૧૦૩અ યા મૌઞ્જિકૈઃ (મૌઞ્જકૈઃ) કાશકુશૈશ્ચ યુક્તા
૫૩।૧૦૩બ્ નીલા ચ મૃદ્યત્ર સશર્કરા ચ ।
૫૩।૧૦૩ય્ તસ્યાં પ્રભૂતં સુરસં ચ તોયં
૫૩।૧૦૩દ્ કૃષ્ણાથવા યત્ર ચ રક્તમૃદ્ વા ॥ ॥

૫૩।૧૦૪અ સશર્કરા તામ્રમહી કષાયં
૫૩।૧૦૪બ્ ક્ષારં ધરિત્રી કપિલા કરોતિ ।

૫૩।૧૦૪ય્ આપાણ્ડુરાયાં લવણં પ્રદિષ્ટં
૫૩।૧૦૪દ્ મૃષ્ટં (મિષ્ટં) પયો નીલવસુન્ધરાયામ્ ॥ ॥

૫૩।૧૦૫અ શાકાશ્વકર્ણાર્જુનવિલ્વ (બિલ્વ) સર્જાઃ
૫૩।૧૦૫બ્ શ્રીપર્ણ્યરિષ્ટાધવશિંશપાશ્ચ ।
૫૩।૧૦૫ય્ છિદ્રૈશ્ચ પત્રૈઃ (પર્ણૈઃ) દ્રુમગુલ્મવલ્લ્યો
૫૩।૧૦૫દ્ રૂક્ષાશ્ચ દૂરેઽંબુ નિવેદયન્તિ ॥ ॥

૫૩।૧૦૬અ સૂર્યાગ્નિભસ્મૌષ્ટ્રખરાનુવર્ણા
૫૩।૧૦૬બ્ યા નિર્જલા સા વસુધા પ્રદિષ્ટા ।
૫૩।૧૦૬ય્ રક્તાંકુરાઃ ક્ષીરયુતાઃ કરીરા
૫૩।૧૦૬દ્ રક્તા ધરા ચેજ્જલમશ્મનોઽધઃ ॥ ॥

૫૩।૧૦૭અ વૈદૂર્યમુદ્ગ (વૈડૂર્યમુડ્ગ)અંબુદમેચકાભા
૫૩।૧૦૭બ્ પાકૌન્મુખોદુંબરસન્નિભા વા ।
૫૩।૧૦૭ય્ ભંગ (ભૃગ્ગ)અગ્જનાભા કપિલાથવા યા
૫૩।૧૦૭દ્ જ્ઞેયા શિલા ભૂરિસમીપતોયા ॥ ॥

૫૩।૧૦૮અ પારાવત (પરાવત) ક્ષૌદ્રઘૃતૌપમા યા (વા)
૫૩।૧૦૮બ્ ક્ષૌમસ્ય વસ્ત્રસ્ય ચ તુલ્યવર્ણા ।
૫૩।૧૦૮ય્ યા સોમવલ્લ્યાશ્ચ સમાનરૂપા
૫૩।૧૦૮દ્ સાપ્યાશુ તોયં કુરુતેઽક્ષયં ચ ॥ ॥

૫૩।૧૦૯અ તામ્રૈઃ સમેતા પૃષતૈઃ વિચિત્રૈઃ
૫૩।૧૦૯બ્ આપાણ્ડુભસ્મૌષ્ટ્રખરાનુરૂપા ।
૫૩।૧૦૯ય્ ભૃંગૌપમાંગુષ્ઠિકપુષ્પિકા વા
૫૩।૧૦૯દ્ સૂર્યાગ્નિવર્ણા ચ શિલા વિતોયા ॥ ॥

૫૩।૧૧૦અ ચન્દ્રાતપસ્ફટિકમૌક્તિકહેમરૂપા
૫૩।૧૧૦બ્ યાશ્ચેન્દ્રનીલમણિહિંગુલુકાગ્જનાભાઃ ।
૫૩।૧૧૦ય્ સૂર્યોદયાંશુહરિતાલનિભાશ્ચ યાઃ સ્યુઃ
૫૩।૧૧૦દ્ તાઃ શોભના મુનિવચોઽત્ર ચ વૃત્તમેતત્ ॥ ॥

૫૩।૧૧૧અ એતા હ્યભેદ્યાશ્ચ શિલાઃ શિવાશ્ચ
૫૩।૧૧૧બ્ યક્ષૈશ્ચ નાગૈશ્ચ સદાભિજુષ્ટાઃ ।
૫૩।૧૧૧ય્ યેષાં ચ રાષ્ટ્રેષુ ભવન્તિ રાજ્ઞાં
૫૩।૧૧૧દ્ તેષામવૃષ્ટિઃ ન ભવેત્ કદાચિત્ ॥ ॥

૫૩।૧૧૨અ ભેદં યદા નૈતિ શિલા તદાનીં
૫૩।૧૧૨બ્ પલાશકાષ્ઠૈઃ સહ તિન્દુકાનામ્ ।
૫૩।૧૧૨ચ્ પ્રજ્વાલયિત્વાનલમગ્નિવર્ણા
૫૩।૧૧૨દ્ સુધાંબુસિક્તા પ્રવિદારમેતિ ॥ ॥

૫૩।૧૧૩અ તોયં શ્રિતં (શ઼ૃતં) મોક્ષકભસ્મના વા
૫૩।૧૧૩બ્ યત્ સપ્તકૃત્વઃ પરિષેચનં તત્ ।
૫૩।૧૧૩ચ્ કાર્યં શરક્ષારયુતં શિલાયાઃ
૫૩।૧૧૩દ્ પ્રસ્ફોટનં વહ્નિવિતાપિતાયાઃ ॥ ॥

૫૩।૧૧૪અ તક્રકાઞ્જિકસુરાઃ સકુલત્થા
૫૩।૧૧૪બ્ યોજિતાનિ બદરાણિ ચ તસ્મિન્ ।
૫૩।૧૧૪ચ્ સપ્તરાત્રમુષિતાનિ અભિતપ્તાં
૫૩।૧૧૪દ્ દારયન્તિ હિ શિલાં પરિષેકૈઃ ॥ ॥

૫૩।૧૧૫અ નૈંબં પત્રં ત્વક્ ચ નાલં તિલાનાં
૫૩।૧૧૫બ્ સાપામાર્ગં તિન્દુકં સ્યાદ્ ગુડૂચી ।
૫૩।૧૧૫ચ્ ગોમૂત્રેણ સ્રાવિતઃ ક્ષાર એષાં
૫૩।૧૧૫દ્ ષટ્કૃત્વોઽતઃ તાપિતો ભિદ્યતેઽશ્મા ॥ ॥

૫૩।૧૧૬અ આર્કં પયો હુડુવિષાણમષીસમેતં
૫૩।૧૧૬બ્ પારાવતાખુશકૃતા ચ યુતઃ પ્રલેપઃ ।
૫૩।૧૧૬ચ્ ટંકસ્ય તૈલમથિતસ્ય તતોઽસ્ય પાનં
૫૩।૧૧૬દ્ પશ્ચાત્શિતસ્ય ન શિલાસુ ભવેદ્ વિઘાતઃ ॥ ॥

૫૩।૧૧૭અ ક્ષારે કદલ્યા મથિતેન યુક્તે (યક્તે)
૫૩।૧૧૭બ્ દિનોષિતે પાયિતમાયસં યત્ ।
૫૩।૧૧૭ચ્ સમ્યક્ શિતં (છિતં) ચાશ્મનિ નૈતિ ભંગં
૫૩।૧૧૭દ્ ન ચાન્યલોહેષ્વપિ તસ્ય કૌણ્ઠ્યમ્ ॥ ॥

૫૩।૧૧૮અ પાલી પ્રાગપરાયતાંબુ સુચિરં ધત્તે ન યામ્યોત્તરા
૫૩।૧૧૮બ્ કલ્લોલૈઃ અવદારમેતિ મરુતા સા પ્રાયશઃ પ્રેરિતૈઃ ।
૫૩।૧૧૮ચ્ તાં ચેદિચ્છતિ સારદારુભિઃ અપાં સમ્પાતમાવારયેત્ ।
૫૩।૧૧૮દ્ પાષાણાદિભિઃ એવ વા પ્રતિચયં ક્ષુણ્ણં (ક્ષુન્નં) દ્વિપાશ્વાદિભિઃ ॥ ॥

૫૩।૧૧૯અબ્/ કકુભવટામ્રપ્લક્ષકદંબૈઃ સનિચુલજંબૂવેતસનીપૈઃ ।

૫૩।૧૧૯ય્દ્/ કુરબક (કુરવાક) તાલાશોકમધૂકૈઃ બકુલવિમિશ્રૈશ્ચાવૃએતતીરામ્ ॥ ॥

૫૩।૧૨૦અ દ્વારં ચ નૈર્વાહિકમેકદેશે
૫૩।૧૨૦બ્ કાર્યં શિલાસંચિતવારિમાર્ગમ્ ।
૫૩।૧૨૦ય્ કોશસ્થિતં નિર્વિવરં કપાટં
૫૩।૧૨૦દ્ કૃત્વા તતઃ પાંશુભિઃ આવપેત્ તમ્ ॥ ॥

૫૩।૧૨૧અબ્/ અઞ્જનમુસ્તૌશીરૈઃ સરાજકોશાતકામલકચૂર્ણૈઃ ।
૫૩।૧૨૧ય્દ્/ કતકફલસમાયુક્તૈઃ યોગઃ કૂપે પ્રદાતવ્યઃ ॥ ॥

૫૩।૧૨૨અ કલુષં કટકં (કતુકં) લવણં વિરસં
૫૩।૧૨૨બ્ સલિલં યદિ વા શુભગન્ધિ ભવેત્ ।
૫૩।૧૨૨ય્ તદનેન ભવત્યમલં સુરસં
૫૩।૧૨૨દ્ સુસુગન્ધિ ગુણૈઃ અપરૈશ્ચ યુતમ્ ॥ ॥

૫૩।૧૨૩અબ્/ હસ્તો મઘાનુરાધાપુષ્યધનિષ્ઠૌત્તરાણિ રોહિણ્યઃ ।
૫૩।૧૨૩ય્દ્/ શતભિષગ્ ઇત્યારંભે કૂપાનાં શસ્યતે ભગણઃ ॥ ॥

૫૩।૧૨૪અબ્/ કૃત્વા વરુણસ્ય બલિં વટવેતસકીલકં શિરાસ્થાને ।
૫૩।૧૨૪ય્દ્/ કુસુમૈઃ ગન્ધૈઃ ધૂપૈઃ સમ્પૂજ્ય નિધાપયેત્ પ્રથમમ્ ॥ ॥

/Eણ્(૫૪।૧૨૫અબ્/ મેઘોદ્ભવં પ્રથમમેવ મયા પ્રદિષ્ટં જ્યેષ્ઠામતીત્ય બલદેવમતાદિ દૃષ્ટ્વા ।
૫૪।૧૨૫ય્દ્/ ભૌમં દગાર્ગલમિદં કથિતં દ્વિતીયં સમ્યગ્વરાહમિહિરેણ મુનિપ્રસાદાત્ ॥ ॥)
sએપરતે અધ્યાય ૫૪ વૃક્ષાયુર્વેદાધ્યાયઃ
૫૪।૧અબ્/ પ્રાન્તચ્છાયાવિનિર્મુક્તા ન મનોજ્ઞા જલાશયાઃ ।
૫૪।૧ય્દ્/ યસ્માદતો જલપ્રાન્તેષ્વારામાન્ વિનિવેશયેત્ ॥ ॥

૫૪।૨અબ્/ મૃદ્વી ભૂઃ સર્વવૃક્ષાણાં હિતા તસ્યામ્ તિલાન્ વપેત્ ।
૫૪।૨ય્દ્/ પુષ્પિતાં તાંશ્ચ મૃદ્નીયાત્ (ગૃહ્ણીયાત્) કર્મએતત્ પ્રથમં ભુવઃ (ભુવિ) ॥ ॥

૫૪।૩અબ્/ અરિષ્ટાશોકપુન્નાગશિરીષાઃ સપ્રિયંગવઃ ।
૫૪।૩ય્દ્/ મંગલ્યાઃ પૂર્વમારામે રોપણીયા ગૃહેષુ વા ॥ ॥

૫૪।૪અબ્/ પનસાશોકકદલીજંબૂલકુચદાડિમાઃ ।
૫૪।૪ય્દ્/ દ્રાક્ષાપાલીવતાશ્ચએવ બીજપૂરાતિમુક્તકાઃ ॥ ॥

૫૪।૫અબ્/ એતે દ્રુમાઃ કાણ્ડરોપ્યા (કાણ્ડારોપ્યા) ગોમયેન પ્રલેપિતાઃ ।
૫૪।૫ય્દ્/ મૂલોચ્છેદેઽથવા સ્કન્ધે રોપણીયાઃ પરં તતઃ (પ્રયત્નતઃ) ॥ ॥

૫૪।૬અબ્/ અજાતશાખાન્ શિશિરે જાતશાખાન્ હિમાગમે ।
૫૪।૬च्द्/ વર્ષાગમે ચ સુસ્કન્ધાન્ યથાદિક્સ્થાન્ પ્રરોપયેત્ (યથાદિક્ પ્રતિરોપયેત્) ॥ ॥

૫૪।૭અબ્/ ઘૃતૌશીરતિલક્ષૌદ્રવિડંગક્ષીરગોમયૈઃ ।
૫૪।૭च्द्/ આમૂલસ્કન્ધલિપ્તાનાં સંક્રામણવિરોપણમ્ ॥ ॥

૫૪।૮અબ્/ શુચિઃ ભૂત્વા તરોઃ પૂજાં કૃત્વા સ્નાનાનુલેપનૈઃ ।
૫૪।૮च्द्/ રોપયેદ્ રોપિતશ્ચૈવ પત્રૈઃ તૈઃ એવ જાયતે ॥ ॥

૫૪।૯અબ્/ સાયં પ્રાતશ્ચ ઘર્મઋતૌ (ઘર્માન્તે) શીતકાલે દિનાન્તરે ।
૫૪।૯च्द्/ વર્ષાસુ ચ ભુવઃ શોષે સેક્તવ્યા રોપિતા દ્રુમાઃ ॥ ॥

૫૪।૧૦અબ્/ જંબૂવેતસવાનીરકદંબૌદુંબરાર્જુનાઃ ।
૫૪।૧૦च्द्/ બીજપૂરકમૃદ્વીકાલકુચાશ્ચ સદાડિમાઃ ॥ ॥

૫૪।૧૧અબ્/ વઞ્જુલો નક્તમાલશ્ચ તિલકઃ પનસઃ તથા ।
૫૪।૧૧च्द्/ તિમિરોઽમ્રાતકશ્ચેતિ (ચૈવ) ષોડશાનૂપજાઃ સ્મૃતાઃ ॥ ॥

૫૪।૧૨અબ્/ ઉત્તમં વિંશતિઃ હસ્તા મધ્યમં ષોડશાન્તરમ્ ।
૫૪।૧૨च्द्/ સ્થાનાત્ સ્થાનાન્તરં કાર્યં વૃક્ષાણાં દ્વાદશાવરમ્ ॥ ॥

૫૪।૧૩અબ્/ અભ્યાસજાતાઃ તરવઃ સંસ્પૃશન્તઃ પરસ્પરમ્ ।
૫૪।૧૩च्द्/ મિશ્રૈઃ મૂલૈશ્ચ ન ફલં સમ્યગ્ યચ્છન્તિ પીડિતાઃ ॥ ॥

૫૪।૧૪અબ્/ શીતવાતાતપૈ રોગો જાયતે પાણ્ડુપત્રતા ।
૫૪।૧૪च्द्/ અવૃદ્ધિશ્ચ પ્રવાલાનાં શાખાશોષો રસસ્રુતિઃ ॥ ॥

૫૪।૧૫અબ્/ ચિકિત્સિતમથએતેષાં શસ્ત્રેણાદૌ વિશોધનમ્ ।
૫૪।૧૫च्द्/ વિડંગઘૃતપંકાતાન્ સેચયેત્ ક્ષીરવારિણા ॥ ॥

૫૪।૧૬અબ્/ ફલનાશે કુલત્થૈશ્ચ માષૈઃ મુદ્ગૈઃ તિલૈઃ યવૈઃ ।
૫૪।૧૬च्द्/ શ◌ૃતશીતપયઃસેકઃ ફલપુષ્પસમૃદ્ધયે (અભિવૃદ્ધયે) ॥ ॥

૫૪।૧૭અબ્/ અવિકાજશકૃચ્ચૂર્ણસ્યાઢકે દ્વે તિલાઢકમ્ ।
૫૪।૧૭च्द्/ સક્તુપ્રસ્થો જલદ્રોણો ગોમાંસતુલયા સહ ॥ ॥

૫૪।૧૮અબ્/ સપ્તરાત્રોષિતૈઃ એતૈઃ સેકઃ કાર્યો વનસ્પતેઃ ।
૫૪।૧૮च्द्/ વલ્મીગુલ્મલતાનાં ચ ફલપુષ્પાય સર્વદા ॥ ॥

૫૪।૧૯અ વાસરાણિ દશ દુગ્ધભાવિતં
૫૪।૧૯બ્ બીજમાજ્યયુતહસ્તયોજિતમ્ ।

પ૪।૧૯ચ્ ગોમયેન બહુશો વિરૂક્ષિતં
પ૪।૧૯દ્ ક્રૌડમાર્ગપિશિતૈશ્ચ ધૂપિતમ્ ॥ ॥

પ૪।૨૦અબ્/ માંસ (મત્સ્ય) સૂકરવસાસમન્વિતં રોપિતં ચ પરિકર્મિતાવનૌ ।
પ૪।૨૦ચ્દ્/ ક્ષીરસંયુતજલાવસેચિતં જાયતે કુસુમયુક્તમેવ તત્ ॥ ॥

પ૪।૨૧અબ્/ તિન્તિડીત્યપિ કરોતિ વલ્લરીં વ્રીહિમાષતિલચૂર્ણસક્તુભિઃ ।
પ૪।૨૧ચ્દ્/ પૂતિમાંસસહિતૈશ્ચ સેચિતા ધૂપિતા ચ સતતં હરિદ્રયા ॥ ॥

પ૪।૨૨અ કપિત્થવલ્લીકરણાય મૂલાન્ય્-
પ૪।૨૨બ્ આસ્ફોતધાત્રીધવવાસિકાનામ્ ।
પ૪।૨૨ચ્ પલાશિની વેતસસૂર્યબલ્લી (વલ્લી)
પ૪।૨૨દ્ શ્યામાતિમુક્તૈઃ સહિતાષ્ટમૂલી ॥ ॥

પ૪।૨૩અ ક્ષારે શ‍ૃતે ચાપ્યનયા સુશીતે
પ૪।૨૩બ્ તાલા (નાલા) શતં સ્થાપ્ય કપિત્થબીજમ્ ।
પ૪।૨૩ચ્ દિને દિને શોષિતમર્કપાદૈઃ
પ૪।૨૩દ્ માસં વિધિઃ ત્વેષ તતોઽધિરોપ્યમ્ ॥ ॥

પ૪।૨૪અ હસ્તાયતં તદ્દ્વિગુણં ગભીરં
પ૪।૨૪બ્ ખાત્વાવટં પ્રોક્તજલાવપૂર્ણમ્ ।
પ૪।૨૪ચ્ શુષ્કં પ્રદગ્ધં મધુસર્પિષા તત્
પ૪।૨૪દ્ પ્રલેપયેદ્ ભસ્મસમન્વિતન (સમન્વિતેન) ॥ ॥

પ૪।૨૫અ ચૂર્ણીકૃતૈઃ માષતિલૈઃ યવૈશ્ચ
પ૪।૨૫બ્ પ્રપૂરયેદ્ મૃત્તિકયાન્તરસ્થૈઃ ।
પ૪।૨૫ચ્ મત્સ્યામિષાંભઃ (અંભઃ) સહિતં ચ હન્યાદ્
પ૪।૨૫દ્ યાવદ્ ઘનત્વં સમુપાગતં તત્ ॥ ॥

પ૪।૨૬અ ઉપ્તં ચ બીજં ચતુરંગુલાધો
પ૪।૨૬બ્ મત્સ્યાંભસા માંસજલૈશ્ચ સિક્તમ્ ।
પ૪।૨૬ચ્ વલ્લી ભવત્યાશુ શુભપ્રવાલા
પ૪।૨૬દ્ વિસ્માપની મણ્ડપમાવૃણોતિ ॥ ॥

પ૪।૨૭અબ્/ શતશો અંકોલ (અગ‍્ક‍્કોલ્લ) સંભૂતફલકલ્કેન ભાવિતમ્ ।
પ૪।૨૭ચ્દ્/ એતત્ તૈલેન વા બીજં શ્લૈષ્માતક (શ્લેષ્માતક) ફેન વા ॥ ॥

પ૪।૨૮અબ્/ વાપિતં કરકૌન્મિશ્રમૃદિ તત્ક્ષણજન્મકમ્ ।

૫૪।૨૮ચ્દ્/ ફલભારાન્વિતા શાખા ભવતીતિ કિમદ્ભુતમ્ ॥ ॥

૫૪।૨૯અબ્/ શ્લેષ્માતકસ્ય બીજાનિ નિષ્કુલીકૃત્ય ભાવયેત્ પ્રાજ્ઞઃ ।
૫૪।૨૯ચ્દ્/ અંકોલ (અગ઼્કોલ્લ) વિજ્જલાદ્ભિશ્છાયાયાં સપ્તકૃત્વા (સપ્તકૃત્વ્)એવમ્ ॥ ॥

૫૪।૩૦અબ્/ માહિષગોમયઘૃષ્ટાનિ અસ્ય કરીષે ચ તાનિ નિક્ષિપ્ય ।
૫૪।૩૦ચ્દ્/ કરકાજલમૃદ્યોગે ન્યુપ્તાનિ અહ્ના ફલકરાણિ ॥ ॥

૫૪।૩૧અબ્/ ધ્રુવમૃદુમૂલવિશાખા ગુરુભં શ્રવણઃ તથાશ્વિની હસ્તઃ (હસ્તં) ।
૫૪।૩૧ચ્દ્/ ઉક્તાનિ દિવ્યદૃગ્ભિઃ પાદપસંરોપણે ભાનિ ॥ ॥

sએપરતે અધ્યાય ૫૫ પ્રાસાદલક્ષણાધ્યાયઃ
૫૫।૧અબ્/ કૃત્વા પ્રભૂતં સલિલમારામાન્ વિનિવેશ્ય ચ ।
૫૫।૧ચ્દ્/ દેવતાયતનં કુર્યાદ્ યશોધર્માભિવૃદ્ધયે ॥ ॥

૫૫।૨અબ્/ ઇષ્ટાપૂર્તેન લભ્યન્તે યે લોકાઃ તાન્ બુભૂષતા ।
૫૫।૨ચ્દ્/ દેવાનામાલયઃ કાર્યો દ્વયમપિ અત્ર દૃશ્યતે ॥ ॥

૫૫।૩અબ્/ સલિલોદ્યાનયુક્તેષુ કૃતેષ્વકૃતેષુ ચ ।
૫૫।૩ચ્દ્/ સ્થાનેષ્વેતેષુ સાન્નિધ્યમુપગચ્છન્તિ દેવતાઃ ॥ ॥

૫૫।૪અબ્/ સરઃસુ નલિનીછત્રનિરસ્તરવિરશ્મિષુ ।
૫૫।૪ચ્દ્/ હંસાંસાક્ષિપ્તકહ્લારવીથી (વીચી, વીથી) વિમલવારિષુ ॥ ॥

૫૫।૫અબ્/ હંસકારણ્ડવક્રૌંચચક્રવાકવિરાવિષુ ।
૫૫।૫ચ્દ્/ પર્યન્તનિચુલચ્છાયાવિશ્રાન્તજલચારિષુ ॥ ॥

૫૫।૬અબ્/ ક્રૌંચકાંચીકલાપાશ્ચ કલહંસકલસ્વરાઃ (સ્વનાઃ) ।
૫૫।૬ચ્દ્/ નદ્યઃ તોયાંશુકા યત્ર શફરીકૃતમેખલાઃ ॥ ॥

૫૫।૭અબ્/ ફુલ્લતીરદ્રુમોત્તંસાઃ સંગમશ્રોણિમણ્ડલાઃ ।
૫૫।૭ચ્દ્/ પુલિનાભ્યુન્નતોરસ્યા હંસવાસાઃ (હંસહાસાઃ) ચ નિમ્નગાઃ ॥ ॥

૫૫।૮અબ્/ વનોપાન્તનદીશૈલનિર્ઝરોપાન્તભૂમિષુ ।
૫૫।૮ચ્દ્/ રમન્તે દેવતા નિત્યં પુરેષૂદ્યાનવત્સુ ચ ॥ ॥

૫૫।૯અબ્/ ભૂમયો બ્રાહ્મણાદીનાં યાઃ પ્રોક્તા વાસ્તુકર્મણિ ।
૫૫।૯ચ્દ્/ તા એવ તેષાં શસ્યન્તે દેવતાયતનેષ્વપિ ॥ ॥

૫૫।૧૦અબ્/ ચતુઃષષ્ટિપદં કાર્યં દેવતાયતનં સદા ।
૫૫।૧૦ચ્દ્/ દ્વારં ચ મધ્યમં તસ્મિન્ (તત્ર) સમદિક્સ્થં પ્રશસ્યતે ॥ ॥

૫૫।૧૧અબ્/ યો વિસ્તારો ભવેદ્ યસ્ય દ્વિગુણા તત્સમુન્નતિઃ ।
૫૫।૧૧ચ્દ્/ ઉચ્છ્રાયાદ્ યઃ તૃતીયાંશઃ તેન તુલ્યા કટિઃ સ્મૃતા (કટિઃ ભવેત્) ॥ ॥

૫૫।૧૨અબ્/ વિસ્તારાર્ધં ભવેદ્ ગર્ભો ભિત્તયોઽન્યાઃ સમન્તતઃ ।
૫૫।૧૨ચ્દ્/ ગર્ભપાદેન વિસ્તીર્ણં દ્વારં દ્વિગુણમુચ્છ્રિતમ્ ॥ ॥

૫૫।૧૩અબ્/ ઉચ્છ્રાયાત્ પાદવિસ્તીર્ણા શાખા તદ્વદુદુંબરઃ ।
૫૫।૧૩ચ્દ્/ વિસ્તારપાદપ્રતિમં બાહુલ્યં શાખયોઃ સ્મૃતમ્ ॥ ॥

૫૫।૧૪અબ્/ ત્રિપંચસપ્તનવભિઃ શાખાભિઃ તત્ પ્રશસ્યતે ।
૫૫।૧૪ચ્દ્/ અધઃ શાખાચતુર્ભાગે પ્રતીહારૌ નિવેશયેત્ ॥ ॥

૫૫।૧૫અબ્/ શેષં મંગલ્યવિહગૈઃ શ્રીવૃક્ષૈઃ સ્વસ્તિકૈઃ (શ્રીવૃક્ષસ્વસ્તિકૈઃ) ઘટૈઃ ।
૫૫।૧૫ચ્દ્/ મિથુનૈઃ પત્રવલ્લીભિઃ પ્રમથૈશ્ચોપશોભયેત્ ॥ ॥

૫૫।૧૬અબ્/ દ્વારમાનાષ્ટભાગોના પ્રતિમા સ્યાત્ સપિણ્ડિકા ।
૫૫।૧૬ચ્દ્/ દ્વૌ ભાગૌ પ્રતિમા તત્ર તૃતીયાંશશ્ચ પિણ્ડિકા ॥ ॥

૫૫।૧૭અબ્/ મેરુમન્દરકૈલાસવિમાનચ્છન્દનન્દનાઃ ।
૫૫।૧૭ચ્દ્/ સમુદ્ગપદ્મગરુડનન્દિવર્ધનકુઞ્જરાઃ ॥ ॥

૫૫।૧૮અબ્/ ગુહરાજો વૃષો હંસઃ સર્વતોભદ્રકો ઘટઃ ।
૫૫।૧૮ચ્દ્/ સિંહો વૃત્તશ્ચતુષ્કોણઃ ષોડશાષ્ટાશ્રયઃ તથા ॥ ॥

૫૫।૧૯અબ્/ ઇત્યેતે વિંશતિઃ પ્રોક્તાઃ પ્રાસાદાઃ સંજ્ઞયા મયા ।
૫૫।૧૯ચ્દ્/ યથોક્તાનુક્રમેણૈવ લક્ષણાનિ વદામ્યતઃ ॥ ॥

૫૫।૨૦અબ્/ તત્ર ષડશ્રિઃ મેરુઃ દ્વાદશભૌમો વિચિત્રકુહરશ્ચ ।
૫૫।૨૦ચ્દ્/ દ્વારૈઃ યુતશ્ચતુર્ભિઃ દ્વાત્રિંશદ્ધસ્તવિસ્તીર્ણઃ ॥ ॥

૫૫।૨૧અબ્/ ત્રિંશદ્ધસ્તાયામો દશભૌમો મન્દરઃ શિખરયુક્તઃ ।
૫૫।૨૧ચ્દ્/ કૈલાસોઽપિ શિખરવાન્ અષ્ટાવિંશોઽષ્ટભૌમશ્ચ ॥ ॥

૫૫।૨૨અબ્/ જાલગવાક્ષકયુક્તો વિમાનસંજ્ઞઃ ત્રિસપ્તકાયામઃ ।
૫૫।૨૨ચ્દ્/ નન્દન ઇતિ ષડ્ભૌમો દ્વાત્રિંશઃ ષોડશાણ્ડયુક્તઃ ॥ ॥

૫૫।૨૩અબ્/ વૃત્તઃ સમુદ્ગનામા પદ્મઃ પદ્માકૃતિઃ શયા અષ્ટૌ (શયાનાષ્ટૌ) ।
૫૫।૨૩ચ્દ્/ શ◌ૃંગેણૈકેન ભવેદેકૈવ ચ ભૂમિકા તસ્ય ॥ ॥

૫૫।૨૪અબ્/ ગરુડાકૃતિશ્ચ ગરુડો નન્દીતિ ચ ષટ્ચતુષ્કવિસ્તીર્ણઃ ।

૫૫।૨૪ય્દ્/ કાર્યઃ તુ (ચ) સપ્તભૌમો વિભૂષિતોઽણ્ડૈઃ તુ (ચ) વિંશત્યા ॥ ॥

૫૫।૨૫અબ્/ કુઞ્જર ઇતિ ગજપૃષ્ઠઃ ષોડશહસ્તઃ સમન્તતો મૂલાત્ ।
૫૫।૨૫ય્દ્/ ગુહરાજઃ ષોડશકઃ ત્રિચન્દ્રશાલા ભવેદ્ વલભી ॥ ॥

૫૫।૨૬અબ્/ વૃષ એકભૂમિશ ૃંગો દ્વાદશહસ્તઃ સમન્તતો વૃત્તઃ ।
૫૫।૨૬ય્દ્/ હંસો હંસાકારો ઘટોઽષ્ટહસ્તઃ કલશરૂપઃ ॥ ॥

૫૫।૨૭અબ્/ દ્વારૈઃ યુતશ્ચતુર્ભિઃ બહુશિખરો ભવતિ સર્વતોભદ્રઃ ।
૫૫।૨૭ય્દ્/ બહુરુચિરચન્દ્રશાલઃ ષડ્વિંશઃ પંચભૌમશ્ચ ॥ ॥

૫૫।૨૮અબ્/ સિંહઃ સિંહાક્રાન્તો દ્વાદશકોણોઽષ્ટહસ્તવિસ્તીર્ણઃ ।
૫૫।૨૮ય્દ્/ ચત્વારોઽઞ્જનરૂપાઃ પંચાણ્ડયુતઃ તુ ચતુરસ્રઃ (ચતુરશ્રઃ) ॥ ॥

૫૫।૨૯અબ્/ ભૂમિકાંગુલમાનેન મયસ્યાષ્ટોત્તરં શતમ્ ।
૫૫।૨૯ય્દ્/ સાર્ધં હસ્તત્રયં ચૈવ કથિતં વિશ્વકર્મણા ॥ ॥

૫૫।૩૦અબ્/ પ્રાહુઃ સ્થપતયશ્ચાત્ર મતમેકં વિપશ્ચિતઃ ।
૫૫।૩૦ય્દ્/ કપોતપાલિસંયુક્તા ન્યૂના ગચ્છન્તિ તુલ્યતામ્ ॥ ॥

૫૫।૩૧અ પ્રાસાદલક્ષણમિદમ્ કથિતં સમાસાદ્
૫૫।૩૧બ્ ગર્ગેણ યદ્ વિરચિતં તદિહાસ્તિ સર્વમ્ ।
૫૫।૩૧ચ્ મનુઆદિભિઃ વિરચિતાનિ પૃથૂનિ યાનિ
૫૫।૩૧દ્ તત્સંસ્પૃશન્ (તત્સસ્મૃતિં) પ્રતિ મયાત્ર કૃતોઽધિકારઃ ॥ ॥

ऽએપરતે અધ્યાય ૫૬ વજ્રલેપલક્ષણાધ્યાયઃ
૫૬।૧અબ્/ આમં તિન્દુકમામં કપિત્થકં પુષ્પમપિ ચ શાલ્મલ્યાઃ ।
૫૬।૧ય્દ્/ બીજાનિ શલ્લકીનાં ધન્વનવલ્કો વચા ચૈતિ ॥ ॥

૫૬।૨અબ્/ એતૈઃ સલિલદ્રોણઃ ક્વાથયિતવ્યોઽષ્ટભાગશેષશ્ચ ।
૫૬।૨ય્દ્/ અવતાર્યોઽસ્ય ચ કલ્કો દ્રવ્યૈઃ એતૈઃ સમનુયોજ્યઃ ॥ ॥

૫૬।૩અબ્/ શ્રીવાસકરસગુગ્ગુલુભલ્લાતકકુન્દુરૂકસર્જરસૈઃ ।
૫૬।૩ય્દ્/ અતસીબિલ્વૈશ્ચ યુતઃ કલ્કોઽયં વજ્રલેપાખ્યઃ ॥ ॥

૫૬।૪અબ્/ પ્રાસાદહર્મ્યવલભીલિંગપ્રતિમાસુ કુડ્યકૂપેષુ ।
૫૬।૪ય્દ્/ સન્તપ્તો દાતવ્યો વર્ષસહસ્રાયુતસ્થાયી ॥ ॥

૫૬।૫અબ્/ લાક્ષાકુન્દુરુગુગ્ગુલુગૃહધૂમકપિત્થબિલ્વમધ્યાનિ ।
૫૬।૫ય્દ્/ નાગફલનિંબ (બલાફલ) તિન્દુકમદનફલમધૂકમઞ્જિષ્ઠાઃ ॥ ॥

૫૬।૬અબ્/ સર્જરસરસામલકાનિ ચૈતિ કલ્કઃ કૃતો દ્વિતીયોઽયમ્ ।
૫૬।૬ચ્દ્/ વજ્રાખ્યઃ પ્રથમગુણૈઃ અયમપિ તેષ્વેવ કાર્યેષુ ॥ ॥

૫૬।૭અબ્/ ગોમહિષાજવિષાણૈઃ ખરરોમ્ણા મહિષચર્મગવ્યૈશ્ચ ।
૫૬।૭ચ્દ્/ નિંબકપિત્થરસૈઃ સહ વજ્રતલો (વજ્રતરો) નામ કલ્કોઽન્યઃ ॥ ॥

૫૬।૮અબ્/ અષ્ટૌ સીસકભાગાઃ કાંસસ્ય દ્વૌ તુ રીતિકાભાગઃ ।
૫૬।૮ચ્દ્/ મયકથિતો યોગોઽયં વિજ્ઞેયો વજ્રસંઘાતઃ ॥ ॥

sએપરતે અધ્યાય ૫૭ પ્રતિમાલક્ષણાધ્યાયઃ ।
૫૭।૧અબ્/ જાલાન્તરગે ભાનૌ યદણુતરં દર્શનં રજો યાતિ ।
૫૭।૧ચ્દ્/ તદ્ વિન્દ્યાત્ પરમાણું પ્રથમં તદ્ધિ પ્રમાણાનામ્ ॥ ॥

૫૭।૨અબ્/ પરમાણુરજો બાલાગ્ર (વાલાગ્ર) લિક્ષયૂકં (યૂકા) યવો અંગુલં ચૈતિ ।
૫૭।૨ચ્દ્/ અષ્ટગુણાનિ યથોત્તરમંગુલમેકં ભવતિ સંખ્યા (માત્રા) ॥ ॥

૫૭।૩અબ્/ દેવાગારદ્વારસ્યાષ્ટાંશોનસ્ય યઃ તૃતીયોઽંશઃ ।
૫૭।૩ચ્દ્/ તત્પિણ્ડિકાપ્રમાણં પ્રતિમા તદ્દ્વિગુણપરિમાણા ॥ ॥

૫૭।૪અબ્/ સ્વૈઃ અંગુલપ્રમાણૈઃ દ્વાદશ વીસ્તીર્ણં (વિસ્તીર્ણં) આયતં ચ મુખમ્ ।
૫૭।૪ચ્દ્/ નગ્નજિતા તુ ચતુર્દશ દૈર્ઘ્યેણ દ્રાવિડં કથિતમ્ ॥ ॥

૫૭।૫અબ્/ નાસાલલાટચિબુકગ્રીવાશ્ચતુરાંગુલાઃ તથા કર્ણૌ ।
૫૭।૫ચ્દ્/ દ્વે અંગુલે ચ હનુની (હનુકે) ચિબુકં ચ દ્વ્યંગુલં વિતતં (વિસ્તૃતં) ॥ ॥

૫૭।૬અબ્/ અષ્ટાંગુલં લલાટં વિસ્તારાદ્ દ્વ્યંગુલાત્ પરે શંખૌ ।
૫૭।૬ચ્દ્/ ચતુરંગુલૌ તુ શંખૌ કર્ણૌ તુ દ્વ્યંગુલૌ (દ્વ્યગ્ગુલં) પૃથુલૌ ॥ ॥

૫૭।૭અબ્/ કર્ણોપાન્તઃ કાર્યોઽર્ધપંચમે ભ્રૂસમેન સૂત્રેણ ।
૫૭।૭ચ્દ્/ કર્ણસ્રોતઃ સુકુમારકમ્ ચ નેત્ર (નયન) પ્રબન્ધસમમ્ ॥ ॥

૫૭।૮અબ્/ ચતુરંગુલં વસિષ્ઠઃ કથયતિ નેત્રાન્તકર્ણયોઃ વિવરમ્ ।
૫૭।૮ચ્દ્/ અધરો અંગુલપ્રમાણઃ તસ્યાર્ધેનોત્ત્રોષ્ઠશ્ચ ॥ ॥

૫૭।૯અબ્/ અર્ધાંગુલા તુ ગોચ્છા વક્ત્રં ચતુરંગુલાયતં કાર્યમ્ ।
૫૭।૯ચ્દ્/ વિપુલં તુ સાર્ધમંગુલમ્ અવ્યાત્તં ત્ર્યંગુલં (અધ્યાત્તત્ર્યગ્ગુલં) વ્યાત્તમ્ ॥ ॥

૫૭।૧૦અબ્/ દ્વ્યંગુલતુલ્યૌ નાસાપુટૌ ચ નાસા પુટાગ્રતો જ્ઞેયા ।
૫૭।૧૦ચ્દ્/ સ્યાદ્ દ્વ્યંગુલમુચ્છ્રાયશ્ચતુરંગુલમન્તરં ચાક્ષ્ણોઃ ॥ ॥

૫૭।૧૧અબ્/ દ્વ્યંગુલમિતોઽક્ષિકોશો દ્વે નેત્રે તત્ત્રિભાગિકા તારા ।

૫૭।૧૧ય્દ્/ દૃક્તારા પંચાંશો નેત્રવિકાશો અંગુલં ભવતિ ॥ ॥

૫૭।૧૨અબ્/ પર્યન્તાત્ પર્યન્તં દશ ભ્રુવોઽર્ધાંગુલં ભ્રુવોઃ લેખા ।
૫૭।૧૨ય્દ્/ ભ્રૂમધ્યં દ્વ્યંગુલકં ભ્રૂઃ ધૈર્ધ્યેણાંગુલચતુષ્કમ્ ॥ ॥

૫૭।૧૩અબ્/ કાર્યા તુ કેશરેખા ભ્રૂબન્ધસમાંગુલાર્ધવિસ્તીર્ણા ।
૫૭।૧૩ય્દ્/ નેત્રાન્તે કરવીરકમુપન્યસેદનુગુલપ્રમિતમ્ ॥ ॥

૫૭।૧૪અબ્/ દ્વાત્રિંશત્ પરિણાહાગતુર્દશાયામતો અંગુલાનિ શિરઃ ।
૫૭।૧૪ય્દ્/ દ્વાદશ તુ ચિત્રકર્મણિ દૃશ્યન્તે વિંશતિઃ અદૃશ્યાઃ ॥ ॥

૫૭।૧૫અબ્/ આસ્યં સકેશનિચયં ષોડશ દૈર્ધ્યેણ નગ્નિજિત્ (નગ્નજિત્) પ્રોક્તમ્ ।
૫૭।૧૫ય્દ્/ ગ્રીવા દશ વિસ્તીર્ણા પરિણાહાદ્ વિંશતિઃ સૈકા ॥ ॥

૫૭।૧૬અબ્/ કણ્ઠાદ્ દ્વાદશ હૃદયં હૃદયાન્ નાભી (નાભિઃ) ચ તત્પ્રમાણેન ।
૫૭।૧૬ય્દ્/ નાભીમધ્યાદ્ મેઢ્રાન્તરં ચ તત્તુલ્યમેવોક્તમ્ ॥ ॥

૫૭।૧૭અબ્/ ઊરૂ ચાંગુલમાનૈશ્ચતુર્યુતા વિંશતિઃ તથા જંઘે ।
૫૭।૧૭ય્દ્/ જાનુકપિચ્છે ચતુરંગુલે ચ પાદૌ ચ તત્તુલ્યૌ ॥ ॥

૫૭।૧૮અબ્/ દ્વાદશદીર્ઘૌ ષટ્ પૃથુતયા ચ પાદૌ ત્રિકાયતાંગુષ્ઠૌ ।
૫૭।૧૮ય્દ્/ પંચાંગુલપરિણાહૌ પ્રદેશિની ત્ર્યંગુલં દીર્ઘા ॥ ॥

૫૭।૧૯અબ્/ અષ્ટાનંશાંશોનાઃ શેષાંગુલ્યઃ (શેષાઙ્ગુલયઃ) ક્રમેણ કર્તવ્યાઃ ।
૫૭।૧૯ય્દ્/ સચતુર્થભાગમંગુલમુત્સેધો અંગુષ્ઠકસ્યૌક્તઃ ॥ ॥

૫૭।૨૦અબ્/ અંગુષ્ઠનખઃ કથિતઃ ચતુર્થભાગોનમંગુલં તજ્ઞૈઃ ।
૫૭।૨૦ય્દ્/ શેષનખાનામર્ધાંગુલં ક્રમાત્ કિંચિદૂનં વા ॥ ॥

૫૭।૨૧અબ્/ જંઘાગ્રે પરિણાહશ્ચતુર્દશોક્તઃ તુ વિસ્તરાત્ (વિસ્તરઃ) પંચ ।
૫૭।૨૧ય્દ્/ મધ્યે તુ સપ્ત વિપુલા પરિણાહાત્ ત્રિગુણિતાઃ સપ્ત ॥ ॥

૫૭।૨૨અબ્/ અષ્ટૌ તુ જાનુમધ્યે વૈપુલ્યં ત્ર્યષ્ટકં તુ પરિણાહઃ ।
૫૭।૨૨ય્દ્/ વિપુલૌ ચતુર્દશ ઊરૂ મધ્યે દ્વિગુણશ્ચ તત્પરિધિઃ ॥ ॥

૫૭।૨૩અબ્/ કટિઃ અષ્ટાદશ વિપુલા ચત્વારિંશગતુર્યુતા પરિધૌ ।
૫૭।૨૩ય્દ્/ અંગુલમેકં નાભી (નાભિઃ) વેધેન તથા પ્રમાણેન ॥ ॥

૫૭।૨૪અબ્/ ચત્વારિંશદ્વિયુતા નાભીમધ્યેન મધ્યપરિણાહઃ ।
૫૭।૨૪ય્દ્/ સ્તનયોઃ ષોડશ ચાન્તરમૂર્ધ્વં કક્ષ્યે (કક્ષે) ષડંગુલિકે ॥ ॥

૫૭।૨૫અબ્/ અષ્ટાવંસૌ દ્વાદશ બાહૂ કાર્યૌ (કાર્યાવષ્ટાવંસૌ દ્વાદશ બાહૂ) તથા પ્રબાહૂ ચ ।
૫૭।૨૫ય્દ્/ બાહૂ ષડ્વિસ્તીર્ણૌ (ષડ્વિસ્તિર્ણૌ) પ્રતિબાહૂ ત્વંગુલચતુષ્કમ્ ॥ ॥

૫૭।૨૬અબ્/ ષોડશ બાહૂ મૂલે પરિણાહાદ્ દ્વાદશાગ્રહસ્તે ચ ।
૫૭।૨૬ય્દ્/ વિસ્તારેણ કરતલં ષડંગુલં સપ્ત દૈર્ઘ્યેણ ॥ ॥

૫૭।૨૭અબ્/ પંચાંગુલાનિ મધ્યા પ્રદેશિની મધ્યપર્વદલહીના ।
૫૭।૨૭ય્દ્/ અનયા તુલ્યા ચાનામિકા કનિષ્ઠા તુ પર્વોના ॥ ॥

૫૭।૨૮અબ્/ પર્વદ્વયમંગુષ્ઠઃ શેષાંગુલ્યઃ (શેષાગ્ગુલયઃ) ત્રિભિઃ ત્રિભિઃ કાર્યાઃ ।
૫૭।૨૮ય્દ્/ નખપરિમાણં કાર્યં સર્વાસામ્ પર્વણોઽર્ધેન ॥ ॥

૫૭।૨૯અબ્/ દેશાનુરૂપભૂષણવેષાલંકારમૂર્તિભિઃ કાર્યા ।
૫૭।૨૯ય્દ્/ પ્રતિમા લક્ષણયુક્તા સન્નિહિતા વૃદ્ધિદા ભવતિ ॥ ॥

૫૭।૩૦અબ્/ દશરથતનયો રામો બલિશ્ચ વૈરોચનિઃ શતં વિંશમ્ ।
૫૭।૩૦ય્દ્/ દ્વાદશહાન્યા શેષાઃ પ્રવરસમન્યૂનપરિમાણાઃ ॥ ॥

(વિષ્ણુ)

૫૭।૩૧અબ્/ કાર્યોઽષ્ટભુજો ભગવાંશ્ચતુર્ભુજો દ્વિભુજ એવ વા વિષ્ણુઃ ।
૫૭।૩૧ય્દ્/ શ્રીવત્સાંકિતવક્ષાઃ કૌસ્તુભમણિભૂષિતોરસ્કઃ ॥ ॥

૫૭।૩૨અબ્/ અતસીકુસુમશ્યામઃ પીતાંબરનિવસનઃ પ્રસન્નમુખઃ ।
૫૭।૩૨ય્દ્/ કુણ્ડલકિરીટધારી પીનગલૌરઃસ્થલાંસભુજઃ ॥ ॥

૫૭।૩૩અબ્/ ખડ્ગગદાશરપાણિઃ દક્ષિણતઃ શાન્તિદશ્ચતુર્થકરઃ ।
૫૭।૩૩ય્દ્/ વામકરેષુ ચ કાર્મુકખેટકચક્રાણિ શંખશ્ચ ॥ ॥

૫૭।૩૪અબ્/ અથ ચ ચતુર્ભુજમિચ્છતિ શાન્તિદ એકો ગદાધરશ્ચાન્યઃ ।
૫૭।૩૪ય્દ્/ દક્ષિણપાર્શ્વે ત્વ (હિ) એવં વામે શંખશ્ચ ચક્રં ચ ॥ ॥

૫૭।૩૫અબ્/ દ્વિભુજસ્ય તુ શાન્તિકરો દક્ષિણહસ્તોઽપરશ્ચ શંખધરઃ ।
૫૭।૩૫ય્દ્/ એવં વિષ્ણોઃ પ્રતિમા કર્તવ્યા ભૂતિમિચ્છદ્ભિઃ ॥ ॥

(હલધર)

૫૭।૩૬અબ્/ બલદેવો હલપાણિઃ મદવિભ્રમલોચનશ્ચ કર્તવ્યઃ ।
૫૭।૩૬ય્દ્/ વિભ્રત્ (બિભ્રત્) કુણ્ડકમેકં શંખેન્દુમૃણાલગૌરતનુઃ (વપુઃ) ॥ ॥

૫૭।૩૭અબ્/ એકાનંશા કાર્યા દેવી બલદેવકૃષ્ણયોઃ મધ્યે ।
૫૭।૩૭ય્દ્/ કટિસંસ્થિતવામકરા સરોજમિતરેણ ચૌદ્વહતી ॥ ॥

૫૭।૩૮અબ્/ કાર્યા ચતુર્ભુજા યા વામકરાભ્યાં સપુસ્તકં કમલમ્ ।
૫૭।૩૮ચ્દ્/ દ્વાભ્યાં દક્ષિણપાર્શ્વે વરમર્થિષ્વક્ષસૂત્રં ચ ॥ ॥

૫૭।૩૯અબ્/ વામો ઽથવાષ્ટભુજાયાઃ (વામેષ્વષ્ટભુજાયાઃ) કમણ્ડલુશ્ચાપમંબુજં શાસ્ત્રમ્ ।
૫૭।૩૯ચ્દ્/ વરશરદર્પણયુક્તાઃ સવ્યભુજાઃ સાક્ષસૂત્રાશ્ચ ॥ ॥

૫૭।૪૦અબ્/ શાંબશ્ચ ગદાહસ્તઃ પ્રદ્યુમ્નશ્ચાપભૃત્ સુરૂપશ્ચ ।
૫૭।૪૦ચ્દ્/ અનયોઃ સ્ત્રિયૌ ચ કાર્યે ખેટકનિસ્ત્રિંશધારિણ્યૌ ॥ ॥

(બ્રહ્મા અન્દ્ કુમાર)

૫૭।૪૧અબ્/ બ્રહ્મા કમણ્ડલુકરશ્ચતુર્મુખઃ પઙ્કજાસનસ્થશ્ચ ।
૫૭।૪૧ચ્દ્/ સ્કન્દઃ કુમારરૂપઃ શક્તિધરો બર્હિકેતુશ્ચ ॥ ॥

(ઇન્દ્ર)

૫૭।૪૨અબ્/ શુક્લચતુર્વિષાણો દ્વિપો મહેન્દ્રસ્ય વજ્રપાણિત્વમ્ ।
૫૭।૪૨ચ્દ્/ તિર્યગ્ લલાટસંસ્થં તૃતીયમપિ લોચનં ચિહ્નમ્ ॥ ॥

(મહેશ્વર)

૫૭।૪૩અબ્/ શંભોઃ શિરસીન્દુકલા વૃષધ્વજોઽક્ષિ ચ તૃતીયમપિ ચ ઊર્ધ્વમ્ ।
૫૭।૪૩ચ્દ્/ શૂલં ધનુઃ પિનાકં વામાર્ધે વા ગિરિસુતાર્ધમ્ ॥ ॥

(બુધ)

૫૭।૪૪અબ્/ પદ્માંકિતકરચરણઃ પ્રસન્નમૂર્તિઃ સુનીચકેશશ્ચ ।
૫૭।૪૪ચ્દ્/ પદ્માસનૌપવિષ્ટઃ પિતા ઇવ જગતો ભવતિ (ભવેત્) બુદ્ધઃ ॥ ॥

(અર્હત્)

૫૭।૪૫અબ્/ આજાનુલંબબાહુઃ શ્રીવત્સાંકઃ પ્રશાન્તમૂર્તિશ્ચ ।
૫૭।૪૫ચ્દ્/ દિગ્વાસાઃ તરુણો રૂપવાંશ્ચ કાર્યોઽર્હતાં દેવઃ ॥ ॥

(ભાસ્કર)

૫૭।૪૬અબ્/ નાસાલલાટજંઘ ઊરુગણ્ડવક્ષાંસિ ચૌન્નતાનિ રવેઃ ।
૫૭।૪૬ચ્દ્/ કુર્યાદુદીચ્યવેષં ગૂઢં પાદાદુરો યાવત્ ॥ ॥

૫૭।૪૭અબ્/ બિભ્રાણઃ સ્વકરરુહે બાહુભ્યાં (પાણિભ્યાં) પંકજે મુકુટધારી ।
૫૭।૪૭ચ્દ્/ કુણ્ડલભૂષિતવદનઃ પ્રલંબહારો વિયદ્ગ (વિયગ્ગ) વૃતઃ ॥ ॥

૫૭।૪૮ચ્દ્/ કમલૌદરદ્યુતિમુખઃ કંચુકગુમઃ સ્મિતપ્રસન્નમુખઃ ।
૫૭।૪૮ચ્દ્/ રત્નૌજ્જ્વલપ્રભામણ્ડલશ્ચ કર્તુઃ શુભકરોઽર્કઃ ॥ ॥

૫૭।૪૯અબ્/ સૌમ્યા તુ હસ્તમાત્રા વદુદા હસ્તદ્વયોચ્છ્રિતા પ્રતિમા ।
૫૭।૪૯ય્દ્/ ક્ષેમસુભિક્ષાય ભવેત્ ત્રિચતુર્હસ્તપ્રમાણા યા ॥ ॥

૫૭।૫૦અબ્/ નૃપભયમત્યંગાયાં હીનાંગાયામકલ્યતા કર્તુઃ ।
૫૭।૫૦ય્દ્/ શાતૌદાર્યાં ક્ષુદ્ભયમર્થવિનાશઃ કૃશાંગુલાયાં (કૃશાયાં ચ) ॥ ॥

૫૭।૫૧અબ્/ મરણં તુ સક્ષતાયાં શસ્ત્રનિપાતેન નિર્દિશેત્ કર્તુઃ ।
૫૭।૫૧ય્દ્/ વામાવનતા પત્નીં દક્ષિણવિનતા હિનસ્ત્યાયુઃ ॥ ॥

૫૭।૫૨અબ્/ અન્ધત્વમૂર્ધ્વદૃષ્ટ્યા કરોતિ ચિન્તામધોમુખી દૃષ્ટિઃ ।
૫૭।૫૨ય્દ્/ સર્વપ્રતિમાસ્વેવં શુભાશુભં ભાસ્કરોક્તસમમ્ ॥ ॥

૫૭।૫૩અબ્/ લિંગસ્ય વૃત્તપરિધિં દૈર્ઘ્યેણાસૂત્ર્ય તત્ ત્રિધા વિભજેત્ ।
૫૭।૫૩ય્દ્/ મૂલે તગતુરસ્રં (ચતુરશ્રં) મધ્યે ત્વષ્ટાશ્રિં વૃત્તમતઃ ॥ ॥

૫૭।૫૪અબ્/ ચતુરસ્રં (ચતુરશ્રં) અવનિખાતે મધ્યં કાર્યં તુ પિણ્ડિકાશ્વભ્રે ।
૫૭।૫૪ય્દ્/ દૃશ્યૌચ્છ્રાયેણ સમા સમન્તતઃ પિણ્ડિકા (પિણ્ડકા) શ્વભ્રાત્ ॥ ॥

૫૭।૫૫અબ્/ કૃશદીર્ઘં દેશઘ્નં પાર્શ્વવિહીનં પુરસ્ય નાશાય ।
૫૭।૫૫ય્દ્/ યસ્ય ક્ષતં ભવેદ્ મસ્તકે વિનાશાય તલ્લિંગમ્ ॥ ॥

૫૭।૫૬અબ્/ માતૃગણઃ કર્તવ્યઃ સ્વનામદેવાનુરૂપકૃતચિહ્નઃ ।
૫૭।૫૬ય્દ્/ રેવન્તોઽશ્વારૂઢો મૃગયાક્રીડાદિપરિવારઃ ॥ ॥

(યમ, વરુણ, કુબેર)
૫૭।૫૭અબ્/ દણ્ડી યમો મહિષગો હંસારૂઢશ્ચ પાશભૃદ્ વરુનઃ ।
૫૭।૫૭ય્દ્/ નરવાહનઃ કુબેરો વામકિરીટી બૃહત્કુક્ષિઃ ॥ ॥

(૫૮।૫૮અબ્/ પ્રમથાધિપો ગજમુખઃ પ્રલંબજઠરઃ કુઠારધારી સ્યાત્ ।
૫૮।૫૮ય્દ્/ એકવિષાણો બિભ્રન્મૂલકકન્દં સુનીલદલકન્દમ્ ॥ ॥)
sએપરતે અધ્યાય ૫૮ વનસમ્પ્રવેશાધ્યાયઃ
૫૮।૧અબ્/ કર્તુઃ અનુકૂલદિવસે દૈવજ્ઞવિશોધિતે શુભનિમિત્તે ।
૫૮।૧ય્દ્/ મંગલશકુનૈઃ પ્રાસ્થાનિકૈશ્ચ વનસમ્પ્રવેશઃ સ્યાત્ ॥ ॥

૫૮।૨અબ્/ પિતૃવનમાર્ગસુરાલયવલ્મીકૌદ્યાનતાપસાશ્રમજાઃ ।
૫૮।૨ય્દ્/ ચૈત્યસરિત્સંગમસંભવાશ્ચ ઘટતોયસિક્તાશ્ચ ॥ ॥

૫૮।૩અબ્/ કુબ્જાનુજાતવલ્લીનિપીડિતા વજ્રમારુતોપહતાઃ ।
૫૮।૩ય્દ્/ સ્વપતિતહસ્તિનિપીડિતશુષ્કાગ્નિપ્લુષ્ટમધુનિલયાઃ ॥ ॥

૫૮।૪અબ્/ તરવો વર્જયિતવ્યાઃ શુભદાઃ સ્યુઃ સ્નિગ્ધપત્રકુસુમફલાઃ ।
૫૮।૪ય્દ્/ અભિમતવૃક્ષં ગત્વા કુર્યાત્ પૂજાં સબલિપુષ્પામ્ ॥ ॥

૫૮।૫અબ્/ સુરદારુચન્દનશમીમધૂકતરવઃ શુભા દ્વિજાતીનામ્ ।
૫૮।૫ય્દ્/ ક્ષત્રસ્યારિષ્ટાશ્વત્થખદિરબિલ્વા વિવૃદ્ધિકરાઃ ॥ ॥

૫૮।૬અબ્/ વૈશ્યાનાં જીવકખદિરસિન્ધુકસ્યન્દનાઃ (સ્પન્દનાઃ) ચ શુભફલદાઃ ।
૫૮।૬ય્દ્/ તિન્દુકકેસરસર્જાર્જુનામ્રશાલાશ્ચ શૂદ્રાણામ્ ॥ ॥

૫૮।૭અબ્/ લિંગં વા પ્રતિમા વા દ્રુમવત્ સ્થાપ્યા યથા દિશં યસ્માત્ ।
૫૮।૭ય્દ્/ તસ્માગિહ્નયિતવ્યા દિશો દ્રુમસ્ય ઊર્ધ્વમથવાધઃ ।
૫૮।૮અબ્/ પરમાન્નમોદકૌદનદધિપલલૌલ્લોપિકાદિભિઃ ભક્ષ્યૈઃ ।
૫૮।૮ય્દ્/ મદ્યૈઃ કુસુમૈઃ ધૂપરિ ગન્ધૈશ્ચ તરું સમભ્યર્ચ્ય ॥ ॥

૫૮।૯અબ્/ સુરપિતૃપિશાચરાક્ષસભુજગાસુરગણવિનાયકાદ્યાનામ્ ।
૫૮।૯ય્દ્/ કૃત્વા રાત્રૌ પૂજાં વૃક્ષં સંસ્પૃશ્ય ચ બ્રૂયાત્ ॥ ॥

(મન્ત્ર)

૫૮।૧૦અબ્/ અર્ચાર્થમમુકસ્ય ત્વં દેવસ્ય પરિકલ્પિતઃ ।
૫૮।૧૦ય્દ્/ નમઃ તે વૃક્ષ પૂજેયં વિધિવત્ સમ્પ્રગૃહ્યતામ્ ॥ ॥

૫૮।૧૧અ યાનીહ ભૂતાનિ વસન્તિ તાનિ
૫૮।૧૧બ્ બલિં ગૃહીત્વા વિધિવત્ પ્રયુક્તમ્ ।
૫૮।૧૧ય્ અન્યત્ર વાસં પરિકલ્પયન્તુ
૫૮।૧૧દ્ ક્ષમન્તુ તાનિ અદ્ય નમોऽસ્તુ તેભ્યઃ ॥ ॥

૫૮।૧૨અ વૃક્ષં પ્રભાતે સલિલેન સિક્ત્વા
૫૮।૧૨બ્ પૂર્વોત્તરસ્યાં દિશિ સન્નિકૃત્ય ।
૫૮।૧૨ય્ મધ્વાજ્યદિગ્ધેન (લિપ્તેન) કુઠારકેણ
૫૮।૧૨દ્ પ્રદક્ષિણં શેષમતો નિહન્યાત્ (ऽભિહન્યાત્) ॥ ॥

૫૮।૧૩અ પૂર્વેણ પૂર્વોત્તરતોऽથવા ઉદક્
૫૮।૧૩બ્ પતેદ્ યદા વૃદ્ધિકરઃ તદા સ્યાત્ ।
૫૮।૧૩ય્ આગ્નેયકોણાત્ ક્રમશોऽગ્નિદાહ-
૫૮।૧૩દ્ રુગ્રાગ (ક્ષુદ્રોગ) રોગાઃ તુરગક્ષયશ્ચ ॥ ॥

૫૮।૧૪અ યન્ નૌક્તમસ્મિન્ વનસમ્પ્રવેશે
૫૮।૧૪બ્ નિપાતવિચ્છેદનવૃક્ષગર્ભાઃ ।

૫૮।૧૪ય્ ઇન્દ્રધ્વજે વાસ્તુનિ ચ પ્રદિષ્ટાઃ
૫૮।૧૪દ્ પૂર્વં મયા તેઽત્ર તથૈવ યોજ્યાઃ ॥ ॥

sએપરતે અધ્યાય ૫૯ પ્રતિમાપ્રતિષ્ઠાપનાધ્યાયઃ
૫૯।૧અબ્/ દિશિ યામ્યાયાં (સૌમ્યાયાં) કુર્યાદધિવાસનમણ્ડપં બુધઃ પ્રાગ્ વા ।
૫૯।૧ય્દ્/ તોરણચતુષ્ટયયુતં શસ્તદ્રુમપલ્લવચ્છન્નમ્ ॥ ॥

૫૯।૨અબ્/ પૂર્વે ભાગે ચિત્રાઃ સ્રજઃ પતાકાશ્ચ મણ્ડપસ્યૌક્તાઃ ।
૫૯।૨ય્દ્/ આગ્નેય્યાંદિશિ રક્તાઃ કૃષ્ણાઃ સ્યુઃ યામ્યનૈરૃત્યોઃ (નૈરૃતયોઃ) ॥ ॥

૫૯।૩અબ્/ શ્વેતા દિશ્યપરસ્યામ્ વાયવ્યાયાં તુ પાણ્ડુરા એવ ।
૫૯।૩ય્દ્/ ચિત્રાશ્ચૌત્તરપાર્શ્વે પીતાઃ પૂર્વોત્તરે કાર્યાઃ (કોણે) ॥ ॥

૫૯।૪અબ્/ આયુઃશ્રીબલજયદા દારુમયી મૃણ્મયી (મૃન્મયી) તથા પ્રતિમા ।
૫૯।૪ય્દ્/ લોકહિતાય મણિમયી સૌવર્ણી પુષ્ટિદા ભવતિ ॥ ॥

૫૯।૫અબ્/ રજતમયી કીર્તિકરી પ્રજાવિવૃદ્ધિં કરોતિ તામ્રમયી ।
૫૯।૫ય્દ્/ ભૂલાભં તુ મહાન્તં શૈલી પ્રતિમાથવા લિંગમ્ ॥ ॥

૫૯।૬અબ્/ શંખૂપહતા પ્રતિમા પ્રધાનપુરુષં કુલં ચ ઘાતયતિ ।
૫૯।૬ય્દ્/ શ્વભ્રોપહતા રોગાન્ ઉપદ્રવાંશ્ચ ક્ષયં (અક્ષયાન્) કુરુતે ॥ ॥

૫૯।૭અબ્/ મણ્ડપમધ્યે સ્થણ્ડિલમુપલિપ્યાસ્તીર્ય સિકતયાથ કુશૈઃ ।
૫૯।૭ય્દ્/ ભદ્રાસનકૃતશીર્ષોપધાનપાદાં ન્યસેત્ પ્રતિમામ્ ॥ ॥

૫૯।૮અબ્/ પ્લક્ષાશ્વત્થૌદુંબરશિરીષવટસંભવૈઃ કષાયજલૈઃ ।
૫૯।૮ય્દ્/ મંગલ્યસંજ્ઞિતાભિઃ સર્વોષધિભિઃ કુશાદ્યાભિઃ ॥ ॥

૫૯।૯અબ્/ દ્વિપવૃષભૌદ્ધત (ઉદ્ધૃત) પર્વતવલ્મીકસરિત્સમાગમતટેષુ ।
૫૯।૯ય્દ્/ પદ્મસરઃસુ ચ મૃદ્ભિઃ સપંચગવ્યૈશ્ચ તીર્થજલૈઃ ॥ ॥

૫૯।૧૦અબ્/ પૂર્વશિરસ્કાં સ્નાતાં સુવર્ણરત્નાંબુભિશ્ચ સસુગન્ધૈઃ ।
૫૯।૧૦ય્દ્/ નાનાતૂર્યનિનાદૈઃ પુણ્યાહૈઃ વેદનિર્ઘોષૈઃ ॥ ॥

૫૯।૧૧અબ્/ ઐન્દ્યાં દિશીન્દ્રલિંગા મન્ત્રાઃ પ્રાગ્દક્ષિણેઽગ્નિલિંગાશ્ચ ।
૫૯।૧૧ય્દ્/ વક્તવ્યા (જપ્તવ્યા) દ્વિજમુખ્યૈઃ પૂજ્યાઃ તે દક્ષિણાભિશ્ચ ॥ ॥

૫૯।૧૨અબ્/ યો દેવઃ સંસ્થાપ્યઃ તન્મન્ત્રૈશ્ચાનલં દ્વિજો જુહુયાત્ ।
૫૯।૧૨ય્દ્/ અગ્નિનિમિત્તાનિ મયા પ્રોક્તાનીન્દ્રધ્વજૈત્થાને (ઉચ્છ્રાયે) ॥ ॥

૫૯।૧૩અબ્/ ધૂમાકુલોઽપસવ્યો મુહુર્મુહુઃ વિકુલિંગકૃન્ ન શુભઃ ।

૫૯।૧૩ય્દ્/ હોતુઃ સ્મૃતિલોપો વા પ્રસર્પણં ચાશુભં પ્રોક્તમ્ ॥ ॥

૫૯।૧૪અબ્/ સ્નાતામભુક્તવસ્ત્રાં સ્વલંકૃતાં પૂજિતામ્ કુસુમગન્ધૈઃ ।
૫૯।૧૪ય્દ્/ પ્રતિમાં સ્વાસ્તીર્ણાયામ્ શય્યાયામ્ સ્થાપકઃ કુર્યાત્ ॥ ॥

૫૯।૧૫અબ્/ સુમાં સગીતનૃત્યૈઃ જાગરણૈઃ (સુનૃત્યગીતૈઃ જાગરકૈઃ) સમ્યગ્ એવમધિવાસ્ય ।
૫૯।૧૫ય્દ્/ દૈવજ્ઞસમ્પ્રદિષ્ટે કાલે સંસ્થાપનં કુર્યાત્ ॥ ॥

૫૯।૧૬અબ્/ અભ્યર્ચ્ય કુસુમવસ્ત્રાનુલેપનૈઃ શંખતૂર્યનિર્ઘોષૈઃ ।
૫૯।૧૬ય્દ્/ પ્રાદક્ષિણ્યેન નયેદાયતનસ્ય પ્રયતનેન ॥ ॥

૫૯।૧૭અબ્/ કૃત્વા બલિં પ્રભૂતં સમ્પૂજ્ય બ્રાહ્મણાંશ્ચ સભ્યાંશ્ચ ।
૫૯।૧૭ય્દ્/ દત્ત્વા હિરણ્યશકલં વિનિક્ષિપેત્ પિણ્ડિકાશ્વભ્રે ।
૫૯।૧૮અબ્/ સ્થાપકદૈવજ્ઞદ્વિજસભ્યસ્થપતીન્ વિશેષતોઽભ્યર્ચ્ય ।
૫૯।૧૮ય્દ્/ કલ્યાણાનાં ભાગી ભવતીહ પરત્ર ચ સ્વર્ગી ॥ ॥

૫૯।૧૯અ વિષ્ણોઃ ભાગવતાન્ મગાંશ્ચ સવિતુઃ શંભોઃ સભસ્મદ્વિજાન્
૫૯।૧૯બ્ માતીણામપિ મણ્ડલક્રમવિદો (માતૃમણ્ડલવિદો) વિપ્રાન્ વિદુઃ બ્રહ્મણઃ ।
૫૯।૧૯ય્ શાક્યાન્ સર્વહિતસ્ય શાન્તમનસો નગ્નાન્ જિનાનાં વિદુઃ
૫૯।૧૯દ્ યે યં દેવમુપાશ્રિતાઃ સ્વવિધિના તૈઃ તસ્ય કાર્યા ક્રિયા ॥ ॥

૫૯।૨૦અબ્/ ઉદગયને સિતપક્ષે શિશિરગભસ્તૌ ચ જીવવર્ગસ્થે ।
૫૯।૨૦ય્દ્/ લગ્ને સ્થિરે સ્થિરાંશે સૌમ્યૈઃ ધીધર્મકેન્દ્રગતૈઃ ॥ ॥

૫૯।૨૧અબ્/ પાપૈરુપચયસંસ્થૈઃ ધ્રુવમૃદુહરિતિષ્યવાયુદેવેષુ ।
૫૯।૨૧ય્દ્/ વિકુજે દિનેઽનુકૂલે દેવાનાં સ્થાપનં શસ્તમ્ ॥ ॥

૫૯।૨૨અબ્/ સામાન્યમિદં સમાસતો લોકાનાં હિતદં મયા કૃતમ્ ।
૫૯।૨૨ય્દ્/ અધિવાસનસન્નિવેશને સાવિત્રે પૃથગ્ એવ વિસ્તરાત્ ॥ ॥

sએપરતે અધ્યાય ૬૦ ગોલક્ષણાધ્યાયઃ
૬૦।૧અ પરાશરઃ પ્રાહ બૃહદ્રથાય
૬૦।૧બ્ ગોલક્ષણં યત્ ક્રિયતે તતોઽયમ્ ।
૬૦।૧ય્ મયા સમાસઃ શુભલક્ષણાઃ તાઃ
૬૦।૧દ્ સર્વાઃ તથાઽપિ આગમતોઽભિધાસ્યે ॥ ॥

૬૦।૨અબ્/ સાસ્ર આવિલરૂક્ષાક્ષ્યો મૂષકનયનાશ્ચ શુભદા ગાવઃ ।
૬૦।૨ય્દ્/ પ્રચલચ્ચિપિટવિષાણાઃ કરટાઃ ખરસદૃશવર્ણાઃ (વર્નાઃ) ચ ॥ ॥

૬૦।૩અબ્/ દશસપ્તચતુર્દન્ત્યઃ પ્રલંબમુણ્ડાનના વિનતપૃષ્ઠ્યઃ (પૃષ્ઠાઃ) ।
૬૦।૩ચ્દ્/ હ્રસ્વસ્થૂલગ્રીવા યવમધ્યા દારિતખુરાશ્ચ ॥ ॥

૬૦।૪અબ્/ શ્યાવાતિદીર્ઘજિહ્વા ગુલ્ફૈઃ અતિતનુભિઃ અતિબૃહદ્ભિઃ વા ।
૬૦।૪ચ્દ્/ અતિકકુદાઃ કૃશદેહા નૈષ્ટા હીનાધિકાંગ્યશ્ચ ॥ ॥

૬૦।૫અબ્/ વૃષભોઽપિ એવં સ્થૂલાતિલંબવૃષણઃ શિરાતતક્રોડઃ ।
૬૦।૫ચ્દ્/ સ્થૂલશિરાચિતગણ્ડઃ ત્રિસ્થાનં મેહતે યશ્ચ ॥ ॥

૬૦।૬અબ્/ માર્જારાક્ષઃ કપિલઃ કરટો વા ન શુભદો દ્વિજસ્યૈવ (દ્વિજસ્યેષ્ટઃ) ।
૬૦।૬ચ્દ્/ કૃષ્ણોષ્ઠતાલુજિહ્વઃ શ્વસનો યૂથસ્ય ઘાતકરઃ ॥ ॥

૬૦।૭અબ્/ સ્થૂલશકૃન્મણિશૃંગઃ સિતોદરઃ કૃષ્ણસારવર્ણશ્ચ ।
૬૦।૭ચ્દ્/ ગૃહજાતોઽપિ ત્યાજ્યો યૂથવિનાશાવહો વૃષભઃ ॥ ॥

૬૦।૮અબ્/ શ્યામકપુષ્પચિતાંગો ભસ્મારુણસન્નિભો બિડાલાક્ષઃ ।
૬૦।૮ચ્દ્/ વિપ્રાણામપિ ન શુભં કરોતિ વૃષભઃ પરિગૃહીતઃ ॥ ॥

૬૦।૯અબ્/ યે ચૌદ્ધરન્તિ પાદાન્ પંકાદિવ યોજિતાઃ કૃશગ્રીવાઃ ।
૬૦।૯ચ્દ્/ કાતરનયના હીનાશ્ચ પૃષ્ઠતઃ તે ન ભારસહાઃ ॥ ॥

૬૦।૧૦અબ્/ મૃદુસંહતતામ્રોષ્ઠાઃ તનુસ્ફિજઃ તામ્રતાલુજિહ્વાશ્ચ ।
૬૦।૧૦ચ્દ્/ હ્રસ્વતનુ (તનુહ્રસ્વો) ઉચ્ચશ્રવણાઃ સુકુક્ષયઃ સ્પૃષ્ટ (સ્પષ્ટ) જંઘાશ્ચ ॥ ॥

૬૦।૧૧અબ્/ આતામ્રસંહતખુરા વ્યૂઢોરસ્કા બૃહત્કકુદયુક્તાઃ ।
૬૦।૧૧ચ્દ્/ સ્નિગ્ધશ્લક્ષ્ણતનુત્વગ્રોમાણઃ તામ્રતનુશૃંગાઃ ॥ ॥

૬૦।૧૨અબ્/ તનુભૂસ્પૃગ્વાલધયો રક્તાન્તવિલોચના મહોચ્છ્વાસાઃ ।
૬૦।૧૨ચ્દ્/ સિંહસ્કન્ધાઃ તન્વલ્પકંબલાઃ પૂજિતાઃ સુગમાઃ (સુગતાઃ) ॥ ॥

૬૦।૧૩અબ્/ વામાવર્તૈઃ વામે દક્ષિણપાર્શ્વે ચ દક્ષિણાવર્તૈઃ ।
૬૦।૧૩ચ્દ્/ શુભદા ભવન્ત્યનડુહો જંઘાભિશ્ચએણકનિભાભિઃ ॥ ॥

૬૦।૧૪અબ્/ વૈદૂર્ય (વૈડૂર્ય) મલ્લિકાબુદ્બુદેક્ષણાઃ સ્થૂલનેત્રપક્ષ્માણઃ (વર્માણઃ) ।
૬૦।૧૪ચ્દ્/ પાર્ષ્ણિભિઃ અસ્ફુટિતાભિઃ શસ્તાઃ સર્વે ચ (અપિ) ભારસહાઃ ॥ ॥

૬૦।૧૫અબ્/ ઘ્રાણોદ્દેશે સવલિઃ માર્જારમુખઃ સિતશ્ચ દક્ષિણતઃ ।
૬૦।૧૫ચ્દ્/ કમલોત્પલલાક્ષાભઃ સુવાલધિઃ વાજિતુલ્યજવઃ ॥ ॥

૬૦।૧૬અબ્/ લંબૈઃ વૃષણૈઃ મેષોદરશ્ચ સંક્ષિપ્તવંક્ષણ (ક્ષણા) ક્રોડઃ ।
૬૦।૧૬ચ્દ્/ જ્ઞેયો ભારાધ્વસહો જવેઽશ્વતુલ્યશ્ચ શસ્તફલઃ ॥ ॥

૬૦।૧૭અબ્/ સિતવર્ણઃ પિંગાક્ષઃ તામ્રવિષાણેક્ષણો મહાવક્ત્રઃ ।
૬૦।૧૭ચ્દ્/ હંસો નામ શુભફલો યૂથસ્ય વિવર્ધનઃ પ્રોક્તઃ ॥ ॥

૬૦।૧૮અબ્/ ભૂસ્પૃગ્વાલધિઃ આતામ્રવિષાણો (વગ઼્ક્ષણો) રક્તદૃક્ કકુદ્માંશ (કકુદ્મી) ચ ।
૬૦।૧૮ચ્દ્/ કલ્માષશ્ચ સ્વામિનમચિરાત્ કુરુતે પતિં લક્ષ્મ્યાઃ ॥ ॥

૬૦।૧૯અબ્/ યો વા સિતૈકચરણૈઃ (સિતૈકચરણો) યથેષ્ટવર્ણશ્ચ સોઽપિ શુભફલકૃત્ (શસ્તફલઃ) ।
૬૦।૧૯ચ્દ્/ મિશ્રફલોઽપિ ગ્રાહ્યો યદિ નએકાન્ત પ્રશસ્તોઽસ્તિ ॥ ॥

sએપરતે અધ્યાય ૬૧ શ્વલક્ષણાધ્યાયઃ
૬૧।૧અ પાદાઃ પંચનખાઃ ત્રયોઽગ્રચરણઃ ષડ્ભિઃ નખૈઃ દક્ષિણઃ
૬૧।૧બ્ તામ્રઓષ્ઠાગ્રનસો મૃગેશ્વરગતિઃ જિઘ્રન્ ભુવં યાતિ ચ ।
૬૧।૧ચ્ લાંગૂલં સસટં દૃગૃક્ષસદૃશી કર્ણૌ ચ લંબૌ મૃદૂ
૬૧।૧દ્ યસ્ય સ્યાત્ સ કરોતિ પોષ્ટુરચિરાત્ પુષ્ટાં શ્રિયં શ્વા ગૃહે ॥ ॥

૬૧।૨અ પાદે પાદે પંચ પંચાગ્રપાદે
૬૧।૨બ્ વામે યસ્યાઃ ષણ્નખા મલ્લિકાક્ષ્યાઃ ।
૬૧।૨ચ્ વક્રં પુચ્છં પિંગલાલંબકર્ણા
૬૧।૨દ્ યા સા રાષ્ટ્રં કુક્કુરી પાતિ પુષ્ટા (પોષ્ટુઃ) ॥ ॥

sએપરતે અધ્યાય ૬૨ કુક્કુટલક્ષણાધ્યાયઃ
૬૨।૧અબ્/ કુક્કુટઃ ત્વૃજુતનૂરુહાંગુલિઃ તામ્રવક્ત્રનખચૂલિકઃ સિતઃ ।
૬૨।૧ચ્દ્/ રૌતિ સુસ્વરમુષાત્યયે ચ યો વૃદ્ધિદઃ સ નૃપરાષ્ટ્રવાજિનામ્ ॥ ॥

૬૨।૨અ યવગ્રીવો યો વા બદરસદૃશો વાપિ વિહગો
૬૨।૨બ્ બૃહન્મૂર્ધા વર્ણૈઃ ભવતિ બહુભિશ્ચ રુચિરઃ ।
૬૨।૨ચ્ સ શસ્તઃ સંગ્રામે મધુમધુપવર્ણશ્ચ જયકૃદ્
૬૨।૨દ્ ન શસ્તો યોઽતોઽન્યઃ કૃશતનુરવઃ ખઞ્જચરણઃ ॥ ॥

૬૨।૩અબ્/ કુક્કુટી ચ મૃદુચારુભાષિણી સ્નિગ્ધમૂર્તિરુચિરાનનેષણા ।
૬૨।૩ચ્દ્/ સા દદાતિ સુચિરં મહીક્ષિતાં શ્રીયશોવિજયવીર્યસમ્પદઃ ॥ ॥

sએપરતે અધ્યાય ૬૩ કૂર્મલક્ષણાધ્યાયઃ
૬૩।૧અ સ્ફુટિકરજતવર્ણો નીલરાજીવિચિત્રઃ
૬૩।૧બ્ કલશસદૃશમૂર્તિશ્ચારુવંશશ્ચ કૂર્મઃ ।
૬૩।૧ચ્ અરુણસમવપુઃ વા સર્ષપાકારચિત્રઃ

૬૩।૧દ્ સકલનૃપમહત્ત્વં મન્દિરસ્થઃ કરોતિ ॥ ॥

૬૩।૨અબ્/ અઞ્જનભૃંગશ્યામતનુઃ વા બિન્દુવિચિત્રોઽવ્યંગશરીરઃ ।
૬૩।૨य્દ્/ સર્પશિરા વા સ્થૂલગલો યઃ સોઽપિ નૃપાણાં રાષ્ટ્રવિવૃદ્ધ્યૈ ॥ ॥

૬૩।૩અ વૈડૂર્યત્વિટ્ સ્થૂલકણ્ઠઃ ત્રિકોણો
૬૩।૩બ્ ગૂઢચ્છિદ્રશ્ચ ઊરુ (ચારુ) વંશશ્ચ શસ્તઃ ।
૬૩।૩ય્ ક્રીડાવાપ્યાં તોયપૂર્ણે મણૌ વા
૬૩।૩દ્ કાર્યઃ કૂર્મો મંગલાર્થં નરેન્દ્રૈઃ ॥ ॥

sએપરતે અધ્યાય ૬૪ છાગલક્ષણાધ્યાયઃ
૬૪।૧અબ્/ છાગશુભાશુભલક્ષણમભિધાસ્યે નવદશાષ્ટદન્તાઃ તે ।
૬૪।૧ય્દ્/ ધન્યાઃ સ્થાપ્યા વેશ્મનિ સન્ત્યાજ્યાઃ સપ્તદન્તા યે ॥ ॥

૬૪।૨અબ્/ દક્ષિણપાર્શ્વે મણ્ડલમસિતં શુક્લસ્ય શુભફલં ભવતિ ।
૬૪।૨ય્દ્/ ઋષ્યનિભકૃષ્ણલોહિતવર્ણાનાં શ્વેતમતિ (અપિ) શુભદમ્ ॥ ॥

૬૪।૩અબ્/ સ્તનવદવલંબતે યઃ કણ્ઠેઽજાનાં મણિઃ સ વિજ્ઞેયઃ ।
૬૪।૩ય્દ્/ એકમણિઃ શુભફલકૃદ્ધન્યતમા દ્વિત્રમણયો (દ્વિત્રિમણયો) યે ॥ ॥

૬૪।૪અબ્/ મુણ્ડાઃ સર્વે શુભદાઃ સર્વસિતાઃ સર્વકૃષ્ણદેહાશ્ચ ।
૬૪।૪ય્દ્/ અર્ધાસિતાઃ સિતાર્ધા ધન્યાઃ કપિલાર્ધકૃષ્ણાશ્ચ ॥ ॥

૬૪।૫અબ્/ વિચરતિ યૂથસ્યાગ્રે પ્રથમં ચાંભોઽવગાહતે યોઽજઃ ।
૬૪।૫ય્દ્/ સ શુભઃ સિતમૂર્ધા વા મૂર્ધનિ વા કૃત્તિકા (ટિક્કિકા) યસ્ય ॥ ॥

૬૪।૬અબ્/ સપૃષતકણ્ઠશિરા વા તિલપિષ્ટનિભશ્ચ તામ્રદૃક્ શસ્તઃ ।
૬૪।૬ય્દ્/ કૃષ્ણચરણઃ સિતો વા કૃષ્ણો વા શ્વેતચરણો યઃ ॥ ॥

૬૪।૭અબ્/ યઃ કૃષ્ણાણ્ડઃ શ્વેતો મધ્યે કૃષ્ણેન ભવતિ પટ્ટેન ।
૬૪।૭ય્દ્/ યો વા ચરતિ સશબ્દં મન્દં ચ સ શોભનચ્છાગઃ ॥ ॥

૬૪।૮અબ્/ ઋષ્યશિરોરુહપાદો યો વા પ્રાક્ પાણ્ડુરોઽપરે નીલઃ ।
૬૪।૮ય્દ્/ સ ભવતિ શુભકૃચ્છાગઃ શ્લોકશ્ચાપ્યત્ર ગર્ગોક્તઃ ॥ ॥

૬૪।૯અબ્/ કુટ્ટકઃ કુટિલશ્ચૈવ જટિલો વામનઃ તથા ।
૬૪।૯ય્દ્/ તે ચત્વારઃ શ્રિયઃ પુત્રા નાલક્ષ્મીકે વસન્તિ તે ॥ ॥

૬૪।૧૦અ અથાપ્રશસ્તાઃ ખરતુલ્યનાદાઃ
૬૪।૧૦બ્ પ્રદીપ્તપુચ્છાઃ કુનખા વિવર્ણાઃ ।

૬૪।૧૦ય્ નિકૃત્તકર્ણા દ્વિપમસ્તકાશ્ચ
૬૪।૧૦દ્ ભવન્તિ યે ચાસિતતાલુજિહ્વાઃ ॥ ॥

૬૪।૧૧અ વર્ણૈઃ પ્રશસ્તૈઃ મણિભિઃ પ્રયુક્તા (ચ યુક્તા)
૬૪।૧૧બ્ મુણ્ડાશ્ચ યે તામ્રવિલોચનાશ્ચ ।
૬૪।૧૧ય્ તે પૂજિતા વેશ્મનિ (વેશ્મસુ) માનવાનાં
૬૪।૧૧દ્ સૌખ્યાનિ કુર્વન્તિ યશઃ શ્રિયં ચ ॥ ॥

sએપરતે અધ્યાય ૬૫ અશ્વાલક્ષણાધ્યાયઃ
૬૫।૧અ દીર્ઘગ્રીવાક્ષિકૂટઃ ત્રિકહૃદયપૃથુઃ તામ્રતાલુ ઓષ્ઠજિહ્વઃ
૬૫।૧બ્ સૂક્ષ્મત્વક્કેશવાલઃ સુશફગતિમુખો હ્રસ્વકર્ણઓષ્ઠપુચ્છઃ ।
૬૫।૧ય્ જંઘાજાનૂરુવૃત્તઃ સમસિતદશનશ્ચારુસંસ્થાનરૂપો
૬૫।૧દ્ વાજી સર્વાંગશુદ્ધો ભવતિ નરપતેઃ શત્રુનાશાય નિત્યમ્ ॥ ॥

૬૫।૨અબ્/ અશ્રુપાતહનુગણ્ડહૃદ્ (હૃડ્) ગલપ્રોથશંખકટિબસ્તિજાનૂનિ ।
૬૫।૨ય્દ્/ મુષ્કનાભિકકુદે તથા ગુદે સવ્યકુક્ષિચરણે તથા (ચરણેષુ ચ) શુભાઃ ॥ ॥

૬૫।૩અ યે પ્રપાણગલકર્ણસંસ્થિતાઃ
૬૫।૩બ્ પૃષ્ઠમધ્યનયનોપરિ સ્થિતાઃ ।
૬૫।૩ય્ ઓષ્ઠસક્થિભુજકુક્ષિપાર્શ્વગાઃ
૬૫।૩દ્ તે લલાટસહિતાઃ સુશોભનાઃ ॥ ॥

૬૫।૪અબ્/ તેષાં પ્રપાણ એકો લલાટકેશેષુ ચ ધ્રુવાવર્તાઃ ।
૬૫।૪ય્દ્/ રન્ધ્રુપરન્ધ્રમૂર્ધનિ વક્ષસિ ચેતિ સ્મૃતૌ દ્વૌ દ્વૌ ॥ ॥

૬૫।૫અ ષડ્ભિઃ દન્તૈઃ સિતાભૈઃ ભવતિ હયશિશુઃ તૈઃ કશાયૈઃ દ્વિવર્ષૈઃ
૬૫।૫બ્ સન્દંશૈઃ મધ્યમન્ત્યૈઃ પતિ (પતિત) સમુદિતૈઃ ત્ર્યબ્ધિ (ત્ર્યબ્દ) પંચાબ્દિકાશ્ચઃ ।
૬૫।૫ય્ સન્દંશાનુક્રમેણ ત્રિકપરિગણિતાઃ કાલિકા પીતશુક્લાઃ
૬૫।૫દ્ કાચા મક્ષીક (માક્ષીક) શંખાવટચલનમતો દન્તપાતં ચ વિદ્ધિ ॥ ॥

sએપરતે અધ્યાય ૬૬ હસ્તિલક્ષણાધ્યાયઃ
૬૬।૧અ મધ્વાભદન્તાઃ સુવિભક્તદેહા
૬૬।૧બ્ ન ચૌપદિગ્ધા ન (દિગ્ધાશ્ચ) કૃશાઃ ક્ષમાશ્ચ ।
૬૬।૧ય્ ગાત્રૈઃ સમૈશ્ચાપસમાનવંશા
૬૬।૧દ્ વરાહતુલ્યૈઃ જઘનૈશ્ચ ભદ્રાઃ ॥ ॥

૬૬।૨અ વક્ષોઽથ કક્ષાવલયઃ શ્લથાશ્ચ

૬૬।૨બ્ લંબૌદરઃ ત્વગ્ બૃહતી ગલશ્ચ ।
૬૬।૨ય્ સ્થૂલા ચ કુક્ષિઃ સહ પેચકેન
૬૬।૨દ્ સૈંહી ચ દૃગ્ મન્દમતંગજસ્ય ॥ ॥

૬૬।૩અ મૃગાઃ તુ હ્રસ્વાધરવાલમેઢ્રાઃ
૬૬।૩બ્ તન્વંઘ્રિ (તન્વંહ્રિ) કણ્ઠદ્વિજહસ્તકર્ણાઃ ।
૬૬।૩ય્ સ્થૂલેક્ષણાશ્ચેતિ યથોક્તચિહ્નૈઃ
૬૬।૩દ્ સંકીર્ણનાગા વ્યતિમિશ્રચિહ્નાઃ ॥ ॥

૬૬।૪અ પંચૌન્નતિઃ સપ્ત મૃગસ્ય દૈર્ઘ્યમ્
૬૬।૪બ્ અષ્ટૌ ચ હસ્તાઃ પરિણાહમાનમ્ ।
૬૬।૪ય્ એકદ્વિવૃદ્ધાવથ મન્દભદ્રૌ
૬૬।૪દ્ સંકીર્નનાગોઽનિયતપ્રમાણઃ ॥ ॥

૬૬।૫અ ભદ્રસ્ય વર્ણો હરિતો મદશ્ચ (મદ્સ્ય)
૬૬।૫બ્ મન્દસ્ય હારિદ્રકસન્નિકાશઃ ।
૬૬।૫ય્ કૃષ્ણો મદશ્ચાભિહિતો મૃગસ્ય
૬૬।૫દ્ સંકીર્ણનાગસ્ય મદો વિમિશ્રઃ ॥ ॥

૬૬।૬અ તામ્રોષ્ઠતાલુવદનાઃ કલવિંકનેત્રાઃ
૬૬।૬બ્ સ્નિગ્ધ ઊનતાગ્રદશનાઃ પૃથુલાયતાસ્યાઃ ।
૬૬।૬ય્ ચાપૌન્નતાયતનિગૂઢનિમગ્નવંશાઃ
૬૬।૬દ્ તન્વેકરોમચિતકૂર્મસમાનકુંભાઃ ॥ ॥

૬૬।૭અ વિસ્તીર્ણકર્ણહનુનાભિલલાટગુહ્યાઃ
૬૬।૭બ્ કૂર્મોન્નતદ્વિનવવિંશતિભિઃ નખૈશ્ચ ।
૬૬।૭ય્ રેખાત્રયોપચિતવૃત્તકરાઃ સુવાલા
૬૬।૭દ્ ધન્યાઃ સુગન્ધિમદપુષ્કરમારુતાશ્ચ ॥ ॥

૬૬।૮અબ્/ દીર્ઘાંગુલિરક્તપુષ્કરાઃ સજલાંભોદનિનાદબૃંહિણઃ ।
૬૬।૮ય્દ્/ બૃહદાયતવૃત્તકન્ધરા ધન્યા ભૂમિપતેઃ મતંગજાઃ ॥ ॥

૬૬।૯અ નિમર્દ (નિર્મદા) અભ્યધિકહીનનખાંગાન્
૬૬।૯બ્ કુબ્જવામનકમેષવિષાણાન્ ।
૬૬।૯ય્ દૃશ્યકોશફલપુષ્કરહીનાન્
૬૬।૯દ્ શ્યાવનીલશબલાસિતતાલૂન્ ॥ ॥

૬૬।૧૦અ સ્વલ્પવક્ત્રરુહમત્કુણષણ્ઢાન્
૬૬।૧૦બ્ હસ્તિનીં ચ ગજલક્ષણયુક્તામ્
૬૬।૧૦ચ્ ગર્ભિણી ચ નૃપતિઃ પરદેશં
૬૬।૧૦દ્ પ્રાપયેદતિવિરૂપફલાઃ તે ॥ ॥

sએપરતે અધ્યાય ૬૭ પુરુષલક્ષનાધ્યાયઃ
૬૭।૧અ ઉન્માનમાનગતિસંહતિસારવર્ણ-
૬૭।૧બ્ સ્નેહસ્વરપ્રકૃતિસત્ત્વમનૂકં આદૌ ।
૬૭।૧ચ્ ક્ષેત્રં મૃજાં ચ વિધિવત્ કુશલોઽવલોક્ય
૬૭।૧દ્ સામુદ્રવિદ્ વદતિ યાતમનાગતં વા (ચ) ॥ ॥

૬૭।૨અ અસ્વેદનૌ મૃદુતલૌ કમલૌદરાભૌ
૬૭।૨બ્ શ્લિષ્ટાંગુલી રુચિરતામ્રનખૌ સુપાર્ષ્ણી ।
૬૭।૨ચ્ ઉષ્ણૌ શિરાવિરહિતૌ સુનિગૂઢગુલ્ફૌ
૬૭।૨દ્ કૂર્મોન્નતૌ ચ ચરણૌ મનુજેશ્વરસ્ય ॥ ॥

૬૭।૩અ શૂર્પાકારવિરૂક્ષપાણ્ડુરનખૌ વક્રૌ શિરાસન્તતૌ
૬૭।૩બ્ સંશુષ્કૌ વિરલાંગુલી ચ ચરણૌ દારિદ્યદુઃખપ્રદૌ ।
૬૭।૩ચ્ માર્ગાયૌત્કટકૌ કષાયસદૃશૌ વંશસ્ય વિચ્છેદદૌ (વિચ્છિત્તિદૌ)
૬૭।૩દ્ બ્રહ્મઘ્નૌ પરિપક્વમૃદ્યુતિતલૌ પીતાવગમ્યારતૌ (પીતાવગમ્યરતૌ) ॥ ॥

૬૭।૪અ પ્રવિરલતનુરોમવૃત્તજંઘા
૬૭।૪બ્ દ્વિરદકરપ્રતિમૈઃ વર ઊરુભિશ્ચ ।
૬૭।૪ચ્ ઉપચિતસમજાનવશ્ચ ભૂપા
૬૭।૪દ્ ધનરહિતાઃ શ્વશ◌ૃગાલતુલ્યજંઘાઃ ॥ ॥

૬૭।૫અ રોમએકૈકં કૂપકે પાર્થિવાનાં
૬૭।૫બ્ દ્વે દ્વે જ્ઞેયે પણ્ડિતશ્રોત્રિયાણામ્ ।
૬૭।૫ચ્ ત્ર્યાદ્યૈઃ નિઃસ્વા માનવા દુઃખભાજઃ
૬૭।૫દ્ કેશાશ્ચૈવં નિન્દિતાઃ પૂજિતાશ્ચ ॥ ॥

૬૭।૬અ નિર્માંસજાનુઃ મ્રિયતે પ્રવાસે
૬૭।૬બ્ સૌભાગ્યમલ્પૈઃ વિકટૈઃ દરિદ્રાઃ ।
૬૭।૬ચ્ સ્ત્રીનિર્જિતાશ્ચૈવ (ચાપિ) ભવન્તિ નિમ્નૈ
૬૭।૬દ્ રાજ્યં સમાંશૈશ્ચ મહદ્ભિઃ આયુઃ ॥ ॥

૬૭।૭અ લિંગેઽલ્પે ધનવાન્ અપત્યરહિતઃ સ્થૂલે ઽપિ હીનો (વિહીનો) ધનૈઃ

૬૭।૭બ્ મેઢ્રે વામનતે સુતાર્થરહિતો વક્રેઽન્યથા પુત્રવાન્ ।
૬૭।૭ય્ દારિદ્ર્યં વિનતે ત્વધોઽલ્પતનયો લિંગે શિરાસન્તતે
૬૭।૭દ્ સ્થૂલગ્રન્થિયુતે સુખી મૃદુ કરોત્યન્તં પ્રમેહાદિભિઃ ॥ ॥

૬૭।૮અબ્/ કોશનિગૂઢૈઃ ભૂપા દીર્ઘૈઃ ભગ્નૈશ્ચ વિત્તપરિહીનાઃ ।
૬૭।૮ય્દ્/ ઋજુવૃત્તશેફસો લઘુશિરાલશિશ્નાશ્ચ ધનવન્તઃ ॥ ॥

૬૭।૯અબ્/ જલમૃત્યુઃ એકવૃષણો વિષમૈઃ સ્ત્રીચંચલઃ સમૈઃ ક્ષિતિપઃ ।
૬૭।૯ય્દ્/ હ્રસ્વાયુશ્ચોદ્બદ્ધૈઃ પ્રલંબવૃષણસ્ય શતમાયુઃ ॥ ॥

૬૭।૧૦અબ્/ રક્તૈઃ આઢ્યા મણિભિઃ નિર્દ્રવ્યાઃ પાણ્ડુરૈશ્ચ મલિનૈશ્ચ ।
૬૭।૧૦ય્દ્/ સુખિનઃ સશબ્દમૂત્રા નિઃસ્વા નિઃશબ્દધારાશ્ચ ॥ ॥

૬૭।૧૧અબ્/ દ્વિત્રિચતુર્ધારાભિઃ પ્રદક્ષિણાવર્તવલિતમૂત્રાભિઃ ।
૬૭।૧૧ય્દ્/ પૃથિવીપતયો જ્ઞેયા વિકીર્ણમૂત્રાશ્ચ ધનહીનાઃ ॥ ॥

૬૭।૧૨અબ્/ એકૈવ મૂત્રધારા વલિતા રૂપપ્રદા ન સુતદાત્રી (રૂપપ્રધાનસુતદાત્રી) ।
૬૭।૧૨ય્દ્/ સ્નિગ્ધૌન્નતસમમણયો ધનવનિતારત્નભોક્તારઃ ।
૬૭।૧૩અબ્/ મણિભિશ્ચ મધ્યનિમ્નૈઃ કન્યાપિતરો ભવન્તિ નિઃસ્વાશ્ચ ।
૬૭।૧૩ય્દ્/ બહુપશુભાજો મધ્યૌન્નતૈશ્ચ નાત્યુલ્બણૈઃ ધનિનઃ ॥ ॥

૬૭।૧૪અબ્/ પરિશુષ્કબસ્તિશીર્ષૈઃ ધનરહિતા દુર્ભગાશ્ચ વિજ્ઞેયાઃ ।
૬૭।૧૪ય્દ્/ કુસુમસમગન્ધશુક્રા વિજ્ઞાતવ્યા મહીપાલાઃ ॥ ॥

૬૭।૧૫અબ્/ મધુગન્ધે બહુવિત્તા મત્સ્યસગન્ધે બહૂનિ અપત્યાનિ ।
૬૭।૧૫ય્દ્/ તનુશુક્રઃ સ્ત્રીજનકો માંસસગન્ધો મહાભોગી ॥ ॥

૬૭।૧૬અબ્/ મદિરાગન્ધે યજ્વા ક્ષારસગન્ધે ચ રેતસિ દરિદ્રઃ ।
૬૭।૧૬ય્દ્/ શીઘ્રં મૈથુનગામી દીર્ઘાયુઃ અતોઽન્યથા અલ્પાયુઃ ॥ ॥

૬૭।૧૭અબ્/ નિઃસ્વોઽતિસ્થૂલસ્ફિક્ સમાંસલસ્ફિક્ સુખાન્વિતો ભવતિ ।
૬૭।૧૭ય્દ્/ વ્યાઘ્રાન્તોઽધ્યર્ધસ્ફિગ્ મણ્ડૂકસ્ફિગ્ નરાધિપતિઃ ॥ ॥

૬૭।૧૮અબ્/ સિંહકટિઃ મનુજેન્દ્રઃ કપિકરભકટિઃ ધનૈઃ પરિત્યક્તઃ ।
૬૭।૧૮ય્દ્/ સમજઠરા ભોગયુતા ઘટપિઠરનિભોદરા નિઃસ્વાઃ ॥ ॥

૬૭।૧૯અબ્/ અવિકલપાર્શ્વા ધનિનો નિમ્નૈઃ વક્રૈશ્ચ ભોગસન્ત્યક્તાઃ ।
૬૭।૧૯ય્દ્/ સમકુક્ષા ભોગાઢ્યા નિમ્નાભિઃ ભોગપરિહીનાઃ ॥ ॥

૬૭।૨૦અબ્/ ઉન્નતકુક્ષાઃ ક્ષિતિપાઃ કુટિલાઃ સ્યુઃ માનવા વિષમકુક્ષાઃ ।

૬૭।૨૦ય્દ્/ સર્પોદરા દરિદ્રા ભવન્તિ બહ્વાશિનશ્ચૈવ ॥ ॥

૬૭।૨૧અબ્/ પરિમણ્ડલૌન્નતાભિઃ વિસ્તીર્ણાભિશ્ચ નાભિભિઃ સુખિનઃ ।
૬૭।૨૧ય્દ્/ અલ્પા (સ્વલ્પા) ત્વદૃશ્યનિમ્ના નાભિઃ ક્લેશાવહા ભવતિ ॥ ॥

૬૭।૨૨અબ્/ વલિમધ્યગતા વિષમા શૂલાદ્ બાધાં (શૂલાબાધં) કરોતિ નૈસ્વયં (નૈઃસ્વ્યં) ચ ।
૬૭।૨૨ય્દ્/ શાઠ્યં વામાવર્તા કરોતિ મેધાં પ્રદક્ષિણતઃ ॥ ॥

૬૭।૨૩અબ્/ પાર્શ્વાયતા ચિરાયુષમુપરિષ્ટાગઈશ્વરં ગવાઢ્યમધઃ ।
૬૭।૨૩ય્દ્/ શતપત્રકર્ણિકાભા નાભિઃ મનુજેશ્વરં કુરુતે ॥ ॥

૬૭।૨૪અબ્/ શસ્ત્રાન્તં સ્ત્રીભોગિનમાચાર્યં બહુસુતં યથાસંખ્યમ્ ।
૬૭।૨૪ય્દ્/ એકદ્વિત્રિચતુર્ભિઃ વલિભિઃ વિન્દ્યાદ્ નૃપં ત્વવલિમ્ ॥ ॥

૬૭।૨૫અબ્/ વિષમવલયો મનુષ્યા ભવન્ત્યગમ્યા અભિગામિનઃ પાપાઃ ।
૬૭।૨૫ય્દ્/ ઋજુવલયઃ સુખભાજઃ પરદારદ્વેષિણશ્ચૈવ ॥ ॥

૬૭।૨૬અબ્/ માંસલમૃદુભિઃ પાર્શ્વૈઃ પ્રદક્ષિણાવર્તરોમભિઃ ભૂપાઃ ।
૬૭।૨૬ય્દ્/ વિપરીતૈઃ નિર્દ્રવ્યાઃ સુખપરિહીનાઃ પરપ્રેષ્યાઃ ॥ ॥

૬૭।૨૭અબ્/ સુભગા ભવન્ત્યનુદ્બધ્ધ (અનુબધ્ધ) ચૂચુકા નિર્ધના વિષમદીર્ઘૈઃ ।
૬૭।૨૭ય્દ્/ પીનૌપચિતનિમગ્નૈઃ ક્ષિતિપતયશ્ચૂચુકૈઃ સુખિનઃ ॥ ॥

૬૭।૨૮અબ્/ હૃદયં સમુન્નતં પૃથુ ન વેપનં માંસલં ચ નૃપતીનામ્ ।
૬૭।૨૮ય્દ્/ અધનાનાં વિપરીતં ખરરોમચિતં શિરાલં ચ ॥ ॥

૬૭।૨૯અબ્/ સમવક્ષસોઽર્થવન્તઃ પીનૈઃ શૂરા હિ (શૂરાઃ ત્વ્) અકિંચનાઃ તનુભિઃ ।
૬૭।૨૯ય્દ્/ વિષમં વક્ષો યેષાં તે નિઃસ્વાઃ શસ્ત્રનિધનાશ્ચ ॥ ॥

૬૭।૩૦અબ્/ વિષમૈઃ વિષમો જત્રુભિઃ અર્થવિહીનોઽસ્થિસન્ધિપરિણદ્ધૈઃ ।
૬૭।૩૦ય્દ્/ ઉન્નતજત્રુઃ ભોગી (ભાગી) નિમ્નૈઃ નિઃસ્વોઽર્થવાન્ પીનૈઃ ॥ ॥

૬૭।૩૧અબ્/ ચિપિટગ્રીવો નિઃસ્વઃ શુષ્કા સશિરા ચ યસ્ય વા ગ્રીવા ।
૬૭।૩૧ય્દ્/ મહિષગ્રીવઃ શૂરઃ શસ્ત્રાન્તો વૃષસમગ્રીવઃ ॥ ॥

૬૭।૩૨અબ્/ કંબુગ્રીવો રાજા પ્રલંબકણ્ઠઃ પ્રભક્ષણો ભવતિ ।
૬૭।૩૨ય્દ્/ પૃષ્ઠમભગ્નમરોમશમર્થવતામશુભદમતોઽન્યત્ ॥ ॥

૬૭।૩૩અબ્/ અસ્વેદનપીનૌન્નતસુગન્ધ (સુગન્ધિ) સમરોમસંકુલાઃ કક્ષાઃ ।
૬૭।૩૩ય્દ્/ વિજ્ઞાતવ્યા ધનિનામતોઽન્યથાર્થૈઃ વિહીનાનામ્ ॥ ॥

૬૭।૩૪અબ્/ નિર્માંસૌ રોમચિતૌ ભગ્નાવલ્પૌ ચ નિર્ધનસ્યાંસૌ ।
૬૭।૩૪ચ્દ્/ વિપુલાવવ્યુચ્છિન્નૌ સુશ્લિષ્ટૌ સૌખ્યવીર્યવતામ્ ॥ ॥

૬૭।૩૫અબ્/ કરિકરસદૃશૌ વૃત્તાવાજાન્વવલંબિનૌ સમૌ પીનૌ ।
૬૭।૩૫ચ્દ્/ બાહૂ પૃથિવીશાનામધનાનાં (અધમાનાં) રોમશૌ હ્રસ્વૌ ॥ ॥

૬૭।૩૬અબ્/ હસ્તાંગુલયો દીર્ઘાશ્ચિરાયુષામવલિતાશ્ચ સુભગાનામ્ ।
૬૭।૩૬ચ્દ્/ મેધાવિનામ્ ચ સૂક્ષ્માશ્ચિપિટાઃ પરકર્મનિરતાનામ્ ॥ ॥

૬૭।૩૭અબ્/ સ્થૂલાભિઃ ધનરહિતા બહિર્નતાભિશ્ચ શસ્ત્રનિર્યાણાઃ ।
૬૭।૩૭ચ્દ્/ કપિસદૃશકરા ધનિનો વ્યાઘ્રૌપમપાણયઃ પાપાઃ ॥ ॥

૬૭।૩૮અબ્/ મણિબન્ધનૈઃ નિગૂઢૈઃ દૃઢૈશ્ચ સુશ્લિષ્ટસન્ધિભિઃ ભૂપાઃ ।
૬૭।૩૮ચ્દ્/ હીનૈઃ હસ્તચ્છેદઃ શ્લથૈઃ સશબ્દૈશ્ચ નિર્દ્રવ્યાઃ ॥ ॥

૬૭।૩૯અબ્/ પિતૃવિત્તેન વિહીના ભવન્તિ નિમ્નેન કરતલેન નરાઃ ।
૬૭।૩૯ચ્દ્/ સંવૃતનિમ્નૈઃ ધનિનઃ પ્રોત્તાનકરાશ્ચ દાતારઃ ॥ ॥

૬૭।૪૦અબ્/ વિષમૈઃ વિષમા નિઃસ્વાશ્ચ કરતલૈઃ ઈશ્વરાઃ (ઈશ્વરાઃ) તુ લાક્ષાભૈઃ ।
૬૭।૪૦ચ્દ્/ પીતૈઃ અગમ્યવનિતાભિગામિનો નિર્ધના રૂક્ષૈઃ ॥ ॥

૬૭।૪૧અબ્/ તુષસદૃશનખાઃ ક્લીબાશ્ચિપિટૈઃ સ્ફુટિતૈશ્ચ વિત્તસન્ત્યક્તાઃ ।
૬૭।૪૧ચ્દ્/ કુનખવિવર્ણૈઃ પરતર્કુકાશ્ચ તામ્રૈશ્ચમૂપતયઃ ॥ ॥

૬૭।૪૨અબ્/ અંગુષ્ઠયવૈઃ આઢ્યાઃ સુતવન્તો અંગુષ્ઠમૂલજૈશ્ચ યવૈઃ (મૂલગૈશ્ચ યવઃ) ।
૬૭।૪૨ચ્દ્/ દીર્ઘાંગુલિપર્વાણઃ સુભગા દીર્ઘાયુષશ્ચૈવ ॥ ॥

૬૭।૪૩અબ્/ સ્નિગ્ધા નિમ્ના રેખા ધનિનાં તદ્વ્યત્યયેન નિઃસ્વાનામ્ ।
૬૭।૪૩ચ્દ્/ વિરલાંગુલયો નિઃસ્વા ધનસંચયિનો ઘનાંગુલયઃ ॥ ॥

૬૭।૪૪અબ્/ તિસ્રો રેખા મણિબન્ધનોત્થિતાઃ કરતલોપગા નૃપતેઃ ।
૬૭।૪૪ચ્દ્/ મીનયુગાંકિતપાણિઃ નિત્યં સત્રપ્રદો ભવતિ ॥ ॥

૬૭।૪૫અબ્/ વજ્રાકારા ધનિનાં વિદ્યાભાજાં ચ મીનપુચ્છનિભાઃ ।
૬૭।૪૫ચ્દ્/ શંખ આતપત્રશિવિકાગજાશ્વપદ્મૌપમા નૃપતેઃ ॥ ॥

૬૭।૪૬અબ્/ કલશમૃણાલપતા અકાંકુશૌપમાભિઃ ભવન્તિ નિધિપાલાઃ ।
૬૭।૪૬ચ્દ્/ દામનિભાભિશ્ચ આઢ્યાઃ સ્વસ્તિકરૂપાભિઃ ઐશ્વર્યમ્ ॥ ॥

૬૭।૪૭અબ્/ ચક્રાસિપરશુતોમરશક્તિધનુઃકુન્તસન્નિભા રેખાઃ ।
૬૭।૪૭ચ્દ્/ કુર્વન્તિ ચમૂનાથં યજ્વાનમુલૂખલાકારાઃ ॥ ॥

૬૭।૪૮અબ્/ મકરધ્વજકોષ્ઠાગારસન્નિભાભિઃ મહાધનોપેતાઃ ।
૬૭।૪૮ચ્દ્/ વેદીનિભેન ચૈવાગ્નિહોત્રિણો બ્રહ્મતીર્થેન ॥ ॥

૬૭।૪૯અબ્/ વાપીદેવકુલાદ્યૈઃ ધર્મં કુરુવન્તિ ચ ત્રિકોણાભિઃ ।
૬૭।૪૯ચ્દ્/ અંગુષ્ઠમૂલરેખાઃ પુત્રાઃ સ્યુઃ દારિકાઃ સૂક્ષ્માઃ ॥ ॥

૬૭।૫૦અબ્/ રેખાઃ પ્રદેશિનિગતાઃ (ગાઃ) શતાયુષં કલ્પનીયમૂનાભિઃ ।
૬૭।૫૦ચ્દ્/ છિન્નાભિઃ દ્રુમપતનં બહુરેખારેખિણો નિઃસ્વાઃ ॥ ॥

૬૭।૫૧અબ્/ અતિકૃશદીર્ઘૈશ્ચિબુકૈઃ નિર્દ્રવ્યા માંસલૈઃ ધનોપેતાઃ ।
૬૭।૫૧ચ્દ્/ વિંબ (બિંબ) ઉપમૈઃ અવક્રૈઃ અધરૈઃ ભૂપાઃ તનુભિઃ અસ્વાઃ ॥ ॥

૬૭।૫૨અબ્/ ઓષ્ઠૈઃ સ્ફુટિતવિખણ્ડિતવિવર્ણરૂક્ષૈશ્ચ ધનપરિત્યક્તાઃ ।
૬૭।૫૨ચ્દ્/ સ્નિગ્ધા ઘનાશ્ચ દશનાઃ સુતીક્ષ્ણદંષ્ટ્રાઃ સમાશ્ચ શુભાઃ ॥ ॥

૬૭।૫૩અબ્/ જિહ્વા રક્તા દીર્ઘા શ્લક્ષ્ણા સુસમા ચ ભોગિનો (ભોગિનાં) જ્ઞેયા ।
૬૭।૫૩ચ્દ્/ શ્વેતા કૃષ્ણા પરુષા નિર્દ્રવ્યાણાં તથા તાલુ ॥ ॥

૬૭।૫૪અબ્/ વક્ત્રં સૌમ્યં સંવૃતમમલં શ્લક્ષ્ણં સમં ચ ભૂપાનામ્ ।
૬૭।૫૪ચ્દ્/ વિપરીતં ક્લેશભુજાં મહામુખં દુર્ભગાણાં ચ ॥ ॥

૬૭।૫૫અબ્/ સ્ત્રીમુખમનપત્યાનાં શાઠ્યવતાં મણ્ડલં પરિજ્ઞેયમ્ ।
૬૭।૫૫ચ્દ્/ દીર્ઘં નિર્દ્રવ્યાણાં ભીરુમુખાઃ પાપકર્માણઃ ॥ ॥

૬૭।૫૬અબ્/ ચતુરસ્રં (ચતુરશ્રં) ધૂર્તાનાં નિમ્નં વક્રં (વક્ત્રં) ચ તનયરહિતાનામ્ ।
૬૭।૫૬ચ્દ્/ કૃપણાનામતિહ્રસ્વં સમ્પૂર્ણં ભોગિનાં કાન્તમ્ ॥ ॥

૬૭।૫૭અબ્/ અસ્ફુટિતાગ્રં સ્નિગ્ધં શ્મશ્રુ શુભં મૃદુ ચ સન્નતં ચૈવ ।
૬૭।૫૭ચ્દ્/ રક્તૈઃ પરુષૈશ્ચૌરાઃ શ્મશ્રુભિઃ અલ્પૈશ્ચ વિજ્ઞેયાઃ ॥ ॥

૬૭।૫૮અબ્/ નિર્માંસૈઃ કર્ણૈઃ પાપમૃત્યવશ્ચર્પટૈઃ સુબહુભોગાઃ ।
૬૭।૫૮ચ્દ્/ કૃપણાશ્ચ હ્રસ્વકર્ણાઃ શંકુશ્રવણાશ્ચમૂપતયઃ (ચ ભૂપતયઃ) ॥ ॥

૬૭।૫૯અબ્/ રોમશકર્ણા દીર્ઘાયુષશ્ચ (તુ) ધનભાગિનો વિપુલકર્ણાઃ ।
૬૭।૫૯ચ્દ્/ ક્રૂરાઃ શિરાવનદ્ધૈઃ વ્યાલંબૈઃ માંસલૈઃ સુખિનઃ ॥ ॥

૬૭।૬૦અબ્/ ભોગી ત્વનિમ્નગણ્ડો મન્ત્રી સમ્પૂર્ણમાંસગણ્ડો યઃ ।
૬૭।૬૦ચ્દ્/ સુખભાક્ શુકસમનાસશ્ચિરજીવી શુષ્કનાસશ્ચ ॥ ॥

૬૭।૬૧અબ્/ છિન્નાનુરૂપયા અગમ્યગામિનો દીર્ઘયા તુ સૌભાગ્યમ્ ।

૬૭।૬૧ચ્દ્/ આકુંચિતયા ચૌરઃ સ્ત્રીમૃત્યુઃ સ્યાગિપિટનાસઃ ॥ ॥

૬૭।૬૨અબ્/ ધનિનોઽગ્રવક્રનાસા દક્ષિણવિનતાઃ (વક્રાઃ) પ્રભક્ષણાઃ ક્રૂરાઃ ।
૬૭।૬૨ચ્દ્/ ઋજ્વી સ્વલ્પચ્છિદ્રા સુપુટા નાસા સભાગ્યાનામ્ ॥ ॥

૬૭।૬૩અબ્/ ધનિનાં ક્ષુતં સકૃદ્ દ્વિત્રિપિણ્ડિતં હ્લાદિ સાનુનાદં ચ ।
૬૭।૬૩ચ્દ્/ દીર્ઘાયુષાં પ્રમુક્તં વિજ્ઞેયં સંહતં ચૈવ ॥ ॥

૬૭।૬૪અબ્/ પદ્મદલાભૈઃ ધનિનો રક્તાન્તવિલોચનાઃ (વિલોચનાઃ) શ્રિયઃ ભાજઃ ।
૬૭।૬૪ચ્દ્/ મધુપિંગલૈઃ મહાર્થા માર્જારવિલોચનૈઃ પાપાઃ ॥ ॥

૬૭।૬૫અબ્/ હરિણાક્ષા મણ્ડલલોચનાશ્ચ જિહ્મૈશ્ચ લોચનૈશ્ચૌરાઃ ।
૬૭।૬૫ચ્દ્/ ક્રૂરાઃ કેકરનેત્રા ગજસદૃશવિલોચનાશ્ચમૂપતયઃ (દૃશશ્ચ ભૂપતયઃ) ॥ ॥

૬૭।૬૬અબ્/ ઐશ્વર્યમ્ ગંભીરૈઃ નીલોત્પલકાન્તિભિશ્ચ વિદ્વાંસઃ ।
૬૭।૬૬ચ્દ્/ અતિકૃષ્ણતારકાણામક્ષ્નામુત્પાટનં ભવતિ ॥ ॥

૬૭।૬૭અબ્/ મન્ત્રિત્વં સ્થૂલદૃશાં શ્યાવાક્ષાણાં ભવતિ સૌભાગ્યમ્ ।
૬૭।૬૭ચ્દ્/ દીના દૃગ્ નિઃસ્વાનાં સ્નિગ્ધા વિપુલાર્થભોગવતામ્ ॥ ॥

૬૭।૬૮અબ્/ અભ્યુન્નતાભિઃ અલ્પાયુષો વિશાલૌન્નતાભિઃ અતિસુખિનઃ ।
૬૭।૬૮ચ્દ્/ વિષમભ્રુવો દરિદ્રા બાલેન્દુનતભ્રુવઃ સધનાઃ ॥ ॥

૬૭।૬૯અબ્/ દીર્ઘા અસંસક્તાભિઃ ધનિનઃ ખણ્ડાભિઃ અર્થપરિહીનાઃ ।
૬૭।૬૯ચ્દ્/ મધ્યવિનતભ્રુવો યે તે સક્તાઃ સ્ત્રીષ્વગમ્યાસુ ॥ ॥

૬૭।૭૦અબ્/ ઉન્નતવિપુલૈઃ શંખૈઃ ધનિનો (ધન્યા) નિમ્નૈઃ સુતાર્થસન્ત્યક્તાઃ ।
૬૭।૭૦ચ્દ્/ વિષમલલાટા વિધના ધનવન્તોઽર્ધેન્દુસદૃશેન ॥ ॥

૬૭।૭૧અબ્/ શુક્તિવિશાલૈઃ આચાર્યતા શિરાસન્તતૈઃ અધર્મરતાઃ ।
૬૭।૭૧ચ્દ્/ ઉન્નતશિરાભિઃ આઢ્યાઃ સ્વસ્તિકવત્ સંસ્થિતાભિશ્ચ ॥ ॥

૬૭।૭૨અબ્/ નિમ્નલલાટા વધબન્ધભાગિનઃ ક્રૂરકર્મનિરતાશ્ચ ।
૬૭।૭૨ચ્દ્/ અભ્યુન્નતૈશ્ચમૂપાઃ (ભૂપાઃ) કૃપણાઃ સ્યુઃ સંવૃત (સગ઼્કટ) લલાટાઃ ॥ ॥

૬૭।૭૩અબ્/ રુદિતમદીનમનશ્રુ સ્નિગ્ધં ચ શુભાવહં મનુષ્યાણામ્ ।
૬૭।૭૩ચ્દ્/ રૂક્ષં દીનં પ્રચુરાશ્રુ ચૈવ ન શુભપ્રદં પુંસામ્ ॥ ॥

૬૭।૭૪અબ્/ હસિતં શુભદમકંપં સનિમીલિતલોચનં તુ પાપસ્ય ।
૬૭।૭૪ચ્દ્/ દુષ્ટસ્ય (હૃષ્ટસ્ય) હસિતમસકૃત્ સોન્માદસ્યાસકૃત્ પ્રાન્તે ॥ ॥

૬૭।૭૫અબ્/ તિસ્રો રેખાઃ શતજીવિનાં લલાટાયતાઃ સ્થિતા યદિ તાઃ ।
૬૭।૭૫ય્દ્/ ચતસૃભિઃ અવનીશત્વં નવતિશ્ચાયુઃ સપંચાબ્દા ॥ ॥

૬૭।૭૬અબ્/ વિચ્છિન્નાભિશ્ચાગમ્યગામિનો નવતિઃ અપિ અરેખેણ ।
૬૭।૭૬ય્દ્/ કેશાન્તોપગતાભી રેખાભિઃ અશીતિવર્ષાયુઃ ॥ ॥

૬૭।૭૭અબ્/ પંચભિઃ આયુઃ સપ્તતિઃ એકાગ્રાવસ્થિતાભિઃ અપિ ષષ્ટિઃ ।
૬૭।૭૭ય્દ્/ બહુરેખેણ શતાર્ધં ચત્વારિંશગ વક્રાભિઃ ॥ ॥

૬૭।૭૮અબ્/ ભ્રૂલગ્નાભિઃ ત્રિંશદ્ (ત્રિંશભ્રૂલગ્નાભિઃ) વિંશતિકશ્ચૈવ વામવક્રાભિઃ ।
૬૭।૭૮ય્દ્/ ક્ષુદ્રાભિઃ સ્વલ્પાયુઃ ન્યૂનાભિશ્ચાન્તરે કલ્પ્યમ્ ॥ ॥

૬૭।૭૯અબ્/ પરિમણ્ડલૈઃ ગવાઢ્યાશ્છત્રાકારૈઃ શિરોભિઃ અવનીશાઃ ।
૬૭।૭૯ય્દ્/ ચિપિટૈઃ પિતૃમાતૃઘ્નાઃ કરોટિશિરસાં ચિરાન્ મૃત્યુઃ ॥ ॥

૬૭।૮૦અબ્/ ઘટમૂર્ધા અધ્વાનરુચિઃ દ્વિમસ્તકઃ પાપકૃદ્ ધનૈઃ ત્યક્તઃ ।
૬૭।૮૦ય્દ્/ નિમ્નં તુ શિરો મહતાં બહુનિમ્નમનર્થદં ભવતિ ॥ ॥

૬૭।૮૧અબ્/ એકૈકભવૈઃ સ્નિગ્ધૈઃ કૃષ્ણૈઃ આકુંચિતૈઃ અભિન્નાગ્રૈઃ ।
૬૭।૮૧ય્દ્/ મૃદુભિઃ ન ચાતિબહુભિઃ કેશૈઃ સુખભાગ્ નરેન્દ્રો વા ॥ ॥

૬૭।૮૨અબ્/ બહુમૂલવિષમકપિલાઃ સ્થૂલસ્ફુટિતાગ્રપરુષહ્રસ્વાશ્ચ ।
૬૭।૮૨ય્દ્/ અતિકુટિલાશ્ચાતિઘનાશ્ચ મૂર્ધજા વિત્તહીનાનામ્ ॥ ॥

૬૭।૮૩અબ્/ યદ્યદ્ ગાત્રં રૂક્ષં માંસવિહીનં શિરાવનદ્ધં ચ ।
૬૭।૮૩ય્દ્/ તત્તદનિષ્ટં પ્રોક્તં વિપરીતમતઃ શુભં સર્વમ્ ॥ ॥

૬૭।૮૪અબ્/ ત્રિષુ વિપુલો ગંભીરઃ ત્રિષ્વેવ ષડુન્નતશ્ચતુર્હ્રસ્વઃ ।
૬૭।૮૪ય્દ્/ સપ્તસુ રક્તો રાજા પંચસુ દીર્ઘશ્ચ સૂક્ષ્મશ્ચ ॥ ॥

૬૭।૮૫અ નાભી (નાભિઃ) સ્વરઃ સત્ત્વમિતિ પ્રશસ્તં (પ્રદિષ્ટં)
૬૭।૮૫બ્ ગંભીરમેતત્ ત્રિતયં નરાણામ્ ।
૬૭।૮૫ય્ ઉરો લલાટં વદનં ચ પુંસાં
૬૭।૮૫દ્ વિસ્તીર્ણમેતત્ ત્રિતયં પ્રશસ્તમ્ ॥ ॥

૬૭।૮૬અ વક્ષોઽથ કક્ષા નખનાસિકાસ્યં
૬૭।૮૬બ્ કૃકાટિકા ચેતિ ષડુન્નતાનિ ।
૬૭।૮૬ય્ હ્રસ્વાનિ ચત્વારિ ચ લિંગપૃષ્ઠં
૬૭।૮૬દ્ ગ્રીવા ચ જંઘે ચ હિતપ્રદાનિ ॥ ॥

૬૭।૮૭અ નેત્રાન્તપાદકરતાલ્વધરોષ્ઠજિહ્વા
૬૭।૮૭બ્ રક્તા નખાશ્ચ ખલુ સપ્ત સુખાવહાનિ ।
૬૭।૮૭ય્ સૂક્ષ્માણિ પંચ દશનાંગુલિપર્વકેશાઃ
૬૭।૮૭દ્ સાકં ત્વચા કરરુહા ન ચ (કરરુહાશ્ચ ન) દુઃખિતાનામ્ ॥ ॥

૬૭।૮૮અબ્/ હનુલોચનબાહુનાસિકાઃ સ્તનયોઃ અન્તરમત્ર પંચમમ્ ।
૬૭।૮૮ય્દ્/ ઇતિ દીર્ઘમિદં તુ પંચકં ન ભવત્યેવ નૃણામભૂભૃતામ્ ॥ ॥

૬૭।૮૯અ છાયા શુભાશુભફલાનિ નિવેદયન્તી
૬૭।૮૯બ્ લક્ષ્યા મનુષ્યપશુપક્ષિષુ લક્ષણજ્ઞૈઃ ।
૬૭।૮૯ય્ તેજોગુણાન્ બહિઃ અપિ પ્રવિકાશયન્તી
૬૭।૮૯દ્ દીપપ્રભા સ્ફટિકરત્નઘટસ્થિતેવ ॥ ॥

૬૭।૯૦અ સ્નિગ્ધદ્વિજત્વગ્નખરોમકેશાઃ (કેશ)
૬૭।૯૦બ્ છાયા સુગન્ધા ચ મહીસમુત્થા ।
૬૭।૯૦ય્ તુષ્ટ્યર્થલાભાભ્યુદયાન્ કરોતિ
૬૭।૯૦દ્ ધર્મસ્ય ચાહન્યહનિ પ્રવૃત્તિમ્ ॥ ॥

૬૭।૯૧અ સ્નિગ્ધા સિતાચ્છહરિતા નયનાભિરામા
૬૭।૯૧બ્ સૌભાગ્યમાર્દવસુખાભ્યુદયાન્ કરોતિ ।
૬૭।૯૧ય્ સર્વાર્થસિદ્ધિજનની જનનીવ ચ આપ્યા
૬૭।૯૧દ્ છાયા ફલં તનુભૃતાં શુભમાદધાતિ ॥ ॥

૬૭।૯૨અ ચણ્ડા અધૃષ્યા પદ્મહેમાગ્નિવર્ણા
૬૭।૯૨બ્ યુક્તા તેજોવિક્રમૈઃ સપ્રતાપૈઃ ।
૬૭।૯૨ય્ આગ્નેયીતિ પ્રાણિનાં સ્યાજ્જયાય
૬૭।૯૨દ્ ક્ષિપ્રં સિદ્ધિં વાંછિતાર્થસ્ય દત્તે (ધત્તે) ॥ ॥

૬૭।૯૩અ મલિનપરુષકૃષ્ણા પાપગન્ધાનિલોત્થા
૬૭।૯૩બ્ જનયતિ વધબન્ધવ્યાધ્યનર્થાર્થનાશાન્ ।
૬૭।૯૩ય્ સ્ફટિકસદૃશરૂપા ભાગ્યયુક્તાત્યુદારા
૬૭।૯૩દ્ નિધિઃ ઇવ ગગનોત્થા શ્રેયસાં સ્વચ્છવર્ણા ॥ ॥

૬૭।૯૪અ છાયાઃ ક્રમેણ કુજલાગ્ન્યનિલાંબરોત્થાઃ
૬૭।૯૪બ્ કેચિદ્ વદન્તિ દશ તાશ્ચ યથાનુપૂર્વ્યા ।
૬૭।૯૪ય્ સૂર્યાબ્જનાભપુરુહૂતયમૌડુપાનાં
૬૭।૯૪દ્ તુલ્યાઃ તુ લક્ષણફલૈઃ ઇતિ તત્સમાસઃ ॥ ॥

૬૭।૯૫અબ્/ કરિવૃષરથૌઘભેરીમૃદંગસિંહાભ્ર (અબ્દ) નિઃસ્વના ભૂપાઃ ।
૬૭।૯૫ચ્દ્/ ગર્દભજર્જરરૂક્ષસ્વરાશ્ચ ધનસૌખ્યસન્ત્યક્તાઃ ॥ ॥

૬૭।૯૬અબ્/ સપ્ત ભવન્તિ ચ સારા મેદોમજ્જાત્વગસ્થિશુક્રાણિ ।
૬૭।૯૬ચ્દ્/ રુધિરં માંસં ચેતિ પ્રાણભૃતાં તત્સમાસફલમ્ ॥ ॥

૬૭।૯૭અબ્/ તાલ્વોષ્ઠદન્તપાલીજિહ્વાનેત્રાન્તપાયુકરચરણૈઃ ।
૬૭।૯૭ચ્દ્/ રક્તે (રક્તૈઃ) તુ રક્તસારા બહુસુખવનિતાર્થપુત્રયુતાઃ ॥ ॥

૬૭।૯૮અબ્/ સ્નિગ્ધત્વક્કા ધનિનો મૃદુભિઃ સુભગા વિચક્ષણાઃ તનુભિઃ ।
૬૭।૯૮ચ્દ્/ મજ્જામેદઃસારાઃ સુશરીરાઃ પુત્રવિત્તયુતાઃ (યુક્તાઃ) ॥ ॥

૬૭।૯૯અબ્/ સ્થૂલાસ્થિઃ અસ્થિસારો બલવાન્ વિદ્યાન્તગઃ સુરૂપશ્ચ ।
૬૭।૯૯ચ્દ્/ બહુગુરુશુક્રાઃ સુભગા વિદ્વાંસો રૂપવન્તશ્ચ ॥ ॥

૬૭।૧૦૦અબ્/ ઉપચિતદેહો વિદ્વાન્ ધની સુરૂપશ્ચ માંસસારો યઃ ।
૬૭।૧૦૦ચ્દ્/ સંઘાતા ઇતિ ચ સુશ્લિષ્ટસન્ધિતા સુખભુજો જ્ઞેયા ॥ ॥

૬૭।૧૦૧અબ્/ સ્નેહઃ પંચસુ લક્ષ્યો વાગ્જિહ્વાદન્તનેત્રનખસંસ્થઃ ।
૬૭।૧૦૧ચ્દ્/ સુતધનસૌભાગ્યયુતાઃ સ્નિગ્ધૈઃ તૈઃ નિર્ધના રૂક્ષૈઃ ॥ ॥

૬૭।૧૦૨અબ્/ દ્યુતિમાન્ વર્ણસ્નિગ્ધઃ (વર્ણઃ સ્નિગ્ધઃ) ક્ષિતિપાનામ્ મધ્યમઃ સુતાર્થવતામ્ ।
૬૭।૧૦૨ચ્દ્/ રૂક્ષો ધનહીનાનાં શુદ્ધઃ શુભદો ન સંકીર્ણઃ ॥ ॥

૬૭।૧૦૩અબ્/ સાધ્યમનૂકં વક્ત્રાદ્ ગોવૃષશાર્દૂલસિંહગરુડમુખાઃ ।
૬૭।૧૦૩ચ્દ્/ અપ્રતિહતપ્રતાપા જિતરિપવો માનવેન્દ્રાશ્ચ ॥ ॥

૬૭।૧૦૪અબ્/ વાનરમહિષવરાહાજતુલ્યવદનાઃ શ્રુતાર્થ (સુતાર્થ) સુખભાજઃ ।
૬૭।૧૦૪ચ્દ્/ ગર્દભકરભપ્રતિમૈઃ મુખૈઃ શરીરૈશ્ચ નિઃસ્વસુખાઃ ॥ ॥

૬૭।૧૦૫અબ્/ અષ્ટશતં ષણ્ણવતિઃ (ષણવતિઃ) પરિમાણં ચતુરશીતિઃ ઇતિ પુંસામ્ ।
૬૭।૧૦૫ચ્દ્/ ઉત્તમસમહીનાનામંગુલસંખ્યા સ્વમાનેન ॥ ॥

૬૭।૧૦૬અબ્/ ભારાર્ધતનુઃ સુખભાક્ તુલિતોઽતો દુઃખભાગ્ ભવત્યૂનઃ ।
૬૭।૧૦૬ચ્દ્/ ભારોઽતિવાઢ્યાનામધ્યર્ધઃ સર્વધરણીશઃ ॥ ॥

૬૭।૧૦૭અબ્/ વિંશતિવર્ષા નારી પુરુષઃ ખલુ પંચવિંશતિભિઃ અબ્દૈઃ ।
૬૭।૧૦૭ચ્દ્/ અર્હતિ માનોન્માનં જીવિતભાગે ચતુર્થે વા ॥ ॥

૬૭।૧૦૮અબ્/ ભૂજલશિખ્યનિલાંબરસુરનરરક્ષઃ પિશાચકતિરશ્ચામ્ ।

૬૭।૧૦૮ય્દ્/ સત્ત્વેન ભવતિ પુરુષો લક્ષણમેતદ્ ભવતિ તેષાં (એષાં) ॥ ॥

૬૭।૧૦૯અ મહીસ્વભાવઃ શુભપુષ્પગન્ધઃ
૬૭।૧૦૯બ્ સંભોગવાન્ સુશ્વસનઃ સ્થિરશ્ચ ।
૬૭।૧૦૯ય્ તોયસ્વભાવો બહુતોયપાયી
૬૭।૧૦૯દ્ પ્રિયાભિભાષી (અભિલાષી) રસભાજનઃ (ભોજનઃ) ચ ॥ ॥

૬૭।૧૧૦અ અગ્નિપ્રકૃત્યા ચપલોऽતિતીક્ષ્ણશ્
૬૭।૧૧૦બ્ ચણ્ડઃ ક્ષુધાલુઃ બહુભોજનશ્ચ ।
૬૭।૧૧૦ય્ વાયોઃ સ્વભાવેન ચલઃ કૃશશ્ચ
૬૭।૧૧૦દ્ ક્ષિપ્રં ચ કોપસ્ય વશં પ્રયાતિ ॥ ॥

૬૭।૧૧૧અ ખપ્રકૃતિઃ નિપુણો વિવૃતાસ્યઃ
૬૭।૧૧૧બ્ શબ્દગતેઃ કુશલઃ સુશિરાંગઃ ।
૬૭।૧૧૧ય્ ત્યાગયુતઃ (ત્યાગયુતો) પુરુષો મૃદુકોપઃ
૬૭।૧૧૧દ્ સ્નેહરતશ્ચ ભવેત્ સુરસત્ત્વઃ ॥ ॥

૬૭।૧૧૨અબ્/ મર્ત્યસત્ત્વસંયુતો ગીતભૂષણપ્રિયઃ ।
૬૭।૧૧૨ય્દ્/ સંવિભાગશીલવાન્ નિત્યમેવ માનવઃ ॥ ॥

૬૭।૧૧૩અ તીક્ષ્ણપ્રકોપઃ ખલચેષ્ટિતશ્ચ
૬૭।૧૧૩બ્ પાપશ્ચ સત્ત્વેન નિશાચરાણામ્ ।
૬૭।૧૧૩ય્ પિશાચસત્ત્વશ્ચપલો મલાક્તો
૬૭।૧૧૩દ્ બહુપ્રલાપી ચ સમુલ્બણાંગઃ ॥ ॥

૬૭।૧૧૪અ ભીરુઃ ક્ષુધાલુઃ બહુભુક્ ચ યઃ સ્યાદ્
૬૭।૧૧૪બ્ જ્ઞેયશ્ચ (સ) સત્ત્વેન નરઃ તિરશ્ચામ્ ।
૬૭।૧૧૪ય્ એવં નરાણાં પ્રકૃતિઃ પ્રદિષ્ટા
૬૭।૧૧૪દ્ યલ્લક્ષણજ્ઞાઃ પ્રવદન્તિ સત્ત્વમ્ ॥ ॥

૬૭।૧૧૫અ શાર્દૂલહંસસમદદ્વિપગોપતીનાં
૬૭।૧૧૫બ્ તુલ્યા ભવન્તિ ગતિભિઃ શિખિનાં ચ ભૂપાઃ ।
૬૭।૧૧૫ય્ યેષાં ચ શબ્દરહિતં સ્તિમિતં ચ યાતં
૬૭।૧૧૫દ્ તેऽપીશ્વરા દ્રુતપરિપ્લુતગા દરિદ્રાઃ ॥ ॥

૬૭।૧૧૬અ શ્રાન્તસ્ય યાનમશનં ચ બુભુક્ષિતસ્ય
૬૭।૧૧૬બ્ પાનં તૃષાપરિગતસ્ય ભયેષુ રક્ષા ।

૬૭।૧૧૬ચ્ એતાનિ યસ્ય પુરુષસ્ય ભવન્તિ કાલે
૬૭।૧૧૬દ્ ધન્યં વદન્તિ ખલુ તં નરલક્ષણજ્ઞાઃ ॥ ॥

૬૮।૧૧૭અબ્/ પુરુષલક્ષણમુક્તમિદં મયા મુનિમતાનિ અવલોક્ય સમાસતઃ ।
૬૮।૧૧૭ચ્દ્/ ઇદમધીત્ય નરો નૃપસમ્મતો ભવતિ સર્વજનસ્ય ચ વલ્લભઃ ॥ ॥

ऽએપરતે અધ્યાય ૬૮ પંચમનુષ્યવિભાગાધ્યાયઃ
૬૮।૧અબ્/ તારાગ્રહૈઃ બલયુતૈઃ સ્વક્ષેત્રસ્વૌચ્ચગૈશ્ચતુષ્ટયગૈઃ ।
૬૮।૧ચ્દ્/ પંચ પુરુષાઃ પ્રશસ્તા જાયન્તે તાન્ અહં વક્ષ્યે ॥ ॥

૬૮।૨અબ્/ જીવેન ભવતિ હંસઃ સૌરેણ શશઃ કુજેન રુચકશ્ચ ।
૬૮।૨ચ્દ્/ ભદ્રો બુધેન બલિના માલવ્યો દૈત્યપૂજ્યેન ॥ ॥

૬૮।૩અબ્/ સત્ત્વમહીનં સૂર્યાત્શારીરં માનસં ચ ચન્દ્રબલાત્ ।
૬૮।૩ચ્દ્/ યદ્ રાશિભેદયુક્તાવેતૌ તલ્લક્ષણઃ સ પુમાન્ ॥ ॥

૬૮।૪અબ્/ તદ્ધાતુમહાભૂતપ્રકૃતિદ્યુતિવર્ણસત્ત્વરૂપાદ્યૈઃ ।
૬૮।૪ચ્દ્/ અબલરવીન્દુયુતૈઃ તૈઃ સંકીર્ણા લક્ષણૈઃ પુરુષાઃ ॥ ॥

૬૮।૫અબ્/ ભૌમાત્ સત્ત્વં ગુરુતા બુધાત્ સુરેજ્યાત્ સ્વરઃ સિતાત્ સ્નેહઃ ।
૬૮।૫ચ્દ્/ વર્ણઃ સૌરાદેષાં ગુણદોષૈઃ સાધ્વસાધુત્વમ્ ॥ ॥

૬૮।૬અબ્/ સંકીર્ણાઃ સ્યુઃ ન નૃપા દશાસુ તેષાં ભવન્તિ સુખભાજઃ ।
૬૮।૬ચ્દ્/ રિપુગૃહનીચૌચ્ચચ્યુતસત્પાપનિરીક્ષણૈઃ ભેદાઃ (ભેદઃ) ॥ ॥

૬૮।૭અબ્/ ષણ્ણવતિઃ અંગુલાનાં વ્યાયામો દીર્ઘતા ચ હંસસ્ય ।
૬૮।૭ચ્દ્/ શશરુચકભદ્રમાલવ્યસંજ્ઞિતાઃ ત્ર્યંગુલવિવૃદ્ધ્યા ॥ ॥

૬૮।૮અ યઃ સાત્ત્વિકઃ તસ્ય દયા સ્થિરત્વં
૬૮।૮બ્ સત્ત્વાર્જવં બ્રાહ્મણદેવભક્તિઃ ।
૬૮।૮ચ્ રજો અધિકઃ કાવ્યકલાક્રતુસ્ત્રી-
૬૮।૮દ્ સંસક્તચિત્તઃ પુરુષોઽતિશૂરઃ ॥ ॥

૬૮।૯અ તમોઽધિકો વંચયિતા પરેષાં
૬૮।૯બ્ મૂર્ખોઽલસઃ ક્રોધપરોઽતિનિદ્રઃ ।
૬૮।૯ચ્ મિશ્રૈઃ ગુણૈઃ સત્ત્વરજસ્તમોભિઃ
૬૮।૯દ્ મિશ્રાઃ તુ તે સપ્ત સહ પ્રભેદૈઃ ॥ ॥

૬૮।૧૦અ માલવ્યો નાગનાસઃ સમભુજ (નાગનાસસમભુજ) યુગલો જાનુસમ્પ્રાપ્તહસ્તો

૬૮।૧૦બ્ માંસૈઃ પૂર્ણાંગસન્ધિઃ સમરુચિરતનુઃ મધ્યભાગે કૃશશ્ચ ।
૬૮।૧૦ચ્ પંચાષ્ટૌ ચ ઊર્ધ્વમાસ્યં શ્રુતિવિવરમપિ ત્ર્યંગુલોનં ચ તિર્યગ્
૬૮।૧૦દ્ દીપ્તાક્ષં સત્કપોલં સમસિતદશનં નાતિમાંસાધરોષ્ઠમ્ ॥ ॥

૬૮।૧૧અ માલવાન્ સ ભરુકચ્છસુરાષ્ટ્રાન્
૬૮।૧૧બ્ લાટસિન્ધુવિષયપ્રભૃતીંશ્ચ ।
૬૮।૧૧ચ્ વિક્રમાર્જિતધનોઽવતિ રાજા
૬૮।૧૧દ્ પારિયાત્રનિલયાન્ (નિલયઃ) કૃતબુદ્ધિઃ ॥ ॥

૬૮।૧૨અબ્/ સપ્તતિવર્ષો માલવ્યોઽયં ત્યક્ષ્યતિ સમ્યક્ પ્રાણાં તીર્થે ।
૬૮।૧૨ચ્દ્/ લક્ષણમેતત્ સમ્યક્ પ્રોક્તં શેષનરાણાં ચાતો વક્ષ્યે ॥ ॥

૬૮।૧૩અ ઉપચિતસમવૃત્તલંબબાહુઃ
૬૮।૧૩બ્ ભુજયુગલપ્રમિતઃ સમુચ્છ્રયોઽસ્ય ।
૬૮।૧૩ચ્ મૃદુતનુઘનરોમનદ્ધગણ્ડો
૬૮।૧૩દ્ ભવતિ નરઃ ખલુ લક્ષણેન ભદ્રઃ ॥ ॥

૬૮।૧૪અ ત્વક્ષુક્રસારઃ પૃથુપીનવક્ષાઃ
૬૮।૧૪બ્ સત્ત્વાધિકો વ્યાઘ્રમુખઃ સ્થિરશ્ચ ।
૬૮।૧૪ચ્ ક્ષમાન્વિતો ધર્મપરઃ કૃતજ્ઞો
૬૮।૧૪દ્ ગજેન્દ્રગામી બહુશાસ્ત્રવેત્તા ॥ ॥

૬૮।૧૫અ પ્રાજ્ઞો વપુષ્માન્ સુલલાટશંખઃ
૬૮।૧૫બ્ કલાસ્વભિજ્ઞો ધૃતિમાન્ સુકુક્ષિઃ ।
૬૮।૧૫ચ્ સરોજગર્ભદ્યુતિપાણિપાદો
૬૮।૧૫દ્ યોગી સુનાસઃ સમસંહતભ્રૂઃ ॥ ॥

૬૮।૧૬અ નવાંબુસિક્તાવનિપત્રકુંકુમ-
૬૮।૧૬બ્ દ્વિપેન્દ્રદાનાગુરુતુલ્યગન્ધતા ।
૬૮।૧૬ચ્ શિરોરુહાશ્ચએકજકૃષ્ણકુંચિતાઃ
૬૮।૧૬દ્ તુરંગનાગોપમગુહ્યગૂઢતા (ગૂઢગુહ્યતા) ॥ ॥

૬૮।૧૭અ હલમુશલગદાસિશંખચક્ર-
૬૮।૧૭બ્ દ્વિપમકરાબ્જરથાંકિતાંઘ્રિ (અન્ઘ્રિ) હસ્તઃ ।
૬૮।૧૭ચ્ વિભવમપિ જનોઽસ્ય બોભુજીતિ
૬૮।૧૭દ્ ક્ષમતિ હિ ન સ્વજનં સ્વતન્ત્રબુદ્ધિઃ ॥ ॥

૬૮।૧૮અ અંગુલાનિ નવતિશ્ચ ષડૂનાન્ય્-
૬૮।૧૮બ્ ઉચ્છ્રયેણ તુલયાપિ હિ ભારઃ ।
૬૮।૧૮ચ્ મધ્યદેશનૃપતિઃ યદિ પુષ્ટાશ્
૬૮।૧૮દ્ ત્ર્યાદયોઽસ્ય સકલાવનિનાથઃ ॥ ॥

૬૮।૧૯અબ્/ ભુક્ત્વા સમ્યગ્વસુધાં શૌર્યેણૌપાર્જિતામશીત્યબ્દઃ ।
૬૮।૧૯ચ્દ્/ તીર્થે પ્રાણાં ત્યક્ત્વા ભદ્રો દેવાલયં યાતિ ॥ ॥

૬૮।૨૦અ ઈષદ્દન્તુરકઃ તનુદ્વિજનખઃ કોશેક્ષણઃ શીઘ્રગો
૬૮।૨૦બ્ વિદ્યાધાતુવણિક્ક્રિયાસુ નિરતઃ સમ્પૂર્ણગણ્ડઃ શઠઃ ।
૬૮।૨૦ચ્ સેનાનીઃ પ્રિયમૈથુનઃ પરજનસ્ત્રીસક્તચિત્તશ્ચલઃ
૬૮।૨૦દ્ શૂરો માતૃહિતો વનાચલનદીદુર્ગેષુ સક્તઃ શશઃ ॥ ॥

૬૮।૨૧અ દીર્ઘો અંગુલાનાં શતમષ્ટહીનં
૬૮।૨૧બ્ સાશંકચેષ્ટઃ પરરન્ધ્રવિગ ।
૬૮।૨૧ચ્ સારોઽસ્ય મજ્જા નિભૃતપ્રચારઃ
૬૮।૨૧દ્ શશો હ્યતો (અયં) નાતિગુરુઃ પ્રદિષ્ટઃ ॥ ॥

૬૮।૨૨અ મધ્યે કૃશઃ ખેટકખંગવીણા
૬૮।૨૨બ્ પર્યંકમાલામુરજાનુરૂપાઃ ।
૬૮।૨૨ચ્ શૂલોપમાશ્ચ ઊર્ધ્વગતાશ્ચ રેખાઃ
૬૮।૨૨દ્ શશસ્ય પાદોપગતાઃ કરે વા ॥ ॥

૬૮।૨૩અ પ્રાત્યન્તિકો માણ્ડલિકોઽથવા અયં
૬૮।૨૩બ્ સ્ફિક્સ્રાવશૂલાભિભવાર્તમૂર્તિઃ ।
૬૮।૨૩ચ્ એવં શશઃ સપ્તતિહાયનોઽયં
૬૮।૨૩દ્ વૈવસ્વતસ્યાલયમભ્યુપૈતિ ॥ ॥

૬૮।૨૪અ રક્તં પીનકપોલમુન્નતનસં વક્ત્રં સુવર્ણોપમં
૬૮।૨૪બ્ વૃત્તં ચાસ્ય શિરોઽક્ષિણી મધુનિભે સર્વે ચ રક્તા નખાઃ ।
૬૮।૨૪ચ્ સ્રગ્દામાંકુશશંખમત્સ્યયુગલક્રત્વંગકુંભાંબુજૈશ્
૬૮।૨૪દ્ ચિહ્નૈઃ હંસકલસ્વનઃ સુચરણો હંસઃ પ્રસન્નેન્દ્રિયઃ ॥ ॥

૬૮।૨૫અબ્/ રતિઃ અંભસિ શુક્રસારતા દ્વિગુણા ચાષ્ટશતૈઃ પલૈઃ મિતિઃ ।
૬૮।૨૫ચ્દ્/ પરિમાણમથાસ્ય ષડ્યુતા નવતિઃ સમ્પરિકીર્તિતા બુધૈઃ ॥ ॥

૬૮।૨૬અબ્/ ભુનક્તિ હંસઃ ખસશૂરસેનાન્ ગાન્ધારગંગાયામુનાન્તરાલમ્ ।

૬૮।૨૬ય્દ્/ શતં દશોનં શરદાં નૃપત્વં કૃત્વા વનાન્તે સમુપૈતિ મૃત્યુમ્ ॥ ॥

૬૮।૨૭અબ્/ સુભ્રૂકેશો રક્તશ્યામઃ કંબુગ્રીવો વ્યાદીર્ઘાસ્યઃ ।
૬૮।૨૭ય્દ્/ શૂરઃ ક્રૂરઃ શ્રેષ્ઠો મન્ત્રી ચૌરસ્વામી વ્યાયામી ચ ॥ ॥

૬૮।૨૮અ યન્માત્રમાસ્યં રુચકસ્ય દીર્ઘં
૬૮।૨૮બ્ મધ્યપ્રદેશે ચતુરસ્રતા (ચતુરશ્રતા) સા ।
૬૮।૨૮ય્ તનુચ્છવિઃ શોણિતમાંસસારો
૬૮।૨૮દ્ હન્તા દ્વિષાં સાહસસિદ્ધકાર્યઃ ॥ ॥

૬૮।૨૯અ ખટ્વાંગવીણાવૃષચાપવજ-
૬૮।૨૯બ્ શક્તીન્દ્રશૂલાંકિતપાણિપાદઃ ।
૬૮।૨૯ય્ ભક્તો ગુરુબ્રાહ્મણદેવતાનાં
૬૮।૨૯દ્ શતાંગુલઃ સ્યાત્ તુ સહસ્રમાનઃ (તુલયા સહસ્રં) ॥ ॥

૬૮।૩૦અ મન્ત્રાભિચારકુશલઃ કૃશજાનુજંઘો
૬૮।૩૦બ્ વિન્ધ્યં સસહ્યગિરિમુજ્જયિનીં ચ ભુક્ત્વા ।
૬૮।૩૦ય્ સમ્પ્રાપ્ય સપ્તતિસમા રુચકો નરેન્દ્રઃ
૬૮।૩૦દ્ શસ્ત્રેણ મૃત્યુમુપયાત્યથવાऽનલેન ॥ ॥

૬૮।૩૧અ પંચાપરે વામનકો જઘન્યઃ
૬૮।૩૧બ્ કુબ્જોऽથવા મણ્ડલકોऽથ સાચી (સમી) ।
૬૮।૩૧ય્ પૂર્વોક્તભૂપાનુચરા ભવન્તિ
૬૮।૩૧દ્ સંકીર્ણસંજ્ઞઃ (સંજ્ઞાઃ) શ઼ૃણુ લક્ષણૈઃ તાન્ ॥ ॥

૬૮।૩૨અ સમ્પૂર્ણાંગો વામનો ભગ્નપૃષ્ઠઃ
૬૮।૩૨બ્ કિંચિગ઼ ઊરૂમધ્યકક્ષ્ય (કક્ષ) અન્તરેષુ ।
૬૮।૩૨ય્ ખ્યાતો રાજ્ઞાં હ્યેષ ભદ્રાનુજીવી
૬૮।૩૨દ્ સ્ફીટો રાજા (દાતા) વાસુદેવસ્ય ભક્તઃ ॥ ॥

૬૮।૩૩અ માલવ્યસેવી તુ જઘન્યનામા
૬૮।૩૩બ્ ખણ્ડેન્દુતુલ્યશ્રવણઃ સુસન્ધિઃ ।
૬૮।૩૩ય્ શુક્રેણ સારહ્ પિશુનઃ કવિશ્ચ
૬૮।૩૩દ્ રૂક્ષચ્છવિઃ સ્થૂલકરાંગુલીકઃ ॥ ॥

૬૮।૩૪અ ક્રૂરો ધની સ્થૂલમતિઃ પ્રતીતઃ
૬૮।૩૪બ્ તામ્રચ્છવિઃ સ્યાત્ પરિહાસશીલઃ

૬૮।૩૪ય્ ઉરો અંઘ્રિ (અન્હ્રિ) હસ્તેષ્વસિશક્તિપાશ-
૬૮।૩૪દ્ પરશ્વધાંકઃ સ (અગ઼્ક્શ્વ) જઘન્યનામા ॥ ॥

૬૮।૩૫અ કુબ્જો નામ્ના યઃ સ શુદ્ધો હ્યધસ્તાત્
૬૮।૩૫બ્ ક્ષીણઃ કિંચિત્ પૂર્વકાયે નતશ્ચ ।
૬૮।૩૫ય્ હંસાસેવી નાસ્તિકોઽર્થૈરુપેતો
૬૮।૩૫દ્ વિદ્વાન્ શૂરઃ સૂચકઃ સ્યાત્ કૃતજ્ઞઃ ॥ ॥

૬૮।૩૬અ કલાસ્વભિજ્ઞઃ કલહપ્રિયશ્ચ
૬૮।૩૬બ્ પ્રભૂતભૃત્યઃ પ્રમદાજિતશ્ચ ।
૬૮।૩૬ય્ સમ્પૂજ્ય લોકં પ્રજહાત્યકસ્માત્
૬૮।૩૬દ્ કુબ્જોઽયમુક્તઃ સતતોદ્યતશ્ચ ॥ ॥

૬૮।૩૭અબ્/ મણ્ડલકક્ષણમતો (કનામધેયો લક્ષણમતો) રુચકાનુચરોઽભિચારવિત્ કુશલઃ ।
૬૮।૩૭ય્દ્/ કૃત્યાવેતાલ (વૈતાલ) આદિષુ કર્મસુ વિદ્યાસુ ચાનુરતઃ ॥ ॥

૬૮।૩૮અબ્/ વૃદ્ધાકારઃ ખરપરુષમૂર્ધજશ્રૂક્ષમૂર્ધજઃ) ચ શત્રુનાશને કુશલઃ ।
૬૮।૩૮ય્દ્/ દ્વિજદેવયજ્ઞયોગપ્રસક્તધીઃ સ્ત્રીજિતો મતિમાન્ ॥ ॥

૬૮।૩૯અ સાચીઇતિ (સામીતિ) યઃ સોઽતિવિરૂપદેહઃ
૬૮।૩૯બ્ શશાનુગામી ખલુ દુર્ભગશ્ચ ।
૬૮।૩૯ય્ દાતા મહારંભસમાપ્તકાર્યો
૬૮।૩૯દ્ ગુણૈઃ શશસ્યૈવ ભવેત્ સમાનઃ ॥ ॥

૬૮।૪૦અ પુરુષલક્ષણમુક્તમિદમ્ મયા
૬૮।૪૦બ્ મુનિમતાનિ નિરીક્ષ્ય સમાસતઃ ।
૬૮।૪૦ય્ ઇદમધીત્ય નરો નૃપસમ્મતો
૬૮।૪૦દ્ ભવતિ સર્વજનસ્ય ચ વલ્લભઃ ॥ ॥

sએપરતે અધ્યાય ૬૯ કન્યાલક્ષણાધ્યાયઃ
૬૯।૧અ સ્નિગ્ધોન્નતાગ્રતનુતામ્રનખૌ કુમાર્યાઃ
૬૯।૧બ્ પાદૌ સમૌપચિતચારુનિગૂઢગુલ્ફૌ ।
૬૯।૧ય્ શ્લિષ્ટાંગુલી કમલકાન્તિતલૌ ચ યસ્યાઃ
૬૯।૧દ્ તામુદ્વહેદ્ યદિ ભુવોઽધિપતિત્વમિચ્છેત્ ॥ ॥

૬૯।૨અ મત્સ્યાંકુશાબ્જયવવજ્રહલાસિચિહ્ન-
૬૯।૨બ્ અવસ્વેદનૌ મૃદુતલૌ ચરણૌ પ્રશસ્તૌ ।

૬૯।૨ય્ જંઘે ચ રોમરહિતે વિશિરે સુવૃત્તે
૬૯।૨દ્ જાનુદ્વયં સમમનુલ્બણસન્ધિદેશમ્ ॥ ॥

૬૯।૩અ ઊરૂ ઘનૌ કરિકરપ્રતિમાવરોમાવ્
૬૯।૩બ્ અશ્વત્થપત્રસદૃશં વિપુલં ચ ગુહ્યમ્ ।
૬૯।૩ય્ શ્રોણીલલાટમુરુકૂર્મસમુન્નતં ચ
૬૯।૩દ્ ગૂઢો મણિશ્ચ વિપુલાં શ્રિયમાદધાતિ ॥ ॥

૬૯।૪અ વિસ્તીર્ણમાંસૌપચિતો નિતંબઃ
૬૯।૪બ્ ગુરુશ્ચ ધત્તે રશના (રસના) કલાપમ્ ।
૬૯।૪ય્ નાભિઃ ગભીરા (ગંભીરા) વિપુલાંગાનાં
૬૯।૪દ્ પ્રદક્ષિનાવર્તગતા ચ શસ્તા (પ્રશસ્તા) ॥ ॥

૬૯।૫અ મધ્યં સ્ત્રિયાઃ ત્રિવલિનાથમરોમશં ચ
૬૯।૫બ્ વૃત્તૌ ઘનાવવિષમૌ કઠિનાવુરસ્યૌ ।
૬૯।૫ય્ રોમપ્રવર્જિતં (અપવર્જિતં) ઉરો મૃદુ ચાંગનાનાં
૬૯।૫દ્ ગ્રીવા ચ કંબુનિચિતાર્થસુખાનિ દત્તે (ધત્તે) ॥ ॥

૬૯।૬અ બન્ધુજીવકુસુમોપમોડધરો
૬૯।૬બ્ માંસલો રુચિરબિંબરૂપભૃત્ ।
૬૯।૬ય્ કુન્દકુડ્મલનિભાઃ સમા દ્વિજા
૬૯।૬દ્ યોષિતાં પતિસુખામિતાર્થદાઃ ॥ ॥

૬૯।૭અ દાક્ષિણ્યયુક્તમશઠં પરપુષ્ટહંસ-
૬૯।૭બ્ વલ્ગુ પ્રભાષિતમદીનમનલ્પસૌખ્યમ્ ।
૬૯।૭ય્ નાસા સમા સમપુટા રુચિરા પ્રશસ્તા
૬૯।૭દ્ દૃગ્નીલનીરજદલદ્યુતિહારિણી ચ ॥ ॥

૬૯।૮અબ્/ નો સંગતે નાતિપૃથૂ ન લંબે શસ્તે ભ્રુવૌ બાલશશાંકવક્રે ।
૬૯।૮ય્દ્/ અર્ધેન્દુસંસ્થાનમરોમશં ચ શસ્તં લલાટં ન નતં ન તુંગમ્ ॥ ॥

૬૯।૯અબ્/ કર્ણયુગ્મમપિ યુક્તમાંસલં શસ્યતે મ્દ્રુ સમાહિતમ્ સમં (સમં સમાહિતં) ।
૬૯।૯ય્દ્/ સ્નિગ્ધનીલમૃદુકુંચિતૈકજા મૂર્ધજાઃ સુખકરાઃ સમં શિરઃ ॥ ॥

૬૯।૧૦અ ભૃંગારાસનવાજિકુઞ્જરરથશ્રીવૃક્ષયૂપેષુભિઃ
૬૯।૧૦બ્ માલાકુણ્ડલચામરાંકુશયવૈઃ શૈલૈઃ ધ્વજૈઃ તોરણૈઃ ।
૬૯।૧૦ય્ મત્સ્યસ્વસ્તિકવેદિકાવ્યજનકૈઃ શંખાતપત્રાંબુજૈઃ

૬૯।૧૦દ્ પાદે પાણિતલેऽથવા (અપિ વા) યુવતયો ગચ્છન્તિ રાજ્ઞીપદમ્ ॥ ॥

૬૯।૧૧અ નિગૂઢમણિબન્ધનૌ તરુણપદ્મગર્ભોપમૌ
૬૯।૧૧બ્ કરૌ નૃપતિયોષિતસ્યોષિતાં) તનુવિકૃષ્ટપર્વાંગુલી ।
૬૯।૧૧ય્ ન નિમ્નમતિ નૌન્નતં કરતલં સુરેખાન્વિતં
૬૯।૧૧દ્ કરોત્યવિધવાં ચિરં સુતસુખાર્થસંભોગિનીમ્ ॥ ॥

૬૯।૧૨અ મધ્યાંગુલિં યા મણિબન્ધનોત્થા
૬૯।૧૨બ્ રેખા ગતા પાણિતલે અંગનાયાઃ ।
૬૯।૧૨ય્ ઊર્ધ્વસ્થિતા પાદતલેऽથવા યા
૬૯।૧૨દ્ પુંસોऽથવા રાજ્યસુખાય સા સ્યાત્ ॥ ॥

૬૯।૧૩અ કનિષ્ઠિકામૂલભવા ગતા યા
૬૯।૧૩બ્ પ્રદેશિનીમધ્યમિકાન્તરાલમ્ ।
૬૯।૧૩ય્ કરોતિ રેખા પરમાયુષઃ સા
૬૯।૧૩દ્ પ્રમાણમૂના તુ તદૂનમાયુઃ ॥ ॥

૬૯।૧૪અ અંગુષ્ટમૂલે પ્રસવસ્ય રેખાઃ
૬૯।૧૪બ્ પુત્રા બૃહત્યઃ પ્રમદાઃ તુ તન્વ્યઃ ।
૬૯।૧૪ય્ અચ્છિન્નમધ્યા (દીર્ઘા) બૃહદાયુષઃ (બૃહદાયુષાં) તાઃ
૬૯।૧૪દ્ સ્વલ્પાયુષાં છિન્નલઘુપ્રમાણાઃ ॥ ॥

૬૯।૧૫અ ઇતીદમુક્તં શુભમંગનાનામ્
૬૯।૧૫બ્ અતો વિપર્યસ્તમનિષ્ટમુક્તમ્ ।
૬૯।૧૫ય્ વિશેષતોऽનિષ્ટફલાનિ યાનિ
૬૯।૧૫દ્ સમાસતઃ તાનિ અનુકીર્તયામિ ॥ ॥

૬૯।૧૬અ કનિષ્ઠિકા વા તદનન્તરા વા
૬૯।૧૬બ્ મહીં ન યસ્યાઃ શ્પૃશતિ સ્ત્રિયાઃ સ્યાત્ ।
૬૯।૧૬ય્ ગતાથવ્ંગુષ્ઠમતીત્ય યસ્યાઃ
૬૯।૧૬દ્ પ્રદેશિની સા કુલટાऽતિપાપા ॥ ॥

૬૯।૧૭અ ઉદ્બદ્ધાભ્યામ્ પિણ્ડિકાભ્યામ્ શિરાલે
૬૯।૧૭બ્ શુષ્કે જંઘે લોમશે (રોમશે) ચાતિમાંસે
૬૯।૧૭ય્ વામાવર્તં નિમ્નમલ્પં ચ ગુહ્યં
૬૯।૧૭દ્ કુંભાકારં ચોદરં દુઃખિતાનામ્ ॥ ॥

૬૯।૧૮અબ્/ હ્રસ્વયાતિનિઃસ્વતા દીર્ઘયા કુલક્ષયઃ ।
૬૯।૧૮ચ્દ્/ ગ્રીવયા પૃથૂત્થયા યોષિતઃ પ્રચણ્ડતા ॥ ॥

૬૯।૧૯અ નેત્રે યસ્યાઃ કેકરે પિંગલે વા
૬૯।૧૯બ્ સા દુઃશીલા શ્યાવલોલેક્ષણા ચ ।
૬૯।૧૯ચ્ કૂપૌ યસ્યા ગણ્ડયોશ્ચ સ્મિતેષુ
૬૯।૧૯દ્ નિઃસન્દિગ્ધં બન્ધકીં તાં વદન્તિ ॥ ॥

૬૯।૨૦અ પ્રવિલંબિનિ દેવરં લલાટે
૬૯।૨૦બ્ શ્વશુરં હન્ત્યુદરે સ્ફિજોઃ પતિં ચ ।
૬૯।૨૦ચ્ અતિરોમચયાન્વિતૌત્તરઓષ્ઠી
૬૯।૨૦દ્ ન શુભા ભર્તુઃ અતીવ યા ચ દીર્ઘા ॥ ॥

૬૯।૨૧અ સ્તનૌ સરોમૌ મલિનૌલ્બણૌ ચ
૬૯।૨૧બ્ ક્લેશં દધાતે વિષમૌ ચ કર્ણૌ ।
૬૯।૨૧ચ્ સ્થૂલાઃ કરાલા વિષમાશ્ચ દન્તાઃ
૬૯।૨૧દ્ ક્લેશાય ચૌર્યાય ચ કૃષ્ણમાંસાઃ ॥ ॥

૬૯।૨૨અ ક્રવ્યાદરૂપૈઃ વૃકકાકકંક-
૬૯।૨૨બ્ સરીસૃપૌલૂકસમાનચિહ્નૈઃ
૬૯।૨૨ચ્ શુષ્કૈઃ શિરાલૈઃ વિષમૈશ્ચ હસ્તૈઃ
૬૯।૨૨દ્ ભવન્તિ નાર્યહ્ સુખવિત્તહીનાઃ ॥ ॥

૬૯।૨૩અ યા તૂત્તરોષ્ઠેન સમુન્નતેન
૬૯।૨૩બ્ રૂક્ષાગ્રકેશી કલહપ્રિયા સા ।
૬૯।૨૩ચ્ પ્રાયો વિરૂપાસુ ભવન્તિ દોષા
૬૯।૨૩દ્ યત્રાકૃતિઃ તત્ર ગુણા વસન્તિ ॥ ॥

૬૯।૨૪અબ્/ પાદૌ સગુલ્ફૌ પ્રથમં પ્રદિષ્ટૌ જંઘે દ્વિતીયં તુ સજાનુચક્રે ।
૬૯।૨૪ચ્દ્/ મેઢ્ર ઊરુમુષ્કં ચ તતઃ તૃતીયં નાભિઃ કટિશ્ચૈવ (ચ ઇતિ) ચતુર્થમાહુઃ ॥ ॥

૬૯।૨૫અબ્/ ઉદરં કથયન્તિ પંચમં હૃદયં ષષ્ઠમતઃ સ્તનાન્વિતમ્ ।
૬૯।૨૫ચ્દ્/ અથ સપ્તમમંસજત્રુણી કથયન્ત્યષ્ટમમોષ્ઠકન્ધરે ॥ ॥

૬૯।૨૬અબ્/ નવમં નયને ચ સભ્રુણી સલલાટં દશમં શિરઃ તથા ।
૬૯।૨૬ચ્દ્/ અશુભેષ્વશુભં દશાફલં ચરણાદ્યેષુ શુભેષુ શોભનમ્ ॥ ॥

ઽએપરતે અધ્યાય ૭૦ વસ્ત્રચ્છેદલક્ષણાધ્યાયઃ

૭૦।૧અબ્(૭૧।૬અબ્)/ પ્રભૂતવસ્ત્રદાશ્વિની ભરણિ અથાપહારિણી ।
૭૦।૧ચ્દ્(૭૧।૬ચ્દ્)/ પ્રદહ્યતેઽગ્નિદૈવતે પ્રજેસ્વરેઽર્થસિદ્ધયઃ ॥ ॥

૭૦।૨અબ્(૭૧।૭અબ્)/ મૃગે તુ મૂષકાદ્ ભયં વ્યસુત્વમેવ શંકરે ।
૭૦।૨ચ્દ્(૭૧।૭ચ્દ્)/ પુનર્વસૌ શુભાગમઃ તદગ્રભે ધનૈઃ યુતિઃ ॥ ॥

૭૦।૩અબ્(૭૧।૮અબ્)/ ભુજંગભે વિલુપ્યતે મઘાસુ મૃત્યુમાદિશેત્ ।
૭૦।૩ચ્દ્(૭૧।૮ચ્દ્)/ ભગાહ્વયે નૃપાદ્ ભયં ધનાગમાય ચૌત્તરા ॥ ॥

૭૦।૪અબ્(૭૧।૯અબ્)/ કરેણ કર્મસિદ્ધયઃ શુભાગમઃ તુ ચિત્રયા ।
૭૦।૪ચ્દ્(૭૧।૯ચ્દ્)/ શુભં ચ ભોજ્યમાનિલે દ્વિદૈવતે જનપ્રિયઃ ॥ ॥

૭૦।૫અબ્(૭૧।૧૦અબ્)/ સુહૃદ્યુતિઃ (સુહૃદ્યુતિઃ) ચ મિત્રભે તદગ્રભે (પુરન્દરે) ઽંબરક્ષયઃ ।
૭૦।૫ચ્દ્(૭૧।૧૦ચ્દ્)/ જલપ્લુતિશ્ચ નૈરૃતે રુજો જલાધિદૈવતે ॥ ॥

૭૦।૬અબ્(૭૧।૧૧અબ્)/ મિષ્ટમન્નમપિ વૈશ્વદૈવતે વૈષ્ણવે ભવતિ નેત્રરોગતા ।
૭૦।૬ચ્દ્(૭૧।૧૧ચ્દ્)/ ધાન્યલબ્ધિઃ (લબ્ધિં) અપિ (અથ) વાસવે (વિશ્વદૈવતે)
વિદુઃ વારુણે વિષકૃતં મહદ્ભયમ્ ॥ ॥

૭૦।૭અ(૭૧।૧૨અ) ભદ્રપદાસુ ભયં સલિલોત્થં
૭૦।૭બ્(૭૧।૧૨બ્) તત્પરતશ્ચ ભવેત્ સુતલબ્ધિઃ ।
૭૦।૭ચ્(૭૧।૧૨ઇ) રત્નયુતિં કથયન્તિ ચ પૌષ્ણે
૭૦।૭દ્(૭૧।૧૨દ્) યોઽભિનવાંબરમિચ્છતિ ભોક્તુમ્ ॥ ॥

૭૧।૧૩અબ્/ વિપ્રમતાદથ ભૂપતિદત્તં યગ વિવાહવિધાવભિલબ્ધમ્ ।
૭૧।૧૩ચ્દ્/ તેષુ ગુણૈ રહિતેષ્વપિ ભોક્તું નૂતનમંબરમિષ્ટફલં સ્યાત્ .. ..

૭૦।૮અબ્(૭૧।૧૪અબ્)/ ભોક્તું નવાંબરં શસ્તમ્ ઋક્ષેઽપિ ગુણવર્જિતે ।
૭૦।૮ચ્દ્(૭૧।૧૪ચ્દ્)/ વિવાહે રાજસમ્માને બ્રહ્મણાણાં ચ સમ્મતે ॥ ॥

૭૦।૯અબ્(૭૧।૧અબ્)/ વસ્ત્રસ્ય કોણેષુ વસન્તિ દેવા નરાશ્ચ પાશાન્તદશાન્તમધ્યે ।
૭૦।૯ચ્દ્(૭૧।૧ચ્દ્)/ શેષાઃ ત્રયશ્ચાત્ર નિશાચરાંશાઃ તથૈવ શય્યાસનપાદુકાસુ ॥ ॥

૭૦।૧૦અબ્(૭૧।૨અબ્)/ લિપ્તે મષીગોમયકર્દમાદ્યૈશ્છિન્ને પ્રદગ્ધે સ્ફુટિતે ચ વિન્દ્યાત્ ।
૭૦।૧૦ચ્દ્(૭૧।૨ચ્દ્)/ પુષ્ટં નવેઽલ્પાલ્પતરં ચ ભુક્તે પાપં શુભં ચાધિકમુત્તરીયે ॥ ॥

૭૦।૧૧અબ્(૭૧।૩અબ્)/ રુગ્રાક્ષસાંશેસ્વથવાઽપિ મૃત્યુઃ પુઞ્જન્મતેજશ્ચ મનુષ્યભાગે ।
૭૦।૧૧ચ્દ્(૭૧।૩ચ્દ્)/ ભાગેઽમરાણામથ ભોગવૃદ્ધિઃ પ્રાન્તેષુ સર્વત્ર વદન્ત્યનિષ્ટમ્ ॥ ॥

૭૦।૧૨અબ્(૭૧।૪અબ્)/ કંકપ્લવૌલૂકકપોતકાકક્રવ્યાદગોમાયુખરૌષ્ટ્રસર્પૈઃ ।

૭૦।૧૨ચ્દ્(૭૧।૪ચ્દ્)/ છેદાકૃતિઃ દૈવતભાગગાપિ પુંસાં ભયં મૃત્યુસમં કરોતિ ॥ ॥

૭૦।૧૩અબ્(૭૧।૫અબ્)/ છત્રધ્વજસ્વસ્તિકવર્ધમાનશ્રીવૃક્ષકુંભાંબુજતોરણાદ્યૈઃ ।
૭૦।૧૩ચ્દ્(૭૧।૫ચ્દ્)/ છેદાકૃતિઃ નૈરૃતભાગગા અપિ પુંસાં વિધત્તે નચિરેણ લક્ષ્મીમ્ ॥ ॥

sએપરતે અધ્યાય ૭૧ ચામરલક્ષણાધ્યાયઃ
૭૧।૧અ દેવૈશ્ચમર્યઃ કિલ વાલહેતોઃ
૭૧।૧બ્ સૃષ્ટા હિમક્ષ્માધરકન્દરેષુ ।
૭૧।૧ચ્ આપીતવર્ણાશ્ચ ભવન્તિ તાસાં
૭૧।૧દ્ કૃષ્ણાશ્ચ લાંગૂલભવાઃ સિતાશ્ચ ॥ ॥

૭૧।૨અ સ્નેહો મૃદુત્વં બહુવ્લતા (લતા ચ)
૭૧।૨બ્ વૈશદ્યમલ્પાસ્થિનિબન્ધનત્વમ્ ।
૭૧।૨ચ્ શૌક્લ્યં ચ તાસાં (તેષાં) ગુણસમ્પદુક્તા
૭૧।૨દ્ વિદ્ધાલ્પલુપ્તાનિ ન શોભનાનિ ॥ ॥

૭૧।૩અ અધ્યર્ધહસ્તપ્રમિતોઽસ્ય દણ્ડો
૭૧।૩બ્ હસ્તોઽથવા અરત્નિસમોઽથવા અન્યઃ ।
૭૧।૩ચ્ કાષ્ઠાત્શુભાત્ કાંચનરૂપ્યગુપ્તાદ્
૭૧।૩દ્ રત્નૈશ્ચ સર્વૈઃ (વિચિત્રૈઃ) ચ હિતાય રાજ્ઞામ્ ॥ ॥

૭૧।૪અબ્/ યષ્ટ્યાતપત્રાંકુશવેત્રચાપવિતાનકુન્તધ્વજચામરાણામ્ ।
૭૧।૪ચ્દ્/ વ્યાપીતતન્ત્રીમધુકૃષ્ણવર્ણા વર્ણક્રમેણૈવ હિતાય દણ્ડાઃ ॥ ॥

૭૧।૫અ માતૃભૂધનકુલક્ષયાવહા
૭૧।૫બ્ રોગમૃત્યુજનનાશ્ચ પર્વભિઃ ।
૭૧।૫ચ્ દ્વ્યાદિભિઃ દ્વિકવિવર્ધિતૈઃ ક્રમાત્
૭૧।૫દ્ દ્વાદશાન્તવિરતૈઃ સમૈઃ ફલમ્ ॥ ॥

૭૧।૬અ યાત્રાપ્રસિદ્ધિઃ દ્વિષતાં વિનાશો
૭૧।૬બ્ લાભાઃ પ્રભૂતા (પ્રભૂતો) વસુધ્પમઃ (ગમઃ) ચ ।
૭૧।૬ચ્ વ્રિદ્ધઃ પશૂનામભિવંછિતાપ્તિઃ
૭૧।૬દ્ ચ્ત્રાદ્યેષ્વયુગ્મેષુ તદીશ્વરાણામ્ ॥ ॥

sએપરતે અધ્યાય ૭૨ છત્રલક્ષણાધ્યાયઃ
૭૨।૧અબ્/ નિચિતં તુ (નુ) હંસપક્ષૈઃ કૃકવાકુમયૂરસારસાનાં વા ।
૭૨।૧ચ્દ્/ દૌકૂલ્યેન (દૌકૂલેન) નવેન તુ સમન્તતશ્છાદિતં શુક્લમ્ ॥ ॥

૭૨।૨અબ્/ મુક્તાફલૈરુપચિતં પ્રલંબમાલાવિલં સ્ફટિકમૂલમ્ ।
૭૨।૨ય્દ્/ ષડ્ઢસ્તશુદ્ધહૈમં નવપર્વનગૈકદણ્ડં તુ ॥ ॥

૭૨।૩અબ્/ દણ્ડાર્ધવિસ્તૃતં તત્ સમાવૃતં રત્નભૂષિતં (રત્નવિભૂષિતમ્, રત્નભૂષિતં) ઉદગ્રમ્ ।
૭૨।૩ય્દ્/ નૃપતેઃ તદાતપત્રં કલ્યાણપરં વિજયદં ચ ॥ ॥

૭૨।૪અબ્/ યુવરાજનૃપતિપત્ન્યોઃ સેનાપતિદણ્ડનાયકાનાં ચ ।
૭૨।૪ય્દ્/ દણ્ડોऽર્ધપંચહસ્તઃ સમપંચકૃતોऽર્ધ (કૃતાર્ધ) વિસ્તારઃ ॥ ॥

૭૨।૫અબ્/ અન્યેષામુષ્ણઘ્નં પ્રસાદપટ્ટૈઃ વિભૂષિતશિરસ્કમ્ ।
૭૨।૫ય્દ્/ વ્યાલંબિરત્નમાલં છત્રં કાર્યં તુ (ચ) માયૂરમ્ ॥ ॥

૭૨।૬અબ્/ અન્યેષાં તુ નરાણાં શીતાતપવારણં તુ ચતુરસ્રં (ચતુરશ્રં) ।
૭૨।૬ય્દ્/ સમવૃત્તદણ્ડયુક્તં છત્રં કાર્યં તુ વિપ્રાણામ્ ॥ ॥

sએપરતે અધ્યાય ૭૩ સ્ત્રીપ્રશંસાધ્યાયઃ
૭૩।૧અ જયે ધરિત્ર્યાઃ પુરમેવ સારં
૭૩।૧બ્ પુરે ગૃહં સદ્મનિ ચએકદેશઃ ।
૭૩।૧ય્ તત્રાપિ શય્યા શયને વરા સ્ત્રી
૭૩।૧દ્ રત્નોજ્જ્વલા રાજ્યસુખસ્ય સારઃ ॥ ॥

૭૩।૨અબ્/ રત્નાનિ વિભૂષયન્તિ યોષા ભૂષ્યન્તે વનિતા ન રત્નકાન્ત્યા ।
૭૩।૨ય્દ્/ ચેતો વિનતા હરનિ અરત્ના નો રત્નાનિ વિનાંગનાંગસંગં (સંગાત્) ॥ ॥

૭૩।૩અ આકારં વિનિગૂહતાં રિપુબલં જેતું સમુત્તિષ્ઠતાં
૭૩।૩બ્ તન્ત્રં ચિન્તયતાં કૃતાકૃતશતવ્યાપારશાખાકુલમ્ ।
૭૩।૩ય્ મન્ત્રિપ્રોક્તનિષેવિણાં (નિસેવિણામ્, નિષેવિનાં) ક્ષિતિભુજામાશંકિનાં સર્વતો
૭૩।૩દ્ ધુઃખાંભોનિધિવર્તિનાં સુખલવઃ કાન્તાસમાલિંગનમ્ ॥ ॥

૭૩।૪અ શ્રુતં દૃષ્ટં સ્પૃષ્ટં સ્મૃતમપિ નૃણાં હ્લાદજનનં
૭૩।૪બ્ ન રત્નં સ્ત્રીભ્યોऽન્યત્ ક્વચિદપિ કૃતં લોકપતિના ।
૭૩।૪ય્ તદર્થં ધર્માર્થૌ સુતવિષયસૌખ્યાનિ ચ તતો
૭૩।૪દ્ ગૃહે લક્ષ્મ્યો માન્યાઃ સતતમબલા માનવિભવૈઃ ॥ ॥

૭૩।૫અ યેऽપિ અંગનાનાં પ્રવદન્તિ દોષાન્
૭૩।૫બ્ વૈરાગ્યમાર્ગેણ ગુણાન્ વિહાય ।
૭૩।૫ય્ તે દુર્જના મે મનસો વિતર્કઃ
૭૩।૫દ્ સદ્ભાવવાક્યાનિ ન તાનિ તેષામ્ ॥ ॥

૭૩।૬અ પ્રબ્રૂત સત્યં કરતો અંગનાનાં
૭૩।૬બ્ દોષોઽસ્તિ યો નાચરિતો મનુષ્યૈઃ ।
૭૩।૬ચ્ ધાર્ષ્ટ્યેન પુંભિઃ પ્રમદા નિરસ્તા
૭૩।૬દ્ ગુણાધિકાઃ તા મનુનાત્ર ચોક્તમ્ ॥ ॥

૭૩।૭અબ્/ સોમઃ તાસામદાત્શૌચં ગન્ધર્વઃ (ગન્ધર્વાઃ) શિક્ષિતાં ગિરમ્ ।
૭૩।૭ચ્દ્/ અગ્નિશ્ચ સર્વભક્ષિત્વં તસ્માન્ નિષ્કસમાઃ સ્ત્રિયઃ ॥ ॥

૭૩।૮અબ્/ બ્રાહ્મણાઃ પાદતો મેધ્યા ગાવો મેધ્યાશ્ચ પૃષ્ઠતઃ ।
૭૩।૮ચ્દ્/ અજાશ્વા મુખતો મેધ્યાઃ સ્ત્રિયો મેધ્યાશ્તુ સર્વતઃ ॥ ॥

૭૩।૯અબ્/ સ્ત્રિયઃ પવિત્રમતુલં નૈતા દુષ્યન્તિ કર્હિચિત્ ।
૭૩।૯ચ્દ્/ માસિ માસિ રજો હ્યાસાં દુષ્કૃતાનિ અપકર્ષતિ ॥ ॥

૭૩।૧૦અબ્/ જામયો યાન્તિ ગેહાનિ શપન્ત્યપ્રતિપૂજિતાઃ ।
૭૩।૧૦ચ્દ્/ તાનિ કૃત્યાહતાનીવ વિનશ્યન્તિ સમન્તતઃ ॥ ॥

૭૩।૧૧અબ્/ જાયા વા સ્યાજ્જનિત્રી વા સંભવઃ સ્ત્રીકૃતો નૃણામ્ ।
૭૩।૧૧ચ્દ્/ હે કૃતઘ્નાશ્તયોઃ નિન્દાં કુર્વતાં વઃ કુતઃ શુભમ્ ॥ ॥

૭૩।૧૨અબ્/ દંપત્યોઃ વ્યુત્ક્રમે દોષઃ સમઃ શાસ્ત્રે પ્રતિષ્ઠિતઃ ।
૭૩।૧૨ચ્દ્/ નરા ન સમવેક્ષન્તે તેનાત્ર વરમંગનાઃ ॥ ॥

૭૩।૧૩અબ્/ બહિઃ લોમ્ના તુ ષણ્માસાન્ વેષ્ટિતઃ ખરચર્મણા ।
૭૩।૧૩ચ્દ્/ દારાતિક્રમણે ભિક્ષાં દેહીત્યુક્ત્વા વિશુધ્યતિ ॥ ॥

૭૩।૧૪અબ્/ ન શતેનાપિ વર્ષાણામપૈતિ મદનાશયઃ ।
૭૩।૧૪ચ્દ્/ તત્ર અશક્ત્યા નિર્વર્તન્તે નરા ધૈર્યેણ યોષિતઃ ॥ ॥

૭૩।૧૫અબ્/ અહો ધાર્ષ્ટ્યમસાધૂનાં નિન્દતામનઘાઃ સ્ત્રિયઃ ।
૭૩।૧૫ચ્દ્/ મુષ્ણતામિવ ચૌરાણાં તિષ્ઠ ચૌરેતિ જલ્પતામ્ ॥ ॥

૭૩।૧૬અ પુરુષશ્ચટુલાનિ કામિનીનાં
૭૩।૧૬બ્ કુરુતે યાનિ રહો ન તાનિ પશ્ચાત્ ।
૭૩।૧૬ચ્ સુકૃતજ્ઞતયા અંગના ગતાસૂન્
૭૩।૧૬દ્ અવગૂહ્ય પ્રવિશન્તિ સપ્તજિહ્વમ્ ॥ ॥

૭૩।૧૭અ સ્ત્રીરત્નભોગોઽસ્તિ નરસ્ય યસ્ય
૭૩।૧૭બ્ નિઃસ્વોઽપિ સાંપ્રત્યવનીસ્વરો (સ્વં પ્રત્યવનીસ્વરો, માં પ્રત્યવ) ઽસૌ ।

૭૩।૧૭ય્ રાજ્યસ્ય સારોऽશનમંગનાશ્ચ
૭૩।૧૭દ્ તૃષ્ણાનલોદ્દીપનદારુ શેષમ્ ॥ ॥

૭૩।૧૮અ કામિનીં પ્રથમયૌવનાન્વિતાં
૭૩।૧૮બ્ મન્દવલ્ગુમૃદુપીડિતસ્વનામ્ ।
૭૩।૧૮ય્ ઉત્સ્તનીં સમવલંબ્ય યા રતિઃ
૭૩।૧૮દ્ સા ન ધાતૃભવનેऽસ્તિ મે મતિઃ ॥ ॥

૭૩।૧૯અ તત્ર દેવમુનિસિદ્ધચારણૈઃ
૭૩।૧૯બ્ માન્યમાનપિતૃસેવ્યસેવનાત્ ।
૭૩।૧૯ય્ બ્રૂત ધાતૃભવનેऽસ્તિ કિં સુખં
૭૩।૧૯દ્ યદ્ રહઃ સમવલંબ્ય ન સ્ત્રિયમ્ ॥ ॥

૭૩।૨૦અ આબ્રહ્મકીટાન્તમિદં નિબદ્ધં
૭૩।૨૦બ્ પુંસ્ત્રીપ્રયોગેણ જગત્ સમસ્તમ્ ।
૭૩।૨૦ય્ વ્રીડા અત્ર કા યત્ર ચતુર્મુખત્વમ્
૭૩।૨૦દ્ ઈશોऽપિ લોભાદ્ ગમિતો યુવત્યાઃ ॥ ॥

sએપરતે અધ્યાય ૭૪ સૌભાગ્યકરણાધ્યાયઃ
૭૪।૧અ જાત્યં મનોભવસુખં સુભગસ્ય સર્વમ્
૭૪।૧બ્ આભાસમાત્રમિતરસ્ય મનોવિયોગાત્ ।
૭૪।૧ય્ ચિત્તેન ભાવયતિ દૂરગતા અપિ યં સ્ત્રી
૭૪।૧દ્ ગર્ભં બિભર્તિ સદૃશં પુરુષસ્ય તસ્ય ॥ ॥

૭૪।૨અ ભંક્ત્વા કાણ્ડં પાદપસ્યૌપ્તમુર્વ્યાં
૭૪।૨બ્ બીજં વાસ્યાં નાન્યતામેતિ યદ્વત્ ।
૭૪।૨ય્ એવં હ્યાત્મા જાયતે સ્ત્રીષુ ભૂયઃ
૭૪।૨દ્ કશ્ચિત્ તસ્મિન્ ક્ષેત્રયોગાદ્ વિશેષઃ ॥ ॥

૭૪।૩અ આત્મા સહૈતિ મનસા મન ઇન્દ્રિયેણ
૭૪।૩બ્ સ્વાર્થેન ચેન્દ્રિયમિતિ ક્રમ એષ શીઘ્રઃ ।
૭૪।૩ય્ યોગોऽયમેવ મનસઃ કિમગમ્યમસ્તિ
૭૪।૩દ્ યસ્મિન્ મનો વ્રજતિ તત્ર ગતોऽયમાત્મા ॥ ॥

૭૪।૪અ આત્માયમાત્મનિ ગતો હૃદયેऽતિસૂક્ષ્મો
૭૪।૪બ્ ગ્રાહ્યોऽચલેન મનસા સતતાભિયોગાત્ ।
૭૪।૪ય્ યો યં વિચિન્તયતિ યાતિ સ તન્મયત્વં

૭૪।૪દ્ યસ્માદતઃ સુભગમેવ ગતા યુવત્યઃ ॥ ॥

૭૪।૫અબ્/ દાક્ષિણ્યમેકં સુભગત્વહેતુઃ વિદ્વેષણં તદ્વિપરીતચેષ્ટા ।
૭૪।૫ચ્દ્/ મન્ત્રૌષધાદ્યૈઃ કુહકપ્રયોગૈઃ ભવન્તિ દોષા બહવો ન શર્મ ॥ ॥

૭૪।૬અબ્/ વાલ્લભ્યમાયાતિ વિહાય માનં દૌર્ભાગ્યમાપાદયતેઽભિમાનઃ ।
૭૪।૬ચ્દ્/ કૃચ્છ્રેણ સંસાધયતેઽભિમાની કાર્યાણિ અયત્નેન વદન્ પ્રિયાણિ ॥ ॥

૭૪।૭અબ્/ તેજો ન તદ્ યત્ પ્રિયસાહસત્વં વાક્યં ન ચાનિષ્ટમસત્પ્રણીતમ્ ।
૭૪।૭ચ્દ્/ કાર્યસ્ય ગત્વાન્તમનુદ્ધતા યે તેજસ્વિનઃ તે ન વિકત્થના યે ॥ ॥

૭૪।૮અબ્/ યઃ સાર્વજન્યં સુભગત્વમિચ્છેદ્ ગુણાન્ સ સર્વસ્ય વદેત્ પરોક્ષં (પરોક્ષે) ।
૭૪।૮ચ્દ્/ પ્રાપ્નોતિ દોષાન્ અસતોઽપિ અનેકાન્ પરસ્ય યો દોષકથાં કરોતિ ॥ ॥

૭૪।૯અબ્/ સર્વોપકારાનુગતસ્ય લોકઃ સર્વોપકારાનુગતો નરસ્ય ।
૭૪।૯ચ્દ્/ કૃત્વા ઉપકારં દ્વિષતાં વિપત્સુયા કીર્તિઃ અલ્પેન ન સા શુભેન ॥ ॥

૭૪।૧૦અબ્/ તૃણૈઃ ઇવાગ્નિઃ સુતરાં વિવૃદ્ધિમાછાદ્યમાનોઽપિ ગુણોઽભ્યુપૈતિ ।
૭૪।૧૦ચ્દ્/ સ કેવલં દુર્જનભાવમેતિ હન્તું ગુણાન્ વાંછતિ યઃ પરસ્ય ॥ ॥

sએપરતે અધ્યાય ૭૫ કાન્દર્કિકાધ્યાયઃ
૭૫।૧અબ્/ રક્તેઽધિકે સ્ત્રી પુરુષઃ તુ શુક્રે નપુંસકં શોણિતશુક્રસામ્યે ।
૭૫।૧ચ્દ્/ યસ્માદતઃ શુક્રવિવૃદ્ધિદાનિ નિષેવિતવ્યાનિ રસાયનાનિ ॥ ॥

૭૫।૨અબ્/ હર્મ્યપૃષ્ઠમુડુનાથરશ્મયઃ સૌત્પલં મધુ મદાલસા પ્રિયા ।
૭૫।૨ચ્દ્/ વલ્લકી સ્મરકથા રહઃ સ્રજો વર્ગ એષ મદનસ્ય વાગુરા ॥ ॥

૭૫।૩અ માક્ષીકધાતુમધુપારદલોહચૂર્ણ-
૭૫।૩બ્ પથ્યાશિલ્જતુઘૃતાનિ સમાનિ (જતુવિડઙ્ગઘૃતાનિ) યોઽદ્યાત્ ।
૭૫।૩ચ્ સૈકાનિ વિંશતિઃ અહાનિ જરાન્વિતોઽપિ
૭૫।૩દ્ સોઽશીતિકોઽપિ રમયત્યબ્બલાં યુવા ઇવ ॥ ॥

૭૫।૪અ ક્ષીરં શ્ૃતં યઃ કપિકચ્છુમૂલૈઃ
૭૫।૪બ્ પિબેત્ ક્ષયં સ્ત્રીષુ ન સોઽભ્યુપૈતિ ।
૭૫।૪ચ્ માષાન્ પયઃસર્પિષિ વા વિપક્વાન્
૭૫।૪દ્ ષડ્ગ્રાસમાત્રાંશ્ચ પયોઽનુપાનં (અનુપાનાન્) ॥ ॥

૭૫।૫અબ્/ વિદારિકાયાઃ સ્વરસેન ચૂર્ણં મુહુર્મુહુઃ ભાવિતશોષિતં ચ ।
૭૫।૫ચ્દ્/ શ્ૃતેન દુગ્ધેન સશર્કરેણ પિબેત્ સ યસ્ય પ્રમદાઃ પ્રભૂતાઃ ॥ ॥

૭૫।૬અ ધાત્રીફલાનાં સ્વરસેન ચૂર્ણં
૭૫।૬બ્ સુભાવિતં ક્ષૌદ્રસિતાજ્યયુક્તમ્ ।
૭૫।૬ય્ લીઢ્વાનુ પીત્વા ચ પયોઽગ્નિશક્ત્યા
૭૫।૬દ્ કામં નિકામં પુરુષો નિષેવેત્ ॥ ॥

૭૫।૭અ ક્ષીરેણ બસ્તાણ્ડયુજા શ્ૃતેન
૭૫।૭બ્ સમ્પ્લાવ્ય કામી બહુશસ્તિલાન્ યઃ ।
૭૫।૭ય્ સુશોષિતાન્ અત્તિ પયઃ પિબેચ્ (પિબેત્ પયઃ) ચ
૭૫।૭દ્ તસ્યાગ્રતઃ કિં ચટકઃ કરોતિ ॥ ॥

૭૫।૮અબ્/ માષસૂપસહિતેન સર્પિષા ષષ્ટિકૌદનમદન્તિ યે નરાઃ ।
૭૫।૮ય્દ્/ ક્ષીરમપિ અનુ પિબન્તિ તાસુ તે શર્વરીષુ મદનેન (મદને ન) શેરતે ॥ ॥

૭૫।૯અ તિલાશ્વગન્ધાકપિચ્છુમૂલૈઃ
૭૫।૯બ્ વિદારિકાષષ્ટિકપિષ્ટયોગઃ ।
૭૫।૯ય્ આજેન પિષ્ટઃ પયસા ઘૃતેન
૭૫।૯દ્ પક્વં (પક્ત્વા) ભવેત્શુષ્કલિકાતિવૃષ્યા ॥ ॥

૭૫।૧૦અ ક્ષીરેણ વા ગોક્ષુરકૌપયોગં
૭૫।૧૦બ્ વિદારિકાકન્દકભક્ષણં વા ।
૭૫।૧૦ય્ કુર્વન્ ન સીદેદ્ યદિ જીર્યતેઽસ્ય
૭૫।૧૦દ્ મન્દાગ્નિતા ચેદિદમત્ર ચૂર્ણમ્ ॥ ॥

૭૫।૧૧અબ્/ સાજમોદલવણા હરીતકી શ્ૃંગવેરસહિતા ચ પિપ્પલી ।
૭૫।૧૧ય્દ્/ મદ્યતક્રતરલોષ્ણવારિભિશ્ચૂર્ણપાનમુદરાગ્નિદીપનમ્ ॥ ॥

૭૫।૧૨અ અત્યમ્લતિક્તલવણાનિ કટૂનિ વાઽત્તિ
૭૫।૧૨બ્ યઃ ક્ષારશાકબહુલાનિ (ક્ષારશાકબહુલાનિ) ચ ભોજનાનિ ।
૭૫।૧૨ય્ દૃક્ષુક્રવીર્યરહિતઃ સ કરોત્યનેકાન્
૭૫।૧૨દ્ વ્યાજાન્ જરન્ ઇવ યુવાઽપિ અબલામવાપ્ય ॥ ॥

sએપરતે અધ્યાય ૭૬ ગન્ધયુક્ત્યઃ
૭૬।૧અબ્/ સ્રગ્ગન્ધધૂપાંબરભૂષણાદ્યં ન શોભતે શુક્લશિરોરુહસ્ય ।
૭૬।૧ય્દ્/ યસ્માદતો મૂર્ધજરાગસેવાં કુર્યાદ્ યથૈવાગ્જનભૂષણાનામ્ ॥ ॥

૭૬।૨અ લૌહે પાત્રે તણ્ડુલાન્ કોદ્રવાણાં
૭૬।૨બ્ શુક્લે પક્વાંલ્લોહચૂર્ણેન સાકમ્ ।

૭૬।૨ય્ પિષ્ટાન્ સૂક્ષ્મં મૂર્ધ્નિ શુક્લામ્લકેશે
૭૬।૨દ્ દત્વા (દત્ત્વા) તિષ્ઠેદ્ વેષ્ટયિત્વા અર્દ્ર (અર્ક) પત્રૈઃ ॥ ॥

૭૬।૩અ યાતે દ્વિતીયે પ્રહરે વિહાય
૭૬।૩બ્ દદ્યાત્શિરસ્યામલકપ્રલેપમ્ ।
૭૬।૩ય્ સંછાદ્ય પત્રૈઃ પ્રહરદ્વયેન
૭૬।૩દ્ પ્રક્ષાલિતં કાષ્ણ્ર્યમુપૈતિ શીર્ષમ્ ॥ ॥

૭૬।૪અ પશ્ચાત્શિરઃ સ્નાનસુગન્ધતૈલૈઃ
૭૬।૪બ્ લોહામ્લગન્ધં શિરસોઽપનીય ।
૭૬।૪ય્ હૃદયૈશ્ચ ગન્ધૈઃ વિવિધૈશ્ચ ધૂપૈઃ
૭૬।૪દ્ અન્તઃપુરે રાજ્યસુખં નિષેવેત્ ॥ ॥

૭૬।૫અબ્/ ત્વક્કુષ્ઠરેણુનલિકાસ્પૃક્કારસતગરબાલકૈઃ તુલ્યૈઃ ।
૭૬।૫ય્દ્/ કેસરપત્રવિમિશ્રૈઃ નરપતિયોગ્યં શિરઃસ્નાનમ્ ॥ ॥

૭૬।૬અબ્/ મઞ્જિષ્ઠયા વ્યાઘ્રનખેન શુક્ત્યા ત્વચા સકુષ્ઠેન રસેન ચૂર્ણઃ ।
૭૬।૬ય્દ્/ તૈલેન યુક્તોઽર્કમયૂખતપ્તઃ કરોતિ તચ્ચંપકગન્ધિ તૈલમ્ ॥ ॥

૭૬।૭અ તુલ્યૈઃ પત્રતુરુષ્કબાલતગરૈઃ ગન્ધઃ સ્મરોદ્દીપનઃ
૭૬।૭બ્ સવ્યામો બકુલોઽયમેવ કટુકાહિંગુપ્રધૂપાન્વિતઃ ।
૭૬।૭ય્ કુષ્ઠેનૌત્પલગન્ધિકઃ સમલયઃ પૂર્વો ભવેગંપકો
૭૬।૭દ્ જાતીત્વક્સહિતોઽતિમુક્તક ઇતિ જ્ઞેયઃ સકુસ્તુંબુરુઃ ॥ ॥

૭૬।૮અબ્/ શતપુષ્પાકુન્દુરુકૌ પાદેનાર્ધેન નખતુષ્કૌ ચ ।
૭૬।૮ય્દ્/ મલયપ્રિયંગુભાગૌ ગન્ધો ધૂપ્યો ગુડનખેન ॥ ॥

૭૬।૯અબ્/ ગુગ્ગુલુબાલક (વાલક) લાક્ષામુસ્તાનખશર્કરાઃ ક્રમાદ્ ધૂપઃ ।
૭૬।૯ય્દ્/ અન્યો માંસીબાલક (વાલક) તુષ્કનખચન્દનૈઃ પિણ્ડઃ ॥ ॥

૭૬।૧૦અ હરીતકીશંખઘનદ્રવાંબુભિઃ
૭૬।૧૦બ્ ગુડોત્પલૈઃ શૈલકમુસ્તકાન્વિતૈઃ ।
૭૬।૧૦ય્ નવાન્તપાદાદિવિવર્ધિતૈઃ ક્રમાદ્
૭૬।૧૦દ્ ભવન્તિ ધૂપા બહવો મનોહરાઃ ॥ ॥

૭૬।૧૧અ ભાગૈશ્ચતુર્ભિઃ સિતશૈલમુસ્તાઃ
૭૬।૧૧બ્ શ્રીસર્જભાગૌ નખગુગ્ગુલૂ ચ ।
૭૬।૧૧ય્ કર્પૂરબોધો મધુપિણ્ડિતોઽયં

૭૬।૧૧દ્ કોપચ્છદો નામ નરેન્દ્રધૂપઃ ॥ ॥

૭૬।૧૨અબ્/ ત્વગુશીરપત્રભાગૈઃ સૂક્ષ્મૈલાર્ધેન સંયુતૈશ્ચૂર્ણઃ ।
૭૬।૧૨ચ્દ્/ પુટવાસઃ પ્રવરોઽયં મૃગકર્પૂરપ્રબોધેન ॥ ॥

૭૬।૧૩અબ્/ ઘનબાલકશૈલેયકકર્પૂરૌશીરનાગપુષ્પાણિ ।
૭૬।૧૩ચ્દ્/ વ્યાઘ્રનખસ્પૃક્કાગુરુદમનક (મદનક)નખતગરધાન્યાનિ ॥ ॥

૭૬।૧૪અબ્/ કર્પૂરચોલ (ચોર) મલયૈઃ સ્વેચ્છાપરિવર્તિતૈશ્ચતુર્ભિઃ અતઃ ।
૭૬।૧૪ચ્દ્/ એકદ્વિત્રિચતુર્ભિઃ ભાગૈઃ ગન્ધાર્ણવો ભવતિ ॥ ॥

૭૬।૧૫અબ્/ અત્યુલ્બણગન્ધત્વાદેકાંશો નિત્યમેવ ધાન્યાનામ્ ।
૭૬।૧૫ચ્દ્/ કર્પૂરસ્ય તદૂનો નૈતૌ દ્વિત્રિઆદિભિઃ દેયૌ ॥ ॥

૭૬।૧૬અબ્/ શ્રીસર્જગુડનખૈઃ તે ધૂપયિતવ્યાઃ ક્રમાન્ ન પિણ્ડસ્થૈઃ ।
૭૬।૧૬ચ્દ્/ બોધઃ કસ્તૂરિકયા દેયઃ કર્પૂરસંયુતયા ॥ ॥

૭૬।૧૭અબ્/ અત્ર સહસ્રચતુષ્ટયમન્યાનિ ચ સપ્તતિસહસ્રાણિ ।
૭૬।૧૭ચ્દ્/ લક્ષં શતાનિ સપ્ત વિંશતિયુક્તાનિ ગન્ધાનામ્ ॥ ॥

૭૬।૧૮અબ્/ એકૈકમેકભાગં દ્વિત્રિચતુર્ભાગિકૈઃ યુતં દ્રવ્યૈઃ ।
૭૬।૧૮ચ્દ્/ ષડ્ગન્ધકરં તદ્વદ્ દ્વિત્રિચતુર્ભાગિકં કુરુતે ॥ ॥

૭૬।૧૯અબ્/ દ્રવ્યચતુષ્ટયયોગાદ્ ગન્ધચતુર્વિંશતિઃ યથૈકસ્ય ।
૭૬।૧૯ચ્દ્/ એવં શેષાણામપિ ષણ્ણવતિઃ સર્વપિણ્ડોઽત્ર ॥ ॥

૭૬।૨૦અબ્/ ષોડશકે દ્રવ્યગણે ચતુર્વિકલ્પેન ભિદ્યમાનાનામ્ ।
૭૬।૨૦ચ્દ્/ અષ્ટાદશ જાયન્તે શતાનિ સહિતાનિ વિંશત્યા ॥ ॥

૭૬।૨૧અબ્/ ષણ્ણવતિભેદભિન્નશ્ચતુર્વિકલ્પો ગણો યતઃ તસ્માત્ ।
૭૬।૨૧ચ્દ્/ ષણ્ણનવતિગુણઃ કાર્યઃ સા સંખ્યા ભવતિ ગન્ધાનામ્ ॥ ॥

૭૬।૨૨અ પૂર્વેણ પૂર્વેણ ગતેન યુક્તં
૭૬।૨૨બ્ સ્થાનં વિનાન્ત્યં પ્રવદન્તિ સંખ્યામ્ ।
૭૬।૨૨ચ્ ઇચ્છાવિકલ્પૈઃ ક્રમશોઽભિનીય
૭૬।૨૨દ્ નીતે નિવૃત્તિઃ પુનઃ અન્યનીતિઃ ॥ ॥

૭૬।૨૩અબ્/ દ્વિત્રીન્દ્રિયાષ્ટભાગૈઃ અગુરુઃ પત્રં તુરુષ્કશૈલેયૌ
૭૬।૨૩ચ્દ્/ વિષયાષ્ટપક્ષદહનાઃ પ્રિયંગુમુસ્તારસાઃ કેશઃ ॥ ॥

૭૬।૨૪અબ્/ સ્પૃક્કાત્વક્તગરાણાં માંસ્યાશ્ચ કૃતૈકસપ્તષડ્ભાગાઃ ।

૭૬।૨૪ય્દ્/ સપ્તઋતુવેદચન્દ્રૈઃ મલયનખશ્રીકકુન્દુરુકાઃ ॥ ॥

૭૬।૨૫અબ્/ ષોડશકે કચ્છપુટે યથા તથા મિશ્રિતે ચતુર્દ્રવ્યે (મિશ્રિતૈશ્ચતુર્દ્રવ્યૈઃ) ।
૭૬।૨૫ય્દ્/ યેઽત્રાષ્ટાદશ ભાગાઃ તેઽસ્મિન્ ગન્ધાદયો યોગાઃ ॥ ॥

૭૬।૨૬અબ્/ નખતગરતુરુષ્કયુતા જાતીકર્પૂરમૃગકૃતૌદ્બોધાઃ ।
૭૬।૨૬ય્દ્/ ગુડનખધૂપ્યા ગન્ધાઃ કર્તવ્યાઃ સર્વતોભદ્રાઃ ॥ ॥

૭૬।૨૭અબ્/ જાતીફલમૃગકર્પૂરબોધિતૈઃ સસહકારમધુસિક્તૈઃ ।
૭૬।૨૭ય્દ્/ બહવોઽત્ર પારિજાતાશ્ચતુર્ભિઃ ઇચ્છાપરિગૃહીતૈઃ ॥ ॥

૭૬।૨૮અબ્/ સર્જરસશ્રીવાસકસમન્વિતા યેઽત્ર સર્વધૂપાઃ (સર્વયોગાઃ) તૈઃ ।
૭૬।૨૮ય્દ્/ શ્રીસર્જરસવિયુક્તૈઃ સ્નાનાનિ સબાલક (સવાલક) ત્વગ્ભિઃ ॥ ॥

૭૬।૨૯અબ્/ રોધ્રૌશીરનતાગુરુમુસ્તાપત્ર (મુસ્તા) પ્રિયંગુવનપથ્યાઃ ।
૭૬।૨૯ય્દ્/ નવકોષ્ઠાત્ કચ્છપુટાદ્ દ્રવ્યત્રિતયં સમુદ્ધૃત્ય ॥ ॥

૭૬।૩૦અબ્/ ચન્દનતુરુષ્કભાગૌ શુક્ત્યર્ધં પાદિકા તુ શતપુષ્પા ।
૭૬।૩૦ય્દ્/ કટુહિંગુલગુડધૂપ્યાઃ કેસરગન્ધાશ્ચતુરશીતિઃ ॥ ॥

૭૬।૩૧અબ્/ સપ્તાહં ગોમૂત્રે હરીતકીચૂર્ણસંયુતે ક્ષિપ્ત્વા ।
૭૬।૩૧ય્દ્/ ગન્ધોદકે ચ ભૂયો વિનિક્ષિપેદ્ દન્તકાષ્ઠાનિ ॥ ॥

૭૬।૩૨અબ્/ એલાત્વક્પત્રાઞ્જનમધુમરિચૈઃ નાગપુષ્પકુષ્ઠૈશ્ચ ।
૭૬।૩૨ય્દ્/ ગન્ધાંભઃ કર્તવ્યં કિંચિત્ કાલં સ્થિતાનિ અસ્મિન્ ॥ ॥

૭૬।૩૩અબ્/ જાતીફલપત્રૈલાકર્પૂરૈઃ કૃતયમએકશિખિભાગૈઃ ।
૭૬।૩૩ય્દ્/ અવચૂર્નિતાનિ ભાનોઃ મરીચિભિઃ શોષણીયાનિ ॥ ॥

૭૬।૩૪અ વર્ણપ્રસાદં વદનસ્ય કાન્તિં
૭૬।૩૪બ્ વૈશદ્યમાસ્યસ્ય સુગન્ધિતાં ચ ।
૭૬।૩૪ય્ સંસેવિતુઃ શ્રોત્રસુખાં ચ વાચં
૭૬।૩૪દ્ કુર્વન્તિ કાષ્ઠાનિ અસકૃદ્ભવાનામ્ ॥ ॥

૭૬।૩૫અ કામં પ્રદીપયતિ રૂપમભિવ્યનક્તિ
૭૬।૩૫બ્ સૌભાગ્યમાવહતિ વક્ત્રસુગન્ધિતાં ચ ।
૭૬।૩૫ય્ ઊર્જં કરોતિ કફજાંશ્ચ નિહન્તિ રોગાં
૭૬।૩૫દ્ તાંબૂલમેવમપરાંશ્ચ ગુણાન્ કરોતિ ॥ ॥

૭૬।૩૬અ યુક્તેન ચૂર્ણેન કરોતિ રાગં

૭૬।૩૬બ્ રાગક્ષયં પૂગફલાતિરિક્તમ્ ।
૭૬।૩૬ચ્ ચૂર્ણાધિકં વક્ત્રવિગન્ધકારિ
૭૬।૩૬દ્ પત્રાધિકં સાધુ કરોતિ ગન્ધમ્ ॥ ॥

૭૬।૩૭અ પત્રાધિકં નિશિ હિતંસફલં દિવા ચ
૭૬।૩૭બ્ પ્રોક્તાનિ અથાકરણમસ્ય વિડંબનૈવ
૭૬।૩૭ચ્ કક્કોલપૂગલવલીફલપારિજાતૈઃ
૭૬।૩૭દ્ આમોદિતં મદમુદા મુદિતં કરોતિ ॥ ॥

sએપરતે અધ્યાય ૭૭ સ્ત્રીપુંસસમાયોગાધ્યાયઃ
૭૭।૧અબ્/ શસ્ત્રેન વેણીવિનિગૂહિતેન વિદૂરથં સ્વા મહિષી જઘાન ।
૭૭।૧ચ્દ્/ વિષપ્રદિગ્ધેન ચ નૂપુરેણ દેવી વિરક્તા કિલ કાશિરાજમ્ ॥ ॥

૭૭।૨અ એવં વિરક્તા જનયન્તિ દોષાન્
૭૭।૨બ્ પ્રાણચ્છિદોઽન્યૈઃ અનુકીર્તિતૈઃ કિમ્ ।
૭૭।૨ચ્ રક્તાવિરક્તાઃ પુરુષૈઃ અતોઽર્થાત્
૭૭।૨દ્ પરીક્ષિતવ્યાઃ પ્રમદાઃ પ્રયત્નાત્ ॥ ॥

૭૭।૩અ સ્નેહં મનોભવકૃતં કથયન્તિ ભાવા
૭૭।૩બ્ નાભીભુજસ્તનવિભૂષણદર્શનાનિ ।
૭૭।૩ચ્ વસ્ત્રાભિસંયમનકેશવિમોક્ષણાનિ
૭૭।૩દ્ ભ્રૂક્ષેપકંપિતકટાક્ષનિરીક્ષણાનિ ॥ ॥

૭૭।૪અ ઉચ્ચૈઃ ષ્ઠીવનમુત્કટપ્રહસિતં શય્યાસનોત્સર્પણં
૭૭।૪બ્ ગાત્રાસ્ફોટનજૃંભણાનિ સુલભદ્રવ્યાલ્પસમ્પ્રાર્થના ।
૭૭।૪ચ્ બાલાલિંગનચુંબનાનિ અભિમુખે સખ્યાઃ સમાલોકનં
૭૭।૪દ્ દૃક્પાતશ્ચ પરાન્મુખે ગુણકથા કર્ણસ્ય કણ્ડૂયનમ્ ॥ ॥

૭૭।૫અ ઇમાં ચ વિન્દ્યાદનુરક્તચેષ્ટાં
૭૭।૫બ્ પ્રિયાણિ વક્તિ સ્વધનં દદાતિ ।
૭૭।૫ચ્ વિલોક્ય સંહૃષ્યતિ વીતરોષા
૭૭।૫દ્ પ્રમાર્ષ્ટિ દોષાન્ ગુણકીર્તનેન ॥ ॥

૭૭।૬અ તન્મિત્રપૂજા તદરિદ્વિષત્વં
૭૭।૬બ્ કૃતસ્મૃતિઃ પ્રોષિતદૌર્મનસ્યમ્ ।
૭૭।૬ચ્ સ્તનૌષ્ઠદાનાનિ ઉપગૂહનં ચ ।
૭૭।૬દ્ સ્વેદોઽથ ચુંબાપ્રથમાભિયોગઃ ॥ ॥

૭૭।૭અ વિરક્તચેષ્ટા ભ્રૂકુટી (ભૃકુટી) મુખત્વં
૭૭।૭બ્ પરાન્મુખત્વં કૃતવિસ્મૃતિશ્ચ ।
૭૭।૭ય્ અસંભ્રમો દુષ્પરિતોષતા ચ
૭૭।૭દ્ તદ્વિષ્ટમૈત્રી પરુષં ચ વાક્યમ્ ॥ ॥

૭૭।૮અ સ્પૃષ્ટ્વા અથવાલોક્ય ધુનોતિ ગાત્રં
૭૭।૮બ્ કરોતિ ગર્વં ન રુણદ્ધિ યાન્તમ્ ।
૭૭।૮ય્ ચુંબાવિરામે વદનં પ્રમાર્ષ્ટિ
૭૭।૮દ્ પશ્ચાત્ સમુત્તિષ્ઠતિ પૂર્વસુપ્તા ॥ ॥

૭૭।૯અબ્/ ભિક્ષુણિકા પ્રવ્રજિતા દાસી ધાત્રી કુમારિકા રજિકા ।
૭૭।૯ય્દ્/ માલાકારી દુષ્ટાંગના સખી નાપિતી દૂત્યઃ ॥ ॥

૭૭।૧૦અબ્/ કુલજનવિનાશહેતુઃ દૂત્યો યસ્માદતઃ પ્રયત્નેન ।
૭૭।૧૦ય્દ્/ તાભ્યઃ સ્ત્રિયોઽભિરક્ષ્યા વંશયશોમાનવૃદ્ધ્યર્થમ્ ॥ ॥

૭૭।૧૧અબ્/ રાત્રીવિહારજાગરરોગવ્યપદેશપરગૃહેક્ષણિકાઃ ।
૭૭।૧૧ય્દ્/ વ્યસનૌત્સવાશ્ચ સંકેતહેતવઃ તેષુ રક્ષ્યાશ્ચ ॥ ॥

૭૭।૧૨અ આદૌ નૈચ્છતિ નૌજ્ઝતિ સ્મરકથાં વ્રીડાવિમિશ્રાલસા
૭૭।૧૨બ્ મધ્યે હ્રીપરિવર્જિતાભ્યુપરમે લજ્જાવિનમ્રાનના ।
૭૭।૧૨ય્ ભાવૈઃ નૈકવિધૈઃ કરોત્યભિનયં ભૂયશ્ચ યા સાદરા
૭૭।૧૨દ્ બુદ્ધ્વા પુંપ્રકૃતિં ચ યાનુચરતિ ગ્લાનેતરૈશ્ચેષ્ટિતૈઃ ॥ ॥

૭૭।૧૩અ સ્ત્રીણાં ગુણા યૌવનરૂપવેષ-
૭૭।૧૩બ્ દાક્ષિણ્યવિજ્ઞાનવિલાસપૂર્વાઃ ।
૭૭।૧૩ય્ સ્ત્રી રત્નસંજ્ઞા ચ ગુણાન્વિતાસુ
૭૭।૧૩દ્ સ્ત્રીવ્યાધયોઽન્યાશ્ચતુરસ્ય પુંસઃ ॥ ॥

૭૭।૧૪અ ન ગ્રામ્યવર્ણૈઃ મલદિગ્ધકાયા
૭૭।૧૪બ્ નિન્દ્યાંગસંબન્ધિકથાં ચ કુર્યાત્ ।
૭૭।૧૪ય્ ન ચાન્યકાર્યસ્મરણં રહઃસ્થા
૭૭।૧૪દ્ મનો હિ મૂલં હરદગ્ધમૂર્તેઃ ॥ ॥

૭૭।૧૫અબ્/ શ્વાસં મનુષ્યેણ સમં ત્યજન્તી બાહૂપધાનસ્તનદાનદક્ષા ।
૭૭।૧૫ય્દ્/ સુગન્ધકેશા સુસમીપરાગા સુમેઽનુસુપ્તા પ્રથમં વિબુદ્ધા ॥ ॥

૭૭।૧૬અબ્/ દુષ્ટસ્વભાવાઃ પરિવર્જનીયા વિમર્દકાલેષુ ચ ન ક્ષમા યાઃ ।
૭૭।૧૬ચ્દ્/ યાસામસૃગ્વાસિતનીલપીતમાતામ્રવર્ણં ચ ન તાઃ પ્રશસ્તાઃ ॥ ॥

૭૭।૧૭અબ્/ યા સ્વપ્નશીલા બહુરક્તપિત્તા પ્રવાહિની વાતકફાતિરક્તા (અતિરિક્તા) ।
૭૭।૧૭ચ્દ્/ મહાશના સ્વેદયુતાંગદુષ્ટા યા હ્રસ્વકેશી પલિતાન્વિતા વા (ચ) ॥ ॥

૭૭।૧૮અ માંસાનિ યસ્યાશ્ચ ચલન્તિ નાર્યા
૭૭।૧૮બ્ મહોદરા ખિક્ખિમિની ચ યા સ્યાત્ ॥ ॥

૭૭।૧૮ચ્ સ્ત્રીલક્ષણે યાઃ કથિતાશ્ચ પાપાઃ
૭૭।૧૮દ્ તાભિઃ ન કુર્યાત્ સહ કામધર્મમ્ ॥ ॥

૭૭।૧૯અબ્/ શશશોણિતસંકાશં લાક્ષારસસન્નિકાશમથવા યત્ ।
૭૭।૧૯ચ્દ્/ પ્રક્ષાલિતં વિરજ્યતિ યગાસૃક્ તદ્ભવેત્શુદ્ધમ્ ॥ ॥

૭૭।૨૦અબ્/ યચ્છબ્દવેદનાવર્જિતં ત્ર્યહાત્ સન્નિવર્તતે રક્તમ્ ।
૭૭।૨૦ચ્દ્/ તત્પુરુષસમ્પ્રયોગાદવિચારં ગર્ભતાં યાતિ ॥ ॥

૭૭।૨૧અબ્/ ન દિનત્રયં નિષેવ્યં (નિષેવેત્) સ્નાનં માલ્યાનુલેપનં સ્ત્રીભિઃ (ચ સ્ત્રી) ।
૭૭।૨૧ચ્દ્/ સ્નાયાગતુર્થદિવસે શાસ્ત્રૌક્તેનૌપદેશેન ॥ ॥

૭૭।૨૨અબ્/ પુષ્યસ્નાનૌષધયો યાઃ કથિતાઃ તાભિઃ અંબુમિશ્રાભિઃ ।
૭૭।૨૨ચ્દ્/ સ્નાયાત્ તથાત્ર મન્ત્રઃ સ એવ યઃ તત્ર નિર્દિષ્ટઃ ॥ ॥

૭૭।૨૩અબ્/ યુગ્માસુ કિલ મનુષ્યા નિશાસુ નાર્યો ભવન્તિ વિષમાસુ ।
૭૭।૨૩ચ્દ્/ દીર્ઘાયુષઃ સુરૂપાઃ સુખિનશ્ચ વિકૃષ્ટયુગ્માસુ ॥ ॥

૭૭।૨૪અબ્/ દક્ષિણપાર્શ્વે પુરુષો વામે નારી યમાવુભયસંસ્થૌ ॥ ॥

૭૭।૨૪ચ્દ્/ યદુદરમધ્યૌપગતં નપુંસકં તન્નિબોદ્ધવ્યમ્ ॥ ॥

૭૭।૨૫અ કેન્દ્રત્રિકોણેષુ શુભસ્થિતેષુ
૭૭।૨૫બ્ લગ્ને શશાંકે ચ શુભૈઃ સમેતે ।
૭૭।૨૫ચ્ પાપૈઃ ત્રિલાભારિગતૈશ્ચ યાયાત્
૭૭।૨૫દ્ પુંજન્મયોગેષુ ચ સમ્પ્રયોગમ્ ॥ ॥

૭૭।૨૬અ ન નખદશનવિક્ષતાનિ કુર્યાદ્
૭૭।૨૬બ્ ઋતુસમયે પુરુષઃ સ્ત્રિયાઃ કથંચિત્ ।
૭૭।૨૬ચ્ ઋતુઃ અપિ દશ ષટ્ ચ વાસરાણિ
૭૭।૨૬દ્ પ્રથમનિશાત્રિતયં ન તત્ર ગમ્યમ્ ॥ ॥

sએપરતે અધ્યાય ૭૮ શય્યાસનલક્ષણાધ્યાયઃ

૭૮।૧અબ્/ સર્વસ્ય સર્વકાલં યસ્માદુપયોગમેતિ શાસ્ત્રમિદમ્ ।
૭૮।૧ચ્દ્/ રાજ્ઞાં વિશેષતોઽતઃ શયનાસનલક્ષણં વક્ષ્યે ॥ ॥

૭૮।૨અબ્/ અસનસ્પન્દનચન્દનહરિદ્રસુરદારુતિન્દુકીશાલાઃ ।
૭૮।૨ચ્દ્/ કાશ્મર્યઞ્જનપદ્મકશાકા વા શિંશપા ચ શુભાઃ ॥ ॥

૭૮।૩અબ્/ અશનિજલાનિલહસ્તિપ્રપાતિતા મધુવિહંગકૃતનિલયાઃ ।
૭૮।૩ચ્દ્/ ચૈત્યશ્મશાનપથિજ ઊર્ધ્વશુષ્કવલ્લીનિબદ્ધાશ્ચ ॥ ॥

૭૮।૪અબ્/ કણ્ટકિનો યે ચ (વા યે) સ્યુઃ મહાનદીસંગમૌદ્ભવા યે ચ ।
૭૮।૪ચ્દ્/ સુરભવનજાશ્ચ ન શુભા યે ચાપરયામ્યદિક્પતિતાઃ ॥ ॥

૭૮।૫અબ્/ પ્રતિષિદ્ધવૃક્ષનિર્મિતશયનાસનસેવનાત્ કુલવિનાશઃ ।
૭૮।૫ચ્દ્/ વ્યાધિભયવ્યયકલહા ભવન્ત્યનર્થા (અનર્થાશ્ચ) અનેકવિધાઃ ॥ ॥

૭૮।૬અબ્/ પૂર્વચ્છિન્નં યદિ વા દારુ ભવેત્ તત્પરીક્ષ્યમારંભે ।
૭૮।૬ચ્દ્/ યદ્યારોહેત્ તસ્મિન્ કુમારકઃ પુત્રપશુદં તત્ ॥ ॥

૭૮।૭અબ્/ સિતકુસુમમત્તવારણદધ્યક્ષતપૂર્ણકુંભરત્નાનિ ।
૭૮।૭ચ્દ્/ મંગલ્યાનિ અન્યાનિ ચ દૃષ્ટ્વારંભે શુભં જ્ઞેયમ્ ॥ ॥

૭૮।૮અબ્/ કર્માંગુલં યવાષ્ટકમુદરાસક્તં તુષૈઃ પરિત્યક્તમ્ ।
૭૮।૮ચ્દ્/ અંગુલશતં નૃપાણાં મહતી શય્યા જયાય કૃતા ॥ ॥

૭૮।૯અબ્/ નવતિઃ સૈવ ષડૂના દ્વાદશહીના ત્રિષટ્કહીના ચ ।
૭૮।૯ચ્દ્/ નૃપપુત્રમન્ત્રિબલપતિપુરોધસાં સ્યુઃ યથાસંખ્યમ્ ॥ ॥

૭૮।૧૦અબ્/ અર્ધમતોઽષ્ટાંશોનં વિષ્કંભો વિશ્વકર્મણા પ્રોક્તઃ ।
૭૮।૧૦ચ્દ્/ આયામત્ર્યંશસમઃ પાદૌચ્છ્રાયઃ સકુક્ષ્ય (સકુક્ષિ) શિરાઃ ॥ ॥

૭૮।૧૧અબ્/ યઃ સર્વઃ શ્રીપર્ણ્યા પર્યંકો નિર્મિતઃ સ ધનદાતા ।
૭૮।૧૧ચ્દ્/ અસનકૃતો રોગહરઃ તિન્દુકસારેણ વિત્તકરઃ ॥ ॥

૭૮।૧૨અબ્/ યઃ કેવલશિંશપયા વિનિર્મિતો બહુવિધં સ વૃદ્ધિકરઃ ।
૭૮।૧૨ચ્દ્/ ચન્દનમયો રિપુઘ્નો ધર્મયશોદીર્ઘજીવિતકૃત્ ॥ ॥

૭૮।૧૩અબ્/ યઃ પદ્મકપર્યંકઃ સ દીર્ઘમાયુઃ શ્રિયં શ્રુતં વિત્તમ્ ।
૭૮।૧૩ચ્દ્/ કુરુતે શાલેન કૃતઃ કલ્યાણં શાકરચિતશ્ચ ॥ ॥

૭૮।૧૪અબ્/ કેવલચન્દનરચિતં કાંચનગુપ્તં વિચિત્રરત્નયુતમ્ ।

૭૮।૧૪ય્દ્/ અધ્યાસન્ પર્યંકં વિબુધૈઃ અપિ પૂજ્યતે નૃપતિઃ ॥ ॥

૭૮।૧૫અબ્/ અન્યેન સમાયુક્તા ન તિન્દુકી શિંશપા ચ શુભફલદા ।
૭૮।૧૫ય્દ્/ ન શ્રીપર્ણેન (શ્રીપર્ણી ન) ચ દેવદારુવૃક્ષો ન ચાપ્યસનઃ ॥ ॥

૭૮।૧૬અબ્/ શુભદૌ તુ શાલશાકૌ (શાકશાલૌ) પરસ્પરં સંયુતૌ પૃથક્ ચૈવ ।
૭૮।૧૬ય્દ્/ તદ્વત્ પૃથક્ પ્રશસ્તૌ સહિતૌ ચ હરિદ્રકકદંબૌ ॥ ॥

૭૮।૧૭અબ્/ સર્વઃ સ્પન્દનરચિતો ન શુભઃ પ્રાણાન્ હિનસ્તિ ચાંબકૃતઃ ।
૭૮।૧૭ય્દ્/ અસનોઽન્યદારુસહિતઃ ક્ષિપ્રં દોષાન્ કરોતિ બહૂન્ ॥ ॥

૭૮।૧૮અબ્/ અંબસ્પન્દનચન્દનવૃક્ષાણાં સ્પન્દનાત્શુભાઃ પાદાઃ ।
૭૮।૧૮ય્દ્/ ફલતરુણા શયનાસનમિષ્ટફલં ભવતિ સર્વેણ ॥ ॥

૭૮।૧૯અબ્/ ગજદન્તઃ સર્વેષાં પ્રોક્તતરૂણાં પ્રશસ્યતે યોગે ।
૭૮।૧૯ય્દ્/ કાર્યોઽલંકારવિધિઃ ગજદન્તેન પ્રશસ્તેન ॥ ॥

૭૮।૨૦અબ્/ દન્તસ્ય મૂલપરિધિં દ્વિરાયતં પ્રોહ્ય કલ્પયેત્શેષમ્ ।
૭૮।૨૦ય્દ્/ અધિકમનૂપચરાણાં ન્યૂનં ગિરિચારિણાં કિંચિત્ ॥ ॥

૭૮।૨૧અબ્/ શ્રીવૃક્ષ (વત્સ) વર્ધમાનચ્છત્રધ્વજચામરાનુરૂપેષુ ।
૭૮।૨૧ય્દ્/ છેદે દૃષ્ટેષ્વારોગ્ય (અરોગ્ય) વિજયધનવૃદ્ધિસૌખ્યાનિ ॥ ॥

૭૮।૨૨અબ્/ પ્રહરણસદૃશેષુ જયો નન્દ્યાવર્તે પ્રનષ્ટદેશાપ્તિઃ ।
૭૮।૨૨ય્દ્/ લોષ્ટે તુ લબ્ધપૂર્વસ્ય ભવતિ દેશસ્ય સમ્પ્રાપ્તિઃ ॥ ॥

૭૮।૨૩અબ્/ સ્ત્રીરૂપે ધનનાશો (સ્વવિનાશો) ભૃંગારેઽભ્યુત્થિતે સુતોત્પત્તિઃ ।
૭૮।૨૩ય્દ્/ કુંભેન નિધિપ્રાપ્તિઃ યાત્રાવિઘ્નં ચ દણ્ડેન ॥ ॥

૭૮।૨૪અબ્/ કૃકલાસકપિભુજંગેષ્વસુભિક્ષવ્યાધયો રિપુવશિત્વં (વશત્વં) ।
૭૮।૨૪ય્દ્/ ગૃધ્રોલૂકધ્વાંક્ષશ્યેનાકારેષુ જનમરકઃ ॥ ॥

૭૮।૨૫અબ્/ પાશેઽથવા કબન્ધે નૃપમૃત્યુઃ જનવિપત્ સ્રુતે રક્તે ।
૭૮।૨૫ય્દ્/ કૃષ્ણે શ્યાવે રૂક્ષે દુર્ગન્ધે ચાશુભં ભવતિ ॥ ॥

૭૮।૨૬અબ્/ શુક્લઃ સમઃ સુગન્ધિઃ સ્નિગ્ધશ્ચ શુભાવહો ભવેદ્ધેદઃ ।
૭૮।૨૬ય્દ્/ અશુભશુભચ્છેદા યે શયનેષ્વપિ તે તથા ફલદાઃ ॥ ॥

૭૮।૨૭અબ્/ ઈષાયોગે દારુ પ્રદક્ષિણાગ્રં પ્રશસ્તમાચાર્યૈઃ ।
૭૮।૨૭ય્દ્/ અપસવ્યૈકદિગગ્રે ભવતિ ભયં ભૂતસઞ્જનિતમ્ ॥ ॥

૯૪।૧૮ય્દ્/ રક્તદ્રવ્યં દગ્ધં તૃણકાષ્ઠં વા ગૃહે વિદધત્ ॥ ॥

૯૪।૧૯અબ્/ ઐન્દ્યાદિદિગ્ અવલોકી સૂર્યાભિમુખો રુવન્ ગૃહે ગૃહિનઃ ।
૯૪।૧૯ય્દ્/ રાજભયચોરબન્ધનકલહાઃ સ્યુઃ પશુભયં ચેતિ ॥ ॥

૯૪।૨૦અબ્/ શાન્તામૈન્દ્રીમવલોકયન્ રુયાદ્ રાજપુરુષમિત્રાપ્તિઃ ।
૯૪।૨૦ય્દ્/ ભવતિ ચ સુવર્ણલબ્ધિઃ શાલ્યન્નગુડાશનાપ્તિશ્ચ ॥ ॥

૯૪।૨૧અબ્/ આગ્નેય્યામનલાજીવિકયુવતિપ્રવરધાતુલાભશ્ચ ।
૯૪।૨૧ય્દ્/ યામ્યે માષકુલૂત્થા (કુલત્થા) ભોજ્યં ગાન્ધર્વિકૈઃ યોગઃ ॥ ॥

૯૪।૨૨અબ્/ નૈરૃત્યાં દૂતાશ્વોપકરણદધિતૈલપલલભોજ્યાપ્તિઃ ।
૯૪।૨૨ય્દ્/ વારુણ્યાં માંસસુરાસવધાન્યસમુદ્રરત્નાપ્તિઃ ॥ ॥

૯૪।૨૩અબ્/ મારુત્યાં શસ્ત્રાયુધસરોજવલ્લીફલાશનાપ્તિશ્ચ ।
૯૪।૨૩ય્દ્/ સૌમ્યાયાં પરમાન્નાશનં તુરંગાંબરપ્રાપ્તિઃ ॥ ॥

૯૪।૨૪અબ્/ ઐશાન્યાં સમ્પ્રાપ્તિઃ ધૃતપૂર્ણાનાં ભવેદનડુહશ્ચ ।
૯૪।૨૪ય્દ્/ એવં ફલં ગૃહપતેઃ ગૃહપૃષ્ઠસમાશ્રિતે ભવતિ ॥ ॥

૯૪।૨૫અબ્/ ગમને કર્ણસમશ્ચેત્ ક્ષેમાય ન કાર્યસિદ્ધયે ભવતિ ॥ ॥

૯૪।૨૫ય્દ્/ અભિમુખમુપૈતિ યાતુઃ વિરુવન્ વિનિવર્તયેદ્ યાત્રામ્ ॥ ॥

૯૪।૨૬અબ્/ વામે વાશિત્વાદૌ દક્ષિણપાર્શ્વેઽનુવાશતે યાતુઃ ।
૯૪।૨૬ય્દ્/ અર્થાપહારકારી તદ્વિપરીતોઽર્થસિદ્ધિકરઃ ॥ ॥

૯૪।૨૭અબ્/ યદિ વામ એવ વિરુવન્ (વિરુયાત્) મુહુર્મુહુઃ યાયિનોઽનુલોમગતિઃ ।
૯૪।૨૭ય્દ્/ અર્થસ્ય ભવતિ સિદ્ધ્યૈ પ્રાચ્યાનાં દક્ષિણશ્ચૈવમ્ ॥ ॥

૯૪।૨૮અબ્/ વામઃ પ્રતિલોમગતિઃ વિરુવન્ (વાશન્) ગમનસ્ય વિઘ્નકૃદ્ ભવતિ ।
૯૪।૨૮ય્દ્/ તત્રસ્થસ્યૈવ ફલં કથયતિ તદ્વાંછિતં ગમને ॥ ॥

૯૪।૨૯અબ્/ દક્ષિણવિરુતં કૃત્વા વામે વિરુયાદ્ યથીપ્સિતાવાપ્તિઃ ।
૯૪।૨૯ય્દ્/ પ્રતિવાશ્ય પુરો યાયાદ્ દ્રુતમત્યર્થાગમો ભવતિ (અગ્રે ઽર્થાગમોઽતિમહાન્) ॥ ॥

૯૪।૩૦અબ્/ પ્રતિવાશ્ય પૃષ્ટઃઅતો દક્ષિણેન યાયાદ્ દ્રુતં ક્ષતજકારી (ક્ષતજકર્તા) ।
૯૪।૩૦ય્દ્/ એકચરણોઽર્કમીક્ષન્ વિરુવંશ્ચ પુરો રુધિરહેતુઃ ॥ ॥

૯૪।૩૧અબ્/ દૃષ્ટ્વાર્કમેકપાદઃ તુણ્ડેન લિખેદ્ યદા સ્વપિચ્છાનિ ।

૯૪।૩૧ય્દ્/ પુરતો જનસ્ય મહતો વધમભિધત્તે તદા બલિભુક્ ॥ ॥

૯૪।૩૨અબ્/ સસ્યોપેતે ક્ષેત્રે વિરુવતિ શાન્તે સસસ્યભૂલબ્ધિઃ ।
૯૪।૩૨ય્દ્/ આકુલચેષ્ટો વિરુવન્ સીમાન્તે ક્લેશકૃદ્ યાતુઃ ॥ ॥

૯૪।૩૩અબ્/ સુસ્નિગ્ધપત્રપલ્લવકુસુમફલાનમ્રસુરભિમધુરેષુ ।
૯૪।૩૩ય્દ્/ સક્ષીરાવ્રણસંસ્થિતમનોજ્ઞવૃક્ષેષુ ચાર્થસિદ્ધિકરઃ (ચાર્થકરઃ) ॥ ॥

૯૪।૩૪અબ્/ નિષ્પન્નસસ્યશાદ્વ (શાડ્વ, શાદ્વ) લભવનપ્રાસાદહર્મ્યહરિતેષુ ।
૯૪।૩૪ય્દ્/ ધન્ય (ધાન્ય) ઉચ્છ્રયમંગલ્યેષુ ચૈવ વિરુવન્ ધનાગમદઃ ॥ ॥

૯૪।૩૫અબ્/ ગોપુચ્છસ્થે વલ્મીકગેઽથવા દર્શનં ભુજંગસ્ય ।
૯૪।૩૫ય્દ્/ સદ્યો જ્વરો મહિષગે વિરુવતિ ગુલ્મે ફલં સ્વલ્પમ્ ॥ ॥

૯૪।૩૬અબ્/ કાર્યસ્ય વ્યાઘાતઃ તૃણકૂટે વામગેઽંબુસંસ્થે (અસ્થિસંસ્થે) વા ।
૯૪।૩૬ય્દ્/ ઊર્ધ્વાગ્નિપ્લુષ્ટેઽશનિહતે ચ કાકે વધો ભવતિ ॥ ॥

૯૪।૩૭અબ્/ કણ્ટકિમિશ્રે સૌમ્યે સિદ્ધિઃ કાર્યસ્ય ભવતિ કલહશ્ચ ।
૯૪।૩૭ય્દ્/ કણ્ટકિનિ ભવતિ કલહો વલ્લીપરિવેષ્ટિતે બન્ધઃ ॥ ॥

૯૪।૩૮અબ્/ છિન્નાગ્રે અંગચ્છેદઃ કલહઃ શુષ્કદ્રુમસ્થિતે ધ્વાંક્ષે ।
૯૪।૩૮ય્દ્/ પુરતશ્ચ પૃષ્ઠતો વા ગોમયસંસ્થે ધનપ્રાપ્તિઃ ॥ ॥

૯૪।૩૯અબ્/ મૃતપુરુષાંગાવયવસ્થિતોઽભિવિરુવન્ (ઽભિવાશન્) કરોતિ મૃત્યુભયમ્ ।
૯૪।૩૯ય્દ્/ ભઞ્જન્ અસ્થિ ચ ચંચ્વા યદિ વિરુવતિ (વાશતિ) અસ્થિભંગાય ॥ ॥

૯૪।૪૦અબ્/ રજ્જ્વસ્થિકાષ્ઠકણ્ટકિનિઃસારશિરોરુહાનને રુવતિ ।
૯૪।૪૦ય્દ્/ ભુજગગદદંષ્ટ્રિતસ્કરશસ્ત્રાગ્નિભયાનિ અનુક્રમશઃ ॥ ॥

૯૪।૪૧અબ્/ સિતકુસુમાશુચિમાંસાનનેઽર્થસિદ્ધિઃ યથેપ્સિતા યાતુઃ ।
૯૪।૪૧ય્દ્/ પક્ષૌ ધુન્વન્ (ધુન્વન્ પક્ષાવ્) ઊર્ધ્વાનને ચ વિઘ્નં મુહુઃ ક્વણતિ ॥ ॥

૯૪।૪૨અબ્/ યદિ શ ૃંખલાં વરત્રાં વલ્લીં વા આદાય વાશતે બન્ધઃ ।
૯૪।૪૨ય્દ્/ પાષાણસ્થે ચ ભયં ક્લિષ્ટાપૂર્વાધ્વિકયુતિશ્ચ ॥ ॥

૯૪।૪૩અબ્/ અન્યોન્યભક્ષસંક્રામિતાનને તુષ્ટિરુત્તમા ભવતિ ।
૯૪।૪૩ય્દ્/ વિજ્ઞેયઃ સ્ત્રીલાભો દંપત્યોઃ વિરુવતોઃ (વાશતોઃ) યુગપત્ ॥ ॥

૯૪।૪૪અબ્/ પ્રમદાશિરૌપગતપૂર્ણકુંભસંસ્થે અંગનાર્થસમ્પ્રાપ્તિઃ ।
૯૪।૪૪ય્દ્/ ઘટકુટ્ટને સુતવિપદ્ઘટોપહદનેઽન્નસમ્પ્રાપ્તિઃ ॥ ॥

૯૪।૪૫અબ્/ સ્કન્ધાવારાદીનાં નિવેશસમયે રુવંશ્ચલત્પક્ષઃ ।
૯૪।૪૫ય્દ્/ સૂચયતેઽન્યત્સ્થાનં (ઽન્યસ્થાનં) નિશ્ચલપક્ષઃ તુ ભયમાત્રમ્ ॥ ॥

૯૪।૪૬અબ્/ પ્રવિશદ્ભિઃ સૈન્યાદીન્ સગૃધ્રકંકૈઃ વિનામિષં ધ્વાંક્ષૈઃ ।
૯૪।૪૬ય્દ્/ અવિરુદ્ધૈઃ તૈઃ પ્રીતિઃ દ્વિષતાં યુદ્ધં વિરુદ્ધૈશ્ચ ॥ ॥

૯૪।૪૭અબ્/ બન્ધઃ સૂકરસંસ્થે પંકાક્તે સૂકરે દ્વિકેઽર્થાપ્તિઃ ।
૯૪।૪૭ય્દ્/ ક્ષેમં ખરોષ્ટ્રસંસ્થે કેચિત્ પ્રાહુઃ વધં તુ ખરે ॥ ॥

૯૪।૪૮અબ્/ વાહનલાભોઽશ્વગતે વિરુવત્યનુયાયિનિ ક્ષતજપાતઃ ।
૯૪।૪૮ય્દ્/ અન્યેઽપિ અનુવ્રજન્તો યાતારં કાકવદ્ વિહગાઃ ॥ ॥

૯૪।૪૯અબ્/ દ્વાત્રિંશત્ પ્રવિભક્તે દિગ્ચક્રે યદ્ યથા સમુદ્દિષ્ટમ્ ।
૯૪।૪૯ય્દ્/ તત્તત્ તથા વિધેયં ગુણદોષફલં યિયાસૂનામ્ ॥ ॥

૯૪।૫૦અબ્/ કા ઇતિ કાકસ્ય રુતં સ્વનિલયસંસ્થસ્ય નિષ્ફલં પ્રોક્તમ્ ।
૯૪।૫૦ય્દ્/ કવ ઇતિ ચાત્મપ્રીત્યૈ કૈતિ રુતે સ્નિગ્ધમિત્રાપ્તિઃ ॥ ॥

૯૪।૫૧અબ્/ કરા ઇતિ કલહં કુરુકુરુ ચ હર્ષમથ કટકટૈતિ દધિભક્તમ્ ।
૯૪।૫૧ય્દ્/ કેકે વિરુતં કુકુ વા ધનલાભં યાયિનઃ પ્રાહ ॥ ॥

૯૪।૫૨અબ્/ ખરેખરે પથિકાગમમાહ કખાખૈતિ યાયિનો મૃત્યુમ્ ।
૯૪।૫૨ય્દ્/ ગમનપ્રતિષેધિકમા કખલા (આખલખલ, આ ખલખલ) સદ્યોઽભિવર્ષાય ॥ ॥

૯૪।૫૩અબ્/ કાકા ઇતિ વિઘાતઃ (વિઘાતં) કાકટીતિ ચાહારદૂષણં પ્રાહ ।
૯૪।૫૩ય્દ્/ પ્રીત્યાસ્પદં કવકવૈતિ બન્ધમેવં કગાકુઃ ઇતિ ॥ ॥

૯૪।૫૪અબ્/ કરગૌ (કરકૌ) વિરુતે વર્ષં ગુડવત્ ત્રાસાય વડિતિ વસ્ત્રાપ્તિઃ ।
૯૪।૫૪ય્દ્/ કલયૈતિ ચ સંયોગઃ શૂદ્રસ્ય બ્રાહ્મણૈઃ સાકમ્ ॥ ॥

૯૪।૫૫અ કડિતિ (ફડિતિ) ફલાપ્તિઃ ફલદા (ફલવા)
૯૪।૫૫બ્ હિદર્શનં ટડ્ડિતિ (ટડિતિ) પ્રહારાઃ સ્યુઃ ।
૯૪।૫૫ચ્ સ્ત્રીલાભઃ સ્ત્રીતિ રુતે
૯૪।૫૫બ્ ગડિતિ ગવાં પુડિતિ પુષ્પાણામ્ ॥ ॥

૯૪।૫૬અબ્/ યુદ્ધાય ટાકુટાક્વિતિ ગુહુ વહ્નિભયં કટેકટે કલહઃ ।
૯૪।૫૬ય્દ્/ ટાકુલિ ચિણ્ટિચિ કેકેકૈતિ પુરં ચેતિ દોષાય ॥ ॥

૯૪।૫૭અ કાકદ્વયસ્યાપિ સમાનમેતત્
૯૪।૫૭બ્ ફલં યદુક્તં રુતચેષ્ટિતાદ્યૈઃ ।

૯૪।૫૭ય્ પતત્રિણોઽન્યેઽપિ યથૈવ કાકો
૯૪।૫૭દ્ વન્યાઃ શ્વવર્ગૌપરિદંષ્ટ્રિણો યે ॥ ॥

૯૪।૫૮અ સ્થલસલિલચરાણાં વ્યત્યયો મેઘકાલે
૯૪।૫૮બ્ પ્રચુરસલિલવૃષ્ટ્યૈ શેષકાલે ભયાય ।
૯૪।૫૮ય્ મધુ ભવનનિલીનં તત્કરોત્યાશુ શૂન્યં
૯૪।૫૮દ્ મરણમપિ ચ નીલા (નિલીના) મક્ષિકા મૂર્ધ્નિ લીના ॥ ॥

૯૪।૫૯અ વિનિક્ષિપન્ત્યઃ સલિલેઽણ્ડકાનિ
૯૪।૫૯બ્ પિપીલિકા વૃષ્ટિનિરોધમાહુઃ ।
૯૪।૫૯ય્ તરું સ્થલં (તરુસ્થલં, તરું સ્થલં) વાપિ નયન્તિ નિમ્નાદ્
૯૪।૫૯દ્ યદા તદા તાઃ કથયન્તિ વૃષ્ટિમ્ ॥ ॥

૯૪।૬૦અ કાર્યં તુ મૂલશકુનેઽન્તરજે તદહ્નિ
૯૪।૬૦બ્ વિન્દ્યાત્ ફલં નિયતમેવમિમે વિચિન્ત્યાઃ ।
૯૪।૬૦ય્ પ્રારંભયાનસમયેષુ તથા પ્રવેશે
૯૪।૬૦દ્ ગ્રાહ્યં ક્ષુતં ન શુભદં ક્વચિદપિ ઉશન્તિ ॥ ॥

૯૪।૬૧અ શુભં દશાપાકમવિઘ્નસિદ્ધિં
૯૪।૬૧બ્ મૂલાભિરક્ષામથવા સહાયાન્ ।
૯૪।૬૧ય્ દુષ્ટસ્ય (ઇષ્ટસ્ય) સંસિદ્ધિમનામયત્વં
૯૪।૬૧દ્ વદન્તિ તે માનયિતુઃ નૃપસ્ય ॥ ॥

૯૪।૬૨અ ક્રોશાદૂર્ધ્વં શકુન (શકુનિ) વિરુતં નિષ્ફલં પ્રાહુઃ એકે
૯૪।૬૨બ્ તત્રાનિષ્ટે પ્રથમશકુને માનયેત્ પંચ ષટ્ ચ ।
૯૪।૬૨ય્ પ્રાણાયામાન્ નૃપતિઃ અશુભે ષોડશૈવ દ્વિતીયે
૯૪।૬૨દ્ પ્રત્યાગચ્છેત્ સ્વભવનમતો યદ્યનિષ્ટઃ તૃતીયઃ ॥ ॥

sએપરતે અધ્યાય ૯૫। શાકુનૌત્તરાધ્યાયઃ
૯૫।૧અબ્/ દિગ્દેશચેષ્ટાસ્વરવાસરર્ક્ષમુહૂર્તહોરાકરણૌદયાંશાન્ ।
૯૫।૧ય્દ્/ ચરસ્થિઃ (ચિરસ્થિર્, ચરસ્થિઃ) ઉન્મિશ્રબલાબલં ચ બુદ્ધ્વા ફલાનિ પ્રવદેદ્ રુતજ્ઞઃ ॥ ॥

૯૫।૨અ દ્વિવિધં કથયન્તિ સંસ્થિતાનામ્
૯૫।૨બ્ આગામિસ્થિરસંજ્ઞિતં ચ કાર્યમ્ ।
૯૫।૨ય્ નૃપદૂતચરાન્યદેશજાતાન્ય્-
૯૫।૨દ્ અભિઘાતઃ સ્વજનાદિ ચાગમાખ્યમ્ ॥ ॥

૯૫।૩અ ઉદ્બદ્ધસંગ્રહણભોજનચૌરવહ્નિ-
૯૫।૩બ્ વર્ષોત્સવાત્મજવધાઃ કલહો ભયં ચ ।
૯૫।૩ય્ વર્ગાઃ સ્થિરોઽયમુદયેન્દુયુતે સ્થિરઋક્ષે
૯૫।૩દ્ વિદ્યાત્ સ્થિરં ચરગૃહે ચ ચરં યદુક્તમ્ ॥ ॥

૯૫।૪અબ્/ સ્થિરપ્રદેશૌપલમન્દિરેષુ સુરાલયે ભૂજલસન્નિધૌ ચ ।
૯૫।૪ય્દ્/ સ્થિરાણિ કાર્યાણિ ચરાણિ યાનિ ચલપ્રદેશાદિષુ ચાગમાય ॥ ॥

૯૫।૫અ આપ્યૌદયઋક્ષક્ષણદિગ્જલેષુ
૯૫।૫બ્ પક્ષાવસાનેષુ ચ યે પ્રદીપ્તાઃ ।
૯૫।૫ય્ સર્વેઽપિ તે વૃષ્ટિકરા રુવન્તઃ
૯૫।૫દ્ શાન્તોઽપિ વૃષ્ટિં કુરુતેઽંબુચારી ॥ ॥

૯૫।૬અ આગ્નેયદિગ્લગ્નમુહૂર્તદિશેષ્વ્
૯૫।૬બ્ અર્કપ્રદીપ્તોઽગ્નિભયાય રૌતિ ।
૯૫।૬ય્ વિષ્ટ્યાં યમઋક્ષોદયકણ્ટકેષુ
૯૫।૬દ્ નિષ્પત્રવલ્લીષુ ચ દોષકૃત્ (મોષકૃત્) સ્યાત્ ॥ ॥

૯૫।૭અ ગ્રામ્યઃ પ્રદીપ્તઃ સ્વરચેષ્ટિતાભ્યામ્
૯૫।૭બ્ ઉગ્રો રુવન્ કણ્ટકિનિ સ્થિતશ્ચ ।
૯૫।૭ય્ ભૌમઋક્ષલગ્ને યદિ નૈરૃતીં ચ
૯૫।૭દ્ સ્થિતોઽભિતશ્ચેત્ કલહાય દૃષ્ટઃ ॥ ॥

૯૫।૮અ લગ્નેઽથવા ઇન્દોઃ ભૃગુભાંશસંસ્થે
૯૫।૮બ્ વિદિક્સ્થિતોઽધોવદનશ્ચ રૌતિ ।
૯૫।૮ય્ દીપ્તઃ સ ચેત્ સંગ્રહણં કરોતિ
૯૫।૮દ્ યોન્યા તયા યા વિદિશિ પ્રદિષ્ટા ॥ ॥

૯૫।૯અ પુંરાશિલગ્ને વિષમે તિથૌ ચ
૯૫।૯બ્ દિક્સ્થઃ પ્રદીપ્તઃ શુકુનો રનાખ્યઃ
૯૬।૯ય્ વાચ્યં તદા સંગ્રહણં નરાણાં
૯૫।૯દ્ મિશ્રે ભવેત્ પણ્ડકસમ્પ્રયોગઃ ॥ ॥

૯૫।૧૦અ એવં રવેઃ ક્ષેત્રનવાંશલગ્ને
૯૫।૧૦બ્ લગ્ને સ્થિતે વા સ્વયમેવ સૂર્યે ।
૯૫।૧૦ય્ દીપ્તોઽભિધત્તે શકુનો વિરૌતિ (વિવાસં)
૯૫।૧૦દ્ પુંસઃ પ્રધાનસ્ય હિ કારણં તત્ ॥ ॥

૯૫।૧૧અબ્/ પ્રારંભમાણેષુ (પ્રારભ્યમાણેષુ) ચ સર્વકાર્યેષ્વર્કાન્વિતાદ્ ભાદ્ ગણયેદ્ વિલગ્નમ્ ।
૯૫।૧૧ય્દ્/ સમ્મદ્ વિપગૈતિ યથા ક્રમેણ સમ્પદ્ વિપચ્ચૈતિ (વાપિ) તથૈવ વાચ્યં (વાચ્યા) ॥ ॥

૯૫।૧૨અ કાણેનાક્ષ્ણા દક્ષિણેનૈતિ સૂર્યે
૯૫।૧૨બ્ ચન્દ્રે લ્ગનાદ્ દ્વાદશે ચૈતરેન ।
૯૫।૧૨ય્ લગ્નસ્થેઽર્કે પાપદૃષ્ટેઽન્ધ એવ
૯૫।૧૨દ્ કુબ્જઃ સ્વઋક્ષે શ્રોત્રહીનો જડો વા ॥ ॥

૯૫।૧૩અ ક્રૂરઃ ષષ્ઠે ક્રૂરદૃષ્ટો વિલગ્નાદ્
૯૫।૧૩બ્ યસ્મિન્ રાશૌ તદ્ગૃહાગ્ગે વ્રણોઽસ્ય (સ્યાત્)
૯૫।૧૩ય્ એવં પ્રોક્તં યન્મયા જન્મકાલે ચિહ્નં રૂપં તત્ તદસ્મિન્ વિચિન્ત્યમ્ ॥ ॥

(યવનેશ્વર)

૯૫।ય્૧અ અતઃ પરં લોકનિરૂપિતાનિ
૯૫।ય્૧બ્ દ્રવ્યેષુ નાનાક્ષરસંગ્રહાણિ ।
૯૫।ય્૧ય્ ઇષ્ટપ્રણીતાનિ વિભાજિતાનિ
૯૫।ય્૧દ્ નામાનિ કેન્દ્રક્રમશઃ પ્રવક્ષ્યે ॥ ॥

૯૫।ય્૨અ લગ્નાંબુસંસ્થાસ્તનભઃસ્થિતેષુ
૯૫।ય્૨બ્ ક્ષેત્રેષુ યે લગ્નગતા ગૃહાંશાઃ ।
૯૫।ય્૨ય્ તેભ્યોઽક્ષરાણિ આત્મગૃહાશ્રયાણિ
૯૫।ય્૨દ્ વિન્દ્યાદ્ ગ્રહાણાં સ્વગણક્રમેણ ॥ ॥

૯૫।ય્૩અ કવર્ગપૂર્વાન્ કુજશુક્રચાન્દ્રિ-
૯૫।ય્૩બ્ જીવાર્કજાનાં પ્રવદન્તિ વર્ગાન્ ।
૯૫।ય્૩ય્ યકારપૂર્વાઃ શશિનો નિરુક્તા
૯૫।ય્૩દ્ વર્ણાઃ ત્વકારપ્રભવા રવેઃ સ્યુઃ ॥ ॥

૯૫।ય્૪અ દ્રેષ્કાણવૃદ્ધ્યા પ્રવદન્તિ નામ
૯૫।ય્૪બ્ ત્રિપંચસપ્તાક્ષરમોજરાશૌ ।
૯૫।ય્૪ય્ યુગ્મે તુ વિન્દ્યાદ્ દ્વિચતુષ્કષટ્કં
૯૫।ય્૪દ્ નામાક્ષરાણિ ગ્રહદૃષ્ટિવૃદ્ધ્યા ॥ ॥

૯૫।ય્૫અ વર્ગોત્તમે દ્વ્યક્ષરકં ચરાંશે
૯૫।ય્૫બ્ સ્થિરઋક્ષભાગે ચતુરક્ષરં તત્ ।
૯૫।ય્૫ય્ ઓજેષુ ચૈભ્યો વિષમાક્ષરાણિ

૯૫।૫્પદ્ સ્યુઃ દ્વિસ્વભાવેષુ તુ રાશિવગ ॥  ॥

૯૫।૫્૬અ દ્વિમૂર્તિસંજ્ઞે તુ વદેદ્ દ્વિનામ
૯૫।૫્૬બ્ સૌમ્યઈક્ષિતે દ્વિપ્રકૃતૌ ચ રાશૌ ।
૯૫।૫્૬ચ્ યાવાન્ ગણઃ સ્વોદયગોઽંશકાનાં
૯૫।૫્૬દ્ તાવાન્ ગ્રહઃ સંગ્રહકેઽક્ષરાણામ્ ॥  ॥

૯૫।૫્૭અ સંયોગમાદૌ બહુલેષુ વિન્દ્યાત્
૯૫।૫્૭બ્ કૂટેષુ સંયોગપરં વદન્તિ ।
૯૫।૫્૭ચ્ સ્વૌચ્ચાંશકે દ્વિષ્કૃતમ્ ઋક્ષયોગાદ્
૯૫।૫્૭દ્ ગુર્વક્ષરં તદ્ભવનાંશકે સ્યાત્ ॥  ॥

૯૫।૫્૮અ માત્રાદિયુક્ સ્યાદ્ ગ્રહયુક્ત્રિકોણે
૯૫।૫્૮બ્ દ્રેષ્કાણપર્યાયવદક્ષરેષુ ।
૯૫।૫્૮ચ્ નભોબલેષૂર્ધ્વમધોઽંબુજેષુ
૯૫।૫્૮દ્ જ્ઞેયો વિસર્ગઃ તુ બલાન્વિતેષુ ॥  ॥

૯૫।૫્૯અ શીર્ષોદયેષુ ઊર્ધ્વમુશન્તિ માત્રામ્
૯૫।૫્૯બ્ અધશ્ચ પૃષ્ઠોદયશબ્દિતેષુ ।
૯૫।૫્૯ચ્ તીર્યક્ ચ વિન્દ્યાદુભયોદયે તાં
૯૫।૫્૯દ્ દીર્ઘેષુ દીર્ઘામિતરેષુ ચાન્યામ્ ॥  ॥

૯૫।૫્૧૦અ પ્રાગ્લગ્નતોયાસ્તનભઃસ્થિતેષુ
૯૫।૫્૧૦બ્ ભેષ્વંશકેભ્યોઽક્ષરસંગ્રહઃ સ્યાત્ ।
૯૫।૫્૧૦ચ્ ક્રૂરોઽક્ષરં હન્તિ ચતુષ્ટયસ્થો
૯૫।૫્૧૦દ્ દૃષ્ટ્યાપિ માત્રાં ચ ત્રિકોણગો વા ॥  ॥

૯૫।૫્૧૧અ શુભગ્રહઃ તુ ઊર્જિતવીર્યભાગી
૯૫।૫્૧૧બ્ સ્થાનાંશતુલ્યાક્ષરદઃ સ ચોક્તઃ ।
૯૫।૫્૧૧ચ્ પશ્યન્ સ્થિતઃ કેન્દ્રત્રિકોણયોઃ વા
૯૫।૫્૧૧દ્ સ્વૌચ્ચેઽપિ વર્ણદ્વયમાત્મભાગે ॥  ॥

૯૫।૫્૧૨અ ક્ષેત્રેશ્વરે ક્ષીણબલેઽંશકે ચ
૯૫।૫્૧૨બ્ માત્રાક્ષરં નાશમુપૈતિ તજ્જમ્ ।
૯૫।૫્૧૨ચ્ અસંભવેઽપિ ઉદ્ભવમેતિ તસ્મિન્
૯૫।૫્૧૨દ્ વર્ગાદ્યમુચ્ચાંશયુજીશદૃષ્ટે ॥  ॥

૯૫।૫્૧૩અ કેન્દ્રે યથાસ્થાનબલપ્રકર્ષં
૯૫।૫્૧૩બ્ ક્ષેત્રસ્ય તત્ક્ષેત્રપતેશ્ચ બુદ્ધ્વા ।
૯૫।૫્૧૩ય્ કાર્યોઽક્ષરાણામનુપૂર્વયોગો
૯૫।૫્૧૩દ્ માત્રાદિસંયોગવિકલ્પના ચ ॥ ॥

૯૫।૫્૧૪અ તત્રાદિરાશ્યાદિચતુર્વિલગ્નમ્
૯૫।૫્૧૪બ્ આદ્યંશકાદિક્રમપર્યાયેણ ।
૯૫।૫્૧૪ય્ ગ્રહાંશકેભ્યઃ સ્વગણાક્ષરાણામ્
૯૫।૫્૧૪દ્ અન્વર્થને પ્રાપ્તિઃ ઇયં વિધાર્યા ॥ ॥

૯૫।૫્૧૫અ મેષ કકારો હિબુકે ચકારઃ
૯૫।૫્૧૫બ્ તુલે ચકારો મકરે પકારઃ ।
૯૫।૫્૧૫ય્ મેષે છકારો હિબુકેઽપિ અકારઃ
૯૫।૫્૧૫દ્ તુલે ખકારો મકરે ફકારઃ ॥ ॥

૯૫।૫્૧૬અ મેષે ટકારો હિબુકે ઠકારઃ
૯૫।૫્૧૬બ્ તુલે તકારો મકરે થકારઃ ।
૯૫।૫્૧૬ય્ મેષે તુ રેફા હિબુકે જકારઃ
૯૫।૫્૧૬દ્ તુલે બકારો મકરે ગકારઃ ॥ ॥

૯૫।૫્૧૭અ આકારમાદ્યેઽંબુગતે ઘકારમ્
૯૫।૫્૧૭બ્ અસ્તે ભકારં મકરે ઝકારમ્ ।
૯૫।૫્૧૭ય્ લગ્ને ડકારં હિબુકે દકારમ્
૯૫।૫્૧૭દ્ અસ્તે ધકારં મકરે ઢકારમ્ ॥ ॥

૯૫।૫્૧૮અ લગ્ને ઞકારો હિબુકે મકારઃ
૯૫।૫્૧૮બ્ તુલે ગ઼કારો મકરે લકારઃ ।
૯૫।૫્૧૮ય્ લગ્ને કકારો હિબુકે પકારઃ
૯૫।૫્૧૮દ્ તુલે ચકારો મકરે ઇકારઃ ॥ ॥

૯૫।૫્૧૯અ લગ્ને નકારો હિબુકે તકારઃ
૯૫।૫્૧૯બ્ તુલે ણકારો મકરે ટકારઃ ।
૯૫।૫્૧૯ય્ ઇત્યેતદુક્તં ચરસંજ્ઞકસ્ય વક્ષ્યે
૯૫।૫્૧૯દ્ સ્થિરાખ્યસ્ય ચતુષ્ટયસ્ય ॥ ॥

૯૫।૫્૨૦અ વૃષે ફકારો હિબુકે ખકારઃ
૯૫।૫્૨૦બ્ કીટે વકારો નૃઘટે છકારઃ ।

૯૫।૨૦ચ્ આદ્યાંશકેભ્યો મતિમાન્ વિદધ્યાદ્
૯૫।૨૦દ્ અનુક્રમેણ સ્થિરસંજ્ઞકેષુ ॥ ॥

૯૫।૨૧અ લગ્ને બકારો હિબુકે જકાર
૯૫।૨૧બ્ ઈકારમસ્તેઽંબરગે ગકારઃ ।
૯૫।૨૧ચ્ વૃષે થકારો હિબુકે ટકારઃ
૯૫।૨૧દ્ કીટે ડકારો નૃઘટે દકારઃ ॥ ॥

૯૫।૨૨અ વૃષે ઘકારો હિબુકે શકારઃ
૯૫।૨૨બ્ કીટે ઝકારો નૃઘટે ભકારઃ ।
૯૫।૨૨ચ્ લગ્ને જકારો હિબુકે ઉકારઃ
૯૫।૨૨દ્ કીટે ગ઼કારો નૃઘટે મકારઃ ॥ ॥

૯૫।૨૩અ લગ્ને ઢકારોઽથ જલે ણકારશ્
૯૫।૨૩બ્ ચાસ્તે ધકારોઽંબરગે નકારઃ ।
૯૫।૨૩ચ્ વૃષે ષકારો હિબુકે ચકારઃ
૯૫।૨૩દ્ કીટે પકારો નૃઘટે કકારઃ ॥ ॥

૯૫।૨૪અ ઊકારમાહુઃ વૃષભે જલે ખમ્
૯૫।૨૪બ્ અસ્તે ફકારો નૃઘટે છકારઃ ।
૯૫।૨૪ચ્ અન્ત્યે વૃષે ટમ્ તમુશન્તિ સિંહે
૯૫।૨૪દ્ થં સપ્તગે ઠં પ્રવદન્તિ કુંભે ॥ ॥

૯૫।૨૫અ દ્વિમૂર્તિસંજ્ઞે મિથુને જકારાઃ
૯૫।૨૫બ્ ષષ્ઠે બકારઃ પ્રથમાંશકે સ્યાત્ ।
૯૫।૨૫ચ્ ધનુર્ધરેઽસ્તોપગતે ગકારો
૯૫।૨૫દ્ મીનદ્વયે ચાંબરગે સકારઃ ॥ ॥

૯૫।૨૬અ લગ્ને ઘકારો હિબુકે ભકારશ્
૯૫।૨૬બ્ ચાસ્તે ઝકારોઽંબરમધ્યગે ઈ ।
૯૫।૨૬ચ્ લગ્ને દકારો હિબુકે ધકારમ્
૯૫।૨૬દ્ અસ્તે ડકારં વિદુઃ અંબરે ઢમ્ ॥ ॥

૯૫।૨૭અ લગ્ને મકારો હિબુકે ગ઼કારશ્
૯૫।૨૭બ્ અસ્તે હકારોઽંબરગે ઞકારઃ ।
૯૫।૨૭ચ્ લગ્ને પકારો જલગે ચકાર
૯૫।૨૭દ્ ઐકારમસ્તેઽંબરગે કકારઃ ॥ ॥

૯૫।ય્૨૮અ પ્રાગ્લગ્ને નં જલગે ણમાહુઃ
૯૫।ય્૨૮બ્ અસ્તં ગતે ટં નભસિ સ્થિતે તમ્ ।
૯૫।ય્૨૮ય્ પ્રાગ્લગ્નગે ખં જલગે યમાહુઃ
૯૫।ય્૨૮દ્ અસ્તં ગતે છં નભસિ સ્થિતે ફમ્ ॥ ॥

૯૫।ય્૨૯અ લગ્ને જમોકારમથાંબુસંસ્થે
૯૫।ય્૨૯બ્ ગમસ્તસંસ્થે વિદુઃ અંબરે બમ્ ।
૯૫।ય્૨૯ય્ ઠં લગ્નગેઽન્ત્યે હિબુકાશ્રિતે ડં
૯૫।ય્૨૯દ્ થમસ્તગે દં નભસિ સ્થિતે વૈ ॥ ॥

૯૫।ય્૩૦અ એવં વિકલ્પોઽક્ષરસંગ્રહોઽયં
૯૫।ય્૩૦બ્ નામ્નાં નિરુદ્દિષ્ટવિધાન ઉક્તઃ ।
૯૫।ય્૩૦ય્ સર્વેષુ લગ્નેષુ ચ કેચિદેવમ્
૯૫।ય્૩૦દ્ ઇચ્છન્તિ પૂર્વોક્તવિધાનવત્ તુ ॥ ॥

૯૫।ય્૩૧અ કેન્દ્રાણિ વા કેન્દ્રગતાંશકૈઃ સ્વૈઃ
૯૫।ય્૩૧બ્ પૃથક્ પૃથક્ સંગુણિતાનિ કૃત્વા ।
૯૫।ય્૩૧ય્ ત્રિકૃદ્વિભક્તં વિરુદક્ષરં તત્
૯૫।ય્૩૧દ્ ક્ષેત્રેશ્વરસ્યાંશપરિક્રમસ્વમ્ ॥ ॥

૯૫।ય્૩૨અ સંચિન્તિતપ્રાર્થિતનિર્ગતેષુ
૯૫।ય્૩૨બ્ નષ્ટક્ષતસ્ત્રીઃ અતિભોજનેષુ
૯૫।ય્૩૨ય્ સ્વપ્નર્ક્ષચિન્તાપુરુષાદિવર્ગેષ્વ્
૯૫।ય્૩૨દ્ એતેષુ નામાનિ ઉપલક્ષયેત
૯૫।૧૪અ દ્વ્યક્ષરં ચરગૃહાંશકોદયે
૯૫।૧૪બ્ નામ ચાસ્ય ચતુરક્ષરં સ્થિરે ।
૯૫।૧૪ય્ નામયુગ્મમપિ ચ દ્વિમૂર્તિષુ
૯૫।૧૪દ્ ત્ર્યક્ષરં ભવતિ ચાસ્ય પંચભિઃ ॥ ॥

૯૫।૧૫અ કાદ્યાઃ તુ વર્ગાઃ કુજશુક્રસૌમ્ય-
૯૫।૧૫બ્ જીવાર્કજાનાં ક્રમશઃ પ્રદિષ્ટાઃ ।
૯૫।૧૫ય્ વર્ણાષ્ટકં યાદિ ચ શીતરશ્મે
૯૫।૧૫દ્ રવેઃ અકારાત્ ક્રમશઃ સ્વરાઃ સ્યુઃ ॥ ॥

૯૫।૧૬અ નામાનિ ચાગ્ન્યંબુકુમારવિષ્ણુ-

૯૫।૧૬બ્ શક્રેન્દ્રપત્નીચતુરાનનાનામ્ ।
૯૫।૧૬ચ્ તુલ્યાનિ સૂર્યાત્ ક્રમશો વિચિન્ત્ય
૯૫।૧૬દ્ દ્વિત્ર્યાદિવર્ણૈઃ ઘટયેત્ સ્વબુદ્ધ્યા ॥ ॥

૯૫।૧૭અ વયાંસિ તેષામ્ સ્તનપાનબાલ્ય-
૯૫।૧૭બ્ વ્રતસ્થિતા યૌવનમધ્યવૃદ્ધાઃ ।
૯૫।૧૭ચ્ અતીવવૃદ્ધા ઇતિ ચન્દ્રભૌમ-
૯૫।૧૭દ્ જ્ઞશુક્રજીવાર્કશનૈશ્ચરાણામ્ ॥ ॥

sએપરતે અધ્યાય ૯૬ પાકાધ્યાયઃ
૯૬।૧અબ્/ પક્ષાદ્ ભાનોઃ સોમસ્ય માસિકો અંગારકસ્ય વક્ત્રોક્તઃ ।
૯૬।૧ચ્દ્/ આદર્શનાગ પાકો બુધસ્ય જીવસ્ય વર્ષેણ ॥ ॥

૯૬।૨અબ્/ ષડ્ભિઃ સિતસ્ય માસૈઃ અબ્દેન શનેઃ સુરદ્વિષોઽબ્દાર્ધાત્ ।
૯૬।૨ચ્દ્/ વર્ષાત્ સૂર્યગ્રહણે સદ્યઃ સ્યાત્ ત્વાષ્ટ્રકીલકયોઃ ॥ ॥

૯૬।૩અબ્/ ત્રિભિઃ એવ ધૂમકેતોઃ માસૈઃ શ્વેતસ્ય સપ્તરાત્રાન્તે ।
૯૬।૩ચ્દ્/ સપ્તાહાત્ પરિવેષેન્દ્રચાપસન્ધ્યાભ્રસૂચીનામ્ ॥ ॥

૯૬।૪અબ્/ શીતોષ્ણવિપર્યાસઃ ફલપુષ્પમકાલજં દિશાં દાહઃ ।
૯૬।૪ચ્દ્/ સ્થિરચરયોઃ અન્યત્વં પ્રસૂતિવિકૃતિશ્ચ ષણ્માસાત્ ॥ ॥

૯૬।૫અબ્/ અક્રિયમાણકકરણં ભૂકંપોઽનુત્સવો દુરિષ્ટં ચ ।
૯૬।૫ચ્દ્/ શોષશ્ચાશોષ્યાણાં સ્રોતોઽન્યત્વં ચ વર્ષાર્ધાત્ ॥ ॥

૯૬।૬અબ્/ સ્તંભકુસૂલાર્ચાનાં જલ્પિતરુદિતપ્રકંપિતસ્વેદાઃ ।
૯૬।૬ચ્દ્/ માસત્રયેણ કલહેન્દ્રચાપનિર્ઘાતપાકાશ્ચ ॥ ॥

૯૬।૭અબ્/ કીટાખુમક્ષિકોરગબાહુલ્યં મૃગવિહંગવિરુતં ચ ।
૯૬।૭ચ્દ્/ લોષ્ટસ્ય ચાપ્સુ તરણં ત્રિભિઃ એવ વિપચ્યતે માસૈઃ ॥ ॥

૯૬।૮અબ્/ પ્રસવઃ શુનામરણ્યે વન્યાનાં ગ્રામસમ્પ્રવેશશ્ચ ।
૯૬।૮ચ્દ્/ મધુનિલયતોરણેન્દ્રધ્વજાશ્ચ વર્ષાત્ સમધિકાદ્ વા ॥ ॥

૯૬।૯અબ્/ ગોમાયુગૃધ્રસંઘા દશાહિકાઃ સદ્ય એવ તૂર્યરવઃ ।
૯૬।૯ચ્દ્/ આક્રુષ્ટં પક્ષફલં વલ્મીકો વિદરણં ચ ભુવઃ ॥ ॥

૯૬।૧૦અબ્/ અહુતાશપ્રજ્વલનં ઘૃતતૈલવસાદિવર્ષણં ચાપિ ।
૯૬।૧૦ચ્દ્/ સદ્યઃ પરિપચ્યન્તે માસેઽધ્યર્ધે ચ જનવાદઃ ॥ ॥

૯૬।૧૧અબ્/ છત્રચિતિયૂપહુતવહબીજાનાં સપ્તભિઃ ભવતિ પક્ષૈઃ ।
૯૬।૧૧ય્દ્/ છત્રસ્ય તોરણસ્ય ચ કેચિન્ માસાત્ ફલં પ્રાહુઃ ॥ ॥

૯૬।૧૨અબ્/ અત્યન્તવિરુદ્ધાનાં સ્નેહઃ શબ્દશ્ચ વિયતિ ભૂતાનામ્ ।
૯૬।૧૨ય્દ્/ માર્જારનકુલયોઃ મૂષકેણ સંગશ્ચ માસેન ॥ ॥

૯૬।૧૩અબ્/ ગન્ધર્વપુરં માસદ્ રસવૈકૃત્યં હિરણ્યવિકૃતિશ્ચ ।
૯૬।૧૩ય્દ્/ ધ્વજવેશ્મપાંશુધૂમાકુલા દિશશ્ચાપિ માસફલાઃ ॥ ॥

૯૬।૧૪અબ્/ નવકૈકાષ્ટદશકૈકષટ્ત્રિકત્રિકસંખ્યમાસપાકાનિ ।
૯૬।૧૪ય્દ્/ નક્ષત્રાણિ અશ્વિનિપૂર્વકાણિ સદ્યઃ ફલાશ્લેષા ॥ ॥

૯૬।૧૫અબ્/ પિત્ર્યાન્ માસઃ ષટ્ સટ્ત્રયોઽર્ધમષ્ટૌ ચ ત્રિષડેકૈકાઃ ।
૯૬।૧૫ય્દ્/ માસચતુષ્કેઽષાઢે સદ્યઃ પાકાભિજિત્તારા ॥ ॥

૯૬।૧૬અબ્/ સપ્તાષ્ટાવધ્યર્ધં ત્રયઃ ત્રયઃ પંચ ચૈવ માસાઃ સ્યુઃ ।
૯૬।૧૬ય્દ્/ શ્રવણાદીનાં પાકો નક્ષત્રાણાં યથાસંખ્યમ્ ॥ ॥

૯૬।૧૭અ નિગદિતસમયે ન દૃશ્યતે ચેદ્
૯૬।૧૭બ્ અધિકતરં દ્વિગુણે પ્રપચ્યતે તત્ ।
૯૬।૧૭ય્ યદિ ન કનકરત્નગોપ્રદાનૈઃ
૯૬।૧૭દ્ ઉપશમિતં વિધિવદ્ દ્વિજૈશ્ચ શાન્ત્યા ॥ ॥

sએપરતે અધ્યાય ૯૭ નક્ષત્રકર્મગુણાધ્યાયઃ
૯૭।૧અબ્/ શિખિગુણરસેન્દ્રિયાનલશશિવિષયગુણઋતુપંચવસુપક્ષાઃ ।
૯૭।૧ય્દ્/ વિષયૈકચન્દ્રભૂતાર્ણવાગ્નિરુદ્રાશ્વિવસુદહનાઃ ॥ ॥

૯૭।૨અબ્/ ભૂતશતપક્ષવસવો દ્વાત્રિંશગેતિ તારકામાનમ્ ।
૯૭।૨ય્દ્/ ક્રમશોઽશ્વિન્યાદીનાં કાલઃ તારાપ્રમાણેન ॥ ॥

૯૭।૩અબ્/ નક્ષત્રજમુદ્વાહે ફલમબ્દૈઃ તારકામિતૈઃ સદસત્ ।
૯૭।૩ય્દ્/ દિવસૈઃ જ્વરસ્ય નાશો વ્યાધેઃ અન્યસ્ય વા વાચ્યઃ ॥ ॥

(નક્ષત્રદેવતા)
૯૭।૪અબ્/ અશ્વિયમદહનકમલજશશિશૂલભૃદદિતિજીવફણિપિતરઃ ।
૯૭।૪ય્દ્/ યોન્યર્યમદિનકૃત્ત્વષ્ટૃપવનશક્રાગ્નિમિત્રાશ્ચ ॥ ॥

૯૭।૫અબ્/ શક્રો નિરૃતિઃ તોયં વિશ્વે બ્રહ્મા હરિઃ વસુઃ વરુણઃ ।
૯૭।૫ય્દ્/ અજપાદોઽહિર્બુધ્ન્યઃ પૂષા ચેતીશ્વરા ભાનામ્ ॥ ॥

૯૭।૬અબ્/ ત્રીણિ ઉત્તરાણિ તેભ્યો રોહિણ્યશ્ચ ધ્રુવાણિ તૈઃ કુર્યાત્ ।
૯૭।૬ય્દ્/ અભિષેકશાન્તિતરુનગરધર્મબીજધ્રુવારંભાન્ ॥ ॥

૯૭।૭અબ્/ મૂલશિવશક્રભુજગાધિપાનિ તીક્ષ્ણાનિ તેષુ સિદ્ધ્યન્તિ ।
૯૭।૭ય્દ્/ અભિઘાતમન્ત્રવેતાલબન્ધવધભેદસંબન્ધાઃ ॥ ॥

૯૭।૮અબ્/ ઉગ્રાણિ પૂર્વભરણીપિત્ર્યાણિ ઉત્સાદનાશશાઠ્યેષુ ।
૯૭।૮ય્દ્/ યોજ્યાનિ બન્ધવિષદહનશસ્ત્રઘાતાદિષુ ચ સિદ્ધ્યૈ ॥ ॥

૯૭।૯અબ્/ લઘુ હસ્તાશ્વિનપુષ્યાઃ પણ્યરતિજ્ઞાનભૂષણકલાસુ ।
૯૭।૯ય્દ્/ શિલ્પૌષધયાનાદિષુ સિદ્ધિકરાણિ પ્રદિષ્ટાનિ ॥ ॥

૯૭।૧૦અબ્/ મૃદુવર્ગો (મૃદુવર્ગઃ ત્વ્) ઽનૂરાધાચિત્રાપૌષ્ણેન્દવાનિ મિત્રાર્થે ।
૯૭।૧૦ય્દ્/ સુરતવિધિવસ્ત્રભૂષણમંગલગીતેષુ ચ હિતાનિ ॥ ॥

૯૭।૧૧અબ્/ હૌતભુજં સવિશાખં મૃદુતીક્ષ્ણમ્ તદ્વિમિશ્રફલકારિ ।
૯૭।૧૧ય્દ્/ શ્રવણત્રયમાદિત્યાનિલે ચ ચરકર્મણિ હિતાનિ ॥ ॥

૯૭।૧૨અ હસ્તત્રયં મૃગશિરઃ શ્રવણત્રયં (શ્રવનાત્ત્રયં) ચ
૯૭।૧૨બ્ પૂષાશ્વિશક્રગુરુભાનિ પુનર્વસુશ્ચ ।
૯૭।૧૨ય્ ક્ષૌરે તુ કર્મણિ હિતાનિ ઉદયે ક્ષણે વા
૯૭।૧૨દ્ યુક્તાનિ ચૌડુપતિના શુભતારયા ચ ॥ ॥

૯૭।૧૩અ ન સ્નાતમાત્રગમનૌન્મુખ (ઉત્સુક) ભૂષિતાનામ્
૯૭।૧૩બ્ અભ્યક્તભુક્તરણકાલનિરાસનાનામ્ ।
૯૭।૧૩ય્ સન્ધ્યિશાશનિકુજાર્કતિથૌ (નિશોઃ કુજયમાર્કદિને) ચ રિક્તે
૯૭।૧૩દ્ ક્ષૌરં હિતં ન નવમેઽહ્નિ ન ચાપિ વિષ્ટ્યામ્ ॥ ॥

૯૭।૧૪અબ્/ નૃપાજ્ઞયા બ્રાહ્મણસમ્મતે ચ વિવાહકાલે મૃતસૂતકે ચ ।
૯૭।૧૪ય્દ્/ બદ્ધસ્ય મોક્ષે ક્રતુદીક્ષણાસુ સર્વેષુ શસ્તં ક્ષુરકર્મ ભેષુ ॥ ॥

૯૮।૧૫અબ્/ હસ્તો મૂલં શ્રવણા પુનર્વસુઃ મૃગશિરઃ તથા પુષ્યઃ ।
૯૮।૧૫ય્દ્/ પુંસઞ્જ્ઞિતેષુ કાર્યેષ્વેતાનિ શુભાનિ ધિષ્ણ્યાનિ ॥ ॥

૯૭।૧૫અબ્/ સાવિત્રપૌષ્ણાનિલમૈત્રતિષ્યત્વાષ્ટ્રે તથા ચૌડુગણાધિપઋક્ષે ।
૯૭।૧૫ય્દ્/ સંસ્કારદીક્ષાવ્રતમેખલાદિ કુર્યાદ્ ગુરૌ શુક્રબુધેન્દુયુક્તે ॥ ॥

૯૮।૧૭અબ્/ લાભે તૃતીયે ચ શુભૈઃ સમેતે પાપૈઃ વિહીને શુભરાશિલગ્ને ।
૯૮।૧૭ય્દ્/ વેધ્યૌ તુ કર્ણૌ ત્રિદશેજ્યલગ્ને તિષ્યેન્દુચિત્રાહરિરેવતીષુ ॥ ॥

૯૭।૧૬અ શુદ્ધૈઃ દ્વાદશકેન્દ્રનૈધનગૃહૈઃ પાપૈઃ ત્રિષષ્ઠાયગૈઃ ।
૯૭।૧૬બ્ લગ્ને કેન્દ્રગતેઽથવા સુરગુરૌ દૈત્યેન્દ્રપૂજ્યેઽપિ વા ॥ ॥

૯૭।૧૬ચ્ સર્વારંભફલપ્રસિદ્ધિરુદયે રાશૌ ચ કર્તુઃ શુભે
૯૭।૧૬દ્ સગ્રામ્યસ્થિરભોદયે ચ ભવનં કાર્યં પ્રવેશોઽપિ વા ॥ ॥

sએપરતે અધ્યાય ૯૮ તિથિકર્મગુણાધ્યાયઃ
૯૮।૧અબ્/ કમલજવિધાતૃહરિયમશશાંકષડ્વક્ત્રશક્રવસુભુજગાઃ ।
૯૮।૧ય્દ્/ ધર્મેશસવિતૃમન્મથકલયો વિશ્વે ચ તિથિપતયઃ ॥ ॥

૯૮।૨અબ્/ પિતરોઽમાવસ્યાયાં સંજ્ઞાસદૃશાશ્ચ તૈઃ ક્રિયાઃ કાર્યાઃ ।
૯૮।૨ય્દ્/ નન્દા ભદ્રા વિજયા રિક્તા પૂર્ણા ચ તાઃ ત્રિવિધાઃ ॥ ॥

૯૮।૩અબ્/ યત્ કાર્યં નક્ષત્રે તદ્દૈવત્યાસુ તિથિષુ તત્ કાર્યમ્ ।
૯૮।૩ય્દ્/ કરણમુહૂર્તેષ્વપિ તત્ સિદ્ધિકરં દેવતાસદૃશમ્ ॥ ॥

sએપરતે અધ્યાય ૯૯ કરણગુણાધ્યાયઃ
૯૯।૧અબ્/ વવવાલવકૌલવ (બવબાલવકૌલબ) તૈતિલાખ્યગરવણિજવિષ્ટિસંજ્ઞાનામ્ ।
૯૯।૧ય્દ્/ પતયઃ સ્યુઃ ઇન્દ્રકમલજમિત્રાર્યમભૂશ્રિયઃ સયમાઃ ॥ ॥

૯૯।૨અબ્/ કૃષ્ણચતુર્દશ્યર્ધાદ્ ધ્રુવાણિ શકુનિશ્ચતુષ્પદં નાગમ્ ।
૯૯।૨ય્દ્/ કિંસ્તુઘ્નમિતિ ચ તેષાં કલિવૃષફણિમારુતાઃ પતયઃ ॥ ॥

૯૯।૩અ કુર્યાદ્ વવે (બવે) શુભચરસ્થિરપૌષ્ટિકાનિ
૯૯।૩બ્ ધર્મક્રિયાદ્વિજહિતાનિ ચ વાલવ (બાલવ) આખ્યે ।
૯૯।૩ય્ સમ્પ્રીતિમિત્રવરણાનિ ચ કૌલવે (કૌલબે) સ્યુઃ
૯૯।૩દ્ સૌભાગ્યસંશ્રયગૃહાણિ ચ તૈતિલાખ્યે ॥ ॥

૯૯।૪અ કૃષિબીજગૃહાશ્રયજાનિ ગરે
૯૯।૪બ્ વણિજિ ધ્રુવકાર્યવણિગ્યુતયઃ ।
૯૯।૪ય્ ન હિ વિષ્ટિકૃતં વિદધાતિ શુભં
૯૯।૪દ્ પરઘાતવિષાદિષુ સિદ્ધિકરમ્ ॥ ॥

૯૯।૫અ કાર્યં પૌષ્ટિકમૌષધાદિ શકુનૌ મૂલાનિ મન્ત્રાઃ તથા ।
૯૯।૫બ્ ગોકાર્યાણિ ચતુષ્પદે દ્વિજપિતૄન્ ઉદ્દિશ્ય રાજ્યાનિ ચ
૯૯।૫ય્ નાગે સ્થાવરદારુણાનિ હરણં દૌર્ભાગ્યકર્માણ્યતઃ
૯૯।૫દ્ કિંસ્તુઘ્ને શુભમિષ્ટિ (ઇષ્ટ) પુષ્ટિકરણં મંગલ્યસિદ્ધિક્રિયાઃ ॥ ॥

૯૯।૬અબ્/ લાભે તૃતીયે ચ શુભૈઃ સમેતે પાપૈઃ વિહીને શુભરાશિલગ્ને ।

૯૯।૬ય્દ્/ વેધ્યૌ ચ કર્ણાવમરેજ્યલગ્ને પુષ્યેન્દુચિત્રાહરિપૌષ્ણભેષુ ॥ ॥

૯૯।૭અ રોહિણ્યુત્તરરેવતીમૃગશિરોમૂલાનુરાધામઘા-
૯૯।૭બ્ હસ્તસ્વાતિષુ ષષ્ઠતૌલિમિથુનેષૂદ્યત્સુ પાણિગ્રહઃ ।
૯૯।૭ય્ સપ્તાષ્ટાન્ત્યબહિઃશુભૈરુડુપતાવેકાદશદ્વિત્રિગે
૯૯।૭દ્ ક્રૂરૈઃ ત્ર્યાયષડષ્ટગૈઃ ન તુ ભૃગૌ ષષ્ઠે કુજે ચાષ્ટમે ॥ ॥

૯૯।૮અ દંપત્યોઃ દ્વિનવાષ્ટરાશિરહિતે ચારાનુકુલે રવૌ
૯૯।૮બ્ ચન્દ્રે ચાર્કકુજાર્કિશુક્રવિયુતે મધ્યેઽથવા પાપયોઃ ।
૯૯।૮ય્ ત્યક્ત્વા ચ વ્યતિપાતવૈધૃતિ (વૈધૃત) દિનં વિષ્ટિં ચ રિક્તાં તિથિં
૯૯।૮દ્ ક્રૂરાહાયનપૌષચૈત્ર (ચૈત્રપૌષ) વિરહે લગ્નાંશકે માનુષે ॥ ॥

ꣳએપરતે અધ્યાય ૧૦૦ નક્ષત્રજાતકાધ્યાયઃ
૧૦૦।૧અબ્/ પ્રિયભૂષણઃ સ્વરૂપઃ (સુરૂપઃ) સુભગો દક્ષોઽશ્વિનીષુ મતિમાંશ્ચ ।
૧૦૦।૧ય્દ્/ કૃતનિશ્ચયસત્યારુગ્દક્ષઃ સુખિતશ્ચ ભરણીષુ ॥ ॥

૧૦૦।૨અબ્/ બહુભુક્ પરદારરતઃ તેજસ્વી કૃત્તિકાસુ વિખ્યાતઃ ।
૧૦૦।૨ય્દ્/ રોહિણ્યાં સત્યશુચિઃ પ્રિયંવદઃ સ્થિરઃ સ્વરૂપશ્ચ (સ્થિરસુરૂપશ્ચ) ॥ ॥

૧૦૦।૩અબ્/ ચપલશ્ચતુરો ભીરુઃ પટુરુત્સાહી ધની મૃગે ભોગી ।
૧૦૦।૩ય્દ્/ શઠગર્વિતચણ્ડકૃતઘ્નહિંસ્રપાપશ્ચ રૌદ્રર્ક્ષે ॥ ॥

૧૦૦।૪અબ્/ દાન્તઃ સુખી સુશીલો દુર્મેધા રોગભાક્ પિપાસુશ્ચ ।
૧૦૦।૪ય્દ્/ અલ્પેન ચ સન્તુષ્ટઃ પુનર્વસૌ જાયતે મનુજઃ ॥ ॥

૧૦૦।૫અબ્/ શાન્તાત્મા સુભગઃ પણ્ડિતો ધની ધર્મસંશ્રિતઃ પુષ્યે ।
૧૦૦।૫ય્દ્/ શઠસર્વભક્ષક્ષ્ય (ભક્ષ) (ભક્ષ્ય) પાપઃ કૃતઘ્નધૂર્તશ્ચ ભૌજંગે ॥ ॥

૧૦૦।૬અબ્/ બહુભૃત્યધની ભોગી સુરપિતૃભક્તો મહોદ્યમઃ પિત્ર્યે ।
૧૦૦।૬ય્દ્/ પ્રિયવાગ્ દાતા દ્યુતિમાન્ અટનો નૃપસેવકો ભાગ્યે ॥ ॥

૧૦૦।૭અબ્/ સુભગો વિદ્યાપ્તધનો ભોગી સુખભાગ્ દ્વિતીયફલ્ગુન્યામ્ ।
૧૦૦।૭ય્દ્/ ઉત્સાહી ધૃષ્ટઃ પાનપોઽઘૃણી તસ્કરો હસ્તે ॥ ॥

૧૦૦।૮અબ્/ ચિત્રાંબરમાલ્યધરઃ સુલોચનાંગશ્ચ ચિત્રાયાં (ભવતિ ચિત્રાયાં) ।
૧૦૦।૮ય્દ્/ દન્તો વણિક્ તૃષાલુઃ (કૃપાલુઃ) પ્રિયવાગ્ ધર્માશ્રિતઃ સ્વાતૌ ॥ ॥

૧૦૦।૯અબ્/ ઈર્ષુઃ (ઇર્ષ્યુઃ) લુબ્ધો દ્યુતિમાન્ વચનપટુઃ કલહકૃદ્ વિશાખાસુ ॥ ॥

૧૦૦।૯ય્દ્/ આઢ્યો વિદેશવાસી ક્ષુધાલુઃ અટનોઽનુરાધાસુ ॥ ॥

૧૦૦।૧૦અબ્/ જ્યેષ્ઠાસુ ન બહુમિત્રઃ સન્તુષ્ટો ધર્મકૃત્ પ્રચુરકોપઃ ।
૧૦૦।૧૦ય્દ્/ મૂલે માની ધનવાન્ સુખી ન હિંસ્રઃ સ્થિરો ભોગી ॥ ॥

૧૦૦।૧૧અબ્/ ઇષ્ટાનન્દકલત્રો વીરો દૃઢસૌહૃદશ્ચ જલદેવે ।
૧૦૦।૧૧ય્દ્/ વૈશ્વે વિનીતધાર્મિકબહુમિત્રકૃતજ્ઞસુભગશ્ચ ॥ ॥

૧૦૦।૧૨અબ્/ શ્રીમાન્ શ્રવણે શ્રુતવાન્ ઉદારદારો ધનાન્વિતઃ ખ્યાતઃ ।
૧૦૦।૧૨ય્દ્/ દાતાઽઽઢ્યશૂરગીતિપ્રિયો ધનિષ્ઠાસુ ધનલુબ્ધઃ ॥ ॥

૧૦૦।૧૩અબ્/ સ્ફુટવાગ્ વ્યસની રિપુહા સાહસિકઃ શતભિષક્સુ દુર્ગ્રાહ્યઃ ।
૧૦૦।૧૩ય્દ્/ ભદ્રપદાસૂદ્વિગ્નઃ સ્ત્રીજિતધનપટુઃ અદાતા ચ ॥ ॥

૧૦૦।૧૪અબ્/ વક્તા સુખી પ્રજાવાન્ જિતશત્રુઃ ધાર્મિકો દ્વિતીયાસુ ॥ ॥

૧૦૦।૧૪ય્દ્/ સમ્પૂર્ણાંગઃ સુભગઃ શૂરઃ શુચિઃ અર્થવાન્ પૌષ્ણે ॥ ॥

sએપરતે અધ્યાય ૧૦૧ રાશિવિભાગાધ્યાયઃ
૧૦૧।૧અબ્/ અશ્વિન્યોઽથ ભરણ્યો બહુલાપાદશ્ચ કીર્ત્યતે મેષઃ ।
૧૦૧।૧ય્દ્/ વૃષભો બહુલાશેષં રોહિણ્યોઽર્ધમ્ ચ મૃગશિરસઃ ॥ ॥

૧૦૧।૨અબ્/ મૃગશિરો ઽર્ધં રૌદ્રં પુનર્વસોઃ (પુનર્વસોઃ ચ) અંશકત્રયં મિથુનઃ (મિથુનં) ।
૧૦૧।૨ય્દ્/ પાદશ્ચ પુનર્વસુતઃ તિષ્યઃ શ્લેષા (પુનર્વસોઃ સતિષ્યોઽશ્લેષા) ચ કર્કટકઃ ॥ ॥

૧૦૧।૩અબ્/ સિંહોઽથ મઘા પૂર્વા ચ ફલ્ગુની પાદ ઉત્તરાયાશ્ચ ।
૧૦૧।૩ય્દ્/ તત્પરિશેષં હસ્તશ્ચિત્રાર્ધં ચ કન્યાખ્યઃ ॥ ॥

૧૦૧।૪અબ્/ તૌલિનિ ચિત્રાન્ત્યાર્ધં સ્વાતિઃ પાદત્રયં વિશાખાયાઃ ।
૧૦૧।૪ય્દ્/ અલિનિ વિશાખાપાદઃ તથાનુરાધાન્વિતા જ્યેષ્ઠા ॥ ॥

૧૦૧।૫અબ્/ મૂલમષાઢા પૂર્વા પ્રથમશ્ચાપ્યુત્તરાંશકો ધન્વી ।
૧૦૧।૫ય્દ્/ મકરઃ તત્પરિષેશં શ્રવણઃ પૂર્વં ધનિષ્ઠાર્ધમ્ ॥ ॥

૧૦૧।૬અબ્/ કુંભોઽન્ત્યધનિષ્ઠાર્ધં શતભિષગંશત્રયં ચ પૂર્વાયાઃ ।
૧૦૧।૬ય્દ્/ ભદ્રપદાયાઃ શેષં તથોત્તરા રેવતી ચ ઝષઃ ॥ ॥

૧૦૧।૭અબ્/ અશ્વિનીપિત્ર્યમૂલાદ્યા મેષસિંહહયાદયઃ ।
૧૦૧।૭ય્દ્/ વિષમર્ક્ષાન્ નિવર્તન્તે પાદવૃદ્ધ્યા યથોત્તરમ્ ॥ ॥

sએપરતે અધ્યાય ૧૦૨ વિવાહપટલાધ્યાયઃ
૧૦૨।૧અ મૂર્તૌ કરોતિ દિનકૃદ્ વિધવાં કુજશ્ચ
૧૦૨।૧બ્ રાહુઃ વિપન્નતનયાં રવિજો દરિદ્રામ્ ।

૧૦૨।૧ય્ શુક્રઃ શશાંકતનયશ્ચ ગુરુશ્ચ સાધ્વીમ્
૧૦૨।૧દ્ આયુઃક્ષયં પ્રકુરુતેઽથ વિભાવરીશઃ ॥ ॥

૧૦૨।૨અ કુર્વન્તિ ભાસ્કરશનૈશ્ચરરાહુભૌમા
૧૦૨।૨બ્ દારિદ્ર્યદુઃખમતુલં નિયતં દ્વિતીયે ।
૧૦૨।૨ય્ વિત્તેશ્વરીમવિધવાં ગુરુશુક્રસૌમ્યા
૧૦૨।૨દ્ નારીં પ્રભૂતતનયાં કુરુતે શશાંકઃ ॥ ॥

૧૦૨।૩અ સૂર્યેન્દુભૌમગુરુશુક્રબુધાઃ તૃતીયે
૧૦૨।૩બ્ કુર્યુઃ સદા બહુસુતાં ધનભાગિનીં ચ ।
૧૦૨।૩ય્ વ્યક્તાં (વ્યક્તં) દિવાકરસુતઃ સુભગાં કરોતિ
૧૦૨।૩દ્ મૃત્યું દદાતિ નિયમાત્ ખલુ સૈંહિકેયઃ ॥ ॥

૧૦૨।૪અ સ્વલ્પં પયઃ સ્રવતિ સૂર્યસુતે ચતુર્થે
૧૦૨।૪બ્ દૌર્ભાગ્યમુષ્ણકિરણઃ કુરુતે શશી ચ ।
૧૦૨।૪ય્ રાહુઃ સપત્નનં (સપત્ન્યં) અપિ ચ ક્ષિતિજોઽલ્પવિત્તં (અલ્પવિત્તાં)
૧૦૨।૪દ્ દદ્યાદ્ ભૃગુઃ સુરગુરુશ્ચ બુધશ્ચ સૌખ્યમ્ ॥ ॥

૧૦૨।૫અ નષ્ટાત્મજાં રવિકુજૌ ખલુ પંચમસ્થે (પંચમસ્થૌ)
૧૦૨।૫બ્ ચન્દ્રાત્મજો બહુસુતા ગુરુભાર્ગવૌ ચ ।
૧૦૨।૫ય્ રાહુઃ દદાતિ મરણં શનિરુગ્રરોગં
૧૦૨।૫દ્ કન્યાવિનાશં (પ્રસૂતિં) અચિરાત્ કુરુતે શશાંકઃ ॥ ॥

૧૦૨।૬અ ષષ્ઠાશ્રિતાઃ શનિદિવાકરરાહુજીવાઃ
૧૦૨।૬બ્ કુર્યુઃ કુજશ્ચ સુભગાં શ્વશુરેષુ ભક્તામ્ ।
૧૦૨।૬ય્ ચન્દ્રઃ કરોતિ વિધવામુશના દરિદ્રામ્
૧૦૨।૬દ્ ઋદ્ધાં શશાંકતનયઃ કલહપ્રિયાં ચ ॥ ॥

૧૦૨।૭અ સૌરારજીવબુધરાહુરવીન્દુશુક્રાઃ
૧૦૨।૭બ્ કુર્યુઃ પ્રસહ્ય ખલુ સપ્તમરાશિસંસ્થાઃ ।
૧૦૨।૭ય્ વૈધવ્યબન્ધનવધક્ષયમર્થનાશ-
૧૦૨।૭દ્ વ્યાધિપ્રવાસમરણાનિ યથાક્રમેણ ॥ ॥

૧૦૨।૮અ સ્થાનેઽષ્ટમે ગુરુબુધૌ નિયતં વિયોગં
૧૦૨।૮બ્ મૃત્યું શશી ભૃગુસુતશ્ચ તથૈવ રાહુઃ ।
૧૦૨।૮ય્ સૂર્યઃ કરોત્યવિધવાં સરુજાં (સરુજં) મહીજઃ
૧૦૨।૮દ્ સૂર્યાત્મજો ધનવતીં પિતવલ્લભાં ચ ॥ ॥

૧૦૨।૯અ ધર્મે સ્થિતા ભૃગુદિવાકરભૂમિપુત્રા
૧૦૨।૯બ્ જીવશ્ચ ધર્મનિરતાં શશિજઃ ત્વરોગામ્ ।
૧૦૨।૯ચ્ રાહુશ્ચ સૂર્યતનયશ્ચ કરોતિ બન્ધ્યાં (વન્ધ્યાં)
૧૦૨।૯દ્ કન્યાપ્રસૂતિમટનાં (અટનં) કુરુતે શશાંકઃ ॥ ॥

૧૦૨।૧૦અ રાહુઃ નભઃસ્થલગતો (નભસ્થલગતો) વિધવાં કરોતિ
૧૦૨।૧૦બ્ પાપે રતાં દિનકરશ્ચ શનૈશ્ચરશ્ચ ।
૧૦૨।૧૦ચ્ મૃત્યું કુજોઽર્થરહિતાં કુલટાં ચ ચન્દ્રઃ
૧૦૨।૧૦દ્ શેષા ગ્રહા ધનવતીં સુભગાં ચ કુર્યુઃ ॥ ॥

૧૦૨।૧૧અ આયે રવિઃ બહુસુતાં સધનાં (ધનિનીં) શશાંકઃ
૧૦૨।૧૧બ્ પુત્રાન્વિતાં ક્ષિતિસુતો રવિજો ધનાઢ્યામ્ ।
૧૦૨।૧૧ચ્ આયુષ્મતીં સુરગુરુઃ શશિજઃ સમૃધ્દાં
૧૦૨।૧૧દ્ રાહુઃ કરોત્યવિધવાં ભૃગુઃ અર્થયુક્તામ્ ॥ ॥

૧૦૨।૧૨અ અન્તે ગુરુઃ ધનવતીં દિનકૃદ્ દરિદ્રાં
૧૦૨।૧૨બ્ ચન્દ્રોધનવ્યયકરીં કુલટાં ચ રાહુઃ ।
૧૦૨।૧૨ચ્ સાધ્વીં ભૃગુઃ શશિસુતો બહુપુત્રપૌત્રાં
૧૦૨।૧૨દ્ પાનપ્રસક્તહૃદયામ્ રવિજઃ કુજશ્ચ ॥ ॥

૧૦૨।૧૩અ ગોપૈઃ યષ્ટ્યાહતાનાં ખુરપુટદલિતા યા તુ ધૂલિઃ દિનાન્તે
૧૦૨।૧૩બ્ સોદ્વાહે સુન્દરીણાં વિપુલધનસુતારોગ્યસૌભાગ્યકર્ત્રી ।
૧૦૨।૧૩ચ્ તસ્મિન્ કાલે ન ચઋક્ષં ન ચ તિથિકરણં નૈવ લગ્નં ન યોગઃ
૧૦૨।૧૩દ્ ખ્યાતઃ પુંસાં સુખાર્થં શમયતિ દુરિતાનિ ઉત્થિતં ગોરજઃ તુ ॥ ॥

sએપરતે અધ્યાય ૧૦૩ ગ્રહગોચરાધ્યાયઃ
૧૦૩।૧અબ્/ પ્રાયેણ સૂત્રેણ વિનાકૃતાનિ પ્રકાશરન્ધ્રાણિ ચિરન્તનાનિ ।
૧૦૩।૧ચ્દ્/ રત્નાનિ શાસ્ત્રાણિ ચ યોજિતાનિ નવૈઃ ગુણૈઃ ભૂષયિતું ક્ષમાણિ ॥ ॥

૧૦૩।૨અબ્/ પ્રાયેણ ગોચરો વ્યવહાર્યોઽતઃ તત્ફલાનિ વક્ષ્યામિ ।
૧૦૩।૨ચ્દ્/ નાનાવૃત્તૈઃ આર્યા (તન્નો) મુખચપલત્વં ક્ષમધ્વં નઃક્ષમન્ત્વાર્યાઃ) ॥ ॥

૧૦૩।૩અબ્/ માણ્ડવ્યગિરં શ્રુત્વા ન મદીયા રોચતેઽથવા નૈવમ્ ।
૧૦૩।૩ચ્દ્/ સાધ્વી તથા ન પુંસાં પ્રિયા યથા સ્યાજ્જઘનચપલા ॥ ॥

૧૦૩।૪અ સૂર્યઃ ષટ્ત્રિદશસ્થિતઃ ત્રિદશષટ્સપ્તાદ્યગશ્ચન્દ્રમા

૧૦૩।૪બ્ જીવઃ સપ્તનવદ્વિપંચમગતો વક્રાર્કજૌ ષટ્ત્રિગૌ ।
૧૦૩।૪ય્ સૌમ્યઃ ષડ્દ્વિચતુર્દશાષ્ટમગતઃ સૂર્યે (સર્વે) ઽપિ ઉપાન્તે શુભાઃ
૧૦૩।૪દ્ શુક્રઃ સપ્તમષડ્દશર્ક્ષસહિતઃ શાર્દૂલવત્ ત્રાસકૃત્ ॥ ॥

૧૦૩।૫અ જન્મનિ આયાસદોઽર્કઃ ક્ષપયતિ વિભવાન્ કોષ્ઠરોગાધ્વદાતા
૧૦૩।૫બ્ વિત્તભ્રંશં દ્વિતીયે દિશતિ ચ ન સુખં વંચનાં દૃગ્રુજં ચ ।
૧૦૩।૫ય્ સ્થાનપ્રાપ્તિં તૃતીયે ધનનિચયમુદા કલ્યકૃચ્ચારિહર્તા (હન્તા)
૧૦૩।૫દ્ રોગાન્ દત્તે (ધત્તે) ચતુર્થે જનયતિ ચ મુહુઃ સ્રગ્ધરાભોગવિઘ્નમ્ ॥ ॥

૧૦૩।૬અ પીડાઃ સ્યુઃ પંચમસ્થે સવિતરિ બહુશો રોગારિજનિતાઃ
૧૦૩।૬બ્ ષષ્ઠેઽર્કો હન્તિ રોગાન્ ક્ષપયતિ ચ રિપૂન્ શોકાંશ્ચ નુદતિ ।
૧૦૩।૬ય્ અધ્વાનં સપ્તમસ્થો જઠરગદભયં દૈન્યં ચ કુરુતે ।
૧૦૩।૬દ્ રુક્ત્રાસૌ (રુક્કાસૌ) ચાષ્ટમસ્થે ભવતિ સુવદના ન સ્વાપિ વનિતા ॥ ॥

૧૦૩।૭અ રવાવાપદ્દૈન્યં રુગ્ ઇતિ નવમે વિત્ત (ચિત્ત) ચેષ્ટાવિરોધો
૧૦૩।૭બ્ જયં પ્રાપ્નોત્યુગ્રં દશમગૃહગે કર્મસિદ્ધિં ક્રમેણ ।
૧૦૩।૭ય્ જયસ્થાનં (જયં સ્થાનં) માનં વિભવમપિ ચૈકાદશે રોગનાશં
૧૦૩।૭દ્ સુવૃત્તાનાં ચેષ્ટા ભવતિ સફલા દ્વાદશે નૈતરેષામ્ ॥ ॥

૧૦૩।૮અ શશી જન્મનિ અન્નપ્રવરશયનાચ્છાદનકરો
૧૦૩।૮બ્ દ્વિતીયે માનાર્થાન્ (માનાર્થૌ) ગ્લપયતિ સવિઘ્નશ્ચ ભવતિ ।
૧૦૩।૮ય્ તૃતીયે વસ્ત્રસ્ત્રીધનવિજય (નિચય) સૌખ્યાનિ લભતે
૧૦૩।૮દ્ ચતુર્થેઽવિશ્વાસઃ શિખરિણિ ભુજંગેન સદૃશઃ ॥ ॥

૧૦૩।૯અ દૈન્યં વ્યાધિં શુચમપિ શશી પંચમે માર્ગવિઘ્નં
૧૦૩।૯બ્ ષષ્ઠે વિત્તં જનયતિ સુખં શત્રુરોગક્ષયં ચ ।
૧૦૩।૯ય્ યાનં માનં શયનમશનં સપ્તમે વિત્તલાભં
૧૦૩।૯દ્ મન્દ આક્રાન્તે ફણિનિ હિમગૌ ચ અષ્ટમે ભીઃ ન કસ્ય ॥ ॥

૧૦૩।૧૦અ નવમગૃહગો બન્ધૌદ્વેગશ્રમૌદરરોગકૃદ્
૧૦૩।૧૦બ્ દશમભવને ચ આજ્ઞાકર્મપ્રસિદ્ધિકરઃ શશી ।
૧૦૩।૧૦ય્ ઉપચયસુહૃત્સંયોગાર્થપ્રમોદમુપાન્ત્યગો
૧૦૩।૧૦દ્ વૃષભચરિતાન્ દોષાન્ અન્ત્યે (અન્તે) કરોતિ ચ (હિ) સવ્યયાન્ ॥ ॥

૧૦૩।૧૧અબ્/ કુજેઽભિઘાતઃ પ્રથમે દ્વિતીયે નરેન્દ્રપીડા કલહારિદોષૈઃ ।
૧૦૩।૧૧ય્દ્/ ભૃશં ચ પિત્તાનલચૌરરોગૈઃ (રોગચૌરૈઃ) ઉપેન્દ્રવજ્રપ્રતિમોઽપિ યઃ સ્યાત્ ॥ ॥

૧૦૩।૧૨અ તૃતીયગશ્ચૌરકુમારકેભ્યો
૧૦૩।૧૨બ્ ભૌમઃ સકાશાત્ ફલમાદધાતિ ।
૧૦૩।૧૨ચ્ પ્રદીપ્તિમાજ્ઞાં ધનમૌર્ણિકાનિ
૧૦૩।૧૨દ્ ધાત્વાકર આખ્યાનિ કિલ અપરાણિ ॥ ॥

૧૦૩।૧૩અબ્/ ભવતિ ધરણિજે ચતુર્થગે જ્વરજઠરગદાસૃગુદ્ભવઃ ।
૧૦૩।૧૩ચ્દ્/ કુપુરુષજનિતાગ સંગમાત્ પ્રસભમપિ કરોતિ ચ અશુભમ્ ॥ ॥

૧૦૩।૧૪અ રિપુગદકોપભયાનિ પંચમે
૧૦૩।૧૪બ્ તનયકૃતાશ્ચ શુચો મહીસુતે ।
૧૦૩।૧૪ચ્ દ્યુતિઃ અપિ ન અસ્ય ચિરં ભવેત્ સ્થિરા
૧૦૩।૧૪દ્ શિરસિ કપેઃ ઇવ માલતી યથા (કૃતા) ॥ ॥

૧૦૩।૧૫અબ્/ રિપુભયકલહૈઃ વિવર્જિતઃ સકનકવિદ્રુમતામ્રકામગઃ (કાગમઃ) ।
૧૦૩।૧૫ચ્દ્/ રિપુભવનગતે મહીસુતે કિમપરવક્ત્રવિકારમીક્ષતે ॥ ॥

૧૦૩।૧૬અ કલત્રકલહાક્ષિરુગ્જઠરરોગકૃત્ સપ્તમે
૧૦૩।૧૬બ્ ક્ષરત્ક્ષતજરૂક્ષિતઃ ક્ષપિત (ક્ષયિત) વિત્તમાનોઽષ્ટમે ।
૧૦૩।૧૬ચ્ કુજે નવમસંસ્થિતે પરિભવાર્થનાશ આદિભિઃ
૧૦૩।૧૬દ્ વિલંબિતગતિઃ ભવત્યબલદેહધાતુક્લમૈઃ ॥ ॥

૧૦૩।૧૭અ દશમગૃહગતે સમં મહીજે
૧૦૩।૧૭બ્ વિવિધધન આપ્તિરુપાન્ત્યગે જયશ્ચ ।
૧૦૩।૧૭ચ્ જનપદમુપરિ સ્થિતશ્ચ ભુંક્તે
૧૦૩।૧૭દ્ વનમિવ ષટ્ચરણઃ સુપુષ્પિતાગ્રમ્ ॥ ॥

૧૦૩।૧૮અ નાનાવ્યયૈઃ દ્વાદશગે મહીસુતે
૧૦૩।૧૮બ્ સન્તાપ્યતેઽનર્થશતૈશ્ચ માનવઃ ।
૧૦૩।૧૮ચ્ સ્ત્રીકોપપિત્તૈશ્ચ સનેત્રવેદનૈઃ
૧૦૩।૧૮દ્ યોઽપિ ઇન્દ્રવંશાભિજનેન ગર્વિતઃ ॥ ॥

૧૦૩।૧૯અબ્/ દુષ્ટવાક્યપિશુનાહિતભેદૈઃ બન્ધનૈઃ સકલહૈશ્ચ હૃતસ્વઃ ।
૧૦૩।૧૯ચ્દ્/ જન્મગે શશિસુતે પથિ ગચ્છન્ સ્વાગતેઽપિ કુશલં ન શૃણોતિ ॥ ॥

૧૦૩।૨૦અબ્/ પરિભવો ધનગતે ધનલબ્ધિઃ સહજગે શશિસુતે હૃદય આપ્તિઃ (સુહૃદાપ્તિઃ) ।
૧૦૩।૨૦ચ્દ્/ નૃપતિશત્રુભયશંકિતચિતો (ચિત્તો) દ્રુતપદં વ્રજતિ દુશ્ચરિતૈઃ સ્વૈઃ ॥ ॥

૧૦૩।૨૧અ ચતુર્થગે સ્વજનકુટુંબવૃદ્ધયો

૧૦૩।૨૧બ્ ધનાગમો ભવતિ ચ શીતરશ્મિજે ।
૧૦૩।૨૧ય્ સુતસ્થિતે તનયકલત્રવિગ્રહો
૧૦૩।૨૧દ્ નિષેવતે ન ચ રુચિરામપિ સ્ત્રિયમ્ ॥ ॥

૧૦૩।૨૨અ સૌભાગ્યં વિજયમથ ઉન્નતિં ચ ષષ્ઠે
૧૦૩।૨૨બ્ વૈવર્ણ્યં કલહમતીવ સપ્તમે જ્ઞઃ ।
૧૦૩।૨૨ય્ મૃત્યુસ્થે જયસુત (સુતજય) વસ્ત્રવિત્તલાભા
૧૦૩।૨૨દ્ નૈપુણ્યં ભવતિ મતિપ્રહર્ષણીયમ્ ॥ ॥

૧૦૩।૨૩અબ્/ વિઘ્નકરો નવમઃ શશિપુત્રઃ કર્મગતો રિપુહા ધનદશ્ચ ।
૧૦૩।૨૩ય્દ્/ સપ્રમદં શયનં ચ વિધત્તે તદ્વૃહદો ऽથ કથાં સ્તરણં ચ (કથાસ્તરણં) ॥ ॥

૧૦૩।૨૪અ ધનસુતસુખ (સુખસુત) યોષિન્મિત્રવાહ (વાહ્ય) આપ્તિતુષ્ટિઃ
૧૦૩।૨૪બ્ તુહિનકિરણપુત્રે લાભગે મૃષ્ટવાક્યઃ ।
૧૦૩।૨૪ય્ રિપુપરિભવરોગૈઃ પીડિતો દ્વાદશસ્થે
૧૦૩।૨૪દ્ ન સહતિ પરિભોક્તું માલિનીયોગસૌખ્યમ્ ॥ ॥

૧૦૩।૨૫અ જીવે જન્મનિ અપગતધનધીઃ
૧૦૩।૨૫બ્ સ્થાનભ્રષ્ટો બહુકલહયુતઃ ।
૧૦૩।૨૫ય્ પ્રાપ્ય અર્થેऽર્થાન્ વ્યરિઃ અપિ કુરુતે
૧૦૩।૨૫દ્ કાન્તાऽऽસ્યાબ્જે ભ્રમરવિલસિતમ્ ॥ ॥

૧૦૩।૨૬અ સ્થાનભ્રંશાત્ કાર્યવિઘાતાગ તૃતીયે
૧૦૩।૨૬બ્ અનેકૈઃ (નૈકૈઃ) ક્લેશૈઃ બન્ધુજનોત્થૈશ્ચ ચતુર્થે ।
૧૦૩।૨૬ય્ જીવે શાન્તિં પીડિતચિત્તશ્ચ સ વિન્દેદ્ (વિન્દેન્)
૧૦૩।૨૬દ્ નૈવ ગ્રામે નાપિ વને મત્તમયૂરે ॥ ॥

૧૦૩।૨૭અ જનયતિ ચ તનયભવનમુપગતઃ
૧૦૩।૨૭બ્ પરિજનશુભસુતકરિતુરગવૃષાન્ ।
૧૦૩।૨૭ય્ સકનકપુરગૃહયુવતિવસનકૃન્
૧૦૩।૨૭દ્ મણિગુણનિકરકૃદપિ વિબુધગુરુઃ ॥ ॥

૧૦૩।૨૮અ ન સખીવદનં તિલકોજ્જ્વલં
૧૦૩।૨૮બ્ ન ચ વનં (ભવનં) શિખિકોકિલનાદિતમ્ ।
૧૦૩।૨૮ય્ હરિણપ્લુતશાવવિચિત્રિતં
૧૦૩।૨૮દ્ રિપુગતે મનસઃ સુખદં ગુરૌ ॥ ॥

૧૦૩।૨૯અ ત્રિદશગુરુઃ શયનં રતિભોગં
૧૦૩।૨૯બ્ ધનમશનં કુસુમાનિ ઉપવાહ્યમ્ ।
૧૦૩।૨૯ચ્ જનયતિ સપ્તમરાશિમુપેતો
૧૦૩।૨૯દ્ લલિતપદાં ચ ગિરં ધિષણાં ચ ॥ ॥

૧૦૩।૩૦અ બન્ધં વ્યાધિમ્ ચાષ્ટમે શોકમુગ્રં
૧૦૩।૩૦બ્ માર્ગક્લેશં) ક્લેશાન્ મૃત્યુતુલ્યાંશ્ચ રોગાન્ ।
૧૦૩।૩૦ય્ નૈપુણ્યાઽઽજ્ઞાપુત્રકર્માર્થસિદ્ધિં
૧૦૩।૩૦દ્ ધર્મે જીવઃ શાલિનીનાં ચ લાભમ્ ॥ ॥

૧૦૩।૩૧અ સ્થાનકલ્યધનહા દશઋક્ષગઃ
૧૦૩।૩૧બ્ તત્પ્રદો ભવતિ લાભગો ગુરુઃ ।
૧૦૩।૩૧ય્ દ્વાદશેઽધ્વનિ વિલોમદુઃખભાગ્
૧૦૩।૩૧દ્ યાતિ યદ્યપિ નરો રથોદ્ધતઃ ॥ ॥

૧૦૩।૩૨અ પ્રથમગૃહોપગો ભૃગુસુતઃ સ્મરોપકરણૈઃ
૧૦૩।૩૨બ્ સુરભિમનોજ્ઞગન્ધકુસુમાંબરૈરુપચયમ્ ।
૧૦૩।૩૨ય્ શયનગૃહાસનાશનયુતસ્ય ચ અનુકુરુતે
૧૦૩।૩૨દ્ સમદવિલાસિનીમુખસરોજષટ્ચરણતામ્ ॥ ॥

૧૦૩।૩૩અ શુક્રે દ્વિતીયગૃહગે પ્રસવાર્થધાન્ય-
૧૦૩।૩૩બ્ ભૂપાલસન્નત (સન્નતિ) કુટુંબહિતાનિ અવાપ્ય ।
૧૦૩।૩૩ય્ સંસેવતે કુસુમરત્નવિભૂષિતશ્ચ
૧૦૩।૩૩દ્ કામં વસન્તતિલકદ્યુતિમૂર્ધજોઽપિ ॥ ॥

૧૦૩।૩૪અબ્/ આજ્ઞા અર્થમાનાસ્પદભૂતિવસ્ત્રશત્રુક્ષયાન્ દૈત્યગુરુઃ તૃતીયે ।
૧૦૩।૩૪ય્દ્/ દત્તે (ધત્તે) ચતુર્થશ્ચ સુહૃત્સમાજં રુદ્રેન્દ્રવજ્રપ્રતિમાં ચ શક્તિમ્ ॥ ॥

૧૦૩।૩૫અબ્/ જનયતિ શુક્રઃ પંચમસંસ્થો ગુરુપરિતોષં બન્ધુજનાપ્તિમ્ ।
૧૦૩।૩૫ય્દ્/ સુતધનલબ્ધિં મિત્રસહાયાન્ અનવસિતત્વં ચ અરિબલેષુ ॥ ॥

૧૦૩।૩૬અ ષષ્ઠો ભૃગુઃ પરિભવરોગતાપદઃ
૧૦૩।૩૬બ્ સ્ત્રીહેતુકં જનયતિ સપ્તમોઽશુભમ્ ।
૧૦૩।૩૬ય્ યાતોઽષ્ટમં ભવનપરિચ્છદપ્રદો
૧૦૩।૩૬દ્ લક્ષ્મીવતીમુપનયતિ સ્ત્રિયં ચ સઃ ॥ ॥

૧૦૩।૩૭અ નવમે તુ ધર્મવનિતાસુખભાગ્

૧૦૩।૩૭બ્ ભૃગુજેઽર્થવસ્ત્રનિચયશ્ચ ભવેત્ ।
૧૦૩।૩૭ય્ દશમેઽવમાનકલહાન્ નિયમાત્
૧૦૩।૩૭દ્ પ્રમિતાક્ષરાણિ અપિ વદન્ લભતે ॥ ॥

૧૦૩।૩૮અબ્/ ઉપાન્ત્યગો ભૃગો સુતઃ સુહૃદ્ધનાન્નગન્ધદઃ ।
૧૦૩।૩૮ય્દ્/ ધનાંબર આગમોઽન્ત્યગઃ સ્થિરઃ તુ નાંબર આગમઃ ॥ ॥

૧૦૩।૩૯અબ્/ પ્રથમે રવિજે વિષવહ્નિહતઃ સ્વજનૈઃ વિયુતઃ કૃતબન્ધુવધઃ ।
૧૦૩।૩૯ય્દ્/ પરદેશમુપૈત્યસુહૃદ્ભવનો વિમુખાર્થસુતોઽટકદીનમુખઃ ॥ ॥

૧૦૩।૪૦અ ચારવશાદ્ દ્વિતીયગૃહગે દિનકરતનયે
૧૦૩।૪૦બ્ રૂપસુખાપવર્જિતતનુઃ વિગતમદબલઃ ।
૧૦૩।૪૦ય્ અન્યગુણૈઃ કૃતં વસુચયમ્ તદપિ ખલુ ભવત્ય્-
૧૦૩।૪૦દ્ અંબ્વિવ વંશપત્રપતિતં ન બહુ ન ચ ચિરમ્ ॥ ॥

૧૦૩।૪૧અ સૂર્યસુતે તૃતીયગૃહગે ધનાનિ લભતે
૧૦૩।૪૧બ્ દાસપરિચ્છદૌષ્ટ્રમહિષા અશ્વકુઞ્જરખરાન્ ।
૧૦૩।૪૧ય્ સદ્મવિભૂતિસૌખ્યમમિતં ગદવ્યુપરમં
૧૦૩।૪૧દ્ ભીરુઃ અપિ પ્રશાસ્ત્યધિરિપૂંશ્ચ વીરલલિતૈઃ ॥ ॥

૧૦૩।૪૨અ ચતુર્થં ગૃહં સૂર્યપુત્રેઽભ્યુપેતે
૧૦૩।૪૨બ્ સુહૃદ્વિત્તભાર્ય આદિભિઃ વિપ્રયુક્તઃ ।
૧૦૩।૪૨ય્ ભવત્યસ્ય સર્વત્ર ચાસાધુ દુષ્ટં
૧૦૩।૪૨દ્ ભુજંગપ્રયાતાનુકારં ચ ચિત્તમ્ ॥ ॥

૧૦૩।૪૩અ સુતધનપરિહીણઃ પંચમસ્થે
૧૦૩।૪૩બ્ પ્રચુરકલહયુક્તશ્ચ અર્કપુત્રે ।
૧૦૩।૪૩ય્ વિનિહતરિપુરોગઃ ષષ્ઠયાતે
૧૦૩।૪૩દ્ પિબતિ ચ વનિતાઽઽસ્યં શ્રીપુટોષ્ઠમ્ ॥ ॥

૧૦૩।૪૪અ ગચ્છત્યધ્વાનં સપ્તમે ચ અષ્ટમે ચ
૧૦૩।૪૪બ્ હીનઃ સ્ત્રીપુત્રૈઃ સૂર્યજે દીનચેષ્ટઃ ।
૧૦૩।૪૪ય્ તદ્વદ્ ધર્મસ્થે વૈરહૃદ્રોગબન્ધૈઃ
૧૦૩।૪૪દ્ ધર્મોઽપિ ઉચ્છિદ્યેદ્ વૈશ્વદેવીક્રિયાદ્યઃ ॥ ॥

૧૦૩।૪૫અ કર્મપ્રાપ્તિઃ દશમેઽર્થક્ષયશ્ચ
૧૦૩।૪૫બ્ વિદ્યાકીર્ત્યોઃ પરિહાનિશ્ચ સૌરે ।

૧૦૩।૪૫ય્ તૈક્ષ્ણ્યં લાભે પરયોષાર્થલાભઃ (લાભા)
૧૦૩।૪૫દ્ ચ અન્ત્યે (અન્તે) પ્રાપ્નોત્યપિ શોક ઊર્મિમાલામ્ ॥ ॥

૧૦૩।૪૬અબ્/ અપિ કાલમપેક્ષ્ય ચ પાત્રં શુભકૃદ્ વિદધાત્યનુરૂપમ્ ।
૧૦૩।૪૬ય્દ્/ ન મધૌ બહુ કં કુડવે વા (ચ) વિસૃજત્યપિ મેઘવિતાનઃ ॥ ॥

૧૦૩।૪૭અ રક્તૈઃ પુષ્પૈઃ ગન્ધૈઃ તામ્રૈઃ કનકવૃષબકુલકુસુમૈઃ દિવાકરભૂસુતૌ
૧૦૩।૪૭બ્ ભક્ત્યા પૂજ્યાવિન્દુઃ ધેન્વા સિતકુસુમરજતમધુરૈઃ સિતશ્ચ મદપ્રદૈઃ ।
૧૦૩।૪૭ય્ કૃષ્ણદ્રવ્યૈઃ સૌરિઃ સૌમ્યો મણિરજતતિલકકુસુમૈઃ ગુરુઃ પરિપીતકૈઃ
૧૦૩।૪૭દ્ પ્રીતૈઃ પીડા ન સ્યાદુચ્ચાદ્ યદિ પતતિ વિશતિ યદિ વા ભુજંગવિજૃંભિતમ્ ॥ ॥

૧૦૩।૪૮અબ્/ શમયૌદ્ધતામશુભદૃષ્ટિમપિ વિબુધવિપ્રપૂજયા ।
૧૦૩।૪૮ય્દ્/ શાન્તિજપનિયમદાનદમૈઃ સુજનાભિભાષણસમાગમૈઃ તથા ॥ ॥

૧૦૩।૪૯અબ્/ રવિભૌમૌ પૂર્વાર્ધે શશિસૌરૌ કથયતોઽન્ત્યગૌ રાશેઃ ।
૧૦૩।૪૯ય્દ્/ સદસલ્લક્ષણમાર્યગીત્યુપગીત્યોઃ યથાસંખ્યમ્ ॥ ॥

૧૦૩।૫૦અબ્/ આદૌ યાદૃક્ સૌમ્યઃ પશ્ચાદપિ તાદૃશો ભવતિ ।
૧૦૩।૫૦ય્દ્/ ઉપગીતેઃ માત્રાણાં ગણવત્ સત્સમ્પ્રયોગો વા ॥ ॥

૧૦૩।૫૧અબ્/ આર્યાણામપિ કુરુતે વિનાશમન્તર્ગુરુઃ વિષમસંસ્થઃ ।
૧૦૩।૫૧ય્દ્/ ગણ ઇવ ષષ્ઠે દૃષ્ટઃ સ (ચ) સર્વલઘુતાં જનં (ગતો) નયતિ ॥ ॥

૧૦૩।૫૨અ અશુભનિરીક્ષિતઃ શુભફલો બલિના બલવાન્
૧૦૩।૫૨બ્ અશુભફલપ્રદશ્ચ શુભદૃગ્વિષયોપગતઃ ।
૧૦૩।૫૨ય્ અશુભશુભાવપિ સ્વફલયોઃ વ્રજતઃ સમતામ્
૧૦૩।૫૨દ્ ઇદમપિ ગીતકં ચ ખલુ નર્કુટકં ચ યથા ॥ ॥

૧૦૩।૫૩અબ્/ નીચેઽરિભેઽસ્તે ચ અરિદૃષ્ટસ્ય (અરિ) સર્વં વૃથા યત્ (યથા) પરિકીર્તિતમ્ ।
૧૦૩।૫૩ય્દ્/ પુરતોઽન્ધસ્ય ઇવ કામિન્યાઃ સવિલાસકટાક્ષનિરીક્ષણમ્ ॥ ॥

૧૦૩।૫૪અ સૂર્યસુતોઽર્કફલસમશ્ચન્દ્રસુતશ્
૧૦૩।૫૪બ્ છન્દતઃ સમનુયાતિ યથા ।
૧૦૩।૫૪ય્ સ્કન્ધકમાર્યગીતિઃ વૈતાલીયં ચ
૧૦૩।૫૪દ્ માગધી ગાથાઽઽર્યામ્ ॥ ॥

૧૦૩।૫૫અબ્/ સૌરોઽર્કરશ્મિયોગાત્ (રાગાત્) સવિકારો લબ્ધવૃદ્ધિઃ અધિકતરમ્ ।
૧૦૩।૫૫ય્દ્/ પિત્તવદાચરતિ નૃણાં પથ્યકૃતાં ન તુ તથાઽઽર્યાણામ્ ॥ ॥

૧૦૩।૫૬અબ્/ યાદૃશેન ગ્રહેણેન્દુઃ યુક્તઃ તાદૃગ્ ભવેત્ સોઽપિ ।
૧૦૩।૫૬ચ્દ્/ મનોવૃત્તિસમાયોગાદ્ વિકાર ઇવ વક્ત્રસ્ય ॥ ॥

૧૦૩।૫૭અબ્/ પંચમં લઘુ સર્વેષુ (સર્વપાદેષુ) સપ્તમં દ્વિચતુર્થયોઃ ।
૧૦૩।૫૭ચ્દ્/ યદ્વત્શ્લોકાક્ષરં તદ્વલ્લઘુતાં યાતિ દુઃસ્થિતૈઃ ॥ ॥

૧૦૩।૫૮અબ્/ પ્રકૃત્ય અપિ લઘુઃ યશ્ચ વૃત્તબાહ્યે વ્યવસ્થિતઃ ।
૧૦૩।૫૮ચ્દ્/ સ યાતિ ગુરુતાં લોકે યદા સ્યુઃ સુસ્થિતા ગ્રહાઃ ॥ ॥

૧૦૩।૫૯અબ્/ પ્રારબ્ધમસુસ્થિતૈઃ ગ્રહૈઃ યત્ કર્મ આત્મવિવૃદ્ધયે બુધૈઃ (ઽબુધૈઃ) ।
૧૦૩।૫૯ચ્દ્/ વિનિહન્તિ તદેવ કર્મ તાન્ વૈતાલીયમિવ અયથાકૃતમ્ ॥ ॥

૧૦૩।૬૦અબ્/ સૌસ્થિત્યમવેક્ષ્ય યો ગ્રહેભ્યઃ કાલે પ્રક્રમણં કરોતિ રાજા ।
૧૦૩।૬૦ચ્દ્/ અણુના અપિ સ પૌરુષેણ વૃત્ત્યૌ (વૃત્તસ્યૌ) પચ્છન્દસિકસ્ય યાતિ પારમ્ ॥ ॥

૧૦૩।૬૧ (૧) ઉપચયભવનૌપયાતસ્ય ભાનોઃ દિને કારયેદ્ -
ધેમતામ્રાશ્વકાષ્ઠાસ્થિચર્માઉર્ણિકાદ્રિદ્રુમત્વગ્નખવ્યાલચૌર -
આયુધીયાટવીક્રૂરરાજોપસેવાભિષેકાઉષધક્ષૌમપણ્યાદિ-
ગોપાલકાન્તારવૈદ્યાશ્મકૂટાવદાતાભિવિખ્યાતશૂર આહવશ્લાધ્યયાચ્ય -
(યાજ્યા) અગ્નિકર્માણિ (કાર્યાણિ) સિદ્ધ્યન્તિ લગ્નસ્થિતે વા રવૌ ।
૧૦૩।૬૧ (૨) શિશિરકિરણવાસરે તસ્ય વ અપિ ઉદ્ગમે કેન્દ્રસંસ્થેઽથવા -
ભૂષણં શંખમુક્તા અબ્જરૂપ્યાંબુયજ્ઞૈક્ષુભોજ્યાંગનાક્ષીર-
સુસ્નિગ્ધવૃક્ષક્ષુપાનૂપધાન્યદ્રવદ્રવ્યવિપ્રાધ્વગીત -
(વિપ્રાશ્વશીત) ક્રિયાશૃંગિકૃષ્યાદિસેનાધિપ -
આક્રન્દભૂપાલસૌભાગ્યનક્તંચરશ્લૈષ્મિકદ્રવ્યમાતુલ્ય (માતુંગ) -
પુષ્પાંબરારંભસિદ્ધિઃ ભવેત્ ॥ ॥

૧૦૩।૬૧ (૩) ક્ષિતિતનયદિને પ્રસિદ્ધ્યન્તિ (પ્રસિધ્યન્તિ) ધાત્વાકરાદીનિ -
સર્વાણિ કાર્યાણિ ચામીકરાગ્નિપ્રવાલ આયુધક્રૌર્યચૌર્યાભિઘાતાટ-
વીદુર્ગસેનાધિકારાઃ -
તથા રક્તપુષ્પદ્રુમા રક્તમન્યગ તિક્તં કટુદ્રવ્યકૂટાહિપાશાર્જિતસ્વાઃ -
કુમારા ભિષક્ષાક્યભિક્ષુક્ષપાવૃત્તિકોશેશ (કૌશેય) શાઠ્યાનિ -
સિદ્ધ્યન્તિ (સિધ્યન્તિ) દંભાઃ તથા ॥ ॥

૧૦૩।૬૧ (૪) હરતિ (હરિત, હરિત) મણિમહીસુગન્ધીનિ વસ્ત્રાણિ સાધારણં -
નાટકં શાસ્ત્રવિજ્ઞાનકાવ્યાનિ સર્વાઃ કલાયુક્તયો -
મન્ત્રધાતુક્રિયાવાદનૈપુણ્યપુણ્યવ્રતાયોગદૂતાઃ તથાઽઽયુષ્યમાયાનૃતસ્નાનહ્રસ્વાણિ -

દીર્ઘાણિ મધ્યાનિ ચ છન્દતઃ (શ્છન્દનઃ) ચણ્ડવૃષ્ટિપ્રયાતાનુકારીણિ -
કાર્યાણિ સિદ્ધ્યન્તિ (સિધ્યન્તિ) સૌમ્યસ્ય લગ્નેઽહ્નિ વા ॥ ॥

૧૦૩।૬૨અ સુરગુરુદિવસે કનકં રજતં તુરગાઃ કરિણો વૃષભા -
ભિષગૌષધયઃ (ઓષધયઃ) ।
૧૦૩।૬૨બ્ દ્વિજપિતૃસુરકાર્યપુરઃસ્થિતઘર્મ (ધર્મ) નિવારણચામરભૂષણભૂપતયઃ ।
૧૦૩।૬૨ચ્ વિબુધભવનધર્મસમાશ્રયમંગલશાસ્ત્રમનોજ્ઞબલપ્રદસત્યગિરઃ ।
૧૦૩।૬૨દ્ વ્રતહવનધનાનિ ચ સિદ્ધિકરાણિ તથા રુચિરાણિ ચ વર્ણકદણ્ડકવત્ ॥ ॥

૧૦૩।૬૩અ ભૃગુસુતદિવસે ચ ચિત્રવસ્ત્રવૃષ્યવેશ્યકામિનીવિલાસહાસયૌવનૌપભોગરમ્યભૂમયઃ ।
૧૦૩।૬૩બ્ સ્ફટિકરજતમન્મથૌપચારવાહનૈક્ષુશારદ-
પ્રકારગોવણિક્કૃષીવલૌષધાંબુજાનિ ચ ।
૧૦૩।૬૩ચ્ સવિતૃસુતદિને ચ કારયેન્ -
મહિષ્યજૌષ્ટ્રકૃષ્ણલોહદાસવૃદ્ધનીચકર્મપક્ષિચૌરપાશિકાન્ ।
૧૦૩।૬૩દ્ ચ્યુતવિનયવિશીર્ણભાણ્ડહસ્ત્યપેક્ષવિઘ્નકારણાનિ ચ -
અન્યથા ન સાધયેત્ સમુદ્રગોઽપિ અપાં કણમ્ ॥ ॥

૧૦૩।૬૪અબ્/ વિપુલામપિ બુદ્ધ્વા છન્દોવિચિતિં ભવતિ કાર્યમેતાવત્ ।
૧૦૩।૬૪ચ્દ્/ શ્રુતિસુખદવૃત્તસંગ્રહમિમમાહ વરાહમિહિરોઽતઃ ॥ ॥

sએપરતે અધ્યાય ૧૦૪ રૂપસત્રાધ્યાયઃ
૧૦૪।૧અબ્/ પાદૌ મૂલં જંઘે ચ રોહિણી જાનુની તથાશ્વિન્યઃ ।
૧૦૪।૧ચ્દ્/ ઊરૂ ચ આષાઢદ્વયમથ ગુહ્યં ફલ્ગુનીદ્વિતયં (યુગ્મં) ॥ ॥

૧૦૪।૨અબ્/ કટિઃ અપિ ચ કૃત્તિકા પાર્શ્વયોશ્ચ યમલા ભવન્તિ ભદ્રપદાઃ ।
૧૦૪।૨ચ્દ્/ કુક્ષિસ્થા રેવત્યો વિજ્ઞેયમુરોઽનુરાધા ચ ॥ ॥

૧૦૪।૩અબ્/ પૃષ્ઠં વિદ્ધિ ધનિષ્ઠાં (ધનિષ્ઠા) ભુજૌ વિશાખા (વિશાખાં) સ્મૃતૌ કરૌ હસ્તઃ ॥ ॥

૧૦૪।૩ચ્દ્/ અંગુલ્યશ્ચ પુનર્વસુઃ આશ્લેષાસંજ્ઞિતાશ્ચ નખાઃ ॥ ॥

૧૦૪।૪અબ્/ ગ્રીવા જ્યેષ્ઠા શ્રવણં શ્રવણૌ (શ્રવણૌ શ્રવનઃ) પુષ્યો મુખં દ્વિજાઃ સ્વાતિઃ ।
૧૦૪।૪ચ્દ્/ હસિતં શતભિષગ્ અથ નાસિકા મઘા મૃગશિરો નેત્રે ॥ ॥

૧૦૪।૫અબ્/ ચિત્રા લલાટસંસ્થા શિરો ભરણ્યઃ શિરોરુહાશ્ચાર્દ્રા ।
૧૦૪।૫ચ્દ્/ નક્ષત્રપુરુષકોઽયં કર્તવ્યો રૂપમિચ્છદ્ભિઃ ॥ ॥

૧૦૪।૬અબ્/ ચૈત્રસ્ય બહુલપક્ષે હ્યષ્ટમ્યાં મૂલસંયુતે ચન્દ્રે ।
૧૦૪।૬ચ્દ્/ હ્યુપવાસઃ કર્તવ્યો વિષ્ણું સમ્પૂજ્ય ધિષ્ણ્યં ચ ॥ ॥

૧૦૪।૭અબ્/ દદ્યાદ્ વ્રતે સમાપ્તે ઘૃતપૂર્ણં ભાજનં સુવર્ણયુતમ્ ।
૧૦૪।૭ય્દ્/ વિપ્રાય કાલવિદુષે સરત્નવસ્ત્રં સ્વશક્ત્યા ચ ॥ ॥

૧૦૪।૮અ અન્નૈઃ ક્ષીરઘૃતૌત્કટૈઃ સહ ગુડૈઃ વિપ્રાન્ સમભ્યર્ચયેદ્
૧૦૪।૮બ્ દદ્યાત્ તેષુ સુવર્ણ (તથૈવ) વસ્ત્રરજતં લાવણ્યમિચ્છન્ નરઃ ।
૧૦૪।૮ય્ પાદઋક્ષાત્ પ્રભૃતિ ક્રમાદુપવસન્ન્ અંગઋક્ષનામસ્વપિ
૧૦૪।૮દ્ કુર્યાત્ કેશવપૂજનં સ્વવિધિના ધિષ્ણ્યસ્ય પૂજાં તથા ॥ ॥

૧૦૪।૯અબ્/ પ્રલંબબાહુઃ પૃથુપીનવક્ષાઃ ક્ષપાકરાસ્યઃ સિતચારુદન્તઃ ।
૧૦૪।૯ય્દ્/ ગજેન્દ્રગામી કમલાયતાક્ષઃ સ્ત્રીચિત્તહારી સ્મરતુલ્યમૂર્તિઃ ॥ ॥

૧૦૪।૧૦અબ્/ શરદમલપૂર્ણચન્દ્રદ્યુતિસદૃશમુખી સરોજદલનેત્રા ।
૧૦૪।૧૦ય્દ્/ રુચિરદશના સુકર્ણા ભ્રમરોદરસન્નિભૈઃ કેશૈઃ ॥ ॥

૧૦૪।૧૧અબ્/ પુંસ્કોકિલસમવાણી તામ્રોષ્ટી (તામ્રોષ્ઠી) પદ્મપત્રકરચરણા ।
૧૦૪।૧૧ય્દ્/ સ્તનભારાનતમધ્યા પ્રદક્ષિણાવર્તયા નાભ્યા ॥ ॥

૧૦૪।૧૨અબ્/ કદલીકાણ્ડનિભ ઊરુઃ (ઊરૂઃ) સુશ્રોણી વરકુન્દરા સુભગા ।
૧૦૪।૧૨ય્દ્/ સુશ્લિષ્ટાંગુલિપાદા ભવતિ પ્રમદા મનુષ્યશ્ચ (મનુષ્યો વા) ॥ ॥

૧૦૪।૧૩અ યાવન્ નક્ષત્રમાલા વિચરતિ ગગને ભૂષયન્તી ઇહ ભાસા
૧૦૪।૧૩બ્ તાવન્ નક્ષત્રભૂતો વિચરતિ સહ તૈઃ બ્રહ્મણોઽહ્નોઽવશેષમ્ ।
૧૦૪।૧૩ય્ કલ્પાદૌ ચક્રવર્તી ભવતિ હિ મતિમાં તત્ક્ષયાગાપિ ભૂયઃ
૧૦૪।૧૩દ્ સંસારે જાયમાનો ભવતિ નરપતિઃ બ્રાહ્મણો વા ધનાઢ્યઃ ॥ ॥

૧૦૪।૧૪અબ્/ મૃગશીર્ષાદ્યાઃ કેશવનારાયણમાધવાઃ સગોવિન્દાઃ ।
૧૦૪।૧૪ય્દ્/ વિષ્ણુમધુસૂદનાખ્યૌ ત્રિવિક્રમો વામનશ્ચૈવ ॥ ॥

૧૦૪।૧૫અબ્/ શ્રીધરનામા તસ્માત્ સહૃષીકેશશ્ચ પદ્મનાભશ્ચ ।
૧૦૪।૧૫ય્દ્/ દામોદર ઇત્યેતે માસાઃ પ્રોક્તા યથાસંખ્યં ॥ ॥

૧૦૪।૧૬અબ્/ માસનામસમુપોષિતો નરો દ્વાદશીષુ વિધિવત્ પ્રકીર્તયન્ ।
૧૦૪।૧૬ય્દ્/ કેશવમ્ સમભિપૂજ્ય તત્પદં યાતિ યત્ર નહિ જન્મજં ભયમ્ ॥ ॥

sએપરતે અધ્યાય ૧૦૫ ઉપસંહારાધ્યાયઃ

૧૦૫।૧અબ્/ જ્યોતિઃશાસ્ત્રસમુદ્રં પ્રમથ્ય મતિમન્દરાદ્રિણાઽથ મયા ।
૧૦૫।૧ય્દ્/ લોકસ્ય આલોકકરઃ શાસ્ત્રશશાંકઃ સમુત્ક્ષિપ્તઃ ॥ ॥

૧૦૫।૨અબ્/ પૂર્વાચાર્યગ્રન્થા નૌત્સૃષ્ટાઃ કુર્વતા મયા શાસ્ત્રમ્ ।
૧૦૫।૨ય્દ્/ તાન્ અવલોક્યૈદં ચ પ્રયતધ્વં કામતઃ સુજનાઃ ॥ ॥

૧૦૫।૩અબ્/ અથવા કૃશં (ભૃશં) અપિ સુજનઃ પ્રથયતિ દોષાર્ણવાદ્ ગુણં દૃષ્ટ્વા ।
૧૦૫।૩ય્દ્/ નીચઃ તદ્વિપરીતઃ પ્રકૃતિઃ ઇયં સાધ્વસાધૂનામ્ ॥ ॥

૧૦૫।૪અબ્/ દુર્જનહુતાશતપ્તં કાવ્યસુવર્ણં વિશુદ્ધિમાયાતિ ।
૧૦૫।૪ય્દ્/ શ્રાવયિતવ્યં તસ્માદ્ દુષ્ટજનસ્ય પ્રયત્નેન ॥ ॥

૧૦૫।૫અ ગ્રન્થસ્ય યત્ પ્રચરતોઽસ્ય વિનાશમેતિ
૧૦૫।૫બ્ લેખ્યાદ્ બહુશ્રુતમુખાધિગમક્રમેણ ।
૧૦૫।૫ય્ યદ્વા મયા કુકૃતમલ્પમિહાકૃતં વા
૧૦૫।૫દ્ કાર્યં તદત્ર વિદુષા પરિહૃત્ય રાગમ્ ॥ ॥

૧૦૫।૬અબ્/ દિનકરમુનિગુરુચરણપ્રણિપાતકૃતપ્રસાદમતિના ઇદમ્ ।
૧૦૫।૬ય્દ્/ શાસ્ત્રમુપસંગૃહીતં નમોઽસ્તુ પૂર્વપ્રણેતૃભ્યઃ ॥ ॥

ઽએપરતે અધ્યાય ૧૦૬ શાસ્ત્રાનુક્રમણી
૧૦૬।૧અબ્/ શાસ્ત્રૌપનયઃ પૂર્વં સાંવત્સરસૂત્રમર્કચારશ્ચ ।
૧૦૬।૧ય્દ્/ શશિરાહુભૌમબુધગુરુસિતમન્દશિખિગ્રહાણાં ચ ॥ ॥

૧૦૬।૨અબ્/ ચારશ્ચાગસ્ત્યમુનેઃ સપ્તર્ષીણાં ચ કૂર્મયોગશ્ચ ।
૧૦૬।૨ય્દ્/ નક્ષત્રાણાં વ્યૂહો ગ્રહભક્તિઃ ગ્રહવિમર્દશ્ચ ॥ ॥

૧૦૬।૩અબ્/ ગ્રહશશિયોગઃ સમ્યગ્ગ્રહવર્ષફલં ગ્રહાણાં ચ ।
૧૦૬।૩ય્દ્/ શ઼ૃંગાટસંસ્થિતાનાં મેઘાનાં ગર્ભલક્ષણં ચૈવ ॥ ॥

૧૦૬।૪અબ્/ ધારણવર્ષણરોહિણિવાયવ્યાષાઢભદ્રપદ (ભાદ્રપદ) યોગાઃ ।
૧૦૬।૪ય્દ્/ ક્ષણવૃષ્ટિઃ કુસુમલતાઃ સન્ધ્યાચિહ્નં દિશાં દાહઃ ॥ ॥

૧૦૬।૫અબ્/ ભૂકંપૌલ્કાપરિવેષલક્ષણં શક્રચાપખપુરં ચ ।
૧૦૬।૫ય્દ્/ પ્રતિસૂર્યો નિર્ઘાતઃ સસ્યદ્રવ્યાર્ઘકાણ્ડં ચ ॥ ॥

૧૦૬।૬અબ્/ ઇન્દ્રધ્વજનીરાજનખઞ્જનકૌત્પાતવર્હિ (બર્હિ) ચિત્રં ચ ।
૧૦૬।૬ય્દ્/ પુષ્યાભિષેકપટ્ટપ્રમાણમસિલક્ષણં વાસ્તુ ॥ ॥

૧૦૬।૭અબ્/ ઉદક્ (ઉદગ્) આર્ગલમારામિકમમરાલયલક્ષણં કુલિશલેપઃ ।
૧૦૬।૭ય્દ્/ પ્રતિમા વનપ્રવેશઃ સુરભવનાનાં પ્રતિષ્ઠા ચ ॥ ॥

૧૦૬।૮અબ્/ ચિહ્નં ગવામથ શુનામ્ કુક્કુટકૂર્માજપુરુષચિહ્નં ચ ।

૧૦૬।૮ય્દ્/ પંચમનુષ્યવિભાગઃ સ્ત્રીચિહ્નં વસ્ત્રવિચ્છેદઃ ॥ ॥

૧૦૬।૯અબ્/ ચામરદણ્ડપરીક્ષા સ્ત્રીસ્તોત્રં ચાપિ સુભગકરણં ચ ।
૧૦૬।૯ય્દ્/ કાન્દર્પિકાનુલેપનપુંસ્ત્રિકાધ્યાયશયનવિધિઃ ॥ ॥

૧૦૬।૧૦અબ્/ વજ્રપરીક્ષા મૌક્તિકલક્ષણમથ પદ્મરાગમરકતયોઃ ।
૧૦૬।૧૦ય્દ્/ દીપસ્ય લક્ષણં દન્તધાવનં શાકુનં મિશ્રમ્ ॥ ॥

૧૦૬।૧૧અબ્/ અન્તરચક્રં વિરુતં શ્વચેષ્ટિતં વિરુતમથ શિવાયાશ્ચ ॥ ॥

૧૦૬।૧૧ય્દ્/ ચરિતં મૃગાશ્વકરિણાં વાયસવિદ્યોત્તરં ચ તતઃ ॥ ॥

૧૦૬।૧૨અબ્/ પાકો નક્ષત્રગુણાઃ તિથિકરણગુણાઃ સધિષ્ણ્યજન્મગુણાઃ ।
૧૦૬।૧૨ય્દ્/ ગોચરમથ (ગોચરઃ તથા) ગ્રહાણાં કથિતો નક્ષત્રપુરુષશ્ચ ॥ ॥

૧૦૬।૧૩અબ્/ શતમિદમધ્યાયાનામનુપરિપાટિક્રમાદનુક્રાન્તમ્ ।
૧૦૬।૧૩ય્દ્/ અત્ર શ્લોકસહસ્રાણિ આબદ્ધાનિ ઊનચત્વારિ ॥ ॥

૧૦૬।૧૪અબ્/ અત્રૈવાન્તર્ભૂતં પરિશેષં નિગદિતં ચ યાત્રાયામ્ ।
૧૦૬।૧૪ય્દ્/ બહ્વાશ્ચર્યં જાતકમુક્તં કરણં ચ બહુચોદ્યમ્ ॥ ॥

॥ ઇતિ બૃહત્સંહિતા ॥

---

The accompanying file is a plain ASCII transcription of the
BRhatsaMhitA of VarAhamihira, a classical Sanskrit text on
astrological divination and omens.
The file has the following header:

VarAhamihira's BRhatsaMhitA
(Version 3, June 5, 1992)
digitalized by Michio YAno
proofread by Mizue Sugita
based on the edition of A.V.TripAThI
(SarasvatI Bhavan GranthamAlA Edition)
with reference to H.Kern's text
[variants marked by K.] and his translation

[ Text was input by Kyoto-Harvard System, that is,
Capitals for long vowels, linguals, anusvAra, visarga, and nazals,

and z for palatal sibilants.

Members of sandhi are not medskipd. avagraha is romanized by +a,

external vowel sandhi is decomposed with the mark hat sign.]

DW 11 June 1992

Converted to ITRANS on April 20, 1994. Last update July 7, 1995.

The itrans conversion accounts for trailing word letters such as m, s, t, d etc.

Reference to K. is eliminated since it is available in the original

file.

Sanskrit sandhIs are accounted.  The adhyayas are medskipd by a horizontal

line.

Encoded by Michio YAno in Kyoto system

Proofread by : Mizue Sugita

---

*VarAhamihira's BRhatsaMhitA*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*